नं० ६४५-घ
अद्वैतादित्यः
पत्राणि १-८२ (सम्पूर्णम्)
(वेदान्तशास्त्रम्) (सम्पूर्णम्)
कर्ता गोविन्देवस्नः

वेदांत

अद्वैतादित्य १-१८२

१०
१

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीगुरुभ्यो नमः ॥ प्रपन्नैककृपेभानो हेतादित्याय ते नमः ॥ नमः प्रकाशपुंजाय परमार्काय
ते नमः ॥ १ ॥ नमो हिरण्यगर्भाय महाद्युतिकराय ते ॥ भो मार्तंडप्रचंडांशो तेंऽधकारारये नमः ॥ २ ॥ शरण्याय च हंसाय
नमस्ते कर्मसाक्षिणे ॥ नमस्ते स्वप्रदीपवे तमस्सूदन ते नमः ॥ ३ ॥ प्रकाशावधये तुभ्यं नमस्ते ह्युग्रतेजसे ॥ परंज्योतिर्वि
वस्वायद्युतिसीम्ने च ते नमः ॥ ४ ॥ ज्योतिषामपि त्वं ज्योतिर्नमस्ते ज्योतिरात्मने ॥ तेजसामपि त्वं तेजस्तुभ्यं तेजोब्ध
ये नमः ॥ ५ ॥ तवोदयास्तयोर्मध्ये गताः कल्पाः सहस्रशः ॥ न तत्रास्तोदयौ चापि त्वयि त्वं वेत्सि किंचन ॥ ६ ॥ यांति ये प्र
नराह्णि ते षां मार्गो न त्वां विना ॥ तस्मात्कलकलत्याय महद्द्वाराय ते नमः ॥ ७ ॥ येषां परोक्षत्वमज्ञात्वा परोक्षं नमसा सदा
॥ तेषां करोषि तत्साक्षात्तस्मान्नैगुरवे नमः ॥ ८ ॥ त्वं साक्षात्परोक्षोऽसि परं तत्तव दर्शनं ॥ कोपि कर्तुं न शक्नोति नमस्ते
ऽद्भुतरूपिणे ॥ ९ ॥ चक्षुषामपि सर्वेषामधिदेवोऽसि सर्वतः ॥ चक्षुषश्चक्षुरित्येतद्भवतोऽहि प्रकीर्तितं ॥ १० ॥ त्वत्प्रकाशे
न कर्माणि प्रवर्तंते हि सर्वतः ॥ न तत्किंचित्तेषां तु लेपनं त्वयि वर्तते ॥ ११ ॥ भूतानि चापि लोकाश्च कर्माणीह समंततः
॥ प्रवर्तंते यस्मि साक्षी च प्रकाशयसि सर्वदा ॥ १२ ॥ सर्वस्मिन्नहनीत्थं गुंजायमाने मधुपे ब्रसुदक्तमीप्सवे प्रमुदितार
विंदे विश्रामपरायणं तमाह ॥ कुमुद उवाच ॥ हे प्रेमिन्रात्रौ प्रेमिणां विश्राममपि तेऽस्ति यं ममसद्दितं प्रवं विपश्यरा
त्रिशीतल्पमालोक्य चंद्रोऽदैवोदेति तन्निर्मलच्छविमत्तु भव ॥ मधुरशब्देन तन्वीर्निकूजय ॥ आनंदेन क्रीडय प्रेमाणं
व्यवहरं सर्वमहरातपाविद्धेन नीत्वे तस्मिन्नानंदसमये किं न क्रीडसि ॥ भ्रमर उवाच ॥ कुत्सितो मुदोऽयमसवत्सुदलस्मात्
रेयन्मोदनाः यो गंतसिंस्त्वमोदसेऽतस्त्वं कुमुदोऽसि ॥ रात्रौ क्रीडय व्यवहरेति त्वयोक्तं तत्रो चिंतं तत्र कामातुराः क्री

रुंतिनिशाचरा व्यवहरंति॥ साधुवस्तु स्यात्मक्रीडस्यात्मरतिरिति प्रमाणेन स्वात्मनि क्रीडंति स्वविन[illegible]ते॥ रात्रौ जागरणे सा
धूनां प्रयोजनं नास्ति॥ एकांते स्वमनसि ये जाग्रति ते साधवः॥ तेषां हृदयलोचने स्वप्रियशोभा याविर्भूतः॥ तेषां चक्षूंषि यद्युन्मी
लितानि तर्हि स्वप्रियतेजस्सैव॥ यदि निमीलितानि तर्हि स्वप्रियतेजस्येव॥ स्वप्रियशोभां विनेतरशोभा तेषां दृष्टौ नायाति यदीतरः
कश्चिच्छोभावान्स्यात्तर्हि तस्मिन्नपि स्वप्रियशोभामेव पश्यंति॥ इतरं व्याजमात्रं मत्वा तदीयां शोभां मिथ्याभूतां मन्यंते॥ त्वया रेमु
ग्धे भास्करतेजो न सह्यते तस्मादहर्निशं ज्वलितनेत्रासि यदीर्घया भास्करं न पश्यामीति वदेस्तर्हि तदृष्टमेव विस्मृत्यात्मिकायां रा
त्र्यां त्वं सदा मग्नासि तस्माद्दिवसे उल्लूकवज्ज्ञाविध्यानेन मस्तशिराः संस्थितासि॥ दिवसं रात्रौ इति मत्वा स्वपिषि॥ रात्रिं दिवस इति विकल्प्य
जागर्षि॥ तव दृष्टौ निशायति रेव दिनकरः॥ परंतु त्वमेव निजाभिमतं दिनकरं कदापि गतप्रभं कदा प्रभालेशं मासे पूर्णप्रभं तमपि
वालेक्षा हृतमेतादृशं स्वयमेव पश्यसि॥ पुनस्त्वमेव तमोहृतहृदयत्वाद्धृद्विन्नयवान्कथं भास्करः स्यादिति न विचारयसि॥ अरवि
दप्रियस्तु तारतम्यदोषरहितः सन्नेकावस्थायां सदा राजते॥ तव प्रियस्तु रात्रौ कलाधरो दिवसे ऽभ्रखंडसदृशस्तस्मात्तारतम्यदो
षयुक्तः सन्नेकावस्थां नाप्नोति॥ अतस्तव प्रियो ऽरविंदप्रियसदृशः कथं भवेत्॥॥ इत्यहैतादित्यदृत्तिप्रणयेन मधुकरार्कमधुप
कुमुदसंवादे प्रथमो रश्मिः॥॥१॥॥ कुमुद उवाच॥ हे मधुप त्वयारविंदप्रियः कालेकतारतम्यदोषराहित्येनोत्कृष्टतया वर्णितः॥ चं
द्रस्तु कालेक वृद्धिह्रासादिदोषवत्त्वेन दूषितः॥ भानुरपि ग्रहणदोषकलुषितत्वात्कथं निर्दुष्टः स्यात्॥ मधुप उवाच॥ अरे कुमुद
वस्तुतो भानोर्ग्रहणं नास्ति किंतु चंद्रस्यैव॥ यदि भानोर्ग्रहणं लोकप्रसिद्धमिति कथयसि तर्हि शृणु॥ चंद्रस्य राहुकेतुसंबंधात्तु
ग्रहणं सूर्ये तु चंद्रसंसर्गादारोपितं॥ तथा हि प्रतिपत्पर्वसंधिषु च ग्रहणं न त्वन्यतिथिषु॥ तत्र चंद्रस्य पूर्णत्वाभावात्॥ यदि सूर्ये वा
स्तवं ग्रहणं स्यात्तर्हि सूर्यस्य सर्वदा पूर्णत्वाद्राहुकेतुसंसर्गदशायामष्टम्यादिष्वपि स्यात्तत्तु न भवति रुद्धं॥ चंद्रग्रहणे यथा पूर्ण

प्र०
२

त्वं कारणं तथा कलाशून्यत्वमपि तच्च पर्वसंधिष्वेव ॥ एवं च राहुकेतुरूपभूच्छाया चंद्रमसमाच्छादयति चंद्रस्तु सूर्यमाच्छादय
तीति ॥ चंद्रस्य ग्रहणं सूर्ये लोकैरारोप्यते ॥ किंच जलसारांशश्चंद्रस्तेजःसारांशो रवी राहुस्तु भूच्छाया छायापातस्तु जले संभव
ति न तु तेजसि ॥ तस्माद्ग्रहणदोषाभावात्सूर्यस्सदा निर्दोषः ॥ यदि पुराणादिष्वेवं प्रसिद्धं ॥ अमृतविभागसमये राहुणा देवपं
क्तौ स्थित्वामृतं भक्षितं तं दृष्ट्वा सूर्यचंद्राभ्यां विलंबे सूचितं तज्ज्ञात्वा भगवता चक्रेण तच्छिरश्छेदः कृतस्तद्द्वेषेण राहुकेतुभ्यां
सूर्यचंद्रयोर्ग्रासः क्रियत इति श्रवासतर्हि यथा पृथिवीपर्वतनद्यादीनां भूतादिरूपत्वं तदभिमानिविग्रहवद्रूपत्वं च प्रसिद्धं तथा
सूर्यचंद्रयोरपि बिंबरूपत्वं तदभिमानिविग्रहवद्रूपत्वं च मंतव्यं ॥ पुराणकथा त्वर्थवादतया केतत्त्वज्ञितात्पर्येण विग्रहपरा ज्यो
तिःशास्त्रं तु बिंबभूतप्रसिद्धसूर्यचंद्रपरं तथा च ज्योतिःशास्त्ररीत्या चंद्रग्रहणमेव सूर्ये आरोपितमित्यस्माभिः प्रतिपादितमे
व ॥ तस्मात्सूर्यो निर्दोषः ॥ कुमुद उवाच ॥ हे मधुप एवमुक्त्वा चंद्रोपासको भूवं ॥ अत एव मम जन्म सफल्यं जातं ॥ मधुप उवाच
॥ अरे कुमुद त्वं चंद्रोपासकोपि न चंद्रं विनापि मुदितत्वात् किंतु रजन्युपासको राज्ञावेव मुदितत्वात् ॥ चंद्रमानदोषार्हः सूर्यभ
क्तत्वात् ॥ यो भक्तोपासकः सोर्थाद्भगवदुपासक एव यदि त्वं चंद्रोपासकोऽभूस्तर्हि सूर्योपासकः स्यात्तस्मात्त्वं चंद्रोपासकोपि ना
सि ॥ यथारविंदं भास्करानुरागि तथा चंद्रोपि ॥ चंद्रमास्तु तीव सज्जनः ॥ यथा यथा प्रभुसमीपं गच्छति तथा तथाहं त्वं विहाय त
न्मयो भवति ॥ पुनर्यदा प्रज्ञापोषणार्थं प्रभोर्वियोगमाप्नोति तदापि स्वीयभावं स्वामिन्येव स्थापयति ॥ अत एव सद्भावनया प्रति
दिनं द्विगुणितकलावान् भवति तथापि स्वीयकलां प्रभुप्रभाप्रतिबिंबभूतां मन्यते ॥ कुमुद उवाच ॥ हे मधुप चंद्रमा यदि सा
धुः स्यात्तर्हि तस्मिन्कलंकितत्वं कथं ॥ मधुप उवाच ॥ अरे कुमुद तवात्तानतया यं चंद्रः सूर्यसमत्वेनाभिमतस्तन्निराकर
णार्थं मया दूषितो वस्तुगत्या निष्कलंकः ॥ अयं चंद्रो न किंतु नभोऽब्धौ श्वेतारविंदं तस्मिन्नमरा भ्रमरीभूयामृतरूपमकरंदं

२

पिबंतितद्ज्ञात्वाचंद्रेकलंकंवदंति ॥ यद्वायथाब्रह्मज्ञानिनोहृदयंब्रह्मानंदेनपूरितंसत्वाग्द्वाराज्ञानामृतंस्रवतिश्रद्धा
भक्तिसंपन्नामेधाविनस्तदमृतंपीत्वाजीवंति ॥ तथाचंद्ररूपपात्रमादित्यप्रभामृतपूरितंसद्रश्मिद्वारासुधांस्रवतितत्स
र्वेदेवाभ्रमरीभूयपिबंतोजीवंति ॥ येसर्वप्राणिपोषकाश्चदातारोदयालवःस्वसंपदमन्येभ्योदत्वाप्रसन्नचेतसस्तेसाधवः ॥
एतल्लक्षणंचंद्रेवर्त्ततेतथाहिदेवदातृकेभ्यःसुधांददातिसर्वौषधीनांपोषणंकृत्वाप्रजाःपातिसर्वेषामिष्टःसर्वमैत्रश्च ॥ ए
वंचंद्रमाःपरमसाधुरेतल्लक्षणलक्षितत्वादरविंदमपिसर्वेषांसुगंधदायकंमधुकराणांमकरंददायकंसरसःशोभादायकं
सर्वेषामहृद्यंसर्वप्रियंचतस्मात्साधु ॥ किंचयथाचंद्रोभानुभक्तस्तथारविंदमपि ॥ तद्यथाभानुतेजसिप्रसीदतियद्भानुते
जोरूपसंपन्नहृदयेव्याप्नोतितदातमोहतसंसारंतिरस्कृत्यनम्रशिरोमुद्रितनेत्रंसत्तेजसिसमाधिस्थंभवति ॥ अपरंचे
त्पादेनाकंठजलेस्थितत्वाद्दलरूपांगुलिभिर्हिमबिंदुमालयाभानुमेवजपति ॥ स्वहृदिलीयमकरंदजलेनस्वध्यानविषयीभू
तभानुतेजोरूपसालग्राममभिषिंचति ॥ अरेकुमुदत्वमेवंजानासिकमलहृदयेमधुपोयंसुखेनस्वपितीतितन्नकिंतुकमलहृ
द्याप्तंभानुतेजोऽनुभवामि ॥ अरविंदमपिस्वहृदिमौनव्याख्यानेनाजपाजपंमांप्रत्युपदिशति ॥ अकथ्यकथांश्रावयतितत्तो
हंसर्वस्मिन्नहस्युन्मत्तोभूत्वातद्ध्यानेकूजामि ॥ वारिजंवार्युत्पन्नंचेन्निजप्रियपक्षंहित्वाकदापिपितुःपक्षपातीनभवतिनिज
पितृहृदयेहृद्यात्प्रतिबिंबमस्तितद्ध्यानमेवेतिमत्वातदवलोकनार्थंकदापिनम्रशिरोनभवति ॥ व्याजेनविमोहितमभूत्वा
सद्रूपेःनिमेषणेचंसन्निष्ठतियावज्जलंस्थलंचभानुप्रकाशेनप्रकाशतेतावदरविंददृष्टिःप्रभाकराननंविनाकुत्रापिनप
तति ॥ यन्नेत्रावलोकनेकोपिकदापिनशक्तस्तन्नेत्रावलोकनलालसयापक्ष्मनिमेषविहीनंकरोति ॥ यस्मिन्कालेजलेस्य

१० लं च तत्प्रकाशविहीनं भवतः॥ तदा स्वपिन्द्रद्वंद्व्याप्तविहीनं मत्वा नम्रशिरः सतत् भानुध्यानं धत्ते॥ एवं स्थिते रविदेपरमभक्तो यदि
३ त्वं चेद्भक्तः स्यास्तर्हि कमलनिद्रां वा मलभक्ता भ्रमरनिद्रां च न कृतवान्स्याः॥ तस्मात्त्वं चेद्भक्तो नासि किंतु रजनीभक्तः॥ अत एव
3 भानूद्गतेजसा संतप्तः सन्नाद्यौ मुखं त्वा दृश्यतिष्ठसि॥ ततो भानुके सर्यां विर्भावचिह्नं दृष्ट्वा तमोगजाः पलायितास्तान्निरीक्ष्य
भ्रमरो गुंजन्॥॥ इत्यद्वैतादित्योदक्षिणायने मधुकरार्कमधुपकमलसंवादे द्वितीयो रश्मिः॥॥२॥॥ मधुप उवाच॥ उत्यादि
तोंधकारस्त्वगतागता विभावरी॥ प्रकाशंते दिशः सर्वाश्च भूदर्कोदयस्तदा॥१॥ उदयो रात्रिनाशाय नाशेस्त्युदयः कृतः॥ यथा
रात्रिरभून्मिथ्याव्याप्तस्तथोदयः॥२॥ कथं मुक्तिरजन्या स्याद्यादित्तानोपलब्धिका॥ ननु मुक्तिः सदा नित्याजन्यदोषविव
र्जिता॥३॥ अज्ञानेनावृतं येषामन्तःकरणलोचनं॥ तेषामप्यपरोक्षेण मुक्तेः प्राप्तिः कथं भवेत्॥४॥ ज्ञानमज्ञाननाशाय न च
तन्मुक्तिकारणं॥ यथासीद्रिपुनाशाय रिपोर्नष्टत्वसिः कृतः॥५॥ अनात्माबंधरूपस्तु मुक्तिरात्मैव भण्यते॥ बंधनभ्रांतिवि
रामे स्थितिर्मुक्तेः प्रकाशते॥६॥ यथार्केपि न संदिग्धा भवंत्येव रवेः स्थितौ॥ परं तु स कथं साक्षाद्भवत्यर्कोदयं विना॥७॥ उद
योप्यर्कस्थित्यां तु नापि मिथ्या न वास्तवः॥ तथैव मुक्तौ ज्ञानं च नापि मिथ्या न वास्तवं॥८॥ परिदृश्यमानो य उदयः सोऽस्तसा
पेक्षकः सूर्यत्वेन तद्द्वयविलक्षणोऽस्तनिरपेक्षक उदयो नित्यश्चा राजते॥ तथैव ज्ञानमप्यज्ञानसापेक्षकं व्याजमात्रं स्वरू
पज्ञानं तु ज्ञानाज्ञानविलक्षणं सत्तामात्रं राजते॥ अज्ञाननाशकं ज्ञानं ह्यज्ञानसापेक्षकं यच्च हननविषयो नास्ति तत्र कः किं
हंति कस्य हननापेक्षां करोति॥ न च स्वरूपज्ञानेऽज्ञानमस्ति चेदज्ञानहननापेक्षामपि कुर्यात्॥ तथा च श्रुतिः॥ यत्र त्वस्य स
र्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिः॥ तिमिरनाशकोदयो ह्यस्तसापेक्षकः॥ तिमिराभावान्नित्योदयो नास्तसापेक्षकः॥ अ

स्तं चेदुदयः कल्प्येत अस्ताभावे उदयं वा कल्पयेत॥ अरे उदय एवास्तं गच्छति सूर्यस्तु नोदेति नास्तमेति च॥ सत्ति रूपं स्व-
रूपज्ञानमेव चिन्मात्रं॥ इदं वृत्त्यात्मकं ज्ञानं चित्प्रतिबिंबं तदधीनं परं त्वस्माज्ज्ञानाद्ज्ञानेन न पश्यत्यज्ञाननाशे तज्ज्ञ ज्ञिमात्रं
साक्षाद्भवति॥ यथोदयात्सूर्यः साक्षाद्भवति न तु उदयः सूर्यमुत्पादयति तस्य स्वतः सिद्धत्वात्॥ तथा तत्त्वज्ञानेन स्वरूपोत्पा-
दकं तज्ज्ञानं स्वप्रसापेक्षत्वं न तु स्वरूपं ज्ञानापेक्षकं॥ योऽज्ञानावृतस्स ज्ञानोदयमपेक्षते यः स्वरूपज्ञानात्मकस्तस्य ज्ञा-
नोदयेन किं प्रयोजनं॥ सोऽहं ब्रह्मास्मीति वृत्तेरप्यतीतः॥ नन्वहं ब्रह्मास्मीति ज्ञानमेव स्वरूपमिति चेन्न॥ अहं ब्रह्मास्मी-
ति वृत्तिज्ञानं वृत्तिस्त्वनात्मा आत्मा न भवति॥ अरे भ्रमर एवमज्ञानावृतवन्नमुदयमपेक्षसे॥ कमलं तद्भ्रान्तोऽहं च स्वरूप-
दर्शमग्नौ स्वस्तस्माद्भावयोरे तद्दुदयेन प्रयोजनं नास्तीति॥ ॥ इत्यद्वैतादित्यदक्षिणायने मधुकरार्के मधुपभ्रमरसंवा-
दे तृतीयो रश्मिः॥ ॥ ३॥ ॥ भ्रमर उवाच॥ ॥ हे मधुप भास्करेंदु दृशां श्रेष्ठं मम किं न दर्शयसि तं दर्शयित्वा पापियेनं मां विहृ-
तार्थं न करोषि॥ मधुप उवाच॥ अरे भ्रमर भानुस्तु साक्षादपि साक्षान्नमो यस्य साक्षान्न यास सर्वमिदं साक्षाद्भवति परं त्वन्तं
साक्षाद्द्रष्टुं कोऽपि समर्थः॥ ये लोचने अचराचरात्मकमिदं दृश्यते तानि लोचनानि भानुतेजसा दग्धानि विंदवत्सर्वांगलोचनभू-
तात्मानः संतो भानुतेजोऽनुसंदधति ते दुर्लभाः॥ अरे स्वरूपभानुतेजस्तु दर्शनादि विघ्नटिनाशकं तस्मात्तेम महान्तो हङ्का-
ञ्जीभूय तद्दत्तमवंति॥ तत्रानुभवकर्ता नास्ति परं त्वनुभवः स्वतः सिद्धः॥ अरे भ्रमर भानोरीषत्तेजसि संतप्तः संत्राणं
शांतिं कल्पयसे॥ रात्रिस्तं धकारजननयित्री॥ अंधकारः संतापमूलः॥ रात्रिं शांतिं स्वप्नशांति तल्लयं मत्वा संतापदायक-
वद्भासमाने तेजसि यो विश्राम्यति स शांतस्वरूपः॥ अरे विचित्रं बुद्धं हृदयं तत्रैवः शीतलजलप्लावितवद्भात्यपरः प्रज्ञ

पृ. ५

लितोग्निस्तेजः स्फुरितवद्भाति यः पुरुषार्थहीनः स तेजः कुंडात् ह्री भूत्वा शीतलकुंडे शांत्यभिलाषेण शीतलकुंडे मज्जति स सदा शां
तशो भवति॥ यः पुरुषार्थवान् स ज्वलत्कुंडे शैत्यं व्याजं मत्वा ज्वालासंतापाद्भीतः सं स्तेजः कुंडे मज्जति स शांतिमाप्नोति ॥
अरे कामदेव त्वं पुरुषार्थहीनस्त्वयोग्रतेजो न सह्यते ततस्त्वं निशाशैत्यं परित्यज्य चंद्रशीतलतेजः सहनाभ्यासं कुरु॥ चं
द्रगतिं सूर्यपरायणां विचारय॥ ततो विचारद्वारा क्रमेण शनैः शनैर्भानुतेजः सहिष्यसे॥ यश्चादित्यविमुखः सच्छायोन्मु
खोऽय आदित्याभिमुखस्तस्य छाया स्थितिः पश्चात्॥ स सदादित्याभिमुखस्तस्मात्तस्य छायायाः भावः॥ अरे कामदेवस्त्व
२७ तो रात्रिररमणीया॥ तां त्वं सौंदर्यसीमां कल्पयसे तस्मात्त्वं सौंदर्यभवहृदये विचिंते॥ अत एव भानूग्रतेजसो भीरुः पला
यसे यावद्रात्रिशोभा भवहृदयान्न निस्सरति तावत्सूर्यतेजो न सहसे किंच यावत्सूर्यानुभवस्तव न भवति तावद्रात्रिर
मणीयभावेन परित्यजसि तस्माज्ज्ञानसूर्यानुभवार्थं चंद्रतेजो व्याजेन तत्रैव भानुतेजोनुभव॥ ततो यं व्याजस्त्वां सद्रूपे म
ज्जयिष्यति॥ कामदेव उवाच॥ व्याजः कथं सद्रूपे मज्जयेत व्याजेवा पुरुषार्थः॥॥ मधुप उवाच॥ उदयस्य व्याजत्वेपि
सूर्यदर्शनहेतुत्वादुपायस्य मिथ्यात्वेप्युपेयस्य सत्यत्वादिति शास्त्रसिद्धत याच सत्यवस्त्वनुभवे व्याजोपि हेतुर्भवत्ये
व॥ यथा ज्ञानादिविप्रख्यातीताः जीवन्मुक्ता ज्ञानं व्याजमेवेति पश्यंति तन्नद्धत॥ यद्यपि ज्ञानं व्याज एव तथापि मुमुक्षुं
ज्ञानमेव सद्रूपं मुक्तिपदं प्रापयति॥ ज्ञानं मुक्तिपथ इत्युच्यते॥ यतस्त्वं ज्ञानं मतं ममेति च प्रमाणमिति॥५॥ इत्यद्वैतादि
त्यदक्षिणायने मधुकरार्के मधुपकामदेवसंवादे चतुर्थो रश्मिः॥४॥ कामदेव उवाच॥॥ हे मधुप त्वं सूर्योदयानुभवो
मम नास्तीति ज्ञानमुक्तिदृष्टांतेन मां बोधितवानसि॥ उपमेयरूपः सूर्यस्तदुदयोपि लोकाः प्रसिद्धाविति हेतोः अव

णाह्यारामममतयोरनुभवोवर्त्तते दृष्टांतभूतज्ञानंमुक्तिश्चमयानदृश्यतेनश्रूयतेचतेमुक्तिज्ञानेकीदृशेकिंस्वरूपेणनत्वं
मांबोधय ॥ मधुपउवाच ॥ हेकुमुदएतद्विनायद्यत्तदुर्त्तेयंतत्स्पष्टमहंज्ञापयितुंअज्ञोस्मियद्दालोकेयद्यत्तवाभिलषि
तंश्रेष्ठंवस्तुतद्यदिययाचिंतितंचेद्दास्यामिपरंतुज्ञानमुक्तिरहस्यंनैवप्रष्टव्यं ॥ कुमुदउवाच ॥ भोप्रभोमिथ्याविषयकज्ञानेन
मिथ्याभूतपदार्थेनवाप्रयोजनाभावाद्यन्मयाभिलषितमनुग्रहेणोपदेष्टव्यं ॥ मधुपउवाच ॥ अरेकुमुदएतावताप्रबं
धेनसूर्यतदुदयव्याजेनमुक्तिज्ञानयोः स्वरूपंनिरूपितंवस्तुतस्तुसूर्यतदुदयोदृष्टांतोमुक्तिज्ञानेदार्ष्टांतिके ॥ मुक्ति
स्तुसूर्यस्यापिसूर्यः ॥ यथोदयोव्याजः सूर्यः सत्यस्तथाज्ञानंव्याजोमुक्तिः सत्या ॥ अंततोगत्वादृष्टांतभूतः सूर्योयंव्या
जएवयएषोंतरादित्येहिरण्मयः पुरुषइतिभीषोदेतिसूर्यइतिश्रुतिद्वयविरोधपरिहारार्थंसूर्यचरित्रवर्णंचव्या
जेनमत्वापुरुषः सत्यइतिनिरूपणात् ॥ कुमुदउवाच ॥ हेप्रभोसूर्यस्यसूर्योयस्त्वयोक्तः सूर्यादप्युत्तमः सूर्यः क्वापिप्रसि
द्धः किं ॥ मधुपउवाच ॥ सत्यंश्रुति प्रसिद्धउत्तमत्वाधमत्वाभ्यामतीतस्तत्तेजसामीचंद्रसूर्यादयउत्तेजः प्राप्नुवंति
यस्त्वद्वैतंतत्सूर्यमुपास्तेसराज्यादिकंप्राप्नोतिपरंतुपरमपदंनाप्नोति । योवाद्वैतवरहितः सोऽद्वैतादित्यपरमपदेविर
मति ॥ सहोवाचगार्ग्योयएवासावादित्येपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठा
अतिष्ठः सर्वेषांभूतानांमूर्द्धाराजातिवाअहमेतमुपासइतिसयएतमेवमुपास्तेतिष्ठाः सर्वेषांभूतानांमूर्द्धाराजाभव
तीतिप्रमाणं ॥ कुमुदउवाच ॥ हेप्रभोऽद्वैतादित्यस्तुकियद्दूरस्थः कियत्प्रमाणः किमुपायलभ्यः केनानुभूतः ॥ ॥
मधुपउवाच ॥ सद्दूरत्वांतिकत्वरहितः परिमाणशून्यः श्रवणादिवेद्यस्तत्वविदनुभवविषयः ॥ तथाहि ॥ ससमीपाद्

१० पि समीपः स च चक्षुः समीपवर्त्तीत्यस्माच्चक्षुर्विषयावलोकनसमर्थं॥ घ्राणस्यापि समीपतरो ऽत एव घ्राणस्य घ्राणेन सामर्थ्यं
५ तस्य स्वसमीपवर्त्तित्वेपि चक्षुः घ्राणादिकं तत्समीपं गंतुमसमर्थं कदाचिदपि तदभिमुखं चेन्नहि दृश्येत॥ यद्यपि चक्षु
5 रादीनां समीपवर्त्तीत्यापि चक्षुरादिभिर्न ज्ञायते समीपवर्त्तीति॥ स दूरादपि दूरतरः॥ यः कांश्चित्तन्त्यलोकादिष्वपि तद
न्वेषणार्थं गच्छेत्तस्य तस्य ततोप्यतिदूरतर एव॥ यद्यन्वेष्टा पावकाद्यावरणरूपसमुद्रानप्युल्लंघ्यान्वेषयेत्तस्य तस्य त
तोपि दूरतर एव॥ यद्यन्वेष्टा समीपे ऽन्वेषति तदान्वेष्यवस्तुरूपसमुद्रस्तस्यागाधोतिगंभीरोतिगूढश्च भासते॥ यद्यन्वे
ष्टा तद्गाधतामन्वेष्टुमिच्छति तदा लवणपुत्तिमावत्तस्यादितरंगवेगेन गलितो भवति॥ अतः परं तस्य गांभीर्यं को
वा विद्यात्॥ त्रिपुटिनाशं विनोपायसहस्रेणाप्यद्वैतादित्यो न लभ्यस्तस्मान्मुमुक्षवो द्रष्टृत्वगलनोपाये यतंतेति॥ ए
तद्द्रष्टृत्वनाशभयेन तेजः कुंडाद्विमुखीभूयेतन्मिथ्याभूतशीतलकुंडे मोहिताः संतः सर्वदा संतप्ता भवंति॥ कुमु
द उवाच॥ ॥ द्रष्टृत्वे यदि गलितं स्यान्नहि द्रष्टृभावात्कथं दर्शनं स्यात्॥ ॥ मधुप उवाच॥ ॥ तस्यामवस्थायां न च
द्रष्टा न वा दृश्यं दर्शनं तत्स्वतः सिद्धमिदमेवाद्भुतं॥ ॥ कुमुद उवाच॥ ॥ यदि तेजः कुंडः शांतिदायकस्तर्हि तं परि
त्यज्य शीतलवदग्निकुंडे कस्मान्मज्जंति॥ ॥ मधुप उवाच॥ ॥ यद्यपि तेजः कुंडः शांतिदायकस्तथापि तस्योपगत्वा
त्तदवलोकनेन कोपि समर्थः॥ चित्याद्वैतज्ञामापि यद्युल्लिखेत्तदभिद्रष्टुं कोपि न समर्थः किमुत ज्ञातुं साक्षात्
दर्शने॥ प्रथमतः सहस्रविद्युत्यानामपि भयंकरः पुनः सहनशीलानां भक्तिमतां साधूनाममृतसिंधुवच्छांति
मयो भवति॥ येत्वसहिष्णवो भक्तिहीनाश्च साधवस्ते शीतलवदग्निकुंडशोभायां विमोहिताः संतो दुःखेपि सुख ५

त्वमन्यमानास्तं त्यक्तुं न शक्नुवंति॥ विषक्रिमिन्यायेन तत्त्यागे स्वहानिं मत्वा तत्रैव लिप्ताः संतप्तोपि न त्यजंति॥ अरे कुमुद
त्वदुक्तं पश्यतं दुःखमयांतमिस्रायां प्रसन्नोस्मि तद्वियोगमूर्छितवन्निष्टमिवाद्य चिद्दृप्तितेजःपुंजमार्तंडदर्शनेन समर्थोसीति
इत्यहंतादित्यदक्षिणायने मधुकरार्के मधुपकुमुदसंवादे पंचमोरश्मिः॥५॥ कुमुद उवाच॥ हे मधुप अहंतादित्यदर्शनमनेनै
व चक्षुषा स्याद्दुतान्येन॥ मधुप उवाच॥ तत्र चक्षुर्विनैव दर्शनं सिद्धमेवमवलोकयितारं विनापि॥ चक्षुश्चैवांतरे भ्रुवोरिति प्रमा
णेन स्थूलाभ्यासद्वारा चक्षुरादिसकाशाच्छमाद्यंतर्दृष्टिरुत्पद्यते॥ अंतरभ्यासद्वारांतर्दृष्टिसकाशाच्चक्षुर्वणमननरूपदृष्टि
र्जायते॥ तस्या दिव्यदृष्टिर्जायते॥ दिव्यदृष्टिसकाशात्स्वरूपादित्यसाक्षात्कारो भवति॥ कुमुद उवाच॥ चक्षुरंतरा दृष्टिर्न भव
तीति नियमः॥ अंतर्लोचनं वा किं यस्मादंतर्दृष्टिर्भवति॥ मधुप उवाच॥ अंतःकरणमेवांतर्लोचनं॥ इदं च चक्षुर्बहिःकरणमं
तःकरणं त्वंतश्चक्षुः॥ बाह्या दृष्टिर्बहिश्चक्षुषः॥ अंतश्चक्षुर्दृष्टिस्त्वंतर्दृष्टिः॥ यथा बहिश्चक्षुर्मध्यान्हार्कमभिमुखीकर्तुमसम
र्थं न तथाधिकारं तश्चक्षुरहंतादित्यमभिमुखीकर्तुमसमर्थं॥ यथा सूर्यदर्शनप्राप्त्यर्थं प्रथमं चंद्रतेजोवलोकनाभ्यासं कुर्वंति तथा
हंतादित्यसाक्षात्कारार्थं मनसश्चंद्राधिदैवतत्वात्तेन मनोभ्यासं कुर्वंति॥ मनोगतिं विषयादाकृष्य स्वस्वरूपे योजयंति तदा तेषां मनो
वृत्तिरहंतादित्यव्याप्तुं योग्या भवति तत्र तेषामहंताप्यहंतादित्यतेजसा समूलं भस्मी भवेत॥ असाधकानामहंतात्वविद्यापंके
नार्द्रीभूतत्वाद्भस्मीभवितुमयोग्यास्ति विचारातपेन तत्पाग्रितापेन च यदि सा शुष्की भवेत्तदा दग्धुमर्हति॥ कुमुद उवाच॥ हे मधु
प उग्रतेजसोग्रशुष्कार्द्रयोरुभयोर्भस्मभावसाम्यादहंतादित्यतेजसोऽत्युग्रत्वात्कथमार्द्राहंताया दाहो न भवेत॥ मधुप उवाच
अरे कुमुद दाहभयादहंतादित्याग्रे संमुखीनभूता विद्यापंकेऽवाङ्मुखी सती तत्र शीतलत्वं कल्पयति यदि तदभिमुखी स्यात्त

१० ६ हितन्त्वामेवमस्मीस्यात॥कुमुदउवाच॥भोमधुपएतदेवपरमरहस्यंत्वयाकुतोलब्धं॥मधुपउवाच॥अरेकुमुदसद्गुरूपदिष्टादि
त्यप्रतिपादकग्रंथप्रतापेनममैतद्रहस्यप्रकाशोजातः सांप्रतंतज्जात्याकीटोहंतत्वतस्तत्प्रसादेनपरमहंसोहंभ्रमरवेषेतद्र
हस्यंरोपयामि॥एवंप्रकारेणसंसारवर्त्मोद्भिन्नजातिषुस्मदरविंदमपिविलक्षणं॥अस्मदद्वैतादित्योपिदृश्यमानादित्यस्यां
तर्यामीयत्प्रकाशादयमादित्योजगत्प्रकाशयति॥अरेकुमुदयदित्वमद्वैतादित्यंज्ञातुमिच्छसितर्हिप्रत्यक्षादित्यतेजःसोढुम
भ्यस॥यदाभ्याससद्भावात्तवतेजःसहनसामर्थ्यंभवेत्तदैतत्कुमुदत्वनिवृत्यात्तवारविंदत्वंस्यात॥तदनंतरंमिथ्यारोपिताहंता
निवृत्तौसत्यांयदित्वंप्रसन्नतयाहंसभक्त्याभवेस्तर्हिजडत्वनिवृत्यात्वंहंसत्वंप्राप्स्यसि॥कुमुदउवाच॥भोमधुपएकंवस्तुस्व
रूपंविहायान्यरूपमन्यवर्णंचकथंभवेद्यदिभासेततदाध्यासःस्यात॥मधुपउवाच॥अरेकुमुदलोकेयावंतःपदार्थास्तेसर्वेस
र्वदैकरूपानतिष्ठंतिपरंत्वयंजीवोऽज्ञानतोयद्रूपमाप्नोतितज्ज्ञानात्स्यवशात्तदेवशाश्वतमितिमत्वात्त्यागकालेऽतिदुःखमयो
भवति तस्मान्नद्वियोगात्त्यागेवयस्तन्मोहंत्यजतिससुखीनरः॥तिर्यचामनुष्याश्चदृष्टा॥अबीजकालेभिन्नरूपाउदरेऽन्यरूपा
उत्पत्तिसमयइतररूपाबाल्यतरुणवृद्धावस्थास्वपिपृथग्रूपाभवंत्येवंसर्वकालमारभ्यबहुरूपमाप्नुवंति॥अव्यक्तादभ्ररूपो
बभूव॥अभ्ररूपाद्वृष्टिद्वाराद्यभूत॥पुनश्चैतन्यांशेनलघीभूत्वारेतोरूपाभवतीत्यसेतस्यैकरूपेणास्थितिर्नास्ति॥यदिपुरुषोबभू
वतत्रविवेकसंपत्तिस्तंप्राप्ना॥एतद्योग्यतांज्ञानंतज्ज्ञानत्वाणेंद्रियकस्त्वेविलिप्नायएतद्योग्यतांदृष्ट्वागमयतिसतथागतिंप्राप्नो
ति॥अथैतद्योग्यतांसफलीकृत्ययइंद्रियजन्यसुखंदुःखमेवेतिमत्वायाहृशयोनौयाहृशरूपेइदमेवशाश्वतमितिविश्वासः
स्थितस्तन्निवृत्तेर्यस्यत्रासोनभवतिसदिव्यगतिंप्राप्नोति॥तस्मादेकुमुदलाभालाभौसांप्रतंतवाधीनौ॥तवलाभेच्छानास्तिचेत्र्दि ६

6

न कुमुदरूपेणैव प्रसन्नोऽभव परिणामे त्वेन स्पर्शादृशं फलं नाहं शंसामि॥ यद्वा लाभमिच्छसि तर्ह्येतद्रूपनाशात्प्रागेवैतदभिमा
नेऽपरित्यक्ते त्वैतद्वियोगात्त्वं तापं मा व्रज॥ तदानीं त्वं दिव्यस्थितो भविष्यसे॥॥ इत्यद्वैतादित्ये दक्षिणायने मधुकरार्के मधुपभ्रमरसंवा
दे षष्ठो रश्मिः॥६॥ भ्रमर उवाच॥ भो मधुप कीटजातीयस्य तवाद्वैतादित्यमाहात्म्यानुभवः कुतो लब्धः॥ मधुप उवाच॥॥ अरे
भ्रमर भृंग कीटसंसर्गेणैतत्कीटस्यापि भृंगित्वप्राप्तिर्यथा तथाद्वैतादित्यानुभवशालिसाधुसमागमेन ममाद्वैतादित्यानुभ
वो जातः कीटादीनामपि साम्राज्यपदं कीदृशं तं ब्रह्मज्ञानिनामेव सामर्थ्यमत एव तेऽपारमहिमानः॥ ब्रह्मवेद ब्रह्मैव भवतीत्या
दिश्रुतयोऽपि ब्रह्मविदं स्तुवंति॥ तथा च होताश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसीति स होवाच नमो
वयं ब्रह्मिष्ठाय कुर्म इति॥ साक्षाच्छ्रुत्यैव याज्ञवल्क्याज्जनकब्रह्मिष्ठाय नमस्कारः कृतस्तस्मात्तन्माहात्म्यं वर्णितुं कस्य सामर्थ्यं॥
ज्ञानी त्वात्मैव मे मतमिति भगवद्वचनाच्च॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति वचनात्ज्ञानिनो दुर्लभा एवं तन्माहा
त्म्यमप्यतीव दुर्लभं॥ देहेंद्रियसंघातस्य ज्ञानाज्ज्ञानिसाधारणत्वात्पामरैर्ज्ञानिनो माहात्म्यं न ज्ञायते केषामपि ज्ञानिलोचनानि
न संति यैर्लोचनैर्ज्ञानिनो दृश्यंते॥ पामरदृष्ट्याऽज्ञा विद्वद्दृष्ट्या प्रवराः अत एव ज्ञानिनोऽज्ञाः प्रवराश्च॥ सकलजनसादृश्येन
ज्ञानिनोऽपि वदंति हसंति क्रीडंत्याहारादीन्यपि कुर्वंति परं तु वदनादिव्यापारेभ्योऽतीताः॥ यथा पद्मपत्रं जले विद्यमानं सज्जलेना
लिप्तं॥ तथा ज्ञानिनः संसारे विद्यमाना अपि संसारधर्मैरलिप्ताः॥ यो ब्रह्मिष्ठान्वेषणं कृतवान् स निजस्वरूपमेवान्वेषितवान्
यो निजस्वरूपं ज्ञातवान् स ज्ञानिस्वरूपमेव ज्ञातवान् यस्तत्त्वतो ज्ञानिनं पश्यति स ब्रह्मैव पश्यति॥ यत्तदद्रेश्यमग्राह्यमित्यादिश्रु
त्या ब्रह्मदर्शनाद्यतीतं परंतु यदि ब्रह्मस्वस्वरूपं दर्शयितुमिच्छेत्तदा ज्ञानिवेषेणैव दर्शयेत्॥ ये ज्ञानिनं ब्रह्माभेदेन पश्यंति

१० तेऽपशांतमन्यवः प्रशांतचेतसः॥ ज्ञानिशरीरं व्याजमात्रं तत्तु ब्रह्मैव॥ केषांचित् दृष्टिर्व्याजे केषांचित् दृष्टिस्तत्त्वे येन तद्
द्वारस्ते नित्तथा ज्ञानं द्भुतमनुभवंति॥ ये व्याजमोहितास्ते संशयगर्ते मज्जंतः संभ्रमंति॥ आत्मनिष्ठसमभावलेशोऽनेन सूर्येण प्राप्तः॥ अ
तोऽयं भानुः शुभाशुभसर्वप्रदेशेषु समं प्रकाशते॥ शान्तदान्तत्वलेशोऽनेन चंद्रमसा प्राप्तः॥ अत एवायं चंद्रः सर्वौषधिपोषण
द्वारा सर्वप्राणिपालकः॥ ज्ञानिनोऽच्छिद्रभावलेशोऽनेन नभसा प्राप्तः॥ अत एवाच्छिद्रपदि सर्वव्यवहारे वर्तमानेपीदं नभः स
र्वदा सर्वव्यवहारैरलिप्तं॥ ज्ञानिन अप्रत्यवलोऽनेन वायुना लिंगितं॥ अत एवायं वायुः सर्व[illegible]गो भवति॥ ज्ञानिनः प्रकाशले
शोऽनेनाग्निना प्राप्तः अत एवायमग्निः प्रकाशमयोऽस्ति ज्ञानिनो नैर्मल्यलेशोऽनेन जलेन प्राप्तः॥ अत एवेदं जलं सर्वमलिनप
दार्थनिर्मलकारकं॥ ज्ञानिनः क्षमालेशोऽनया धरण्या प्राप्तः॥ अत एवेयं धरणी सर्वप्राणिभिः शुभाशुभपदार्थान् क्षमते ज्ञानि
नोऽनम्रभावलेशः शेषाख्यायं पातालेऽचलस्तिष्ठति॥ ज्ञानिनो माहात्म्यलेशः ब्रह्माख्यायं सत्यलोक ऊर्ध्वं ...तिप्राप्तः॥ समुद्रस्तु ज्ञानिन
श्रद्धोदकं॥ अत एव तत्सत्त्वाकरत्वं॥ जगति यावंतः सुधापदार्था लोके सर्वे ज्ञानिनो यशसैव स्वस्थत्वं प्राप्ताः॥ ज्ञानिनस्तु निज
महिमगोचरः॥ अत एव तन्महिमानप्रवर्त[illegible]पृष्ठे...सर्वपदार्थाः मितरूपा एव भवेयुः इतरे वर्णितस्तु॥ नेत्वहंमम
ताद्यतीताः परंतु ये अहंममतादिष्वज्ञाजगद्व्यापारे जागृताः ते अहंममतावर्जितां ज्ञानजगद्व्यवहारे सुषुप्तमिवोपहसंति
तेतदुपहासादिमानापमानेषु समचित्ताः स्वधाम्नि सर्वदा जाग्रति॥ यस्मिन्धाम्नि ते विराजंते तद्धाम महत्त्वं किं वर्णनीयं॥
ज्ञानसाधनान्येव तद्धाम्नः सोपानानि॥ ॥ अद्वैतमेव तन्मार्गः॥ ॥ दार्ढ्यं नम्रभावश्च तद्धाम भित्तिमूले॥ निजरहस्यगोप
नमेव तद्यवनिका॥ नैराश्यमेव तन्मंदिरं॥ सद्भाव एव तन्निवाससदनं॥ निष्क्लेशभाव एव तत्कलशः॥ रागद्वेषादिनिरसनक

तावकाशएवतरंगणं॥ चित्स्थैर्यंतिरस्तुसंधानमेवतस्यद्वीपः॥ वैराग्यमेवतद्वारं॥ आनंदएवतद्धारामः॥ प्रमोदएवतद्विनोदः
तद्धामभूमिर्विश्रांतिविज्ञाभावमार्जिताशांतिजलसिक्ताच॥ अरेकुमुदत्वावितिनत्वंनाहंशमहिमानः॥ तस्मादेनांहेलादित्यप्र
काशांममज्ञातरइतिज्ञानीहि॥ इत्यहेलादित्यदक्षिणायनेमधुकरार्कमधुपकुमुदसंवादेज्ञाननौमाहात्म्यवर्णनंनामसप्तमो
ऽध्यायः॥ ७॥ कुमुदउवाच॥ भोमधुपत्वत्स्विष्टमाहात्म्यंयत्त्वयावर्णितंतच्छ्रुत्वाकृतार्थोस्मि॥ परंत्वत्वंविशेषतःकस्मात्पुरुषाद्
पदिष्टोसि किंवास्मिन्नन्मार्गेकथमागतोस्यतदपिमयानज्ञातं॥ तस्मादस्यपृष्टेणस्ववर्त्तमानकथनपूर्वकंस्वदेशकालंब्रूहि
॥ मधुपउवाच॥ ॥ हेकुमुदमहज्ज्ञानेकिंवक्तव्यं॥ अहमपिपूर्वंवस्यायांभवानिवासोस्मि॥ इदंवनमेनमागमंत्र्याम्यतमेवेति
मत्वाद्रुमगुल्मलतादिसावकमांदोलयन्नम्भ्रसन्नोऽस्मि॥ नानाप्रकारकुसुमजालपीत्वापुंजत्पुष्पत्रोऽभूवंएतस्मिन्नंतरेत्वेक
स्मिन्दिवसेमध्याह्नसमयेकुसुमसमकरंदेनतृप्तःसंस्तच्चालेऽतिष्ठं॥ तदानींमहारण्यादयादाकाशमार्गेणचक्रवाकयुगलम
गमत्तन्मध्येएकेनोक्तंसखपादित्यावरकात्वानतिमिरेणयेषांहृदयंमुकुलितंयेऽशाम्यतवनेनभ्रमरकुसुमजालेप्रसन्नचेतसो
लिप्तास्तेकुसुमावसानेस्वप्रियकुसुमस्यभोगंदुस्त्यजंतीति॥ द्वितीयपक्ष्युवाच॥ अशाम्यतकुसुमादिनाशात्प्रागेवतन्मोहंत्य
क्त्वासर्वान्वभासव शाम्यतपदेसदासन्नमनसःकृतोनरमंतइत्यद्भुतमिति॥ ततस्तद्वयमेवंवदन्मत्विहायसागमत्परं
तत्तद्वाक्यद्वयंमद्धृदयेशरवद्विंधात्॥ तदनंतरंममपुनःस्वदृर्शनार्थमतीवाभिलाषोपिजातः॥ एतदभिलाषेणाश्रमनपाना
दिव्यवहारान्निहृत्तोहं॥ एकस्मिन्दिवसेएतच्चिंतयाम्लपुष्पःसन्कस्यचिद्द्रुमशाखायांस्थितोस्मि॥ तदनंतरमतितेज
स्वीकश्चित्पुरुषआगत्यतस्मिन्नेवद्रुमेस्थितवान्॥ ततोदययामांवीक्ष्यापृच्छत्॥ हेमधुपत्वमेवंपीतवर्णोविवर्णोसिकः

पु०
८
8
कस्मान्नागतोसि ॥ तदास्य हृज्ज्ञातं स्वचिंतामपि न्यवेदयं ॥ ततः सर्वहेतोर्विगोचरकावाकोमातापुत्रौ तत्स्तयोर्मध्ये पुत्रो दीप्तिमन्नामा
मद्गुरुरहेतादित्यस्य परमभक्तस्तद्गुणान्वादे कर्तुं कोवासमर्थः ॥ तदनंतरं तमहमपृच्छं हे प्रभुकस्सोऽहेतादित्यः कः कीदृशो वे
ति ॥ ततस्तेनोक्तं यत्प्रकाशेनैते शशिसूर्यादयः प्रकाशंते यः सर्वव्यापी सर्वनिषेधावधिभूतश्च सोऽहेतादित्यः ॥ हे मधुप त्वं
नानाविधनश्वरवस्तुमत्स्वरूपेलिप्तोसि ॥ रूपादिशून्याहेतादित्यप्रश्नेन तव किं प्रयोजनं ॥ वस्तुमवास्तु नाजन्यस्तत्व किं वस्तुमस्थि
तिपर्यंतं परिणामेन दुःखमेव ॥ अशाश्वतमित्रप्रेमसंबंधस्तद्वियोगकालेतीव दुःखायतः ॥ शाश्वतमित्रं तद्वियोगरहितं
तस्माच्छाश्वतमित्रप्रेमसंबंधस्त्वामखंडानंदसागरे मज्जयिष्यति ॥ यदि त्वमस्माच्छाश्वतमित्रप्रेम न त्यक्ष्यसि तर्हि तद्देवां
ते त्वां त्यक्ष्यति ॥ तस्मात्त्वं तत्त्यागात्सर्वमेव तत्त्यक्त्वा शाश्वताहेतादित्येन साकं प्रीतिं कुरु ॥ पुनरहमपृच्छमहेतादित्यः क्वास्ति त
दन्वेषणं कथं करिष्यामि ॥ ततस्तेनोक्तमहेतादित्यः सर्वैरेव दुर्लभः यथाहेतादित्यान्वेषणे तव संकल्पः स्फुरितस्तथैव स
सिद्धः ॥ येनाहेतादित्यान्वेषणं कृतं तेन स्वस्वरूपं प्राप्तं येन स्वस्वरूपान्वेषणं कृतं तेनैवाहेतादित्यः प्राप्तः ॥ अन्वेष्टा तूपा
धिरन्वेष्टारं विना प्राप्तिस्तु स्वतः सिद्धैव ॥ तदनंतरं मया पुनः पृष्टं ॥ भो प्रभो तदहं त्वया ज्ञातव्यस्ते यद्यन्वेष्टा न स्यात्तर्हि तत्प्रा
प्तिः कस्य भवेत् ॥ पुनस्तेनोक्तं हे मधुप तव बोधनार्थमेव कथा मया च्यते तच्छ्रवणेन तव संशयनिवृत्तिर्जायेत ॥ एकः क
श्चिद्ब्राह्मणः परममूर्खो देवदत्त आसीत् येन कदापि जनसमुदायो न दृष्टः ॥ स कुत्रचिद्देवयात्रायां महति जनसमुदाये प्र
विष्टः ॥ तं समुदायं दृष्ट्वा चकितः सन्व्याकुलीभूय स्वमनसि विचारयामास ॥ न जानेऽहमेतन्महाजनसमुदाये मां न वि
स्मरेयं स्वात्मानं नापहरेयं वा ॥ एतत्समुदायस्थाजनाः श्वेतपीताद्येकैकवर्णविशिष्टवस्त्रधारकाश्चाहं त्वेतत्सर्वविल ८

तृणं पंचवर्णविशिष्टवस्त्रं स्वस्वरूपज्ञापनार्थं धरिष्यामि ॥ इति विचार्य तद्धृतवान् ॥ तद्धारणात्स्वागतात्मापहारभीत्या निद्रां न ले
भे तद्धारणानंतरं स्वस्य चिरंतनया सुषाप ॥ ततस्तज्जनसमुदायेके नरेश्वरेण तद्वस्त्रमपहृतं ॥ स चात्मीयतद्वस्त्रमदृष्ट्वा ज्ञात्वा
न यद्दुःखेनिवृत्त्यर्थं महात्म्यत्नो मयाहृतस्तत्देवद्दुःखं प्राप्तमिति ॥ स्वात्मापहारं ज्ञात्वा संततं जनसमुदायेषु मन्सं होकाम्यति
प्रत्येकं प्रत्येकमुवाच पंचरंगवस्त्रधारी देवदत्तः आगतः केनापहृतः कोऽहमिति ॥ एवं वदन्नात्मयमेव स्वात्मानमन्विष्टवान् ॥
हे मधुप यावद्ध्येयं संदिग्धो विमोहितोऽन्वेष्टा वर्ण्यते तावन्निजशांतिं तस्यामपि शांतिहीनोऽतिदुःखी भवति ॥ अन्वेषणोपायो नि
वृत्ते सति प्राप्तिः स्वतः सिद्धैव ॥ तस्मात्सर्वोपि तत्त्वेच्छुर्निवृत्तो स्वात्मनो वा देहेनादित्यः प्रकाशते ॥ हे मधुप त्वयि साधुप्रसादो ज्ञातं
त तत्र श्रवणवाक्येन मां प्रत्युक्तं भगवद्भिः षट्पदप्रेमाग्निर्मधुपहृदये प्रविष्टस्तस्मात्समधुपः प्रत्यहं कृशो भवति ॥ परं त्वतत्त्वधिरक्ता
न भस्मन्यभिभूय स्थितः । माधुर्यसमागमेन प्रबुद्धः संतत्तद्धृदयस्य विकारान् प्रदहेत्तदर्थमहं तेन न तत्समीपं प्रेषितोऽस्मि ॥ त्व
मपि नम्रस्वरूपस्त्वमज्ञानलवरागं परित्यज्य मनसा तत्स्मरणं गत्वा तत्स्मरणं वृजनमवां देहेनात्मज्ञो भवति ॥ ॥ इत्यद्वैतादित्योदधि
णायने मधुकरार्के मधुपभ्रमरसंवादांतर्गतभृंगमधुपसंवादवर्णनं नामाष्टमोरश्मिः ॥ ॥ ८ ॥ ॥ मधुप उवाच ॥ अरे भृंग
दृष्टुं कोन्यं सर्वमेतत्स्मृत्वा ते प्रतिप्रत्नरहमपृच्छं ॥ भो भृंग भवद्दुपरि चवगावाकानुग्रहः कथं जातः ॥ भवद्वृत्तांतमपि कीदृशमनु
ग्रहेण तत्सर्वं कथय ॥ ततः भृंगेनोक्तं हे मधुप पूर्वावस्थायामहं स्ववाङ्माधुर्येण रूपलावण्येन च गर्वितोऽस्मि ॥ अहमेकस्मि
न्दिवसे कस्यांचिन्मंदारवृक्षकोमलशाखायां मांदोलयन्स्थितोऽस्मि ॥ अन्येऽपि पक्षिणस्तस्मिन्वृक्षे क्रीडंतस्तस्थुः ॥ एतस्मि
न्नंतरेऽतितेजस्वी च कश्चित्कोप्यागत्य तत्र स्थितः ॥ सत्पुरुषास्त्रिकालज्ञा भक्तानां भाविज्ञानोपदेशाद्यागयतो ज्ञानं ति तस्मा

५ १ ब्रूतेतिमम्दायमुपेत्य मां वर्द्धिलमवलोक्योवाच ॥ अरे मुग्धक दोषं गुणत्वेन मत्वा वृथा गर्वितोसि ॥ अहं त्वज्ञानतो गर्वमोहि-
तः संसक्तह्याकारहस्यं न ज्ञातवान् ॥ एतस्मिन्नंतरे कश्चिद्व्याधश्चागत्य तत्रामिषं न्यस्य जालं प्रसारितवान् ॥ चक्रवाकस्तु व्याधस्य
जालकापटेन मोहमप्राप्यामिषच्छद्मामकृत्वा ततो निर्गत्य निर्भयदेशमाश्रितवान् ॥ अहं तु सर्वपक्षिभिः साकमामिषलोभे-
न तज्जाले पतितोस्मि ॥ यदा जालबंधनं प्राप्तस्तदा ज्ञातवानहं तदनंतरं पश्चात्तापं कृत्वात्मबुद्धिं निंदितवान् ॥ विवेकिनस्तु
जालपतनात्प्रागेव प्रबुद्धाः संतो मुक्तिपथमिच्छंति मध्यमास्तु जालेपतनानंतरं मोचनोपायं कुर्वंति ॥ अधमास्तु जाले पतिता
प्यामिषमदंतो निश्चिंतं नतयातिष्ठंति ॥ तन्मध्ये केचित्पक्षिणस्तु जालबद्धा अप्यामिषमभक्षयन् ॥ अपरे तु मूढतयानद्यामि-
षं स्वल्पं पक्षिणो बहून्विज्ञाय नवितृंढः परस्परमयुध्यन् ॥ जालैकप्रदेशस्थितं चिंतानंतरं यामपउड्डयन् ॥ तदाहं व्याकुलः
सन्नुद्धं तमैच्छं ॥ उपदेष्टारमंतरेण तस्माज्जालान्निःसरणं कथं स्यादिति चिंतयित्वा पुनस्तेनैव देशांतरसंस्थितोस्मि ॥ मूढप्रवितस्य
टेकार्हे रनिवासवन्नदुष्टजंतुस्फुरितेजालेऽहमप्यवसं ॥ यथैवास्मिंस्तनुपंजरे चैतन्यरूपहंसोन्तर्गतं नाथवात्मेन सहसंतपतित
याहं तेस्मावंतिष्ठन्नतपं ॥ तच्चैकेन विनोदकजलेनाहं भक्षणार्थमाहूतः ॥ तच्चुरन्यान्येनोन्नमयंतः स्वरूपगोयावनालादिकठिना
न्नेनमहं वंटकेषु योमाभूदिति न भक्षयति ॥ अपरे गोन्नमयं राजश्रियोऽनेकमधुरान्नभक्ष्यादिकं तदन्नस्मादेतत्कदन्नं नेच्छतीति ॥ पुनः
वैश्विदुन्नमेतस्यापि भोजनेच्छास्ति परंतु पुरुषसमागमे कामिनीवन्नहि नहीति हावभावं दर्शयति ॥ पुनरन्येनोन्नमयं स्वस्यासिद्ध-
तां दर्शयितुमनिच्छां सूचयतीति ॥ एवमहं तद्दुष्टोन्नोपहासवाक्यानि श्रुत्वा तु वं हे दुष्टा अज्ञानवशाद्दुष्टसंगदोषेणास्मिन्बं-
धने यद्यपि पतितोहं तथापि किं ज्ञानं मत्स्वभावो मां कथं त्यजति ॥ एतत्कदन्नं भवद्योग्यमेव ॥ अतो नाहमेनदिच्छामि ॥ यद्यपि ५

दैववशात्किंचनत्वंशाप्तोहंतथापिपरमार्थतोनायंममस्वभावः॥चिंतादिनाशरीरस्यह्रासत्वेप्यहंसदातुष्टःपुष्टएव॥एतन्म
ममधुरवाक्यंश्रुत्वाव्याधोमामेतद्दुष्टमस्मदीयान्निष्कास्यपंजरेनिवेशयामास॥ममवाक्यचातुर्येणरूपलावण्येनचप्रसन्नःस
न्मामरक्षत॥यद्यपिपश्चात्तापेनबंधमोचनंचिंतयाचव्यग्रोहंतथाप्युदरपोषणार्थंमधुरभाषणादिनाव्याधमतोषयं॥एक
स्मिन्दिवसेमत्पूर्वपरिचितःकपोतआगत्यमत्पंजरसंमुखमवस्थितोवाच॥भोःशुकत्वंविचक्षणःसन्नप्येतस्मिन्पंजरेकथं
पतितोसि॥अहंतुतद्वाक्यंश्रुत्वादीनवाक्येनेदमुक्तवानविचक्षणत्वगर्वेणवाहमेतस्मिन्बंधनेपतितः॥यद्यपिबंधनात्पूर्वंसद्गु
रूणांममदोषोदर्शितस्तथाप्यज्ञानवशान्नप्रबुद्धोस्मि॥सद्गुरुस्त्वामिषमनिच्छंस्तद्धेत्वात्तुदृक्तवान्॥इत्थंविहंगमास्त्वामिषछ
द्मजालेपतिताः॥अहंतुभयचेष्टांदृष्ट्वाप्यज्ञानप्राबल्याद्बंधनेप्राप्तः॥यदिमयिज्ञानस्यप्राबल्यंस्यात्तर्हितानिनःपंथानमनु
स्तनःस्यां॥तस्मादहमज्ञानीतिनिश्चित्यतंयदाबंधनेपतितोस्मितदेदंसर्वंज्ञातवान्॥बंधनेकिमर्थंपतितोगुरूणामसदृशस्तोनानि
र्गतिद्वितीयंनीपश्चात्तापेनकिंस्यात्॥यद्भूतंतत्तुनर्नायातीतितितिक्षामवलंब्यकालंनेषंकरोमि॥भोकपोतयदितवमयिकृपा
दृष्टिःस्यात्तदाचक्रवाकसमीपंगत्वेदंसर्वंनिवेदयथामन्मोक्षोपायंसद्गुरुरूपेदृश्यस्तितथागत्यमांब्रूहि॥ततोमत्प्रार्थनामंगीक
त्यकपोतस्तत्समीपंगत्वामदीयावस्थांनिवेद्यतदुत्तरंश्रुत्वाचतुर्थेदिवसआगत्यमामुवाच॥हेशुकत्वदीयावस्थासर्वाचक्रवा
कायनिवेदितातांश्रुत्वासस्मितवदनोभूत्वैतदुक्तवान्॥+वाक्चातुर्यरूपलावण्यगुणादेवबंधनोजातः॥वाक्चातुर्यादिगुणस्यबंधकत्वेपिसएवेदा+ नीतस्संजीवनोपायो
पिज्ञातःपरंतुमोक्षस्यप्रतिबंधकएव॥अमोक्षंलोकव्यवहारमनुसृत्यस्वप्राणसंरक्षणार्थंसर्वांगीकर्तव्यः॥अंतेतस्य
दभिमानेतत्प्रीतिंचपरित्यजेत्॥अस्माद्विषमबंधनान्मोचनंदुर्घटंपरंतुमोक्षोपायस्त्वेकएवजीवन्नेवमृतवद्देहेनहिनोपायं

३+तस्य

पु० १०

तरंनास्ति यो विषयो जीवितं योगपत्तस्मिन् जीवितेपि न ॥ योजीवनायो यस्तस्मिंन्जीवन्दपि मरणवद्भवेत् ॥ स्वजीवनमिच्छ

सि चेत्त्वात्मानं मृतवद्दृष्टीय मरणन्तलब्ध जीवन्मपहितं चेदस्मिन्न्यत्नरेदु ःबालये जीवितावकियत्कालं जीविकार्थलोकान्विमोद

यपरं त्विदं जीवनं मरणाद्व्यतिरिच्यते पुनरं तेम[illegible]सार्जोरवावलोसि ॥ कपोतस्त्वेवमुक्तान्ततोऽन्यत्रगत्वा वियद्रूहेहलोस्थि

तः ॥ ततोहं स्वमनसि सम्यग्विचार्य मृत्वेव्याहृाय ग्रीवां नेत्रे च बध्वास्य प्राणरोधनं कृत्वा चरणौ प्रसार्य पातितोस्मि ॥ जनास्त्वेत

द्दृष्ट्वा हाहाकारं कृत्वाः वोचन् ॥ अयं शुकस्तु तीव्रगुणतां च्छोभावं लोकमनोरंजकत्वात्सीत्सइदानीं मृतइतिसंतप्य पंजरा

न्मां बहिरक्षिपन् ॥ ततोहं शीघ्रमुड्डीय कपोतसमीपं गतः ॥ जनास्तु मदीयकपटं दृष्ट्वा मामनिंदन्नहं तु कपोतेन साकमागत्य

चक्रवाकचरणारविंदे पतितोस्मि ॥ तदानेन दयालुनानुग्रहहस्तं मच्छिरसि निधाय प्रसादः कृतस्ततो मम प्रकाशो जातः

॥ इत्यहैतादित्यदक्षिणायने मधुकरार्कमधुपकुमुदसंवादांतर्गतशुकसमाचारवर्णनं नाम नवमो रश्मिः ॥ ९ ॥ मधुप उवा

च ॥ हे कुमुद त्वया[+ य]त्स्पष्टं तत्सर्वं श्रुतिपादितं यथा सद्गुरुप्रसादाद्दृहं भवबंधनान्मुक्तात्स्तदप्युक्तमितः परं यच्छ्रोतुमिच्छसि त

त्स्पष्टव्यं ॥ कुमुद उवाच ॥ भो प्रभो ममाहैतादित्योपदेशोऽभिलाषो वर्त्तते ॥ किं चैतद्धैतांतपरमरहस्यं पशुपक्षिषु कथमागत

मिति मम संशयोप्यस्ति ॥ अनुग्रहेणोभयमपि निरूपणीयं ॥ ॥ मधुप उवाच ॥ हे कुमुद योऽयं पारमविचारः प्रथममारभ्यैता

वत्पर्यंतं संक्षेपतो वर्णितः सोऽयमेवाहैतादित्यग्रंथस्यादिः ॥ अस्मिन्नहैतादित्ये खंडस्यार्कसंज्ञाऽध्यायस्य रश्मिसंज्ञा श्र्लोका

र्धस्योन्नरायणसंज्ञा च कृता ॥ अस्मिन्ग्रंथे द्वादशार्कास्तत्रैकार्कस्य दश दश रश्मयं इति विंशत्युत्तरशतरश्मयः ॥ एतावत्पर्यंतं मधु

करेण मयोपदिष्टमित्येतदर्कस्य मधुकरार्कसंज्ञा ॥ एतावत्पर्यंतमावयोः परस्परसंवादकृतः परं ग्रंथसमाप्तिपर्यंतं मम श्रु

[illegible] १०

वेनसंवादः सोऽपि त्वयात्र स्मीयेन ज्ञातः पशुपक्षिषु वेदान्तपरमरहस्यं कथमागतमिति यत्त्वया पृष्टं सर्वं मयमेव पश्यामयाशुक
निकटे ज्ञात तस्तद्वृत्तं यथा तेनोक्तं तन्मात्रं त्वया पृष्टमित्यस्मिन्नेव रशैलो शुकमधुपसंवादे मयोच्यते॥ अथ शुकमधुपसंवादः॥ म
धुप उवाच॥ भो शुक एतद्वेदान्तपरमरहस्यं पशुपक्षिभिः कथं प्राप्तं॥ शुक उवाच॥ यस्मिन्समये करुणानिधिः श्रीभगवान्दाशर
थी रामो वालिवधानंतरं माल्यवद्गिरौ मासचतुष्टयं वसतिं चकार तत्समये ऋषिगणाः साधुवृंदं अमृगपक्षिवेषं धृत्वा भगवत्स
कटे सत्कालक्षेपमकरोत् तस्मिन्काले ये शु(येषु)मृगपक्षिषु वेदान्तश्रवणयोग्यता पूर्वजन्मसंस्कारवशादासीत् तेषां तेषां बालेषु क्र
ष्यादिगणप्रसादेन वेदान्तरहस्यज्ञानं प्राप्तं तदारभ्य गुरुपरंपरयैतत्कालपर्यन्तं तद्वेदान्तरहस्यज्ञानं वर्त्तते परंतु तेषां वेदान्तरह
स्यज्ञानमस्तीति सर्वसाधारणेन मनुष्यैर्न ज्ञायते किं तु परमसिद्धतत्ववेत्तृभिर्ज्ञायते अहमपि तत्कालेप्रसतो दुष्टसंगत्यात
न्मार्गाद्विभ्रष्टो जातः पुनश्च कावाकप्रसादात्तत्प्राप्तवानस्मि॥ मधुप उवाच॥ एतस्मिन्काले ज्ञानवैराग्यसंपन्नाः मृगपक्षिणः के के
कुत्र कुत्र वर्त्तंते। त्वप्रेमेण तत्सर्वं वद॥ शुक उवाच॥ तत्र ज्ञानवैराग्यसंपन्नमृगपक्षिषु द्वौ परमगुरू वर्त्तेते तत्रैको राजविद्योप
देष्टा पक्षिराट् द्वितीयः सांख्ययोगोपदेष्टा हंसः इदानीं तेषां सर्वेषां स्थानानि नामानि च तत्तत्तच्चरित्रं परस्परसंवादं च चाम
णवदिष्यामि तत्सावधानतया शृणु अथ तत्स्थानानि नामानि च मलयगिरौ सूक्ष्ममतिनामा पारावतः स्वबुद्धिनामा स्वगा
लश्चास्ते मंगलप्रस्थे सुमन्युनामक धात्रा सह ध्वजबाहुनामा गृध्रः क्रोधननामा वकश्च कूटगिरौ सोमपनामा चकोरो देवसे
ननामा वराहश्च मैनाके भद्रकाख्यो भारद्वाजो रोहिताक्ष्ययोगावयश्च सह्यगिरौ चारुस्वावाङ्कयः कपोतो रविरंगादनामकः
शाल्यश्च श्रीशैले उग्रबुद्धिनामक धात्रा सह मित्रवर्माख्यः श्येनो विजयबाहुनामा भल्लूकश्च महेंद्राचले सुबुम्नाख्यः क्रौंचो

११ ३

विचित्रबाहुनामकश्चित्रस्य॥ विंध्याचले दीप्तिमदभिधो मकरध्वजवाकः सुवीरनामा व्याघ्रस्य॥ गोवर्धने सुचित्रनामा मयूरो सुगंधव
नामापिको विचित्रनामा कुरंगस्य॥ नीलाचले सातिकाख्यश्वानको दुर्जयनामा शंबरस्य॥ इंद्रनीलगिरौ नीलकंठाभिधः हीरपही
जयसेनाख्यकरभस्य॥ हैमवने सत्कृतिनाम कोगधोवायसेंद्रनामा वानरस्य॥ नोनाद्रावारामनामा प्रसिद्धो हंसकोदृदृहाडुना
मागोकर्णस्य॥ देवगिरौ सुभूताख्यः सारसो विजयाभिधः शारिकाजातिश्च॥ ऋष्यमूकगिरौ सत्यसंधाख्यः कलहंसः सुलोचननना
मासुको मम पितृव्यपुत्रस्य॥ कूटगिरौ चित्ररथाख्यस्तित्तिरिः सुसुखनामकः खंजरीटस्य॥ गंधमादनगिरौ पहिराडाक्रू यो गरुडो
हितात्राख्यः सिंहस्य॥ मानससरोवरे सहजानंदाख्यो हंसस्तत्समीपवर्तिवने वीरसेनाह्वयः खङ्गः इत्येते मम पहिणः एतेषु स्थानेषु नि
वसंतीति॥ इत्थं हैतादित्यदत्तिणायनेन मधुकरार्के मधुपकुमुदसंवादे तत्त्वत्पशुपहिणां जातिनामस्थानसंग्रहो नाम दशमोऽरश्मिः

॥ ॥१०॥ ॥ ॥ ॥इति मधुकरार्कः समाप्तः ॥ ॥ ॥

॥ ॥ ॥ ॥ श्री॥

द्वि०
१२
12

ॐ श्रीगणेशायनमः ॥ अथद्वितीयार्कःप्रारंभः ॥ आत्मारामउवाच ॥ हेमधुपर्कोन्नात्वगामनसस्समुदायएकादशभेदसंप्रदायिनः पंचभे
दवादिनः ॥ तेषामेकादशानांमध्येपद्धिराट्हंसश्चेतिद्वावेतशिरोमणी ॥ तयोः प्रत्येकंचत्वारः शिष्याः ॥ तत्रदीप्तिमान् ॥ इध्मवाहः ॥
भद्रकः ॥ सद्युम्नश्चेतेपद्धिराट्छिष्याः ॥ सत्यसंधः ॥ सुव्रतः ॥ सत्यमतिः ॥ चित्ररथश्चेतेसहजानंदशिष्याः ॥ देवसेननामकोवराह
स्तस्यशिष्यः ॥ सुबुद्धिनामकः शृगालः ॥१॥ रोहिताख्यनामासिंहस्तस्यद्वौशिष्यौविचित्रनामाचित्रः सातिकाख्यश्वानकश्च ॥२॥ उदार
धीनामाकपिस्तस्यशिष्योभ्रान्त्याख्यवृषसेननामा ॥३॥ जयसेननामाऋष्यस्तस्यशिष्योरोहितनामागवयः ॥४॥ वीरसेननामावेडूस्त
स्यशिष्योरविरोगदनामाशल्यः ॥५॥ सुवीरनामाव्याघ्रस्तस्यशिष्योदुर्जयनामाशंबरः ॥६॥ विजयबाहुनामाभल्लूकस्तस्यशिष्यो
वृहद्बाहुनामागोकर्णः ॥७॥ विजयनामासारिकाजातिस्तस्यशिष्यः सुलोचननामाशुकः ॥८॥ सुचित्रनामामयूरस्तस्यशिष्यो
सुगंधनामापिकः ॥९॥ एतेषांनवानांमध्येदेवसेनोरोहिताख्योजयसेनश्चेतेपद्धिराजस्यसवायः ॥ वीरसेनः सुवीरश्चैतेसह
जानंदस्यसावायौ ॥ अथपंचभेदवादिनांनामानि ॥ तत्रैकोनीलकंठनामाशैवोभेदवादी ॥ द्वितीयः सोमपोवैसवोभेदवादी ॥ तृ
तीयः क्रोधननामातपस्वीतपएवश्रेयइतिमन्यमानः ॥ चतुर्थोवायसेंद्रनामाकाकः पूर्वंनास्तिकसंप्रदायस्थित्वानंतरंशैवमी
मांसाशास्त्रमधीत्यतदेवपरमितिमन्यमानः ॥ पंचमउग्रबुद्धिनाम्नास्वशाखासहमित्रवज्ञामाइंद्रियजन्यसुखप्राप्त्यर्थंपरदारग
मनसुरापानादिकंकृत्वापियतिंद्वैतशास्त्रमधीत्यात्मनः संगशुद्धंनिर्विकारस्वरूपत्वान्नसुरापानादिकमात्मनः शुद्ध्या
दिसंपादकंनभवतीत्येवंबहिरभेदभावंदर्शयन्लोकान्मोहयति ॥ तेषांपंचानांमध्येनीलकंठः सोमपश्चस्वीयपारंपर्येणसगुण
तयाशिवविष्णूपासकत्वेनभेदवादिनावेवस्थितौतथैववायसेंद्रोपिभेदवादेवस्थितः ॥ मित्रवाक्क्रोधनश्चपद्धिराजानुग्रहेणतपो १२

निष्ठातोऽनन्ताभेदवादाच्च निरूप्य पारमार्थिकाभेदसिद्धिं शास्त्रं वंतौ ॥ एतयोरेतत्समाचारं विस्तरेण पहिराजोपाख्यानेन वक्ष्यामि मि
त्रवक्त्रोताग्रबुद्धिस्तु सहजानंदोऽनुग्रहेणाद्वैतसिद्धिं प्राप्तस्तत्समाचारं सहजानंदोपाख्याने विस्तरतो वदिष्यामि ॥ हेमधुपद्मदंती प
हिराजसहजानंदाद्येकादशाद्वैतवादिनामुपाख्यानेन तेषां संप्रदायरीतिं चैतेषां तत्तच्छिष्यैः संवादं च पृथक्पृथग्वदिष्यामि ॥ किं
च पहिराजसहजानंदयोश्चतुर्णां शिष्याणां समाचारं तयोरुपाख्यानमध्य एव वदिष्यामि परं तत्र यद्यपि द्वीश्रिमानपहिराजशिष्य
चतुर्णां
स्त्वयापितत्पितुः संप्रदायस्य पूर्वोक्तानेव संप्रदायतत्त्वात्समकुरत्वाच्च तदुपाख्यानमेव पृथग्वक्ष्यामि न कृत्स्नम् ॥ अथैतद्द्वादश
वद्विशिष्टोपाख्यानवर्णनक्रमः ॥ प्रथमं पहिराडुपाख्यानं द्वीश्रिमत्समाचारं विनान्तरेषां तरशिष्याणां समाचारेण सह तत्र नव रश्म
यः ॥ १ द्वितीयार्कः समाप्तः ॥ द्वितीयं जयसेनोपाख्यानं तत्रैको रश्मिः ॥ २ ॥ तृतीयमुदारधुरुपाख्यानं तत्र त्रयो रश्मयः ॥ ३ ॥ चतुर्थं
वीरसेनोपाख्यानं तत्र षड् रश्मयः ६ तृतीयार्कः समाप्तः ॥ ॥ पंचमं रोहिताश्वोपाख्यानं तत्र द्वौ रश्मी ॥ २ ॥ षष्ठं विजयोपाख्यानं तत्र
पंच रश्मयः ॥ ५ ॥ सप्तमं स्तुविश्रोपाख्यानं तत्रैको रश्मिः १ ॥ अष्टमं विजयबाहूपाख्यानं तत्र द्वौ रश्मी ॥ २ ॥ चतुर्थार्कः समाप्तः ॥
नवमं स्तुवीरोपाख्यानं तत्रैको रश्मिः ॥ १ ॥ दशमं देवसेनोपाख्यानं तत्रैको रश्मिः ॥ एकादशं सहजानंदोपाख्यानं तस्य शिष्याणां
समाचारेण सह तत्राष्टौ रश्मयः ८ पंचमार्कः समाप्तः ॥ द्वादशं द्वीश्रिमदुपाख्यानं चास्यैव समाचारेण साकं तत्र दश रश्मयः ॥ १०
षष्ठार्कः समाप्तः ॥ इयं दक्षिणायनसूचिका ॥ अथोत्तरायणसूचिका ॥ तत्रादौ सप्तमार्के श्रीहरिहरस्वरूपनिर्णयार्थं तत्तत्व
डुपहिसंवादे चत्वारो रश्मयः ॥ तदनंतरं पंचमरश्मिमारभ्य दशमार्कसमाप्तिपर्यंतं पहिराजद्वीश्रिमत्संवादः ॥ तत्रोत्पत्तिप्रकरण
एको रश्मिः ॥ ततः श्रीहरिहरस्वरूपनिर्णये मतद्वयनिरूपण एको रश्मिः ॥ ततः श्रीहरिहरास्वरूपविचारप्रस्तावे भगवद्वि

द्वि० विभूतिनिर्णये चत्वारो रश्मयः ॥ सप्तमार्कः समाप्तः ॥ ततः परात्परस्वरूपनिर्णयपूर्वकप्रलयनिरूपणपूर्वकश्रीहरिहरस्वरूपनिर्ण
१३ यार्थं पुनरुत्पत्तिप्रकरणे द्वौ रश्मी ॥ पुनर्विभूतिनिर्णये श्रीहरिहरस्वरूपनिर्णये च द्वौ रश्मी ॥ ततः सात्त्विकोक्तप्रश्नचतुष्टयसमा
13 धानएकोरश्मिः ॥ उमालक्ष्मीगिरां परप्रकृतित्ववर्णने मूलप्रकृतिनिरूपणे चैको रश्मिः ॥ पुनर्विभूतिनिर्णये द्वौ रश्मी पुनः शैवादि
मतत्रयनिरूपणएकोरश्मिः ॥ ततः सांख्यराजयोगतन्त्रिश्च निरूपणएकोरश्मिः ॥ ॥ अष्टमार्कः समाप्तः ॥ ॥ ततः स्वरूपनिरूपणे
द्वौ रश्मी ॥ ततोत्तानिनां मनसः सत्वप्रतिष्ठास्थापने चत्वारो रश्मयः परापरप्रकृत्यंशनिरूपणे परमतत्वबोधनिरूपणे च द्वौ रश्मी ॥
ततः प्रलयव्यवस्थानिरूपणएकोरश्मिः ॥ ततो वेदान्तादिविषयकबहुसंशयसमाधाननिरूपणएकोरश्मिः ॥ ॥ नवमार्कः
समाप्तः ॥ ततोऽर्थवादरीत्या श्रीभगवद्गीता छायाव्याख्याने दश रश्मयः ॥ समाप्तो दशमार्कः ॥ तदनंतरं सहजानंदसमस्तसंधसं
वादे भगवद्विभूतिविषये राजविद्यारहस्ये च द्वौ रश्मी ॥ ततो देवताप्रकरणे चत्वारो रश्मयः ॥ ततो येलेशोपाख्यायकथावर्णने
द्वौ रश्मी ततो वाचस्पतिमिश्रकथावर्णने द्वौ रश्मी ॥ ॥ एकादशार्कः समाप्तः ॥ ॥ ततो भगवद्विभूतिनिरूपणे श्रीकृष्णस्य परा
त्परत्ववर्णने चैको रश्मिः ॥ ततश्चतुर्थीचंद्रावलोकनदोषारोपणे भगवतो नीश्वरत्वसंशयनिवारणे त्रयो रश्मयः ॥ ततश्छांदो
ग्यैतत्तिरीयश्रुतिविरोधपरिहारएकोरश्मिः ततो ब्रह्मवल्लीछायाव्याख्याने द्वौ रश्मी ॥ ततः रुद्रवल्लीछायाव्याख्यानएकोरश्मिः
ततश्छांदोग्यषष्ठाध्यायवेदद्वयछायाव्याख्याननिरूपणपूर्वकं भद्रकस्य बहुसंशयसमाधानवर्णनएकोरश्मिः ॥ ततः शुभदस
भगवत्प्रार्थनया परमगतिप्राप्त्यनंतरं ग्रंथसमाप्तौ ग्रंथकर्तृगोत्रनामादिवर्णनएकोरश्मिः ॥ ॥ द्वादशार्कः समाप्तः ॥ ॥ छ ॥
इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के आत्मारामम धुपसंवादे ब्रह्मज्ञानपश्चपंक्तीणां व्यवस्थायाः दक्षिणोत्तरायणस्य च कार्याश्रनि १३ या २

रूपणंनामप्रथमोरश्मिः॥१॥ आत्मारामउवाच॥ यद्यपद्विराड्रूपाख्यानंतस्यशिष्याणांसमाचीर्णमस्त्येवंपद्विराजोनिरुपमः
सर्वेषांखगजातीयानांयेयेराजानस्तेषामपिराजेत्ययंराजराजइत्युच्यते॥ सकलपक्षिपक्षिणांपरमगुरुरपि॥ सतुश्रीहरिवाहन
गरुडवंशीयः॥ धर्मोराजनीतिश्चैतस्यमत्यवदातंविद्यो॥ मनसासकलवेदोक्तकर्माण्याचरन्मुमुक्षुशिष्याणांवेदान्तरहस्यंता
रकमंत्रंचोपदिशति॥ किंचराजसिंहासनेस्थित्वान्यायतोराजव्यवहारंकुर्वन्नपिव्यासपीठेस्थित्वासर्वपक्षिपक्षिभ्यःपुराणेति
हासाद्युत्तमकथाःश्रावयन्नपिमानसिवायत्तयागादिकर्मकुर्वन्नपिमुमुक्षुभ्योत्तानोपदेशंकुर्वन्नपिस्वरूपस्थितेर्नच्यवते॥
एवंससर्वदाबाह्यान्तःसमाधावखंडतयाविराजते॥ तस्यदेहोपिचैतन्यमयोजातोयदिचेतनाभूतंकंठजिह्वादिकंस्यात्तदापि
तस्यगुणानुवादोऽशक्यःस्यात्॥ चर्ममयीजिह्वादिनाकथंवाशक्योभवेत्॥ तस्मात्तद्गुणानुवादोनक्रियतेकिंतुयत्किंचित
त्समाचारवर्णनंकरोमि॥ तत्पितृपितामहादयःसर्वेब्रह्मनिष्ठाबभूवुः॥ पक्षिणांराजराजत्वमपिपारंपर्येणैवतत्कुलीनैःप्रा
प्तं॥ तस्यपितावितंगमराजनामापितामहस्तुखगेन्द्राभिधः॥ यद्यपिपक्षिराजःस्वतःप्रकाशवांस्तथापिस्वपितुःसकाशादेव
ब्रह्मविद्यांप्राप्तवान्॥ तस्मादाबाल्यादेतत्पर्यंतंतस्याविच्छिन्नतयात्मध्यानवादिकंज्ञानमस्ति॥ हेमधुपव्याकरणेपस्थितत्वं
तरंन्यायमीमांसाद्यध्ययनदशायांममशास्त्रेष्वतीवप्रीतिर्जाताआसत्वघुत्पत्तिरेवपराकाष्ठेतिनिश्चयोऽभूत्॥ तस्मात्तद्विषये
ऽहमहर्निशमासक्तोभूवं॥ मीमांसागौतमकणादसूत्राणिकंठोक्ततनिःस्थितानियद्यपिमदुरुहृदिनिमनन्दगृहेणैतस्यशास्त्रेष
वात्यासक्तिर्माभूदिति श्रीमद्गुरुब्रह्मचंद्रशाकेनमांबोधितवान्॥ तथाचभगवद्वाक्यमध्यात्मरामायणे॥ मद्भक्तिविमुखा
नांहिशास्त्रगर्तेषुमुह्यतां॥ नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि॥१॥ इत्यादिभगवद्वाक्यमधीत्यापिमोहवशात्रयात॰

हि° ज्ञात्वार्थ्यैन त्यातं तत्र यावदभिमानप्राबल्यान्न मोहो मया न त्यक्तः॥ अरे मधुप यदा दीप्तिमानं मां पक्षिराजदर्शनार्थं गृहीत्वा गतवा
१५ न् तत्र प्रथमदर्शनेन तन्नेत्रोत्थलोचनेन च भीतः सन् दूरादेव साष्टांगं प्रणम्य वेपमानः स्थितः॥ तदनंतरं मद्गुरुर्महत्त्वं ज्ञातं तत
न्निकटे निवेदितवान्॥ अयं तत्त्वज्ञश्च भूतः परं तु शास्त्रेष्वेव मोहितः॥ यद्यपीदं शास्त्रमात्रेष्वभिनिवेशं विहाय तत्प्रतिपाद्य
वस्तुन्यभिरतिं कुर्विति बोधितवान्॥ तथापि मद्वाक्येष्वेतस्य श्रद्धा न जाता॥ तस्माद्भवतः परमगुरुत्वाद्भवच्चरणसमीपमानी
तो भवत्प्रसादेनैतस्य मोहनिद्रा निर्भवेदिति॥ पक्षिराडुवाच॥ आत्मारामो वर्द्धिष्णुस्तत्त्वज्ञस्तु मोहं ज॰ मोहेन साकं परित्यज्य तेन
तत्काले रे मधुप मम संसारे विरक्तिः प्रादुर्भूता॥ तदनंतरं पक्षिराजो मामुवाच॥ यद्यत्त्वया त्वत्तत्त्वोपस्थितिस्तत्पठनीयमिति
तं कुर्वता मया पूर्वोक्तग्रंथेषु कानि चिह्नानि वाक्यानि पठितानि ततः पक्षिराजो मां समीपमाहूय मम वक्त्रसि जिह्वायां च स्वन
खाग्रेण कानि चिद्बीजाक्षराणि लिखित्वा पुनस्तानि वाक्यानि पठनीयानीत्युक्तवान्॥ ततोऽहं हर्षाल्लोचः पूर्वपठितान्यन्या
नि वाक्यानि पठितुमसमर्थोऽभूवं॥ तदुत्थं चयमपि विस्मृतं॥ परं तु तत्काले पठितानामीशादिदशोपनिषदामुपस्थि
तिर्ममज्ञानामहृदये सर्ववेदान्तरहस्यमपि स्थितमभूत्॥ ततः सर्वसंसाराद्विरक्तं सन्मच्चित्तं परमात्मनि मज्जितमभूत्॥ हे मधु
प एवं प्रकारेण तस्यापारमाहात्म्यं दृष्ट्वा मम चित्तं चकितमभूत्॥ यदा दीप्तिमता साकमहं पक्षिराजसमीपं गतोऽस्मि तदा तत्र दा
त्तयेष्व वाङ्कः स्वभ्रातरं वीतमन्युं श्रीभगवद्गीताः पाठयन् स्थितः॥ तच्च वीतमन्युर्द्वितीयाध्यायस्थस्य॥ यदा संहरते चायं कूर्मोऽङ्गानी
व सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति श्लोकस्य भावार्थे संदिग्धः सन् भ्रातरं पप्रच्छ॥ ततश्च बाहुस्तस्य सम्यक्
समाधानं वक्तुमसमर्थः सन् भ्रात्रा सह पक्षिराजं विज्ञापयामास भो गुरो वीतमन्युना यदा संहरते चायमिति श्लोकार्थ एवमाक्षेपः १५

कृतः॥ अत्र श्रीभगवतेंद्रियार्थेभ्य इंद्रियाणामाकर्षणे कूर्मावयवाकर्षणं दृष्टांतत्वेनोक्तं॥ तत्र कूर्मेण सर्वदाऽवयवाकर्षणं कृत्वा
न स्थीयते किंतु कदाचित्प्रसारणमपि क्रियते॥ ज्ञानिनस्तु विषयेभ्य आहृष्टानामिंद्रियाणां पुनर्विषयेषु प्रसारणमनुचितमि
ति विषमो दृष्टांत इति॥ अहमेतदुपरि निर्दिष्टे दृष्टांते सर्वसाम्यमित्येकांशं गृहीत्वाऽवयवसंको[illegible]च इंद्रियाकर्षणे दृष्टांतत्वेनोक्त
इत्युत्तरमुक्तवानस्मि॥ यद्यपि कूर्मावयवसंकोच इंद्रियाकर्षणे दृष्टांतत्वेन कथितः स समीचीनस्तथापि पुनः कूर्मांगप्रसारवदि
ंद्रियाणां प्रसारणोऽनर्थः स्यादिति तेन पुनराक्षेपः कृतः॥ पक्षिराज उवाच॥ हे शिशोऽयं दृष्टांतो न विषमः किंतु यं राजयोगः सं
न्यासयोगो न भवति येन त्वया विषमो दृष्टांत इति ज्ञातः॥ राजयोगिनस्तु लोकव्यवहारार्थमिंद्रियाणां विषयेषु प्रवृत्तिरप्यपेक्षिते
ति कूर्मांगदृष्टांतः समानः कूर्मस्य स्वांगसंकोचप्रसारयोर्यथा स्वातंत्र्यमेवं राजयोगिनोऽपि स्वेंद्रियाणां विषयेषु संकोचप्रसार
योः स्वातंत्र्यमपेक्षितं॥ यदा व्यवहारापेक्षा तदेंद्रियाणि विषयेषु योजयेत॥ यदा तु निग्रहेच्छा तदेंद्रियाणि निगृह्णीयात्
निग्रहकाले मनस इंद्रियाणां च प्राबल्यं न भवेत विषयसंगलेशोऽपि न भवेत्ततो झटिति सर्वेंद्रियाणामेकदा संकोचविकासस्संभ
वार्थं श्रीभगवता कूर्मांगदृष्टांतो दर्शितः॥ एतच्छ्लोकेनैवाग्रिमस्य रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन्॥ आत्मवश्यैर्विधे
यात्मा प्रसादमधिगच्छतीति श्लोकस्य संगतिः॥ पुनः पक्षिराजं प्रति वीतमन्युना पृष्टं॥ भो गुरो श्रीमद्भगवद्गीतास्वष्टादशाध्यायस्थ
स्य सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे॥ समासेनैव कौंतेय निष्ठा ज्ञानस्य या परेति श्लोकस्यान्वयो मया न ज्ञातः॥ सोऽत्र प्र
हेण वक्तव्यः॥ पक्षिराज उवाच॥ हे शिशोऽस्य श्लोकस्यान्वय एवं भाति ज्ञानस्य या परा निष्ठा तस्याः सिद्धिं प्राप्तः सन् यथा ब्रह्माप्नो
ति तथा समासेन संक्षेपतो मे निबोध मत्तो निबोधेति॥॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के आत्माराममधुपसंवादे

हि· परिव्राडुपाख्याने द्वितीयो रश्मिः ॥ ॥ २ ॥ ॥ आत्मारामउवाच ॥ ॥ अथ परिव्राडुपाख्यानमध्ये भड्डकसमाचारवर्णनं ॥ परि
१५ 15 राजशिष्यचतुष्टयमध्येऽयं तृतीयो भड्डकनामा भारद्वाजः ॥ तत्पितृपितामहादयः परिव्राजपितृपितामहादीनामेव शिष्या बभू
वुः ॥ परं तु यथा परिव्राजस्य दीप्तिमाश्रियस्तथा नान्ये ॥ दीप्तिमद्रूपेतया भड्डके स्वल्पा प्रीतिस्तद्रूपेतया स्वगुणैः स्यात दूहर्येधमवा
हावल्या ॥ यदा भड्डको विद्यानिपुणो भूत्वा गुरुप्रसादेन शमदमादिसंपन्नो ब्रह्मविद्यायोग्यतां प्राप्तस्तदा परिव्राजं पप्रच्छ ॥ भो गुरो
तत्वमस्यादिमहावाक्यैर्जीवब्रह्मणोरैक्यं श्रुतिप्रायेतेन तत्कथं संगच्छते तत्र्याहि ब्रह्मातीन्द्रियं विषयातीतं सर्वज्ञं सर्वशक्तिमदानं
दरूपं सुज्ञस्वरूपं च ॥ जीवस्त्विंद्रियलोलुपो विषयासक्तः किंचिज्ज्ञोऽल्पशक्तिमान्दुःखमयः संसारबद्धश्चेति कथं ब्रह्माभि
न्नो भवेत् ॥ ॥ ॥ परिव्राडुवाच ॥ ॥ ॥ हे शिष्य जीवस्तु स्वरूपानुभवार्थमेव प्रादुर्भूतो नान्यप्रयोजनार्थं विपरीतभावनयेदं विस्म
त्याव्यक्तगुणान् प्रकटीकृत्य तेष्वेव बद्धो जातः ॥ इंद्रियगुणान् विषयांश्च प्रकाशयते ष्वप्यासक्तः सन्मुह्यति ॥ इंद्रियाणि विष
याश्च जडत्वाच्चैतन्यं बद्धुं न शक्नुवंति किं तु यमेव जीवो भ्रांत्या स्वयमेव स्वस्मिन्बद्धोऽहं पतितोऽहं दुःखोऽहमित्येवं मन्यते ॥
केन चित्याशादिना बद्धश्चेन्न च्छेदनेवान्नैश्शक्नुयात्तु च चित्स्वरूपादेपतितश्चेन्न तदुद्धर्तुं शक्नुयात् ॥ स्वतन्त्र आनंदस्वरूपस्य
किंचिद्बाह्यं दुःखमस्ति चेत्तन्निवारणोपायं कर्तुं शक्नुयात् ॥ सद्गुरुप्रसादादेवं प्रकारां भ्रांतिं निहत्य च स्जीवः स्वयं ब्रह्मैव
यतो मूलाविद्ययाजीवोऽस्य स्वस्वरूपस्याहतत्वाद्भूत्तः सर्वज्ञः सर्वशक्तिमानपि किंचिज्ज्ञोऽल्पशक्तिमांश्च भवति ॥ त
स्माद्गुरुद्भूपां विनास्याविद्यावरणनिवृत्तिपूर्वकस्वरूपप्रकाशो न जायते ॥ भड्डकस्त्वेतच्छ्रवणेन विगतसंशयो भूत्वा श्रीभ
गवद्गीताशास्त्रे किंचित्पृष्टवान् ॥ भो गुरो श्रीभगवद्गीताषष्ठाध्याये ॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि

वक्रः त्वं स योगी परमो मत इति॥ अष्टादशाध्याये तु यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इमांल्लोकान्न हंति न निब
ध्यत इति च वर्ण्णिते॥ एतच्छ्लोकद्वयार्थपर्यालोचनेन परस्परविरोधो भासते॥ यद्यपि प्रकरणभेदात्तात्पर्यभेदेन विरोधो नास्तीत्युच्यते
तर्हि श्रीगीताशास्त्रस्यैव वाक्यता न स्यात्॥ अतः कृपया यथा विरोधपरिहारः स्यात्तथोपदेष्टव्यं॥ पतिराज उवाच॥ हे शिष्याष्टा
ध्यायस्थश्लोकस्य तात्पर्यमेवं॥ सुष्टावक्रः त्वयोर्मनोधर्मत्वेनात्मधर्मत्वं नास्ति तावतात्मधर्मौ भ्रांत्यात्मन्यारोप्येते॥ तानीत्वं धांते
रनात्मबंधना त्तमुक्तः केवलात्मभूतः॥ यथा स्वात्मानं सुष्टावक्रः त्वादिरहितं पश्यति तथापरात्मानमपि॥ अत्र मतद्वयं
सांख्यराजयोगभेदेन॥ तत्र सांख्यमते एवं स्वस्य हंतृभावशून्यत्वेन परस्यापि हंतृभावो नास्तीति परमप्यात्मानं त्वेवं पश्यति॥ अतस्त
स्य युद्धादिरान्यव्यवहारादिप्रयोजनं नास्ति॥ तस्मादात्मवत्सर्वस्यापि सुष्टावक्रः त्वादिसंबंधो नास्तीति पश्यतीति॥ राजयोगमते
त्वेवं राजयोगिनां सांख्यानामिवाऽत्मैकत्वज्ञानं संसारिणामिव व्यवहारज्ञानं च वर्ण्णिते॥ यः सज्जनः [illegible] स्वेन साकं मैत्रीं करो
त्ययं सर्वेणापि साकं मैत्रीमेव करोतीति तस्मिन्प्रीतो भवति॥ यस्त्वसज्जनः स्वेन सह द्वेष्ट्ययं सर्वेणापि द्वेष्टीति तस्मिन्स्वयमपि द्वे
ष्टीति अष्टादशाध्यायस्थश्लोकस्य तात्पर्यं त्वेवं॥ स्वकार्यसाधनार्थमन्यायेन निरपराधिलोकहननतात्पर्यवानयं श्लोको न भव
ति किंतु लोकसंरक्षणार्थं विधिपालनार्थं च युद्धादिप्रसंगेन तत्रात्मानमायुधादिवत्कारणमात्रं मत्वा तत्तत्प्राणिकर्मानुसारे
णमद्वारा परमात्मैवैतेषां हंतेति मत्वा शत्रून्हत्वापि मयैतादृशवधेन पापं प्राप्तमिति पश्चात्तापेन यो न लिप्तो भवति स लोका
न्हत्वापि हंतृत्वधर्मादिविमुक्तः स बद्धो न भवतीति॥ तस्मादेतादृशतात्पर्यवत्त्वेनानयोः श्लोकयोर्विरोधलेशोऽपि नास्ति भद्र
कण्ठस्तमाधानं श्रुत्वा विगतसंशयः सन्स्वरूपलक्षणमात्मरहस्यं चोपदेष्टुं पुनः प्रार्थयामास॥ ततः पतिराजः प्रसन्नस्स

द्वि० मुवाच सर्वेषु चराचरेष्वात्मैव तत्त्वं तस्मान्नगाधिपतिं विग्रहद्वैतं तस्मिन्सर्वस्मिन्नात्मैव व्यापकोऽनुस्यूत इति नु भव ॥॥ ॥
१९ भद्रबाहुरुवाच ॥॥॥ भो गुरो सर्वत्रात्मैव तत्त्वं चेदात्मनः किं तत्त्वं स्यात् ॥॥॥ वसिष्ठ उवाच ॥॥॥ सर्वेषामात्मैव तत्त्वमिति आत्मन
१० स्तत्त्वं त्वात्मैव स्वे महिम्नि प्रतिष्ठित इति श्रुतेः ॥ स्वात्मापरिमाणपरिच्छ्यामतीतः ॥ अहंकारसत्वे संगोऽहंकाराभावे स समीपस्थो
न तु हंभावाद्विलक्षणः ॥ सर्वस्मादूर्ध्वं न तत्तस्माधः कश्चिदन्योऽस्ति सर्वेषामधो न तत्तदुपरि कश्चिदन्योऽस्ति सर्वानाहृत्य तिष्ठति न त
तन्मध्ये कश्चिदन्योऽस्ति सर्वस्मादतीतो न तत्कश्चिदपि तदन्योऽस्ति स सर्वमनन्तं तत्समदृशः कोपि न्योऽस्ति ॥ अव्यक्तश्चाप्रतिमश्च
न तु प्रत्यक्षः प्रसिद्धाप्रसिद्धतरो न तु ग्राह्यः ग्राह्यादुत्तमो न तु प्राप्यः ॥ सगुणः केवलो नित्यो ह्यप्रमेयो निरंजनः ॥ अतीतः
सर्वदृक् सत्यः शुद्धो बुद्धः सनातनः ॥१॥ निर्वैरश्च निराधारो धाता सर्वाधिपः शमः ॥ अविरोधो निराकारो भूतात्मा भूतभाव
नः ॥२॥ सर्वभूताधिवासश्च एको देवः पुरातनः ॥ सर्वभूतेषु गूढश्च चेता देवश्च निर्गुणः ॥३॥ अनिर्देश्योऽच्युतश्चैव कूटस्थः
पावनो विभुः ॥ कर्माध्यक्षः स्वराध्यक्षः सर्वाध्यक्षस्तथाव्ययः ॥४॥ अक्षरः पुरुषः साक्षी अव्यक्तोऽनंत एव च ॥ प्रभापुंजश्च
तेजोब्धिः कांतिसीमा च चेतनः ॥५॥ पूर्णोऽखंडः पुराणश्च ह्यानंदः पुरुषोत्तमः ॥ परमात्मा परब्रह्म निर्मलोऽप्रतिमः प्रभुः
॥६॥ अपारो निर्भयश्चैव तत्त्विमात्रस्ततो बृहत् ॥ शुद्धोऽवर्णोऽशरीरश्च सदसत्परमुच्यते ॥७॥ निर्द्वंद्वोऽगोचरः प्रत्यङ्नि
राकारो निरंतरः ॥ अनवद्यः पराधारो निरालंबो निराश्रयः ॥८॥ व्यक्ताव्यक्तस्वरूपः समष्टिव्यष्टिरूपवान् ॥ यत्सान्तरा
णि भूतानि ह्यवेद्यः सर्वगोऽपि सः ॥९॥ अनन्यश्चाविनाशी चापरिच्छिन्नस्तथाद्वयः ॥ अलेपोऽनश्वरोऽगम्यो ह्यग्राह्यः शा
श्वतो महान् ॥१०॥ सत्यश्च सच्चिदानंदो विधाता बाध्यरावच ॥ अविच्छिन्नः स्वतः सिद्धो जीवजीवः परात्परः ॥११॥ सर्वे

पश्यत्यचक्षुः सन्नकर्णो विमुक्तोतिसः ॥ अपाणिः सन्गृहीता च जवनश्चाप्यनंघ्रिमान् ॥ २२ ॥ यतो जन्मादि जगतो येन सर्व
मिदं ततं ॥ स एव जगदाधारो जगच्च जगतः परः ॥ २३ ॥ समस्तावरणातीतो निरधिष्ठोऽजरोऽव्ययः ॥ स बाह्याभ्यंतरो व्यापी ह्यक्ष
रात्परतः परः ॥ २४ ॥ असंगः पुरुषश्चैव स्वरूपश्चिद्घनः परः ॥ प्रभुर्भर्त्ता सुहृद्बंधुर्निवासः शरणं गतिः ॥ २५ ॥ अहंभावाद्
दूरोयं समीपोऽहमभावतः ॥ अहं सिद्धोऽहमाढ्यश्च भक्तानां वल्लभस्ततः ॥ २६ ॥ पक्षिराजो नामिदं सर्वं श्रुत्वा मद्गुकः
समाधानचित्तो जातः ॥ ततोऽभ्यासद्वारा परां सिद्धिमवाप ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के आत्माराममधुपसंवादे प
क्षिराडुपाख्यानमध्ये मद्गुकसमाचारवर्णनं नाम तृतीयो रश्मिः ॥ ॥ ३ ॥ ॥ ॥ आत्माराम उवाच ॥ ॥ अथ पक्षिराडुपाख्यानमध्ये सद्यु
म्नसमाचारवर्णनं ॥ सद्युम्नस्तु स्वकुलपारंपर्येणैव स्वःपरं तु भेदवादी ॥ तत्पिता क्रौंचकपोतजातीयानां गुरुः ॥ सद्युम्न
स्य विद्यासाधनादिप्राप्तेः प्रागेव तत्पिता परलोकं प्राप्तः ॥ यद्यप्ययं सद्युम्नो विद्यासाधनादिसंपन्नो न जातस्तथापि क्रौं
चकपोतजातीयाः सर्वे तत्पितरि यथा गुरुत्वमन्यमानाः प्रतिष्ठामकुर्वंस्तथास्मिन्नपि तद्भावमकुर्वन् ॥ सद्युम्नस्तु स्वपात्र
त्वादेव प्रकृतिमत्वाच्च तदुभयजातीयकृतसन्मानेनाविष्कृतस्तन्मध्ये ये श्रद्धावंतस्तान्सर्वान्समीपमाहूयोवाच ॥ अहं सत्य
वादी धर्मरतस्तस्माद्युष्मभ्यं तद्वदामि ॥ यूयं सर्वे मोक्षार्थिनस्तस्मान्मयायं ब्रह्मरसः तत् इति विख्यासंज्ञातास्सन्मानेनावृणुत ॥ अहं तव
स्तु नस्तत्त्वज्ञानहीनः यथा भवंतोऽज्ञाननिवृत्तिं प्राप्स्येच्छंतीति तथाहमपीच्छामि तस्माद्यूयं सर्वे इतो गत्वानेकप्रदेशेष्वन्वे
षणं कृत्वा यत्र ब्रह्मभूतान्स्त्रुवत्तो गुरुर्वर्त्तेतेनं शरणं प्राप्य स्वात्मानं तस्मै समर्पयिष्यामः ॥ चारुमुखनामककपोतं विना
ते सर्वे तद्वाक्यं श्रुत्वा तं साधु [illegible] साध्विति प्रशंसंतस्तदंगीचक्रुः ॥ सद्युम्नस्तु ज्ञानी किं करोमि क्व गच्छामीति चिंतयन्स्व

द्वि १८ प्राप ततस्त्वेकस्त्वपितरं दृष्टवान्॥ ततस्तत्पिता तमुवाच हे पुत्रास्मत्कुले साधु साधु त्वं धन्योऽसि॥ अस्मिंस्तारुण्ये स्वानंदं प्राप्या
पि विषयसुखं हित्वा स्वमाहात्म्याद् विमुख्य गुरुत्वाभिमानमपि परित्यज्य सद्गुरुशरणं प्राप्नुमिच्छसि तस्मात्त्वयि भगवत्प्रसादो
17 जातः॥ त्वं सद्गुरुमिच्छसीदानीं लोके पत्रिराजः परमसिद्धो देशवावरस्तस्मात्त्वं तच्छरणं गत्वा स्वात्मानं समर्पय ततस्तव म
नोरथसिद्धिर्भविष्यति एतस्मिन्नंतरे स उत्थाय तान्निर्हेगमानाहूय त्वप्रदृज्ञांतमादृत तदुत्तरदिवसे तैः सार्कं पत्रिराजस्या
नंगंधमादनमगमत्। पत्रिराजस्तत्तदागमनं तत्स्वयोजनं च तान् दृष्ट्वा ज्ञात्वा तान् तन्मानार्थं भद्रवं प्रेषयामास॥ स तत्र गत्वा तं सत्कारेण
नीतवान्॥ स आगत्य पत्रिराजं साष्टांगं प्रणनाम पत्रिराजोऽपि तमालिंग्य महाप्रसादं कृतवान्॥ स तन्निकटे तं स्थापयित्वा स
र्वविद्यासु निपुणं ज्ञात्वा ततस्तस्य साधनचतुष्टयसंपत्तिं संपाद्यात्मोपदेशं कृतवान्॥ कदाचित्पत्रिराजस्तत्परीक्षार्थं तमु
वाच त्वयेतराणि शास्त्राण्यधीत्य वेदांतशास्त्रमप्यधीतं तदध्ययनात्सावकाशं त्वं स्वात्मानं कीदृशं ज्ञातवानिदानीं कीदृशं स्थाप
यसि॥ स उवाच॥ विद्याध्ययनपूर्वं सर्वसाधारण्येनाहं मध्ये कोऽपि जीव इत्यात्मानं ज्ञातवान्॥ अधुना तु तत्त्वमस्यादिमहावाक्य
श्रवणेन शास्त्रीयं जीवब्रह्मणोरैक्यज्ञानं जातं परं त्वहमात्मानं यथापूर्वं तथैव जानामि विशेषं तु न पश्यामि॥ तस्माद्यथा मम मा
हैतानुभवो भवेत्तथा मामुपदिश॥ पत्रिराडुवाच॥ यदहमस्यं तदहंपदलक्ष्याभिन्नं॥ अहंपदवाच्यो जीवो लक्ष्यं तद्ब्रह्म त्वं तु तदु
भयवेत्ता॥ एवं च वाच्यलक्ष्ययोस्तदुभयवेत्तृभेदेनाहंपदार्थस्य त्रैविध्यं निष्पन्नं ततस्तन्मध्ये कोऽहमिति विचारय॥ स तु पुत्रस्त
च्छ्रुत्वा चकितस्तूष्णीमासीत्॥ पत्रिराडुवाच॥ हे सत्पुत्र ममेमानि बुद्ध्यहंकारमनश्चित्तानि ममेमानि चक्षुःश्रोत्रादीनी
न्द्रियाणीदं मे वपुरहं च मिदं मे गृहमिमानि मम बालगोत्रजातिवर्णाश्रमनामानीमाः प्रजा इमानि भूतान्ययमिह लोकः स पर १८

लोकाश्चमेमनुष्याःस्त्रदेवैस्सविल्लस्सशिवस्सविरिंचिस्सशक्रस्संदेवीसागीरसौसूर्योऽयंचंद्रमाः सर्वेषुचराचरब्रह्मांडेषु
स्वदेहेचाऽपीदंप्रयोगस्तत्त्वयोगश्चापिवर्त्ततेयस्मिन्नहंप्रयोगस्सकोवा॥ सर्वेषष्ठीसंबंधिनोयानिस्संबंधः प्रथमःसकोवा
सर्वेषुप्रत्यक्षगोचरायस्मिन्नस्मत्प्रत्ययोवर्त्ततेसकोवा॥ शत्रुघ्नउवाच॥ ब्राह्मणोहंगौतमीयोहंमनुष्योहंबुद्धिमानहमेते
षट्प्रत्ययोस्ति॥ पक्षिराडुवाच॥ एतेसर्वेसंबंधसकाशादस्मत्प्रत्ययाभवंतियथावाचकसंबंधाद्देवदत्तोजातिसंबंधान्नब्राह्म
णोगोत्रसंबंधाद्गौतमीयोनरदेहसंबंधान्मनुष्यः पशुदेहसंबंधात्पशुर्बुद्धिसंबंधाद्बुद्धिमानयोनिःसंबंधोहमस्तिसोहंको
वा॥॥ शत्रुघ्नउवाच॥॥ निःसंबंधिवाभवद्धिवस्तितोहंपदार्थोजीवः स्यात॥ पक्षिराडुवाच॥ जीवोपिनामविशेषस्तस्मि
न्जीवेप्यंतःकरणसंबंधः॥ जीवस्येश्वरःकारणं॥ अयंजीवस्सईश्वरउभावपीदंशब्दे तच्छब्देचवर्त्तेते॥ त्वंनुजीवेश्वरौवे
त्सितस्मात्त्वपिसउभयवेत्ताहंकोवा॥ इमंशब्दमयमाकाशमपिवेत्सीदंश्रोत्रंचशब्दश्रोत्रयोस्संबंधमपिवेत्सीमंस्पर्शमयवा
युमपिवेत्सीमांत्वचंचत्वक्स्पर्शयोस्संबंधमपिवेत्सि॥ इमंरूपमयवह्निंचवेत्सीदंचचक्षुश्चचक्षूरूपयोःसंबंधमपिवेत्सी
दंरसमयजलमपिवेत्सीमांरसनांचरसनारसयोस्संबंधमपिवेत्सि॥ इमांगंधमयींपृथिवीमपिवेत्सीदंघ्राणंचगंधघ्राण
योस्संबंधमपिवेत्सि॥ एतानिशब्दश्रोत्रादीनिसंबंधादीनिचयोवेत्तितस्यवेत्तुर्यस्साक्षीसत्वमेव॥ शत्रुघ्नउवाच॥ हेप
भोप्रनष्टविस्तरतस्तद्विलक्षणमहंपदंबोधनीयं॥ पक्षिराडुवाच॥ सोहंपदार्थः सर्वेषुचराचरेषुव्यापकोस्तितस्माहंत्व
स्याज्ञानात्सर्वाणिभूतानिवि(देवदत्तोहंब्राह्मणोहंमनुष्योहमितिकल्पंतेईदृगहंत्ववाधेसतिसोहंविजृंभते॥ युष्मदस्मदोः
सर्वमिदंजगदिति॥ अस्मत्प्रत्ययेकेवलमहंपदंप्रसिद्धंयुष्मत्प्रत्ययेतदिदंचतिष्ठौभागाविदंशब्देइहलोकस्तच्छब्दे

द्वि० परलोकस्तयोरुभयोर्वेत्तास्मन्नत्ययसिद्धोहमस्मि ॥ योहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वा
१८ हेति श्रुतेः एतत्कल्पितमारोपितं संबंधविशेषमहं त्वं तत्पथ्येवत्यद्भुते सति तन्निजाहं त्वं यथास्वप्रकाशोस्ति तथैव तत्वानन्य
18 भावे विज्ञेयमतः इति ॥ स्तुबुस्तु एतत्सर्वं श्रुत्वा विगतसंशयः सन्पक्षिराजपादयोः पपात ॥ ततो गुरूपदेशानुसारेणाभ्यासद्वा
रात्स्वस्वरूपसाक्षात्कारो जातः ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के पक्षिराडुपाख्यानमध्ये स्तुबुस्तुसमाचारवर्णनं ना
म चतुर्थो रश्मिः ॥ ॥ ॥४॥ ॥ ॥ आत्मारामउवाच ॥ अथ पक्षिराडुपाख्यानमध्ये इध्मबाहुसमाचारस्तस्य स्तुबुमन्युनामभ्रातुः स
माचारेण सह वर्णनं ॥ इध्मबाहुर्दृढस्तेषु बाले जातः ॥ तस्मिन्काले पक्षिराजे भक्तिमानभूत्तस्य यदा कदाचित्संदेहो तेषु यस्मिन्काले स्मिं
श्चित्स्वकरणे संदेहश्चेत्तिं च साधनाभ्यासावस्थायामेवैकावस्थांप्रति नत्वावस्थांतरप्राप्तौ येये संशयाश्च बभूवुस्तान्सर्वा
न्भक्तिभावेन पक्षिराजनिकटमागत्य विज्ञाप्य तत्प्रसादान्निवृत्तसंदेहोऽभवत् ॥ पक्षिराजोऽपि तस्मिन्प्रसादमकरोत् ॥
स त्विध्मबाहोः स्तुबुमन्योश्च बाल्यदशायामेव परलोकं गतः ॥ ततः स्तुबुमन्युर्विषयासक्तो बभूव तत्समाचारं त्वग्रे वक्ष्यामि ॥ इ
ध्मबाहुर्बाल्यावस्थामारभ्य सुशीलः परं तु बाल्यात्स्वपितृसंनिधौ विद्याभ्यासं साधनाभ्यासं च न कृतवान् ॥ तन्माता वि
चक्षणाभूदेनं विद्याभ्यासादिविमुखं दृष्ट्वा पक्षिराजसमीपे नीत्वा तस्मै समर्प्येदमुवाच ॥ अयं बालको भवच्चरणपातितः ॥
एतत्पितृसंप्रदायरीतिस्तन्नाम च यथा प्राप्स्यते भवेत्तां तथैतस्मिन्ननुग्रहं कुरु ॥ पक्षिराजोऽपि तं स्वसमीपे निवेश्य विद्या
द्यभ्यासं कारितवान् भक्त्या भोजनादिनापि पुत्रवत्पालयामास ॥ इध्मबाहुः कियत्काले विद्याद्यभ्यासतत्परो भूत्वा किंचिद्यो
ग्यतां प्राप्तः तदनंतरं पक्षिराज एतस्मात्समभक्षणं वारयित्वा गृहस्थोत्तरतः पक्षिचयोजयामास ॥ ततो वर्षचतुष्टयानंतरं

पुत्रावलोकनार्थं तस्मात्तानत्राजगाम ॥ उग्रतपसा मांसत्यागेन चास्थिचर्ममात्रावशिष्टं पुत्रं दृष्ट्वा संतप्तो बभूव ॥ ततः पक्षिराजसमी
पमागत्य तस्य मांसभक्षणं दृष्ट्वा तमुवाच ॥ हे पुत्र त्वं मांसं भक्षय यत्त्वपि मत्पुत्रं किमर्थं वा वितितवान् ॥ ततः पक्षिराजो भक्षितमांसा
ऽस्थीन्येकीकृत्य पाणिनोदकं प्रोक्ष्योवाच भगवत्सत्तया पुत्रं संजीवा भवत ॥ ततो यस्य पशुपक्ष्यादेरस्थीनि स्थितानि ते सर्वे मृ
गपक्षिणः सांगोपांगाः संजीवा उत्थाय विजह्रुः ॥ ततः पक्षिराजस्तमुवाच ॥ तव पुत्रस्यैतादृशं सामर्थ्यं यदि भवेत्तदा मांस
भक्षणयोग्यो भवेत् तस्मात्तेन तच्चरित्रं दृष्ट्वा प्रसन्नास्स्वगृहे ययौ ॥ अनंतरं तपश्चाद्यभ्यासेन परिपक्वसाधनः स ऊर्ध्वबाहुः स्व
स्यपद्यद्विषये संशयोऽभूद्देवांते गुरुं विज्ञाप्य तदुपदेशवाक्येन तत्तद्विषये गतसंशयो बभूव ॥ एवं गते कदाचित्कस्मिन्विष
ये संदिग्धः सन्गुरुमप्राक्षीत्पक्षिराजस्तदुत्तरं दत्तवान् ॥ तदुत्तरं ते वर्णयिष्यामि शृणु ॥ ऊर्ध्वबाहुरुवाच ॥ ब्रह्म बिंबोंतःकरणं
दर्पणं जीवः प्रतिबिंब इति बिंबप्रतिबिंबदर्पणानामेवावच्छेद्यावच्छेदकभावप्रत्तेपि त्रिपुटी संभवति ॥ एकमेवाद्वितीयमिति श्रुति
स्तु त्रिपुटीबाधिका ॥ एतस्यैकवाक्यता कथं ॥ पक्षिराडुवाच ॥ वस्तुत्रयं विना त्रिपुटी न भवति ॥ अंतःकरणं तु मायाविकारः
सा सा माया यत्कारणस्वरूपं तत्तत्पदार्थ इति कथं विजानीयात् ॥ ऊर्ध्वबाहुरुवाच ॥ या मा सा किमपि जननपित्रं कथं शक्या भवति ॥
पक्षिराडुवाच ॥ माया स्वतः काप्यस्ति चेत्तर्हि चिदपि जनयेत् ॥ किमपि नाजीजनत् जनयित्रीवद्भाति ॥ इदं तु किमपि नास्ति परं त्व
स्तिवद्भाति तस्मात्सदसदात्मकमिदं मिथ्येति सिद्धं ॥ यदि दर्पणं नास्ति तदा प्रतिबिंबः कुतो यदि दर्पणप्रतिबिंबावुभावपि न स्त
स्तदा बिंबवस्तु बिंब इति को ब्रूयात् ॥ ततस्त्रिपुटी कथं संभवति ॥ ऊर्ध्वबाहुरुवाच ॥ माया नास्ति चेत्कुत आगता जगद्धांतःकर
णं वा कथं जनयामास ॥ पक्षिराडुवाच ॥ ब्रह्म विना किमप्यस्ति चेत्तत्कस्मिंस्तिष्ठेत् का वस्य जननयित्र्यपि भवेत् ॥ यद्येकः केव

द्वि० लोनित्यशोभातितत्रकामायाकिंजगत्॥ यस्मिन्नेवसत्त्वविनोदेच्छासैवाद्भुतलीलाः निर्वचनीयामाया॥ तस्मात्तत्स्वयमेवबिं
१९ बःस्वयमेवदर्पणंचप्रतिबिंबरूपं॥ येषांदृष्टौसत्यवज्ञातितेषांभेदभावानांबिंबःप्रतिबिंबोदर्पणंचेत्युपास्योपासकोपास
19 नादिभावविकाराभांति॥ येषांदृष्टिरेवांसैवाद्वितीयमितिश्रुतिप्रतिपाद्यंपरमतितेषाममभेदभावानांबिंबप्रतिबिंबदर्प
णादिभावविकाराःक्षुताः॥ तेषांहृदयेऽखंडोनिर्द्वंद्वःशुद्धःकेवलएवभाति॥ ज्ञानिनोऽज्ञानिनांज्ञापकार्थमंतःकरणमं
तःकरणवच्छिन्नंचैतन्यंशुद्धंचेत्यंत्रिधादर्शयित्वादृष्टीकृत्वापुनर्मायांशोद्भूतविकारंमिथ्याभासंछित्वाचिद्रूपेकेवलेशि
श्रुमसज्जयंति॥ ॥ इध्मवाहुरुवाच॥ बिंबएवप्रतिबिंबइतिमयानिश्चितः॥ परंतद्दर्पणमपिबिंबइतिकथंमन्ये॥ पक्षिराडु
वाच॥ ॥ पाषाणोदर्पणंकृतः॥ दर्पणसर्गकालेस्रष्टृहृदयेदर्पणभावःस्फुरति॥ पुनःस्रष्टृवशात्क्रियाविशेषाच्चदर्पण
कारः प्रकटनितस्माद्दर्पणस्यस्रष्टृसत्ताविनासत्ताकथंस्यात्॥ तस्मिन्नेवजग ज्ञातिनोतत्त्वज्जगतितिष्ठति॥ यद्विनेदं
जगन्नास्तितत्स्वरूपंजगद्विना॥ २॥ इध्मवाहुरेतत्सर्वंश्रुत्वागतसंशयःकृतार्थोबभूव॥ ॥ ॥ ॥ इत्यैद्वैताद्वितीयेहंसिणा
यनेद्वितीयार्केपक्षिराडुपाख्यानमध्येइध्मवाहुसमाचारवर्णनंनामपंचमोरश्मिः॥ ॥५॥ ॥ ॥ आत्मारामउवाच॥ ॥ ॥ स्वम
न्युनामेध्मवाहुभ्रातापूर्वावस्थायांस्वभ्रात्रासार्वाकिंचिन्नपस्तताप॥ ततःप्रबलेंद्रियग्रामस्तेबलात्कारेणविषयेषुक्षिप्त
वान्॥ द्वैतवनस्थसकलपक्षिराजशाकुनिनामकस्यकन्यायांसमुमोह॥ तत्कन्यामनोऽपितद्दासत्वमभूत्॥ इध्मवाहुर्नामे
कोपायैःशिक्षितोपितद्दासत्वंनत्यक्तवान्॥ ततइध्मवाहुःपक्षिराजसमीपेस्वभ्रातृवृत्तांतंनिवेदयामासपक्षिराजस्त
माहूयविषयस्त्रवस्यनिकृष्टतांतत्तगतोमिथ्यात्वंचोपदिश्यपुनस्तंस्वमात्तापयामास॥ एतच्छ्रुत्वास्वमन्युरुवाच॥ राज्य १९

पल

शास्त्रार्थं भोगशास्त्रार्थं च जनैः स्वल्पः क्रियते॥ तदुभयमपि पूर्वं बहुततपसैव ज्ञातमितः परं तपसः किं प्रयोजनं॥॥॥ पद्मिराडु
वाच॥॥॥ रे मंदमते स्वात्मभोगशास्त्रार्थेन पश्यंति स्वात्मभोगशास्त्रेनेतरं भोजनतोन्नरं पर्णपानं च वन्नतपसः किं प्रयोजनं॥ त्वं
तृणभंगुरानात्मभोगेन तपो विनियोजयसि॥ तस्मात्त्वमतिर्विपरीतैव॥॥॥ सुमन्युरुवाच॥॥॥ आत्मभोगः कीदृशोऽना
त्मभोगः कीदृशस्तदुभयभेदं न जानामि स विस्तरेण वर्णनीयः॥ पद्मिराडुवाच॥ ॥ आत्मैव भवेन यथानंदमुपलभ्यते
स आत्मभोगः॥ संगीतालिंगनसौंदर्यास्वादनसुगंधविषयजन्यसुखानुभवोऽनात्मभोगः॥ सुमन्युराह घ्राणत्वक्श्र
वणानंतरं चक्षुरादीनां रूपादिजन्यसुखभोगाः किमर्थं न ज्ञायंते तस्माद्रूपादिजन्यसुखभोग आत्मन एव। पद्मिराडुवाच॥
चक्षुर्गोलककर्णशष्कुल्यादिकं नेंद्रियं किंतिंद्रियस्थानं स्थूलदेहसंबंधि लिंगदेहाद्भिन्नं॥ इंद्रियाणि तु लिंगदेहां
तर्भूतानि॥ यदा लिंगदेहः स्थूलादुत्क्रमति तदा चक्षुरादिसहितस्थूलदेहः प्रेतो भवति॥ तस्माल्लिंगदेहविही
नस्थूलदेहः कथं भोगार्हो भवेत्॥ यथायं स्थूलदेहो लिंगाद्भिन्नो जडस्तथा लिंगदेहोऽप्यात्मभिन्नो जड एव॥ परं तु
भ्रांतिजतादात्म्यात्त्वयं देहोऽस्मीति मन्यते॥ कर्मकांडदृष्ट्या स्थूलदेहस्य नश्वरत्वे नात्मभिन्नत्वेऽपि लिंगदेहस्य स्वर्गादिफल
भोक्तृत्वेनात्मत्वं मन्यते॥ त्वं तु स्थूलदेहमेवात्मानं मन्यसे यथा स्वाप्निकपदार्थानां भोक्तात्र तदिंद्रियाणि तद्विषयाश्च क
ल्पितास्तथैवायं भोक्तातानींद्रियाण्येते विषयाश्च सर्वे कल्पिता एव॥ अचक्षुःश्रोत्रं तदपाणिपादमिति अशब्दम
स्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यदित्यादिश्रुतिप्रामाण्येनात्मा चक्षुरादींद्रियेभ्यो रूपादिविषयेभ्य
श्चातीतः॥ विषयेंद्रियसंयोगाद्यत्सुखं जायते तदात्मन्यारोप्यते॥ ततो भ्रांतिजतादात्म्यादात्मन्यहं सुख्यहं दुःखी:

द्वि० २० त्वीति पश्चात्त्वियोन्नायते॥ अहं तु वीत्यादिप्रत्ययवांस्तु व्यावहारिकचिदाभासः स तु मिथ्यारूपः साक्षी तु सद्रूपः॥
तयोर्भेदमपराशक्तिराहृत्येति तस्माद्व्यावहारिकाद्बोधादिकं साक्षिणि त्वयारोप्य विषयासक्तो भवसि॥ तस्माद्विष
यासक्तिं परित्यज्य सद्गुरुशरणं व्रजसि चेत्तदा तत्सर्वं त्वया ज्ञास्यते॥ एतत्सर्वं श्रुत्वा स विषयसुखाद्विरज्य गुरुच
रणयोः पतित्वा स्वीयाविद्यामयपूर्वावस्थां निवेद्य त्वा गुरुं प्रार्थयामास॥ भो गुरो यथा मम स्वरूपसाक्षात्कारो भवे
त्तथा भवतोपदेष्टव्यं॥ ततः पक्षिराजः प्रसन्नो भूत्वा स्वमन्योर्वीतमन्युरिति नाम कृत्वा तमुवाच॥ हे वीतमन्यो य
त्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्वा ब्रह्म प्रत्यक्षमेव तस्मादिदं घटपटादिकं सर्वं प्रत्यक्षवज्जानाति॥ ब्रह्म रविसदृशं नि
त्यप्रत्यक्षमेव त्वं त्वविद्यावरणं त्वामोहरूपनिद्रया व्याप्तोसि तस्मात्त्वया न साक्षात्क्रियते रवौ साक्षाद्विद्यमानेऽ
प्यंधस्योलूकस्य चाप्रत्यक्ष एव॥ तथैव यथा स्वरूपज्ञानतो ये चक्षानचक्षुर्विहीनास्तेषां ब्रह्मणः साक्षात्त्वेऽपि
न प्रत्यक्षं॥ ये केवलमूढास्तेषामुलूकस्यादित्यवत्सर्वदा ब्रह्मणोऽभाव एव॥ ये शास्त्रज्ञास्तेषामंधस्यादित्य
वद्ब्रह्मणः शाब्दमात्रं ज्ञानं जायते॥ यदि सद्गुरुर्वैद्यकृतोपदेशांजनेनास्य चक्षुर्दोषो निवर्त्तते तदा ब्रह्म यथा
स्यात्तथैव साक्षाद्भवति॥ किं नाम साक्षात्कार इत्युक्तं चेत्साक्षात्कर्त्ता साक्षात्कारात्मकवृत्तिश्च साक्षात्मा च ब्रह्मणि विली
यते स एव साक्षात्कारः॥ अथैधनपश्चदारपुत्रमहाराज्यादैहिकसुखं स्वर्गाद्यामुष्मिकसुखं च कदाचित्कालभं
भवेत्॥ एतद्दृश्यं गुरुकटाक्षं विना सर्वथा दुर्लभमेव॥ इदं सर्वं श्रुत्वा वीतमन्युः कृतार्थो भूत्वा कियत्कालेन स्वश्रा
न्तत्वल्यावस्थां जातः॥ इत्यैतिहासे दक्षिणायने द्वितीयार्के आत्मारामपद्मधुपसंवादे पक्षिराजोपाख्याने मध्ये वीत

मन्त्रसमाचारवर्णनंनामषष्ठोऽध्यायः ॥ ६ ॥ आत्मारामउवाच ॥ अथपक्षिराडुपाख्यानमध्येमित्रवत्समाचारवर्ण
नं ॥ मित्रवद्गुरुवर्यश्रीगोः पारंपर्येणहितसंप्रदायः ॥ परंतुदुःसहवासेनस्वसंप्रदायात्परिभ्रष्टविषयासक्तोभवतः
ततोगुरुबुद्धिर्दत्तंतंमयैसहज्ञानंदोपाख्यानेवर्णयिष्यामि ॥ मित्रवांस्तुवासपचिच्छेदेनपक्षिणोभार्यामपहृतवान् ॥ स
श्येनः पक्षिराजनिकटेगत्वातदपराधवृत्तांतंविज्ञापयामास ॥ पक्षिराजोमित्रवंतमाहूयधर्मतो निर्णीयतद्भार्यां
तस्मैदापयित्वामित्रवंतमाह ॥ अरेमित्रवन्नवमुल्लिष्टकुलेजातः सन्नपिपयासेनविद्यामभ्यस्यपुनः स्त्रीलंपटोभूत्वें
द्रियकेस्तुविकथंलिप्तोसि ॥ एवंभूतस्यतवकथंश्रेयोभवेत् ॥ विद्ययागर्वितोमित्रवानेवंगुरुहृत्तंश्रुत्वापितस्यदेहा
कत्वप्रभुत्वहतमर्थंविहायधार्ष्ट्येनोत्तरंदत्तवान् ॥ मित्रवानुवाच ॥ ॥ इंद्रियाणिविषयाविषयस्त्वंचैतन्तसर्व
स्यात्मत्वेनकस्यत्यागः कर्त्तव्यइति ॥ पक्षिराजउवाच ॥ अरेसर्वस्यापिचिज्जडात्मकत्वेनतवविवेकशून्यत्वेनच
त्वमग्राह्यंग्राह्यमसिग्राह्यंत्यक्तमसि ॥ यथाचचक्षुर्दोषेणश्वेतशंखः पीतोभासतेतथातवबुद्धिदोषेणग्राह्यमग्राह्यत
याः ग्राह्यंग्राह्यतयाचभासते ॥ यावत्तवबुद्धिचक्षुर्दोषोगुरुरूपवैद्यानुग्रहांजनेननश्यतितावत्तवविपरीतभाव
नाननिवर्त्तते ॥ यथामद्यभांडसंलग्नमद्यवासनात्यंतजलक्षालनंविनानश्यतितथातवानेकजन्मविषयसंगजनि
तवासनागुरूपदिष्टमहावाक्यादिजलप्रक्षालनंविनाननश्यति ॥ रेमंदमतेयावद्विषयस्तुवस्यमिथ्यात्वंनिश्चष्ट
त्वंचदृष्टंतयानभासतेतावद्विषयेंद्रियादिष्वात्मत्वबुद्धिर्ननिवर्त्तते ॥ मित्रवानुवाच ॥ ॥ ममबुद्धिचक्षुषिदोषो
नास्तिममहृदयमपिशुद्धंतस्मात्किंशोधयामिगुरुरूपवैद्यंवाकिमर्थमन्वेषयामि ॥ चिज्जडात्मकस्यसर्वस्यत्व

स्यस्वरूपत्वेन कस्यचाग्रहणं त्यागं वा करोमि ॥ पिंगलिराडुवाच ॥ यथा परकीयानायिका स्वप्रियविषयकप्रीतिं गोपायति
तत्प्रीतिमितरे न जानन्ति पृथ्वीशोऽस्तु ज्ञायते तेन यथा न व्यभिचारिहृदयं सर्वैर्न ज्ञायते मा हृदेशैस्तु ज्ञायत एव ॥ तव हृदयम
पवित्रतया पूरितं तत्तज्ज्ञत्वयाऽस्मद्धं मन्यते यथा जात्यंधस्य नयनसत्त्वं इति नाम तद्वत् ॥ अरे यदुक्तं तच्चैतन्यमेव जड
स्यतच्चैतन्यारोपितत्वेन मिथ्यात्वं तथापि यावद् ध्यासं पदार्थत्वेन व्यवह्रियते स्वरूपसाक्षात्कारेण ध्यासनिवृ
त्तौ तत्त्वज्ञानमिति न ज्ञायते ॥ मित्रवानुवाच ॥ ॥ सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचनेत्यादिश्रुत्या सर्वस्यापि ब्रह्म
स्वरूपत्वेन ब्रह्मभिन्नवस्तुनोऽभावात् कस्य कस्मिन्नध्यासः कस्मात् कस्य निवृत्तिः ॥ इदं रजतमित्यत्रान्यत्र प्र
सिद्धरजतस्यैव भानं न त्वन्यत्राप्रसिद्धस्य शशशृंगादेरन्यत्र भानं तस्मादिदमन्यथाभानं न त्वसत्पदार्थारोपः ॥ ॥
पङ्गलिराडुवाच ॥ ॥ अन्यत्रप्रसिद्धस्यैवान्यत्र भानमिति यदुक्तं तन्न संभवति शुक्तौ रजतस्य संनिकर्षाभावात् ज्ञा
नाऽपरोक्षासंभवात् ॥ न च ज्ञानलक्षणया संनिकर्षत्वमस्तीति वाच्यं ॥ तस्य लिङ्गत्वे मानाभावात् अन्यथानुमा
नादीनां प्रामाण्योच्छेदप्रसंगाच्च ॥ तस्माच्छुक्तौ यद्रजतमपरोक्षं तदनिर्वचनीयमेव ॥ यथा वा कस्यचिद्विलासमि
त्रस्य देवदत्तसोमदत्तौ द्वौ सखायौ विलासमित्रस्य तयोर्बहुकालं वियोगाऽस्थितः ॥ अनंतरं कदाचिन्मार्गे विलासमित्रो
देवदत्तं दृष्ट्वा सोमदत्त इति ज्ञात्वा तमुवाच ॥ अहमद्य रात्रौ त्वद्गृहमागमिष्यामीत्यथ गृहे स्थातव्यं ॥ अनंतरं सोम
दत्तगृहं प्रति गत्वा तत्र तमदृष्ट्वा पुनः स्वगृहमागतः ॥ द्वितीयदिने स्वभृत्यमाहूयोक्तवांस्त्वं सोमदत्तगृहं गत्वा म
द्वाक्येन तमेवं वद ॥ पूर्वदिने आवयोर्मिलनसमयेऽहं तव गृहं प्रत्यागमिष्यामीत्यवयानान्यत्र गंतव्यमित्युक्तो

ऽपि महाकामनादृत्यान्यत्र गतवानसि त्वं कीदृशः स इति ततो भक्त्या गत्वा नत्वा तथैवोक्तवान् स तत्सर्वं श्रुत्वा वि
स्मितः सन्नुवाच पूर्वं स्मिन्दिवसे आवयोर्मेलनं तत्र वार्तालापो वाभूदिति तस्मादत्र विस्मितेन देवदत्तेन यः सोम
क३ दत्तो दृष्टः स कोवा भवत्यतो बाधात्संनिर्णयाभावाच्च सप्रसिद्धः सोमदत्तो न भवति तस्मादनिर्वचनीय एवेति स कल्पनी
यः किंचारे मूर्ख विषयभोगार्थं सर्वं खल्विदं ब्रह्मेत्याद्युक्तश्रुतिर्हि न विषयेंद्रियादीनां सर्वेषां ब्रह्मत्वप्रतिपादक
मिति वदसि तन्न संभवति सर्वं खल्विदं ब्रह्मेति श्रुत्या सर्वस्य ब्रह्माभेदेन प्रतिपाद्यते किंतु बाधायां सामानाधिकर
ण्यं प्रतिपाद्यते सर्वं ब्रह्म सन्नातिरिक्तं सत्ताशून्यमित्यर्थः नेह नानास्ति किंचनेति श्रुत्यापि सर्वस्य ब्रह्माभेदेन प्रति
पिध्यते किंतु ब्रह्मणि सर्वस्य नामरूपात्मकस्य जगतः प्रतिषेधः क्रियते ब्रह्मनिष्ठात्यंताभावप्रतियोगि सर्वमित्य
र्थः किंचाशब्दमस्पर्शमित्यादिना अचक्षुः श्रोत्रमित्यादिना च ब्रह्मणो विषयेंद्रियस्वरूपत्वनिषेधाद्विषयें
द्रियाणां कथं ब्रह्मस्वरूपत्वं ऐंद्रियकसुखस्य क्षणिकत्वात्परिणामे दुःखरूपत्वाच्च विवेकिभिः कथं सुखमि
त्यंगीक्रियते यदा विषयेंद्रियसंयोगो सति सुखलेशोऽनुभूयते तदभावे नास्तीति तस्य तुच्छत्वं दारिद्र्यादि
ना विषयप्राप्त्यभावे विषयप्राप्तावपि वार्द्धक्यरोगादिसमये विषयस्य दुःखजनकत्वं तस्माद्विद्वानेवं निजस्वरू
पं परित्यज्य सुखत्वेन भासमानदुःखरूपविषयसुखभोक्तुः कथं श्रेयो भवेत ॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणाय
ने द्वितीयार्के आत्मारामसमधुपसंवादे पक्षिराट्पाख्यानमध्ये मित्रवत्समाचारवर्णनं नाम सप्तमो रश्मिः ॥ ७ ॥ ॥ मि
त्रवानुवाच ॥ सर्वगंधः सर्वरस इति श्रुत्या सर्वतः पाणिपादं तदिति स्मृत्या च विषयेंद्रिययोर्ब्रह्मत्वप्रतिपादनात्

द्वि० २२

घ्रमिंद्रियादीनां ब्रह्मत्वप्रतिषेधः ॥॥ पक्षिराजउवाच ॥॥ हे मंदमते उक्तश्रुतिस्मृत्योरर्थस्त्वया न ज्ञातः ॥ सर्वगंध इ
तिश्रुतेः सर्वानुस्यूतं ब्रह्मैतत्पर्यायेन तु गंधादिस्वरूपमिति ॥ अतएवोक्तवाक्ये सर्वमिदमभ्यात्तइत्यादिना सर्वविषयत्व
प्रतिषेधः ॥ अवाक्यनादरइतिवाग्यादींद्रियप्रतिषेधश्च क्रियते ॥ स्मृतिरपि न ब्रह्मपरा किंतु हेतुवृत्तपरा ॥ हेतुवृत्तेः पि
पाणिपादादींद्रियस्वरूपप्रतिपादिका न भवति किंतु पाणिपादाद्यनुस्यूतं चैतन्यमित्येतत्परा ॥ अतएवोक्तवाक्ये
ज्ञानतो जीवस्य सर्वेंद्रियगुणाभासवत्वं सर्वभृत्त्वं सर्वभोक्तृत्वं चानूद्य परमार्थतः सर्वेंद्रियविवर्जितत्वमसक्तत्वं
निर्गुणत्वं च प्रतिपाद्यते ॥ तस्मादात्मनो विषयेंद्रियादिस्वरूपत्वप्रतिषेधः सिद्धः ॥ मित्रवानुवाच ॥ इंद्रियादीनां ब्र
ह्मभिन्नत्वे एकमेवाद्वितीयमित्याद्यद्वैतश्रुतिविरोधः ॥ पक्षिराडुवाच ॥॥ इंद्रियादीनां वस्तुतः पदार्थत्वे द्वै
तापत्तिः स्यात्तेषां मिथ्यात्वेन नाद्वैतश्रुतिविरोधः ॥ हे जंतुमते गुरुरूपवैद्यान्वेषणं किमर्थं विचारं वा किमर्थं क
रोमीत्युक्तवानसि तदुक्तं रहस्यम् ॥ अथातो ब्रह्मजिज्ञासेति शारीरकमीमांसाप्रथमसूत्रे विषयप्रयोजनाद्य
भावाद्ब्रह्म न विचारणीयमित्याशंक्य विषयप्रयोजनादीन्दर्शयित्वा ब्रह्मविचारः कर्तव्य इत्याचार्यैः स्थापितं
यद्यपीदं सर्वं त्वयाप्यधीतं तथापि तव विषयासक्तत्वेन न सिद्धांतरहस्यं न स्फुरितं ॥॥ आत्मारामउवाच ॥ ततो
मित्रवान्विषयासक्तत्वादिकं स्वान्यायं ज्ञात्वा लज्जितः सन् पक्षिराजचरणयोः पतित्वा पुनरुपदेशार्थं प्रार्थ
यामास ॥ ततः पक्षिराजेनोक्तं तवेदानीं ब्रह्मोपदेशयोग्यता नास्ति साधनचतुष्टयसंपत्तिं संपादय ततो ब्रह्मो
पदेशयोग्यो भविष्यसि ॥ ततो मित्रवता प्रार्थितं ॥ यथा भवानाज्ञापयति तथैव करिष्यामि परं त्विदानीं तवामृत

रूपोपदेशो ममान्यथानिश्चयं निवर्त्तयितुमुपयोक्ष्यते॥ ततः पतिराज्ञस्तपःसाधनादिप्रवर्त्तनेन प्रतिज्ञां कारयित्वा यथोप
देशं कृतवांस्तथा वक्ष्यामि तत्स्वरूप॥ पतिराज उवाच॥॥॥ हे मित्र त्वं स्वहृदयाकाशे विद्यमानं ब्रह्मगुरुं तव रागद्वेषादिप्र
वृत्तिविकारैस्तादात्म्येन सत्यज्ञानानंदलक्षणं ब्रह्म न साक्षाद्वेत्सीति॥ यथा भस्मावृतरत्नस्य गुणो माहात्म्यं च भस्मनिवृत्तिमं
तरापरीक्षकैर्न ज्ञायते तथा ब्रह्मरूपरत्नस्य शारीरतादात्म्यरूपं भस्मावृतत्वेन न ज्ञायते यदैतच्छरीरतादात्म्यरूपभस्मा॰
वरणनिवृत्तिर्भवेत्तदा तव तत्साक्षात्कारो भवेत्॥ यदायं जीवः प्रकृतिधर्मान्विहाय स्वस्वरूपधर्मांस्तन्माहात्म्यं चानुभवति त
दा तस्य त्वंपदलक्ष्ये स्थितिर्भवेत्॥ यदा स्वस्वरूपं विस्मृत्य प्रकृतिधर्मान्गृह्णाति तदा त्वंपदवाच्ये संतिष्ठेत्॥ तस्मात्प्रकृ
तिधर्मशोधनमावश्यकं॥॥॥ मित्रवानुवाच॥ ॥ भो गुरो ब्रह्मणो गुणक्रियादिष्वेतेन तत्कर्मावरणमसंगतं॥ पतिराज उवाच॥
ब्रह्मणो निर्गुणत्वनिरालेपत्वादय एव धर्माः॥ हे मित्र वन्ननादितस्त्वं प्रकृतिधर्मभजनेनैतत्तादात्म्यापन्नो जातो ब्र
ह्मलक्षणं त्वयि विद्यमानमप्यत्यंतं त्वया विस्मृतं तस्मात्प्रकृतिधर्मान्परित्यज्य ब्रह्मलक्षणं भज स्वतदानीं त्वय्येव
स्थितं ब्रह्मत्वमनुभूयते॥ अत्रैव यथैकस्मिन्क्षेत्रे गोधूमाद्येकबीजावापे सति तच्छेदनानंतरं क्षेत्रस्य शुद्धिकरणं वि॰
नाबीजांतरावापो न संभवति तथा तव हृदयक्षेत्रे यद्विषयवासनासस्यमनादितः प्रवर्द्धितं तच्छेदनानंतरं तत्संस्का
रं विनाज्ञानांकुरोत्पत्तिर्न भवति॥ यथा वा पत्रोपरिलेखनानंतरं तल्लिपिमार्जनादिकं विना पुनर्लिप्यंतरलेखनेन न सं
भवति॥ तथा तव हृदयपत्रे नादितः प्राप्तविषयवासनारूपलिपेः सद्गुरुचरणारविंदमकरंदेन मार्जनादिकं विना ब्रह्म
लक्षणाक्षरलेखनेन न संभवति॥ यथा वा खड्गधारणमात्रेण शत्रुनाशो न भवति॥ किंतु खड्गप्रयोगेनैव शत्रुक्षयो भव

हि० २३

ति तथाऽसंगशस्त्रोच्चारणमात्रेणकामक्रोधाद्यंतःशत्रुनाशोपि भवति॥ किंत्वात्मनःसर्वासंगित्वानुसंधानशस्त्रप्रयो
गेणैवतन्नाशोभवति मित्रवानेतत्सर्वंश्रुत्वाविगतसंशयोभूत्वास्वल्पकालेनैवसाधनाभ्यासद्वारागुर्वनुग्रहेणसिद्धिं
प्राप्तवान्॥॥॥॥ इत्यद्वैतादित्रिंशद्दक्षिणायनेद्वितीयार्केश्वात्मारामसमधुपसंवादेपक्षिराजोपाख्यानमध्येमित्रवत्समा
चारवर्णनंनामाष्टमोरश्मिः॥॥८॥ आत्मारामउवाच॥॥ अथपक्षिराजोपाख्यानेक्रोधननामबटुकसमाचार
वर्णनं॥॥ क्रोधनस्तुतपस्यारोगोवेवर्पुरमपुरःपार्थसाधकाविति मन्यते॥ तस्यैवमभिमानेयावत्पर्यंतंतपस्यातिकष्टंस्व
त्वमिवनभातियावच्चनिद्राहारादिंदारपुत्रादिंचनत्यजतितावत्पर्यंतंसिद्धिप्राप्तिर्नभवति॥ तस्मात्सर्वदातेनत
पस्तप्यते॥ इतरेपश्चवोऽयमतितपस्वीतिप्रशंसंतितनस्तस्यप्रतिष्ठामहतीजाता॥ अतएवगर्वितःसंतुष्टस्ति
ष्ठति॥ पारंपर्येणतस्यकुलेऽद्वैतसंप्रदायःस्थितःतत्स्थितानुतत्पवित्राज्ययोगपातंजलमतंश्रेष्ठमितिमत्वात
न्मतमंगीचकार॥ क्रोधनोऽपिस्वपितृमार्गानुसारेणवेदांतशास्त्रंविहाययोगसांख्यादिशास्त्रेषुनिपुणोजातः
ऐहिकसुखंलोकधनंदारांश्चपरित्यज्याऽऽमुष्मिकप्राप्त्यर्थंतपःकृतवान्॥ तस्मात्तदुपरिभगवत्प्रसादोजातः
एकस्मिन्दिवसेपक्षिराजस्यस्वप्नेक्रोधनेभगंद्रत्नंशोभवतेऽ तएतस्यगुह्योपदेशंकृत्वासन्मार्गंदर्शयेतिभगव
दाज्ञाजाता॥ ततःपक्षिराजोवनोपवनेषुविहरन्मंगलप्रस्थंजगाम॥ इध्मवाहुस्तदागमनंश्रुत्वास्वभ्राता
साकंतद्दर्शनार्थंगत्वाप्रदक्षिणानमस्कारैर्दक्षिणत्वातिभक्त्यास्वाश्रममानीयातिथ्यादिनासंमानितवान्॥ पक्षि
राजःस्वयंसर्वज्ञोऽपिपामरवत्समीपस्थक्रोधनाश्रमंदृष्ट्वायंवास्याश्रमइतीध्मवाहुंपप्रच्छ॥ तेनोक्तमिदं २३

न२

क्रोधननामकतपस्विनः स्थानं॥ तत्तपो दृष्ट्वानेकपशुपक्षिणोऽयं महानिति प्रतिष्ठां कुर्वंति तस्मादयमतिगर्विष्ठोऽ
नेकसाधून्‌ अपमन्यते॥ पक्षिराजेनोक्तं भगवदाज्ञयैव तत्क्रोधनार्थमहं [stain] मागतोऽस्मि॥ ततः सद्धर्मबाह्वादिभिः साकं क्रोध
नाश्रमं ययौ॥ क्रोधनस्तपोगर्ववशात्पक्षिराजस्य शत्रुस्थानाभिवंदनादिकमकृत्वानासीनस्थो॥ तानि नो मानापमानतु
ल्यत्वेन न तदनादृत्यमविचार्य तत्समीपवर्त्तिद्वैतसकलपक्षिभिः साकं विराजत॥ ततः क्रोधनोऽहंकारेणच्छंदो बद्ध्वा
केन पक्षिराजं किंचिदुक्तवान्॥ पक्षिराजोऽपि छंदोबद्धवाक्येनोत्तरं ददौ॥ एवं परस्परं तयोर्यो विचारो जातस्तं शृणु
॥५॥ क्रोधन उवाच॥ निद्राहारौ त्यजेद्यस्तु हींद्रियार्थंश्च मैथुनं सर्वोत्कृष्टं तपो यस्य स युक्तः सत्त्वी नरः॥१॥ पक्षि
राडुवाच॥ एकोऽहं सहजानंदो नित्यमुक्तोऽस्मि केवलः॥ मत्सदृशोऽहमेवास्मि मदन्यो नेह कश्चन॥२॥ निद्राहारादिसं
बंधो मम नास्ति कदाचन॥ यस्य निद्रादिसंबंधो न जागर्त्ति कदापि सः॥३॥ यथा घटपटादयस्सदा स्वज्ञात्मानो ज
डाः व्यवहारस्तांश्चेष्टयति तथैवेदं शरीरं मनसेंद्रियैश्च सह जडं सदा स्वज्ञरूपं व्यवहारस्तं चेष्टयति मद्रूपस्तस्य चेष्ट
यात देव जागर्त्तीति मन्यंते॥ अनेन संगदोषेण केवलं मांसत्वबुद्धुः त्वयोस्संबंधिनं कल्पयंति मदन्यत्किंचिदस्ति चे
न्मया तत्त्यक्तुमपि शक्येत॥ अस्याभिमानसंगत्यागेन सर्वस्य ज्ञो भवति निर्गुणो केवल आत्मनि भ्रांत्यान्यभावश्चारो
प्यते भ्रमे विगते सति एकमेवाद्वितीयं भासते॥ तस्मात्ज्ञानिनो भ्रांतिमात्रस्य वैरिणो भवंति भ्रांतिं विना किमपि ब्रह्माति
रिक्तमस्ति चेत्तत्त्यागोऽपि संभवेत्॥ ज्ञानी तु भ्रमात्तीतो विपरीतभावनया मुक्तः सदा समदर्शी ग्रहत्यागाभ्यां रहितः
स्वस्मिन्नेव राजते॥ ॥॥॥ ॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के आत्मारामसमधुपसंवादे पक्षिराडुपाख्याने

द्वि०
२५
25

क्रोधनसमाचारवर्णनंनाम नवमोऽध्यायः ॥९॥ क्रोधन उवाच ॥ हे गुरो ज्ञानिनः कामक्रोधादित्यागमुपदिशंति
॥ भवतात्तु शांतित्यागं विनेतरत्यागेन संभवतीत्युक्तं ॥ एवं चेज्ज्ञानिनः किं कामक्रोधयोरपि त्यागं न कुर्वंति तावंमी
कुर्वंति किं ॥ पद्मिराडुवाच ॥ विपरीतभावनया लोकस्य कामक्रोधयोर्निकृष्टता भासते ॥ अज्ञानतस्तु क्रोधपात्रेऽनुग्रह
मनुग्रहपात्रे क्रोधं च करोति ॥ ज्ञानी तु तद्विपरीतमाचरति ॥ अज्ञानी त्वात्मनि क्रोधमनात्मनि रागं च करोति ॥
ज्ञानी त्वनात्मनि क्रोधमात्मनि रागं च करोति ॥ धर्माविरुद्धो भूतेषु कामोऽस्मीति श्रीभगवद्गीतायां कामः कामप्रद
इति कामदेवः कामपालः कामीति च विष्णुसहस्रनामसु च भगवतः कामस्वरूपत्वप्रतिपादनात् ॥ क्रोधहानक
र्त्रेति विष्णुसहस्रनामसु क्रोधन इति शिवरहस्ये च भगवतः क्रोधस्वरूपत्वप्रतिपादनाच्च कामक्रोधयोर्भगव
द्विभूतिविशेषत्वेन त्यागानर्हत्वाद्ग्राह्यावेव ॥ तस्माद्विपरीतभावत्यागेन सर्वसंसारस्य त्यागो भवति ॥ एवं लोभ
मोहावपि त्यागानर्हौ ॥ ज्ञानिनस्त्वात्मनि लोभमोहावज्ञानिनस्त्वनात्मनि च लोभमोहौ भवतः ॥ क्रोधन उवाच
॥ ज्ञानी किमहंकारमपि न त्यजति ॥ पद्मिराडुवाच ॥ ज्ञानी त्वात्मसंबंध्यहंकारे लीनो भवति योऽहमस्मि ब्रह्माहम
स्मि अहमस्मि ब्रह्माहमस्मीति श्रुतेः ॥ अज्ञानी त्वनात्मसंबंध्यहंकारे बद्धो ॥ मनुष्योऽहं गौरोऽहं स्त्वस्य देहे दुःखहमि
त्याद्यनुभवात् ॥ क्रोधन उवाच ॥ ज्ञानी कार्पण्यमपि न त्यजति किं ॥ पद्मिराडुवाच ॥ ज्ञानी कार्पण्येन दारपुत्रादि
षु रमते तान्पोषयति च तस्माज्ज्ञानिनोऽनात्मनि कार्पण्यमात्मनि निष्कार्पण्यं च ॥ अज्ञानी त्वेतद्वैपरीत्येन ॥ ॥
क्रोधन उवाच ॥ ज्ञानी निंदामपि न त्यजति किं ॥ पद्मिराजउवाच ॥ ज्ञानी त्वनात्मनिंदकोऽज्ञानी त्वात्मनिंदकः ॥

तथा च भगवत्स्मृतिः कर्षयंतः शरीरस्थं भूतग्राममचेतसः॥ मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयानिति॥॥ कौ
धन उवाच॥॥॥ तानी कार्पण्यं वा काठोरत्वं च न त्यजति किं॥ पद्मिराज उवाच॥ तानीत्वति कृपणः कठोरश्च॥ तानि नो मनो
वृत्तिरेव संपद्यत्तः श्रोत्रादीनींद्रियाणि सौंदर्यसंगीतादिविषयान्भोक्तुं मनोवृत्तिं याचंते परंतु तानीतेभ्यस्तां न ददा
त्यात्मन्येव यत्नेन संरक्षति॥ दारपुत्रादीन् रोगदारिद्र्यादिनात्यंतं पीडितानपि दृष्ट्वा करुणां न करोति॥ तस्माज्ज्ञान्यपे
क्षया लोके कः कृपणः कठोरो वा स्यात्॥ कौधन उवाच॥ किं तानी भयमपि न जहाति॥ पद्मिराडुवाच॥ अत्र तानी तु भु
जंगवृश्चिकव्याघ्राद्यनात्मभ्यो बिभेति॥ तानीत्वात्माकारवृत्तिविच्छेदाद्बिभेति॥ यदा कदाचिदात्मानुसंधानं परि
त्यज्य स्वग्नपानादिविषयाभिमुखं मनो भवेत्तदानेकवज्रपातादिभयेन व्याप्नोति॥ तथा च श्रुतिः॥ यदा ह्येवैष ए
तस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति॥ कौधन उवाच॥ तानी वैरमपि न त्यजति किं प(द्मि)राडुवाच॥ तानी तु भ्र
मस्य विपरीतभावनायाश्च वैरी भवति॥ एतद्विनान्यत्र वैराभाववान्॥ कौधन उवाच॥ तानी नामरूपे ऽपि न त्यजति २५६
किं॥ पद्मिराडुवाच॥ यच्चराचरेषु नामरूपं तन्न सर्वं ब्रह्मणो हीति सिद्धं॥ यदा ब्रह्मातिरिक्तं किमप्यस्ति चेत्तदा नाम
रूपमपि भिन्नं स्यात्॥ भवादृशानां भ्रांत्या ब्रह्मातिरिक्तत्वं भासते॥ कौधन उवाच॥ शुक्तौ रजतस्य नामरूपारोपे सतीद
मध्यस्तं रजतमभूदिति मन्यंते यदि नामरूपमपि सत्यमेवेति चेत्तदाध्यासो जगति न स्यात्॥ पद्मिराडुवाच॥ भ्रमो ह्य
ध्यास इति भ्रमं विनाध्यासो न भवति॥ एकस्मादेकस्य भिन्नभावएव भ्रमः स्यादिति॥ यदि चराचरब्रह्मांडेष्वेको ऽखंडा
त्मा चेत्तदा कः कस्मिन्नध्यस्तः॥ भ्रमात्मकान् तापयितुं निर्भ्रांतिकास्त्वध्यासं निरूपयंति नैवं चेद्यज्ञानास्ति तन्निरूपणं

विमर्षं ॥ तस्मात्सर्वं खल्विदं ब्रह्मेति सिद्धं ॥ क्रोधन उवाच ॥ तात्वविद्यामपि न त्यजति किं ॥ पक्षिराडुवाच ॥ तातनिन आत्मवि
षये विद्या अनात्मविषये ऽविद्या ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुने
रिति स्मृतेः ॥ क्रोधन उवाच ॥ तात दुःखमपि न त्यजति किं ॥ पक्षिराडुवाच ॥ भ्रम एव दुःखमूलं तन्नाशे सति दुःखसमू
हस्य नाशो भवति ॥ तस्माज्ज्ञानी भ्रमाद्रहितो दुःखाद्विमुक्तो नित्यानंदे सदा क्रीडति ॥ आत्मक्रीड आत्मरतिः क्रियावाने
ष ब्रह्मविदां वरिष्ठ इति श्रुतेः ॥ क्रोधनस्त्वेतत्सर्वं श्रुत्वा विगतभ्रांतिर्भूत्वा कियत्कालेन सद्गुरुप्रसादात्परमां गतिं प्राप्त
वान् ॥ ॥ ॥ ॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने द्वितीयार्के आत्मारामसमधुपसंवादे पक्षिराजोपाख्यानमध्ये क्रोधनसमा
[illegible]चारवर्णनं नाम दशमो रश्मिः ॥ ॥१० ॥ ॥ ॥ ॥ ॥

इति द्वितीयार्कः समाप्तः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥

९० २६ 26 ॐ श्रीगुरुभ्यो नमः॥ ॥आत्माराम उवाच॥ ॥अथ जयसेननामकथोपाख्यानं॥ ॥तत्कुलेपरंपर्येण सर्वेषां स्वस्व
पितृसमीपएवोपदेशः॥ तदीयसंप्रदायोऽद्वैतवादः परंतु संसारे यथाविधि तथैवाचरणं तस्य तेन विधिपरित्यज्य
किमपि कर्म न क्रियते॥ किंतु विधिप्राप्तनित्यनैमित्तिकं यज्ञयागादि च सर्वं कर्म तत्तत्कालप्राप्तं तत्तत्काल एव करो
तितथैव निषेधपालनमपि क्रियते॥ मधुप उवाच॥ भो प्रभो पञ्चानां यज्ञयागाद्यनुष्ठानं कथं संभवति॥ आत्माराम
उवाच॥ हे मधुप यथा गौतमपुत्रस्त्रितो गोनिमित्तवशाद्भ्रात्रा कूपे पातितः सन्सर्वान्यज्ञसंभारान्मनसा कल्पयित्वा
मानसिकयज्ञं कृतवांस्तथाऽसौमीपश्चापि सर्वान्यज्ञसंभारान्मनसा कल्पयित्वा मानसिकमेव सर्वं कर्म कुर्वं
ति॥ किंच तस्यैवं विदुषः इत्यादि श्रुतिप्रतिपाद्यं ज्ञानयज्ञमपि कुर्वंति॥ स एवं कर्म कुर्वन्नपि स्वरूपानुसंधानात्क
दापि न च्यवते॥ रोहितनामकस्तच्छिष्यः सर्वशास्त्राण्यधीत्यैकस्मिन्दिवसे सविनयमात्मरहस्योपदेशार्थं तं
विज्ञापितवान्॥ जयसेनोऽपि तद्भक्तिभावं दृष्ट्वा तुष्टः सन्यथोपदेशं कृतवांस्तदहं त्वामिष्ट एव॥ जयसेन उवाच
सर्वं तस्माद्युत्पद्यते तेन सर्वं विभाति तस्मिन्सर्वं विलीयते सर्वेषां स एव निवासः स एव गतिस्स सर्वेषु व्यापकस्स ए
व सर्वस्तस्मिन्सर्वस्मादतीते सर्वे लयं यांति स सर्वस्सर्वोऽपि सः॥ न च सर्वस्सोऽपि न सर्वः॥ एकोनन्योऽद्वैतादतीतः
परिमाणपरिणामेन च रहितः॥ यन्न तस्य दृश्यं तन्न देवास्ति तत्सदृशोन्यः कोऽपि नास्ति॥ यदि तदन्यः कोऽपि
भूच्चेत्तदा तस्य प्रकृतेर्भिन्नोऽभूत्॥ अस्मिंश्छिद्रे रसरूपगंधस्पर्शान्तदभावोऽभूत्॥ यदि कदापि तस्य प्रकृतिभि
न्नप्रकृतिमानपि भवति चेत्तर्ह्यनंताद्भुतशक्तिसकाशात्स एव स्यात् तद्भिन्नं किमपि न स्यात् तस्मादद्वैतोऽस्ति स ए २६

वास्तितत्तद्दृशोन्यःकोपिनास्तिसएवशब्दस्पर्शादिविषयरूपःसएवश्रोत्रादिविषय्यपि॥ यथास्वयमेवस्वात्म
न्याकाशादिभूतानिसृष्ट्वातेषामनुभवार्थंश्रोत्राद्यसृजत्॥ तथास्वात्मानुभवार्थंजीवात्माभूत्वास्वमनुभवति॥ श्रो
त्रेयन्निमित्तमुत्पन्नमितरान्विषयान्हित्वाशब्दमात्रमेवानुभवति॥ चक्षुर्यन्निमित्तमुत्पन्नमितरान्हित्वातद्रूप
मात्रमेवानुभवतिरसनापियन्निमित्तमुत्पन्नेतरान्विषयान्हित्वातद्रसमेवानुभवति॥ त्वगपियन्निमित्तमुत्प
न्नाइतरान्विषयान्हित्वातत्स्पर्शमेवानुभवतिघ्राणमपियन्निमित्तमुत्पन्नमितरान्विषयान्हित्वातद्गंधमात्र
मेवानुभवति॥ जीवोयन्निमित्तं र्पकाशत्तं स्वरूपंनानुभूयस्वात्मानंनानुभवतीत्याश्चर्यं॥ तस्माद्धिशिष्योरा
णान्नाणेष्विंद्रियाणींद्रियार्थेषुहित्वातेषांसाक्षीभूत्वायन्निमित्तंत्वंविद्यमानोसितन्मयोभूत्वातदेवस्वस्वरूप
मनुभवस्वेति॥ रोहितस्त्वेतद्गुरुसंवचःश्रुत्वातदनुसारेणतत्साधनेतत्परोऽभवत्॥ तस्यावस्थायामपरिपक्वत्वेन
जयसेनस्यविधिपालनार्थंकृतंकर्मदृष्ट्वातदंतर्गतब्रह्मनिष्ठामपरिज्ञायवायसेंद्रनामककाकवत्पूर्वमीमांसा
शास्त्रसिद्धांतमेवसमीचीनंज्ञातवान्॥ ज्ञानिनःपरंगीतज्ञत्वेनजयसेनस्तदभिप्रायंबुध्वातदज्ञाननिवृत्त्य
र्थंयदुपदेशंकृतवान्मीमांसायांयथातयोःपरस्परंसंवादश्चजातस्तत्सर्वंवक्ष्यामिस्फुटम्॥ अथजयसेनरोहित
संवादवर्णनं॥ ननुज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादेःसर्वस्यापिपूर्वकांडस्यकर्मप्रतिपादकत्वादुपनिषद्भा
गानांब्रह्मप्रतिपादकत्वेवाक्यभेदःस्यादितिचेन्न॥ नहिसर्वस्यापिकर्मप्रतिपादनेतात्पर्यंकिंतुनहिनिंदान्या
येनेवशरीरनिंदायांतात्पर्यं॥ तथाहिनहिशरीरपरिश्रमंविनाकर्मसंभवति॥ कर्मजनितस्वर्गादियोग्यशरी

३ अन्विषया

त.० रांतरस्योत्पन्नदुःखवत्त्वेन शरीरनिंदासंभवः ॥ दृश्यमानशरीरस्य दुःखवत्त्वावगमादिति ॥ स्वर्गयोग्यशरीरस्या
२२ पि दुःखवत्त्वमवगम्यते ॥ तथाहि ॥ तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति उत्त
27 रकांडस्य वाक्येनापि स्वर्गस्य तद्योग्यशरीरस्य चानित्यत्वबोधनात् ॥ तथा च ॥ स्वर्गनाशज्ञानेन स्वर्गयोग्यशरीर
स्य दुःखवत्त्वसंभवात् ॥ किं च कर्मफलानां न्यूनाधिक्यावगमेन परस्परासहिष्णुत्वसत्त्वाद्दुःखसंभवाच्चैहिकामु
ष्मिकशरीराणां दुःखवत्त्वेन निंदायामेव पूर्वोत्तरकांडयोस्तात्पर्यादेकवाक्यता ॥ यद्यपि अक्षय्यं ह वै चातुर्मा
स्ययाजिनः सुकृतं भवतीति श्रुत्या कर्मजन्यफलस्य नित्यत्वावगमेन नाशासंभवः ॥ तथापि श्रुतिस्मृत्योर्विरोधे
प्राप्ते श्रुतिरेव प्रबला श्रुत्योर्विरोधे प्राप्ते च न्यायवती श्रुतिरेव प्रबलेति ॥ अक्षय्यमित्यादिश्रुतेरापेक्षिकनित्य
त्वरूपप्रशंसामात्रपरत्वं बोध्यं ॥ रोहितो गुरुणोक्तं तदेतं तत्त्वमार्थं श्रुत्वा विगतसंशयः सन् कृतकृत्यो जातः
॥ इत्यद्वैतादित्यदक्षिणायनेन तृतीयार्के आत्मारामसधुपसंवादे जयसेनोपाख्याने तत्कृतरोहितोपदेशो नाम प्रथ
मो रश्मिः ॥१॥ आत्मारामउवाच ॥ स परमोदारो वस्तुतोऽद्वैतनिष्ठावांश्च ॥ तेन यत्किंचित्संपाद्यते तत्संग्रहमकृत्वा साधु
अथ जयसेनोपाख्यानं
भ्यो दीनेभ्यश्च दीयते ॥ स्वस्यातिप्रियं वस्तु तत्स्वयमेव भगवत्प्रीत्यर्थमन्येभ्यो दीयते ॥ स्वस्य प्रतिष्ठाकीर्त्यर्थं प्रका
शार्थं बहुधा संगोप्य दीयते ॥ अतिथ्यभ्यागतान् भगवत्स्वरूपत्वेन मत्वा बहुमानेन पूजयति ॥ यदा कदापि दि
वसचतुष्टयपर्यंतमतिथ्यप्राप्तौ भोजनं न करोति ॥ यदा त्वं शक्यं तत्सर्वं दीयते तेन न तु यदा त्वमशक्यं तदपि दीय
ते ॥ यथा त्रेतायुगे महाराजो मांधाता तद्वत् ॥ यथा वा कलियुगे भोजराजसमये तत्र विक्रयोपजीवकस्तद्वो २२

तिरस्यसंमता ॥ ॥ मधुप उवाच ॥ मांधातुर्दृष्टांतंतत्त्वविवेकेनदृष्टांतंचवदयथ ॥ आत्माराम उवाच ॥ कदाचिन्मांधाता
मृगयार्थमरण्यंगत्वातत्रकंचनर्षिवरंसुक्षेत्रनिर्जनेविजनेधान्यकणांश्छिन्दंतमपश्यत् ॥ ततोराजावाहनादुत्तीर्य
तेसाष्टांगंप्रणम्यैवमुवाच ॥ अहोमहर्षेमयिस्थितेसतितवैतावानुदरपोषणार्थंप्रयासःकिमर्थः ॥ गोभूहिरण्या
दिकंयद्यदपेक्षितंतत्सर्वंदास्यामीत्युक्त्वापुनस्तच्चरणयोःपपात ॥ यावत्किंचिदृषिस्तस्याग्रेराजापश्यतितावन्मौनींऽत
र्दधौ ॥ राजातमदृष्ट्वायावदेतदृषिदर्शनंनभवेत्तावदितोनान्यास्यामीतिप्रतिज्ञांकृत्वातत्रैवातिष्ठत् ॥ दृढेनदिन
त्रयपर्यंतंस्नानपानादिकंसर्वंपरित्यज्यतत्रैवासीत् ॥ चतुर्थदिवसेसऋषिःसाक्षाद्भूयराजानंतवकिमभिल
षितंतद्वदेत्युक्तवान् ॥ ततोराजामत्समस्वकोऽद्भवतायत्किंचिद्ग्राह्यमित्युवाच ॥ ऋषिराहतवनिकटेसर्वंवर्त्ततेम
ममेदानींकस्याप्यपेक्षानास्तिपुनःकालांतरेममयदभिलषितंतद्याचिष्य इत्युक्त्वापुनरंतर्दधौ ॥ ततोबहुका
लानंतरंद्वादशवार्षिकंदुर्भिक्षंजातं ॥ यावच्छक्तिकियत्कालपर्यंतंराजाप्रजापोषणंकृतवानंततोराज्ञोऽपिसा
मर्थ्याभावेनबह्व्यःप्रजानष्टाःकाश्चिद्दूरदेशंगताः ॥ राजस्त्रियोऽप्येकत्रगताराजाप्यन्यत्रगतः ॥ तत्समयेऽष्टा
दशदिनपर्यंतंराज्ञोभोजनार्थंकिमपिनमिलितं ॥ एवंस्थितेकस्यचित्स्वल्पदेशराजस्यनिकटेचणकधान्य
मासीत्तेनैवंनियमःकृतःसूर्योदयादस्तपर्यंतमन्नार्थिनोयआयांतितेभ्यःप्रत्येकंप्रस्थमात्रंचणकंदास्या
मीति एवंप्रतिज्ञांपालयन्संध्याकालेनगरद्वारंबंधनंकारयित्वासीत् ॥ राजात्वघटिकामात्रावशिष्टेदिने
तत्रगत्वाप्रस्थमात्रचणकान्प्राप्यबहिरागत्यसंध्यावंदनार्थंगतवान् ॥ ग्रामाधिपतिस्तुसायंकालेस्वनि

रा० २८ 28 ऽयमेन द्वारबंधनं कृतवान्॥ तदनंतरं राज्ञः संध्यानुष्ठानावसानसमये एकः ब्राह्मण आगत्य राजानमुवाच॥ ॥
मासमारभ्य मयान्नं न प्राप्तमतः क्षुधयातिपीडितोस्मि॥ अत्रान्नदातुः स्थानं ज्ञात्वा तद्दर्शनं वा कथं भवेन्नद्वद्॥
राज्ञा स्वमनसि विचारितमत्रान्नं मिलिष्यतीत्याशया कंठप्राणान्धृत्वायमागतः॥ अधुना ग्रामद्वारबंधनादन्न
लाभो न भवतीति यदि विदेयं तर्हि अयं तत्क्षणमेवाधैर्येण प्राणांस्त्यक्ष्यति॥ मिथ्याभूतमदेहसंरक्षणापेक्षया ब्रा
ह्मणप्राणरक्षणं वरमतो मन्निवासस्थमन्नमस्मै दातव्यमिति॥ एवं विचार्य तदन्नं दत्वा तमुवाच। ब्रह्मन्नास्मिन्ना
मये द्वारबंधनवशादन्नं न मिलिष्यतीदं त्वया भोक्तव्यं॥ ततः स ब्राह्मणः पूर्ववद्दृष्टेच्छरूपिस्वरूपेण प्रकटी
भूय प्रसन्नः सन् राजानमुवाच॥ हे राजन्नेतन्न वदानमतीवसामर्थ्यं प्राप्तिदशायां सर्वैरपि दातुं शक्यते॥ अप्राप्ति
दशायामथवा स्वकाले ईदृशं दानमतीव दुष्करमेतत्पुण्यस्यांतो नास्ति॥ ततः क्षामनिवृत्तिर्जाता राजापि पूर्वा
पेक्षयाधिक्येन राज्यमैश्वर्यं च प्राप्तवान्॥ ॥ इत्यद्वैतादित्यदक्षिणायनेत्ततीयार्के आत्मारामम धुपसंवादेउद्धार
ध्रुपाख्याने महाराजमांधातृकथावर्णनं नाम द्वितीयो रश्मिः॥ ॥ २॥ आत्माराम उवाच॥ ॥ ॥ अथक्षणविचायो
पत्नीविकथावर्णनं॥ ...राजसमये कदाचित्पूर्वाह्ने सूर्योपरागः प्राप्तः॥ राजा तत्स्वरसविति स्नात्वा कोटिद्रव्यमुद्दि
कादत्वा ततः कालिदासेन सह राजमार्गेण स्वस्थानमगमत्॥ एवं तद्दानेन मनसि गर्वितो जातः॥ तद्दिने रविर
ग्रे तेजस्वी द्विजः स्थितः॥ राज्ञा सावंदशसहस्रपरिमितं सैन्यमपि स्थितं॥ मार्गमध्यार्द्धलायां वाश्चनमेघस्वंड
आगत्य ससैन्यं राजानमाच्छाद्य सेनया सहैव गमनं कृतवान्॥ तद्दृष्ट्वा राजा कालिदासमुवाच॥ हे कवे पश्य

महान्महात्मात्वंमेघआगत्यछायांकृतवान्॥तच्छ्रुत्वाकालिदासेनोक्तंराजन्त्वंसत्यंवदत्वन्निकटेवियत्कोटिपरि
मितंधनमस्ति॥राज्ञोक्तंकिंचिन्न्यूनाधिकंशतकोटिपरिमितंस्यात्॥ततःकालिदासेनोक्तंशतकोटिधनवतःकोटि
त्रयदानमेतादृशपुण्यदायकंनभवतियेनप्रसन्नोभगवान्छायाकारणार्थंमेघंप्रेरयेत्॥किंतुनज्ञानेतवैतत्सैन्ये
यःकश्चित्सर्वस्वदातायत्पुण्येनसर्वसैन्यस्यछायालाभेनसुखंभवति॥ततोराज्ञाविशेषेणोक्तंमत्प्रदेशेत्वयाऽधिकदा
ताकोवास्यात्॥तस्मात्तद्वृत्तान्तवाक्येममविश्वासोनास्ति॥कालिदासेनोक्तमेतत्परीक्षासुलभैव॥सैन्यमत्रैवस्था
पयित्वाऽन्यस्मिन्ग्रामेनातपदेशेगंतव्यंयदिमेघःसैन्यंपरित्यज्यभवतासार्धमागच्छेत्तदानीमंतव्यंतवैवेदंपुण्य
मितियदिसैन्योपर्येवतिष्ठेत्तदासपुरुषोऽन्वेषणीयःस्यात्यत्पुण्येनेदंजातमिति॥राज्ञातत्तथैवकृतंपरंतुमेघः
सैन्योपर्यवस्थितः॥राज्ञाऽनातपदेशगत्वेदमाश्चर्यंदृष्ट्वालज्जितोबभूव॥ततःकालिदासेनोक्तंसैन्यातश्चत्वारश्च
त्वारोजनाःक्रमेणास्मन्निकटमाक्रान्तव्याः तन्मध्येयेनसार्धंमेघआगमिष्यतितच्छत्रस्थएवसपुरुषोऽन्वेष्टव्यः॥
राज्ञातथाकारयामास॥अथततःसर्वमेवसैन्यंक्रमेणागत्यराज्ञासार्धमातपदेशेऽतिष्ठत्॥तत्राप्रच्छायायांयः
कश्चित्तृणविक्रयोपजीवीपुरुषःस्थितःसत्वात्रविद्यमानश्चतेनसार्धमभ्रखंडोऽपिगच्छतिसतिष्ठतिचेन्मेघोऽपिति
ष्ठति तदृष्ट्वासर्वेजनाविस्मिताबभूवुः॥ततःकालिदासस्तंपुरुषमाहूयोवाच॥भोरेऽद्यत्वयाकिंपुण्यंकृतंतेनो
क्तममकिंचनस्यममनिकटेपुण्यंवार्तैवकिंस्यात्॥परंतुतृणलवविक्रयदाचेत्कालेरथ्यास्थयेनमज्जीवनंस्थितंभान्दप
रापुण्यकालआगतइतिज्ञात्वातद्द्विजीयतत्समयेभगवत्प्रीत्यर्थंब्राह्मणायदत्तवानस्मि॥एतच्छ्रुत्वाकालिदा

द्वि॰
२५
29

सोराजानमुवाच॥राजंस्त्वदैश्वर्यस्य शततमांशोऽपि त्वया न दत्तः॥अनेन तु सर्वस्वं दत्तं॥इतः परं कथं मज्जीवनं भ
वेदिति विचार्य स्वजीवनोपायं परमात्मनि स्थापयित्वा प्रसन्नचित्तः सोऽतिष्ठत्॥तद्विश्वासस्तु राज्यवैभवप्रधान
पृथ्वीपतिष्वन्येषु वर्त्तते॥तस्य विश्वासस्तु केवले परमात्मन्येव अतस्तत्सामर्थ्यं तव कथं वा स्यात्॥तस्याकिंचनत्वेऽपि त
वसार्वभौमत्वेऽपि किं जातं परंतु तच्छ्रद्धापूरणार्थताप्यकिंचनाद्दुर्बला वा न भवति॥हे मधुप एतच्चरित्रमुदा
रधियः संमतं तस्मादुदारधीर्वदान्योऽद्वैतनिष्ठावांश्च भवति॥इत्यद्वैतादित्यदक्षिणायनेन्द्रतीर्थार्क आत्मारामम
धुपसंवादे उदारध्युपाख्यानं मध्ये स्नाणविक्रयोपजीविकथावर्णनं नाम तृतीयो रश्मिः॥३॥मधुप उवाच॥॥॥भो प्रभो
पशूनां निकटे का वा संपदस्ति यद्दानेनोदारा भवंति॥आत्माराम उवाच॥हे मधुप स्वर्णरजतरत्नादिषु मनुष्याभि
मानेन श्रेष्ठताऽरोप्यते नो चेत्स्वर्णादिरपि ताम्रादिवद्धातुरेव रत्नान्यपि स्फटिकादिवच्छिलाविशेषा एव एवं
यद्यज्जातीयैर्यद्वस्तु श्रेष्ठत्वेनाभिमन्यते तत्तज्जातीयानां तदेव धनं॥तस्मात्पश्वादीनामपि स्वस्वाभिमतपदार्थदा
नेनौदार्यमस्तीति न काप्यनुपपत्तिः॥एवं मे मधुप जगत्यात्मवस्तु विनान्यत्र श्रेष्ठता कल्पितैव॥एकस्मिन्दिव
से कश्चन निस्पृह उदारधीमेलनार्थमागतः॥तदोदारधीस्तत्संमुखे किंचिद्धनं स्थापितवान्॥तेनोक्तमेतदर्थं
नागतोऽस्मि॥तत उदारधियोक्तं मदहं तु निमित्तमात्रं कारचरणादिकरणवत्तद्दानं तु परमात्मैव भवत्यारख्यानु
सारेण मद्द्वारा भगवतैव दीयते॥स तदा प्रसन्नस्तद्द्रव्यमंगीचकार॥एकस्मिन्समये सुवीरनाम व्याघ्राश्रमेऽभ्या
गतमृगसमुदाय आगतस्तत्समये तन्निकटे किमपि नाभूत्॥ततः कृशां हत्वा तेषामातिथ्यं कृतवान्॥तदृष

२५

निवृत्यर्थं सुवीर उदारधीसमीपमागत्य तत्सर्वं निवेदयामास ॥ उदारधीस्तु ऋणप्रदत्तं नाम तत्स्थानम् ऋणसंख्यां च दृ
ष्ट्वा तूष्णीं स्थितः ॥ तदनंतरं सुवीरमत्तापयित्वा तदृणं सुवीरेण प्रेषितमिति ऋणदातारमनुज्ञाद्दातव्यमिति स्वभृत्येन
प्रेषयामास ॥ ततः सुवीराय किंचित्पारितोषिकं दत्त्वा ऋणपरिहारमनुज्ञाप्य स्वगृहगमनायाज्ञापयामास ॥ सुवीरस्तु
लज्जया ऋणनिवृत्तिविचारमनुज्ञाप्य स्वमनसि ऋणनिवृत्तिचिंतः परं कथं भवेदिति चिंतयन्स्वगृहमागत्य ऋणपरि
हारं श्रुत्वा तुतोष ॥ हे मधुप उदारधीस्तु ऋणपरिहारो मयाकृत इत्युच्यते चेदयं सुवीरो मदुपर्युपकारं स्थापयेत्संम
त्वेमां सुवीरेतिलज्जया नोक्तवान् ॥ हे मधुप वृषसेननामोदारधीभ्रातृव्योऽतीव सुपात्रं मम मित्रं च ॥ तस्य बाल्याव
स्थायामेव तत्पिता परलोकं गतः ॥ उदारधीस्तु तं पुत्रवत्पालयित्वा स्वसंप्रदायानुसारेण विद्यादिकमुपदिदेश ॥ एक
स्मिन्काले सुचित्रनामा मामसूरोऽतिप्रेम्णा हरिकथामकरोत् तत्सभायां सर्वेमगापहिणः श्रद्धावंतः कथां शृण्वंतो
ऽतिष्ठन् ॥ तत्र वृषसेनोप्यासीत् ॥ सुचित्रेण भक्त्यैतादृशी हरिकथा दत्ता यया सर्वे सभास्था मोहिताः सुः ॥ तत्सम
ये सुचित्रेणोक्तं मतिष्ठ्यभ्यागतातिथ्यार्थं भगवत्सन्माद्युत्सवार्थं च सहस्रहयमुद्रिकापरिमितमृणं मम जातं ॥ अ
त्रये श्रद्धावंतस्ते मे दत्त्वेत्यर्थं ममर्णपरिहारः कर्तव्यः ॥ एतच्छ्रुत्वा सर्वे विरागमागत्य तूष्णीमासन् ॥ सुचित्रोपि पुनः वि
मपि नोक्त्वा स्वस्थानं गतवान् ॥ ततस्तद्दृष्ट्वैव वृषसेनः सहस्रहयमुद्रिका गृहीत्वा सुचित्रस्थानं गत्वैकांते तत्स्मैताः
दत्त्वैवं विज्ञापयामास ॥ अनेनैतद्वृत्तमिति कुत्रापि न वक्तव्यं ॥ ततः सुचित्रः प्रसन्नो भूत्वा तद्गृहीतवान् ॥ तत द्वितीय
दिवसे सभायां हरिकथासमये सर्वेमगापहिणः श्रद्धया कथां शुश्रुवुः ॥ वृषसेनोऽप्येकास्मिन्पार्श्वे स्थित्वा कथामशृ

रू०
३०
30

णेत॥ कथासमाप्तिकाले राज्ञो वृषसेनोक्तं विस्मृत्य सुचित्रः श्रोतृन्नुवाच॥ भो श्रोतारो वृषसेनेन ममैवं विश्वासेनान
स्थितः मद्दत्त हृदयं दत्वा मम मरणं परिहारं करिष्यतीति॥ अयं तु राज्ञा वागत्य मद्दत्तहृदयं दत्तवांस्तस्मादयमस्तुद्रागः॥
वृषसेनस्तच्छ्रुत्वा सर्वेषां निकटे सुचित्रमाह॥ राज्ञो मया यद्दत्तं तन्मम मातुः संबंधि मदीयं न भवति परं तु मात्रा त्वामनु
ह्रीत्वैव दत्तमतः इदानीं तु न तयाज्ञातं मद्धृदयं मम देयमिति मात्रा निर्बंधः क्रियते तस्मात् हृदयं पुनर्देयं॥ सुचित्रस्तद्धृद्य
मानाय पुनर्दत्तवान्॥ वृषसेनस्तद्राज्ञो पुनस्तद्धृदयं गृहीत्वा सुचित्रस्थानमागत्य रहसि तस्मै दत्वोवाच॥ एतद्धृदयं
वृषसेनेन दत्तमित्यन्यं प्रति नोक्तं चेत्तु वक्तव्यवाहानिः॥ तस्मान्मया प्रार्थ्यते न कुत्रापि प्रकाशनीयं॥ सुचित्रस्तच्छ्रुत्वा
साधु साध्विति सुष्ठु प्रसन्नो जातः॥ अरे मधुपैवमुदारथी वृषसेनश्च स्वप्रतिष्ठाकीर्त्योर्गोपनमिष्टत्वे जागीबुरतः॥
एकस्मिन्दिवसे उदारथी वृषसेनयोर्मिथः कथनप्रसंगे विचारो जातस्त्वं वस्तु आमिष्ठृणु॥ वृषसेन उवाच॥ तमेवं विदित्वे
त्यादि श्रुति पर्यालोचनया मुक्तिस्तत्वज्ञानयोः कार्यकारणभावः प्रतीयते॥ स च प्रयुज्यते युक्तेः स्वतः सिद्धात्मस्व
रूपत्वेनानन्यत्वात्॥ उदारथी रुवाच॥ नन्वत्र ज्ञानस्य मुक्तिजनकत्वं हि न मुक्तित्वावच्छिन्नकार्यतानिरूपितका
रणत्वं॥ अपि तु मुक्तित्वावच्छिन्न विरोधि बंधकारणीभूताविद्यानिवर्तकत्वं स च युज्यत एव ज्ञानेनाज्ञाननिवृ
त्तेर्लोकसिद्धत्वात्॥ यथा दाहप्रतिबंधकत्वं मणेस्तन्निवर्तकत्वमुत्तेजकस्येति॥ एतच्छ्रुत्वा वृषसेनो निवृत्तसं
देहो गुरुं ववंदे॥ ॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने तृतीयार्के आत्मारामधुपसंवादे उदारथ्युपाख्याने वृष
सेनेन साकं तत्संवादवर्णनं नाम चतुर्थो रश्मिः॥ ४ ॥ आत्माराम उवाच॥ अथ वीरसेनसमाचारवर्णनं॥

सतुमहातपस्वीयोगीतेजस्वीज्ञानीचस्वकुलपारंपर्येणब्रह्मनिष्ठः॥तेषांसंप्रदायिनःसाधनदशायांविषयासक्तानी
न्द्रियाणिनिग्रहात्माभिमुखानिकुर्वंति॥यावदिंद्रियाणांविषयवैराग्यंनजायतेतावदात्माभिमुखानिनभवंति॥यद
इंद्रियंस्वस्वविषयान्नविरक्तंभवतितदैवरागोत्पादनार्थमुपायंकुर्वंति॥यद्यद्विषयेऽत्यंतंमनोलग्नंतत्तद्विषय
स्यनिकृष्टतांमिथ्यात्वंचमनसिदृढयंति॥अस्मिन्जगतियत्किंचिद्यत्पदार्थजातमस्तितत्तत्सदोषंनश्वरं(च)पश्यंतो
नित्यमनित्यात्पृथक्कृत्यसर्वत्रनित्यमेवानुस्यूतमित्यनुभवंति॥मनसोऽन्नमयत्वेनक्षुधासहनाभ्यासंकुर्वंतो
मनसोमूलमेककलामात्रेस्थिरीकृत्यतेनस्वस्वरूपमनुभवंति॥वीरसेनस्तुस्वपितृसकाशाद्वेदसर्वशास्त्राणि
ब्रह्मविद्यांचप्राप्तवान्॥रविरंगदनामाप्रथमस्तस्यशिष्यः॥तत्पितृपितामहादयोऽपिवीरसेनपितृपितामहादि
भ्यएवविद्याःप्राप्तवन्॥यदारविरंगदस्तस्मात्सर्वाविद्याअधीत्यसाधनोपासनादिसिद्धिंचप्राप्यसंचितादिविष
येसंदिग्धःसन्कदाचिद्गुरुसमीपमागत्यपृष्टवान्॥॥रविरंगदउवाच॥सुकृतदुष्कृतकर्मणांसुखदुःखनिकृष्टज
न्महेतुत्वंशास्त्रेषुप्रसिद्धंतत्कथं॥॥वीरसेनउवाच॥॥संचितप्रारब्धागामिभेदेनकर्मत्रिविधंतत्रकुसूलस्थधान्य
वत्संचितंकुसूलान्निष्कास्यभोगार्थंगृहीतधान्यसदृशंप्रारब्धंबीजावापेनभाविधान्यसदृशमागामि॥प्रारब्धस्यनि
ष्कासनंकेननक्रियतेकिंजीवेनोतेश्वरेणकिंवास्वयमेवायात्येवंपृच्छसिचेन्नाद्यः॥सर्वज्ञजीवस्यापिस्वदेहाव
त्वात्स्वेच्छानुकूलकर्मनिष्कासनमेवकुर्यान्नदुःखानुकूलं॥नद्वितीयः॥वैषम्यनैर्घृण्यदोषापत्तेः॥नतृतीयः
जडस्यस्वतःक्रियाशून्यत्वात्॥किंतु॥अथैकयोर्ध्वउदानःपुण्येनपुण्यंलोकंनयतिपापेनपापमुभाभ्यामे

२१

२० ३१ 31 वमनुष्यलोकमितिप्रमाणेनस्वकृततदुःखकर्मणोयस्याधिकंतत्फलंस्वर्गेनरके वाभोगाविनोभयोःसाम्येमनुष्य
जन्मप्रापयति॥तस्माज्जीवस्यदुःखाभावईश्वरस्यैवेश्वरत्वादिः कर्मणःस्यात्तेभ्यचनास्ति॥रविचंद्रांगदउवाच॥पुण्य
पापयोःसाम्येसत्यपिमनुष्यजन्मन्येवसर्वस्यापिसुखदुःखसाम्येनभोगःस्यात्नत्वेवमस्तिलोके॥एकस्यजन्मप्रभृति
मरणपर्यंतंसुखानुभवदर्शनादपरस्य॥तथादुःखानुभवदर्शनाच्च॥वीरसेनउवाच॥स्वकृततदुःखकृतयोरत्यं
तसाम्याभावएवतत्रनियामकः॥रविचंद्रांगदउवाच॥कस्यचित्सुखमध्येदुःखंकस्यचिद्दुःखमध्येसुखंकस्य
दुःखंकस्यचिद्दुःखाकंतंसुखंस्यचादुर्भवतोनर्योनेतत्रकिंनियामकं॥वीरसेनउवाच॥॥आद्येस्वकृतसाधनीभूतस्व
कृतस्यांगत्वेवाल्पमध्यवातन्मध्येकिंचिद्दुःखानाचरणंनियामकं॥द्वितीये॥दुष्कृताचरणस्यांगत्वेवाल्पमथवात
न्मध्येसुकृताचरणंनियामकं॥तृतीये॥सुकृतक्षीणतादुष्कृतफलोन्मुखताचनियामिका॥चतुर्थे॥दुष्कृ
तक्षीणतासुकृतफलोन्मुखताचनियामिका॥रविचंद्रांगदउवाच॥भोगुरोलोकेकस्यचित्दुःखस्यमरणप्रायविघ्न
प्राप्तावपिसद्यएवतन्निवारिःहारोपिभवतितत्रकिंनियामकं॥॥वीरसेनउवाच॥हेशिशोःदुःखजन्मनिकृतंकर्मेहैव
फलदायकंनभवतिकिंतुजन्मांतरे॥कश्चनप्राणीहजन्मकृतानामनेकपूर्वपूर्वजन्मकृतानांचपापानांनिष्कृत्य
र्थमत्यंततदुःखयागमसाहित्यशास्त्रानुसारेणप्रायश्चित्तंकरोतितत्प्रायश्चित्तम॥शिमजन्मनिविघ्ननाशकंभवि
ष्यति॥एतस्मिन्जन्मनियाविघ्ननिवृत्तिर्जायतेसापूर्वजन्मीयप्रायश्चित्तफलमितिकल्पनीयं॥यथाकश्चित्प्रा
णीपूर्वस्मिन्जन्मनिकस्यचित्द्विषंकृतवान्पुनस्तत्पापभीत्यायथाशास्त्रंप्रायश्चित्तमप्यकरोत्॥तस्येहजन्मनित

३१

दुःखतः प्राणी सर्पादिर्भूत्वा दंशनादिकं करोतीति तदानीं पूर्वजन्मप्राप्त्युत्पन्नं तत्काल एव मंत्रौषधादिरूपेण गतत्वं तद्वदति
रुचिरांगद उवाच॥ भो गुरो पुण्यपापयोः साम्यं मनुष्यजन्मनियामकं चेत्तिर्यग्जन्मनियामकं किं॥ वीरसेन उवाच
पुण्यापेक्षयाधिक्ये तस्मिन्पापमभिभूतं पुण्यस्यैव प्राबल्यं॥ तथैव पापापेक्षयाधिक्ये तस्मिन्पुण्यमभिभूतं पापस्यैव
प्राबल्यमस्तीत्येवं रीतिः॥ इह लोके तिर्यग्योनौ भोग्यमशक्यं पापं चेन्नरकेतदधिकं पापं भुक्त्वा तिर्यग्यो
निं प्राप्यानुरूपपापेन सहागत्येह लोके तत्तत्पापभोगयोग्यतिर्यग्योनिं प्राप्य तदवशिष्टं पापमनुभूयोभय
साम्ये मनुष्ययोनिं प्राप्नोति॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने तृतीयार्के आत्मारामवधूपसंवादे वीरसेनोपाख्याने सं
चितादिकर्मविषयविवेचनं नाम पंचमो रश्मिः॥ ॥५॥ रुचिरांगद उवाच॥ ॥ भो गुरो संचितं कर्म तत्तत्स्थधान्यं सदृश
मित्युक्तं तत्र संचितात्प्रारब्धनिष्कासनानंतरमवशिष्टसंचितस्थितौ किं नियामकं॥ इह जन्मनि कृतं कर्मागामि स
हितं जन्मसमाप्त्यनंतरं संचिते निलीनं तत्पुनर्जन्मारंभकप्रारब्धं भवति तदनुसारेण मनुष्यादिजन्म प्राप्य
प्राणी सुखदुःखादिकमनुभवतीति शास्त्रसिद्धं॥ आगामिकर्मण एवोत्तरजन्मप्रारब्धत्वमिति कुतो नोच्यते
किमवशिष्टसंचितेन॥ वीरसेन उवाच॥ आगामिकर्मसमुदाये नानाविधयोनिसंपादककर्मणां विद्यमानत्वेनैक
दा नानायोनिप्राप्त्यसंभवात्सर्वेषां प्रारब्धत्वं न संभवत्यतः कस्यचिद्योनिविशेषसंपादकस्य कर्मणः प्रारब्धत्वम
गत्यावकल्पनीयं ततोन्यद्[illegible]वशिष्टं संचितमित्येवमनेकजन्मस्वनादितो[illegible]ष्टराशीभूय संचितं भवतीत्यंगी
कर्तव्यं॥ रुचिरांगद उवाच॥ भो गुरो आगामिकर्मणोऽनेकजन्मसंपादकत्वेऽपि मनुष्यजन्म विहाय तिर्यग्योनिवि

८वशि २

रा०
३२
32

शेषप्राप्तौ तिर्यग्योनिं विहाय मनुष्यजन्मप्राप्तौ वा किं नियामकं ॥ वीरसेन उवाच ॥ हे शिशो त्वयाऽनिगूढप्रश्नः कृत
स्तस्य प्रत्युत्तरं सर्वसाधारणेन दुर्लभं ॥ अत्र केचिदुच्यते ऽनेकजन्मसंपादककर्मसमुदायान्तस्य संचितकर्मणः फ
लोन्मुखत्वनास्त्यत्र नियामकापेक्षा नास्तीति ॥ कर्मणो जडत्वेन नियामकं विना स्वातंत्र्याभावादिदं न समीची
नं ॥ एतदुक्तमेवान्तरमहं यद्वदामि तच्छृणु ॥ यं यं वापि स्मरन् भावं त्यजत्यंते कलेवरं ॥ तं तमेवैति कौंतेय सदा
तद्भावभावित इति ॥ अंते मतिः सा गतिरिति च प्रमाणेन प्राणिनामेतद्देहावसानसमये यद्यद्वासनास्फुरति त
दनुसारेण तत्तद्योनिं प्राप्नुवंति ॥ यदि कलेवरत्यागकाले वासनास्फुरणे वा को नियामक इत्युच्यते किं जीव उतेश्व
रः ॥ नाद्यः ॥ जीवस्य स्वातंत्र्ये शुभवासनामेव स्मरेन्नाशुभवासनां ॥ न द्वितीयः ॥ ईश्वरस्य स्मारकत्वे वैषम्यादि
दोषप्रसंगः ॥ किंतु तं तमेवैति कौंतेय सदा तद्भावभावित इति प्रमाणेन जन्मप्रभृति मरणपर्यंतं यस्य चित्ते
याद्विषयवासनां त्यं तं तं च चित्तासेवां ते तस्य स्फुरति ॥ किंच तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकमिति पूर्वाभ्या
सेन तेनैव ह्रियते ह्यवशोऽपि सः इति च प्रमाणेन प्राणिनः संचितकर्मानुसारेण वासनोत्पद्यते ॥ संचिते पुण्या
धिकं चेच्छुभवासना पापाधिकं चेदशुभवासना च जायते ॥ सर्वप्राणिनो वासनानुसारेणैव मरणीययोनिं
वा पूर्वयोनिं वा प्राप्नुवंति ॥ ॥ रविरंगद उवाच ॥ भो गुरो पापिनो नरकभोगानंतरं तिर्यग्योनिभोगयोग्यपापशेषे
ण तिर्यग्योनिं प्राप्य तत्पापशेषमनुभवंतीत्युक्तं ॥ एवं चेत्सर्वेषां तिर्यग्जंतूनां पापशेषसाम्याद्दुःखभोगसा
म्यं स्यात् ॥ न त्वेतदस्ति केचित्तिर्यंचो ऽहर्षभाग्याद्यो जन्मप्रभृति निधनांतं दुःखमेव भुंजते केषांचित्पिपासा

३२

समयेजलमेवनमिलतिकिमुतन्नृणधान्यादिकं॥ केचिद्वणिग्जनाः कांश्चित्तिर्यग्जंतून्वानातपवर्षास्वतिभा
रमारोप्यवर्द्धमवंटकादिषुचवणाशयाहंडेनचताडयंतरत्नस्तेनोग्रामयंति॥ अन्येतिर्यग्जंतवस्तुजन्मप्रभृति
निधनांतंदुःखमेवभुंजते॥ राजराजकुमारादिभिरतिप्रीत्यापाल्यंतेमधुरस्निग्धान्नपानादिनारमणीयालंका
राच्छादनादिनापोष्यंते॥ वीरसेनउवाच॥ हेशिष्ययेषांप्राणिनांनरकभोगानंतरंपुण्यात्किंचित्पापमधिकमस्ति
तेतिर्यग्योनिंप्राप्यआजन्ममरणंदुःखमेवभुंजंति॥ केचित्प्राणिनस्तुपुण्यपापयोःसाम्येनमनुष्ययोनिंप्राप्यत
त्रसुहृज्जनदुःखकृतंकर्मकुर्वंतिकुजनपरोपकारादपिकुर्वंति॥ किंनोदार्थंपशुपक्ष्यादीन्पालयित्वानानाप्रकारंयोध
यित्वानंदंति॥ एवंशेषेनस्यचित्राद्भिर्योमगयांकुर्वंतिसर्वदातेषुकर्मसुलालिप्साःसंतिननुतेषामंतकालेपशु
४७ विषयेयोनिप्रापकवासनाफलोन्मुखोभवतिततद्वासनानुसारेणतज्जन्यपशुयोनिंप्राप्यापिपूर्वजन्मकृतमाहा
त्म्येनकष्टंविनामधुरभक्ष्यभोज्यादिकंप्राप्यपरोपकारप्रभावेणराजराजपुत्रादिप्रीतिंप्राप्यसर्वदासुखमनु
भवंति॥ ॥इत्यद्वैतादित्यदृष्टिग्रणयेनत्तोयार्वाश्रात्माराममधुपसंवादेवीरसेनोपाख्यानेसंचितादिकर्मविषय
निरूपणंनामषष्ठोरश्मिः॥६॥ रुचिरांगदउवाच॥ भोगुरोलोकेकेचनगर्भएवनश्यंतिकेचनोत्पत्त्यनंतरंकेचन
मासवर्षादूर्ध्वंनश्यंत्यत्रकिंनियामकं॥ वीरसेनउवाच॥ हेशिष्ययस्यप्राणिनोगर्भवासमात्रकष्टभोगजनकादृष्ट
मस्तिकिंचसंचितेमनुष्ययोनिसंपादकादृष्टंस्वल्पमस्तितन्मात्रस्यपूर्वर्णानुबंधाद्गर्भधारणमात्रदुःखादृष्ट
मस्तिसप्राणीतद्दुःखंमातरंयावन्मात्रदुःखंदत्वाशुभ्राचनश्यति॥ एवमुत्पत्त्यनंतरंपक्षमासादिजीवनादृ

न० ष्टं तावद्दुःखं भुक्त्वा नश्यति ॥ सचिदानंद उवाच ॥ भो गुरो यद्यस्य गर्भवासमात्रदुःखभोगजनकादृष्टमस्ति तस्य प्रा-
३३ 33 णिनो गर्भवासदुःखभोगो मनुष्यादिनानायोनिषु समान एवेति मनुष्ययोनावेवागंतव्यं नेतरपश्वादियोनिषु
अथवा पश्वादियोनावेवागंतव्यं न मनुष्ययोनाविति अत्र किं नियामकं ॥ श्रीरसेनउवाच ॥ मनुष्ययोनौ चेतनांशा-
धिक्येन पशुमनुष्ययोन्योर्दुःखभोगतारतम्यमस्ति ॥ यथा व्यष्टौ प्रत्येकं तत्तत्पुत्रदुःखभोगजनकं प्रारब्धं भवि-
तव्यता चास्ति तथा समष्टावपि तु सांडवपुषि प्रारब्धं भवितव्यता चास्ति ॥ प्रारब्धभवितव्यतयोः को वा भेद इ-
ति पृच्छसि चेदुच्यते ॥ प्रारब्धं तु सर्गादौ तत्पूर्वकर्मानुसारेण भगवता निर्दिष्टं बीजभूतं ॥ भवितव्यता तु तदनु-
सारेण तत्तद्देशकालादौ तत्पदार्थसंसर्गजनितसुखदुःखविपाकरूपा ॥ यथा कस्यचित्प्राणिनः प्रारब्धे स-
र्पादिदंशनमथवा हस्त्यादिघातो वैकल्यं सूक्ष्मरूपेणास्ति परंतु कस्मिन्देशे कस्मिन्काले केन निमित्तेन किं भविष्य-
तीति न ज्ञायते ॥ भवितव्यतया तत्सर्वं ज्ञायत इति तयोर्भेदः ॥ ईश्वरस्तु सर्वचांतर्यामिरूपेण तिष्ठन्सर्वजंत-
नां तत्तत्प्रारब्धानुरूपेण संयोगवियोगादिकं कारयति ॥ किंच कस्य प्राणिनउदरवासमात्रकष्टजनकमदृ-
ष्टमस्ति ॥ एकस्याः स्त्रियाः पुत्रलालनादिसुखजनकीभूतादृष्टं नास्ति किंतु गर्भधारणप्रसववेदनादिदुःख-
जनकादृष्टमस्ति किंच तस्याः अन्यमनुष्यैरनेकप्राणिभिः साकं संयोगवियोगादिजनितसुखदुःखजनका-
दृष्टमप्यस्ति तयोः स्त्रीबालकयोः पूर्वजन्मसंबंधश्चास्ति ॥ तच्चेयं स्त्री स्वप्रारब्धानुसारेण तत्संबंधीतरप्राण-
दृष्टवशाच्च सा मनुष्ययोनौ जायते तदनुरोधेन स बालकोऽपि मनुष्ययोनौ तदुदरवासमात्रकष्टं भुक्त्वा नश्यप ३३
८१

ति॥ एवं सा स्वादृष्टानुसारेण पश्वादियोनौ जायते तत्तदनुरोधेन सोऽपि पश्वादियोनौ तद्गर्भवासमात्रदुःखमनु
भूय नश्यति। परंतु पूर्वोक्तनारीत्यैवं तयोरंतकाले भवितव्यतानुरोधेन तत्तद्योनिवासनाफलोन्मुखो भवति पुन
स्तौ तत्काले वैरस्य ज्ञानतद्वासनावशात्तत्तद्योनिं प्राप्नुतः॥ यः कश्चित्प्राणी मनुष्यादियोनिं प्राप्य पञ्चमासादि
काले स्थित्वा नश्यति तत्रैवं समाचारः॥ यस्य प्राणिनो मनुष्यजन्मसंपादककर्म स्वल्पमस्ति अथवाधिकम
पि स्यात्परं तत्स्वल्पं वंधीत्वरबहु प्राणिनः स्वस्वादृष्टवशात्स्वर्गनरकादौ सुखदुःखादिकं भुंजते ऽधुनैतल्लोकाम
प्राप्तास्तन्मध्ये केचन दशपंचवर्षे लोकं प्राप्ताः॥ अयं पञ्चमासादिजीवनार्हः प्राणी स्वांतकालवासनावशान्म
नुष्यादिजन्म प्राप्य तत्र स्वादृष्टानुसारेण पञ्चमासादिकालं सुखं दुःखं च भुक्त्वा नश्यति॥ तज्जन्ममरणवशात्
पितृमात्रादयः संबंधिनोऽपि सुखदुःखलाभालाभादीन्प्राप्नुवंति॥ एवं सर्वयोनिषु वगंतव्यं॥॥॥ इत्य
द्वैतादित्यदाक्षिणात्ययनेतृतीयार्कश्चात्माराममधुपसंवादे वीरसेनोपाख्याने संचितादिकर्मविषयनिरूपणं नाम स
प्तमो रश्मिः॥७॥ रविरंगद उवाच॥ ॥ भो प्रभोयः कश्चन पुरुषः कुलीनो धनाढ्योऽसत्यपि रूपेणादृष्टस्वभा
वः कठोरश्च भवति॥ कश्चन तत्वतिकुलीनो न भवति दरिद्रोऽपि सन्मृदुस्वभावो मृदुभाव उदारश्च भवति तत्र किं
नियामकं॥ यद्येवमुच्यते पूर्वजन्मीयपुण्यपापादृष्टवशात्तयोर्दुष्टस्वभावसत्स्वभावौ भवत इति तदा कुली
नत्वधनाढ्यत्वादिप्रापकपुण्यादृष्टे विद्यमाने कथं दुष्टस्वभावादिसंपादकपापादृष्टमस्तीति कल्पनी
यं॥ दारिद्र्यादिसंपादकपापादृष्टे विद्यमाने कथं वा मृदुस्वभावादिसंपादकपुण्यादृष्टमस्तीति कल्पनी।

२० यं ॥ वीरसेन उवाच ॥ ॥ हे शिष्य ते निगमे मार्गद्वयं कर्ममार्ग उपासनामार्गश्च ॥ तत्र कुलीनत्वैश्वर्यादिकं सुकृतफलं
२४ 34 दुष्टस्वभावादिकं क्रूरोपासनाफलं ॥ तथैव दारिद्र्यादिकं दुष्कृतफलं सत्त्वभावादिकं सत्साधनोपासनाफलं
यः फलोद्देशेन सुकृतं कृत्वा साधनोपासनादिकं न कृतवान् तस्य सुकृतप्रभावेणैश्वर्यादिकं भवति साधनोपा
सनाभावेन दुष्टस्वभावादिकं भवति ॥ तथैव यः सुकृतमकृत्वा साधनोपासनादिकं कृतवान् तस्य द्वितीयजन्मनि सा
धनोपासनाप्रभावेण सत्त्वभावादिकं भवति सुकृताभावेन दारिद्र्यादिकं च भवति ॥ यः कश्चन साधनोपासनावा
न्सौम्यस्वभावश्च परं तु दुष्टसंगप्रभावेणांतकाले पश्वादियोनिप्रापकवासनावशात्पश्वादियोनिं प्राप्यतत्रापि
सौम्यस्वभाव एव तिष्ठति ॥ तेन केचिच्छ्रितानां प्रीतिः संपाद्यते केनचित्ताडिते नापि हिंसैव क्रियते चंचलता न क्रियते
के च न गजतुरंगादयस्तु दुष्टस्वभावाः यान्कांश्चित्ताडयंति दशंति हस्तपादविषाणादिना पीडयंति च तद्भय
स्वभावानां पशूनामेव मनुष्यप्रकारा रीतिः ॥ ये प्राणिनस्तपः साधनादिकमाचरंति भगवद्भक्तिबीजमपि तेषां
२५ हृदये वर्तते ॥ ॥ अथ मृत्युं प्राप्ते तेनानाप्रकारं कर्म कृतवंतोपि सिद्धिं न प्राप्नुः संचितागामिकर्मप्रभावेण कदाचित्ते
षां बालेवस्त्यागकाले पशुयोनिविशेषप्रापकवासनावशात्तज्जन्म प्राप्नुवंति ॥ तत्रापि पूर्वजन्मनि यत्तपःसाध
नादिकृतं ते तत्र विस्मरंति ॥ तेषां पूर्वजन्मीयहृदि स्थितं यद्भगवद्भक्तिबीजमेतज्जन्मनि न वर्द्धते परं तत्तेषां
तद्ज्ञानं वर्तते ॥ तथैव पूर्वजन्मनि ध्यानधारणादिकं यद्यत्कृतं तत्तज्ज्ञानमपि वर्तते ॥ तस्मात्ते पश्वादयः स्वस्वजा
तीत्यानवंतो भवंति तज्जातीयादूरतो रखगमनादयस्तेषां प्रतिष्ठां कुर्वंति ॥ अस्मिन्नर्थे जडभरतोपाख्यानं प्र

३६॥

माणं तस्यसंचितानुसारेणमृगशिशुनासाकंसंमेलनेनप्रीतिरुत्पन्नातद्दशाद्रंतकालेमृगवासनयाद्वितीयज
न्मनिमृगोजातः॥तत्रपूर्वजन्मीयतपःसाधनादिकमात्मज्ञानंचनविस्मृतिमगमत्॥अतएवतदुत्तरजन्मन्यध्य
यनगुरूपदेशादिकंविनातस्यसर्वविद्याआत्मज्ञानंचस्वतःसिद्धावभूवुः॥पश्वादीनामपिज्ञानसंपत्तिरस्तीत्य
त्रभारतादिपर्वणितस्यखांडववनदहनसमयेमंदपालर्षिकथाप्रमाणं॥सऋषिःसंततत्यर्थंजौंचजन्मगृहीत्वाज
रितांलपितांचोपयेमेतस्यांतस्याःसारिसृक्काद्याश्चत्वारःपुत्राबभूवुः॥तैःपरब्रह्मत्वेनस्तुतोऽग्निस्तानरर
क्ष॥यदिपश्वादिषुज्ञानंनस्यात्तर्हिकथमेवमग्निंतुष्टुवुः॥किंचतत्रापद्धर्मेषुपौरिकनामाराजामृगालयोनिं
प्राप्यतपोब्रह्मचर्यादिकंकृतवान्व्याघ्रस्यप्रधानोऽपिजातस्तत्कथा॥किंचतत्रैवापद्धर्मेषुलुब्धकपोतीयक
था॥कश्चिद्व्याधोवनेमृगयार्थंगत्वातिवृष्ट्यापीडितःसन्नपिवृष्टिपीडितांहस्तात्पतितांकपोतींगृहीत्वाति
शीतेनांधकारेणचस्वस्थानंगंतुमशक्तःकस्यचिद्वृक्षस्यमूलेपतित्वास्थितः॥ततस्तत्कपोतीभर्त्तागत्यस्वनी
डेपत्नीमदृष्ट्वापातिव्रत्यादिस्वपत्नीगुणाननुवादंकुर्वन्नुरोद॥साकपोतीतद्भर्तृवाक्यंश्रुत्वाभर्तारमुवाच॥स
र्वस्यापिप्रपंचस्यमिथ्यात्वात्तद्दुःखंपत्न्यादिमोहंचविहायस्वगृहमागतंत्वंशीतादिपीडितमेनमातिथ्येनतो
षय॥ततःसोऽप्यतिश्रयत्नेनाग्निमानीयप्रज्वाल्यशीतनिवृत्तिंकृत्वातंव्याधमुवाचेतःपरंकिमपेक्षितमि
तितेनोक्तंक्षुधापीडितोस्मीति॥तच्छ्रुत्वासतन्निवर्त्तकोपायांतरमदृष्ट्वास्वयमग्नौपपातपुनःसाऽप्यग्नौप
पात॥ततस्तौदंपतीविमानेनस्वर्गंययतुः॥इदंसर्वंदृष्ट्वाव्याधोऽपिविरक्तःसन्तपःकृत्वास्वर्गंययौ॥एतद्धि

नै०
३५
35

स्तारः पूर्वोक्तकथाद्वयविस्तारस्तु भारते द्रष्टव्यः॥ किंच हरिवंशे वाग्दुष्टाद्याः कौशिका गार्ग्यशिष्या बभूवुः॥ ते
ऽप्यत्ये गुरुधेनुं हत्वा श्राद्धोद्देशेन तन्मांसभक्षणं चक्रुः॥ तद्दोषवशात् दशार्णदेशे व्याधा जातास्ततः कालंजरे गिरौ
मृगास्ततः शरद्वीपे चक्रवाकास्ततो मानससरसि हंसास्ततः कुरुक्षेत्रे ब्राह्मणा जाताः॥ गुरुगोहिंसापापाद्व्याध
मृगादयो बभूवुः॥ पूर्वजन्मतपोमाहात्म्येन श्राद्धमाहात्म्येन च तत्र तत्र जन्मन्यपि पूर्वजन्मस्मृतिमन्तो ज्ञानवंतश्च
भूत्वा क्रमेण मनुत्वं प्राप्ता इत्येवं कथा चात्र श्रूयंते तत्र प्रमाणमेवं ग्रंथांतरेष्वपि बहवः कथाः प्रसिद्धाः॥ ॥ इत्यद्वैता
दित्यदक्षिणायनेन्दुतीयार्कस्यात्माराममधुपसंवादे वीरसेनोपाख्याने संचितादिकर्मविषयनिरूपणं नामाष्टमो
रश्मिः॥ ८॥ रुचिरांगद उवाच॥ अंतकालीनसंकल्पानुसारेण यद्यग्रिमजन्म भविष्यति तर्हि सर्वैः प्राणिभिः
सत्संकल्प एव किन्न क्रियते किमिति दुःसंकल्पं कृत्वा दुःखजन्म प्राप्यते॥ वीरसेन उवाच॥ अंतकालिकसंक
ल्पानुसारेण जन्म भविष्यतीति सत्यं परंतु सत्संकल्पस्फुरणं प्राणिनां स्वाधीनं नास्ति किंतु पूर्वसंचितानुरो
धेनेहजन्मनि वासना जायते॥ अस्मिन्जन्मनि यद्विषयवासना चित्ते दृढा भवति सैवांतकाले स्फुरति॥ संचिते
सुकृतात्मकमथवोपासनात्मकं पुण्यमधिकमस्ति चेत्प्राणिनः सद्वासनोत्पद्यते पापाधिक्ये च दुष्टवासनो
त्पद्यते॥ यथा वा कस्यचिन्नरस्य रहसि सुंदरपरस्त्रीवारणादिकं च प्राप्तं तस्य संचितस्य पापवशाद्भोगेच्छा
जायते संचितस्य पुण्यवशात्तद्भोगे भीतिरुत्पद्यते॥ सर्वेषां प्राणिनां संचिते पुण्यपापे वर्तेते तत्र पापं परस्त्र्या
दिभोगे प्राणिचित्तं प्रेरयति पुण्यं त्विदमनुचितमिति तन्निवृत्तौ प्रेरयति॥ एवं पुण्यपापप्रभावेण बहुवारं

चित्ते प्रवृत्तिनिवृत्तिस्फुरणं भूत्वा परिणमेत तयोर्यस्याधिक्यं तदनुसारेण प्रवृत्तिर्निवृत्तिर्वा भवति प्राणिनः स्वा
धीनं नास्ति ॥ हे शिशोऽस्मिन्नर्थे काचिदाधुनिकीं कथां वक्ष्यामि शृणु ॥ पैठनाख्ये नगरे माधवभट्टाख्यो ब्राह्म
ण आसीत् ॥ तेन बहुप्रयत्नेन द्रव्यं संपाद्य तत्स्वर्णमुद्रिकाः कृत्वा तदादाय यात्रासमुदायेन साकं काशीगमनं
कृतं ॥ ततो गिरिजापुरग्रामाद्बहिः स्थितं यात्रासमुदायं विहाय पाकार्थं तद्ग्रामे कस्यचिद्ब्राह्मणस्य गृहे ययौ
तद्गृहस्थो ब्राह्मणस्तस्य निकटे वित्तमस्तीत्यनुमीय तस्यातिथ्यं कृत्वाद्य रात्रावत्रैव स्थातव्यमिति स विन
ये प्रार्थयामास ॥ सोऽपि भोजनं कृत्वा तत्रैव सुष्वाप ॥ ततोऽर्धरात्रसमये गृहस्थो ब्राह्मणः सकुटुंब उत्थाय
निद्रितं माधवभट्टं हस्तपादादौ रज्ज्वा सम्यक् बध्वा वस्त्रेण मुखादिकं सम्यगाच्छाद्य मर्मस्थलेषु बलात्का
रेण ताडयामास ॥ माधवोऽपि घटिकाद्वयमत्यंतताडनेन विह्वलः सन् मृतवन्मूर्छितो जातः ॥ सग[illegible]
स्तं मृतं ज्ञात्वा वस्त्रेण बध्वा तस्माद्ग्रामाद्योजनानंतरमन्यग्रामसमीपे कस्यांचिन्नदीकुल्यायां तं निक्षिप्य स्वगृ
हमागत्य तद्धनं गृहीतवान् ॥ यात्रासमुदायस्त्विदमज्ञात्वा काशीं गतः ॥ प्रातःकाले गोपालकास्तत्र कुल्या
यां तद्वस्त्रग्रंथिं दृष्ट्वा तद्वृत्तं ग्रामाधिपाय निवेदयामासुः ॥ सोऽपि तत्रागत्य तद्ग्रंथिं मोचयित्वा तं जीवंतं
ज्ञात्वा स्वग्राममानाय्यौषधादिना तं पोषयामास माधवस्तु मासानंतरं स्वस्थः सन् स्वं ग्रामाधिपं स्ववृत्तांतं नि
वेदयामास ॥ तेनोक्तं मम प्रयोजनांतरमस्ति तत्कृत्वा भवत्समाचारं विचारयिष्यामीति ॥ ततो माधवस्तु य
द्भवितव्यं तज्जातमितः परमत्र स्थित्वा किं करिष्यामीति विचार्य काशीं गत्वा तत्रैव वैराग्येण संन्यासं गृहीत

ने० वान॥ पुनर्वर्षानंतरं तीर्थाटनार्थं निर्गत्य पितृविनाशपुरमागत्य तद्ब्राह्मणगृहं गतवान॥ तत्र पुत्राभ्यां सह पिशाच
३६ गृहीतं तं ब्राह्मणं ददर्श॥ तत्समीपे तेनयत्र तन्मतान्जनैर्बद्धा गृहीता मां विवेकैर्यच्छिशुसंस्थाप्यामि मंत्रिताः संत एवं वदं
36 ति॥ अहं माधवभट्टाख्यब्राह्मणएते मां हत्वा ग्रामाद्बहिः क्षिप्त्वा मदीयं धनं गृहीतवंतः॥ तएतानहं नत्य नालिमार
यित्वा नेष्यामि॥ मां विवेकेन कथ्यते तत्र बोधितबलिदानादिकं कारयिष्याम एतान्मुंच॥ माधवस्तामेतत्सर्वं दृष्ट्वा वि
स्मितः सन्मनस्येवमालोचितवान्॥ मयि जीवति सति को वा माधवः पिशाचो भूत्वैतान्पीडयति॥ हे पिशाच त्वं त
ब्राह्मणपूर्वं पापाद्दृष्टमनेनोग्रकर्मणा मिलित्वैतस्य भ्रांतिमुत्पादयामास॥ सा भ्रांतिर्माधवभट्टाख्यपिशाचं वि
हेपयामास॥ तस्माद्धे पिशाच संचितादिकर्मनाशो दुर्घटः॥ यदा मुमुक्षुः शमदमादिसाधनेन मनो निगृह्णा
ति तदापि वासनानां निवर्तते किं तु पूर्ववासनानुसारेणैव संकल्पः पुनः पुनः स्फुरति॥ सद्गुरुप्रसादाद्ब्रह्म
वदनुग्रहाच्चाभ्यासद्वारा शनैः शनैः संचितहानिर्वासनाक्षयश्च भवति॥ यदा मुमुक्षोः सुखदुःखलाभाला
भमानापमानशत्रुमित्रादिषु समता भवति यदा च मनोरूपसमुद्रे वासनातरंगाणामुपशमस्तदा तस्य संचि
तादिसर्वकर्मक्षयो जात इति मंतव्यं॥॥ ॥ इत्यद्वैतादित्ये दक्षिणायने तत्त्वार्कं आत्मारामसमधुपसंवादे वीर
सेनोपाख्याने संचितादिकर्मविषयनिरूपणं नाम नवमो रश्मिः॥९॥ ॥ रुचिरांगद उवाच॥ ॥ ॥ योगुरो
सर्वस्य वशी सर्वस्येशान इति श्रुतिप्रमाणेन सर्वस्वातंत्र्यं परमात्मन एव न तु कर्मणस्तज्जन्यवासनाया वा
भवदुक्तरीत्या कर्म तज्जन्यवासनयोः स्वातंत्र्यं भासते तत्तयोर्जडत्वादिदमन्याय्यं॥॥ वीरसेन उवाच॥ ॥ यथा

ऽत्वया शंकाहृता तथा ममापि प्रश्नमसाधनदशायां शंका जाता ततः पितरं पृष्टवानहं ततस्तेनोपदिष्टं यन्न पे
व स्मि इदानीं तच्छ्रेयकानि हत्यर्थं मया यदुच्यते तदवधारणीयं ॥ तथा हि हे शिशो ॥ कामः करोति नाहं करोमि
कामः कर्त्ता नाहं कर्त्तेति श्रुत्या यद्यपि कामादि जडस्यापि स्वातंत्र्यं भासते तथापि चिज्जडात्म्यापन्नस्य जडस्य कर्तृ
त्वं न तु चिज्जडात्म्यं विना स्वातंत्र्यं ॥ एवं वासनापि जीवतादात्म्यापन्ना सती आहत स्वरूपं जीवं स्वाधीनं करोति ॥
एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष ह्येवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्य अधो
निनीषते ॥ इति श्रुत्यांतर्याम्येव सर्वं यमयति विस्मृतिपरायणं कर्मबद्धं जीवं चोर्ध्वाधोगतिं नयति परं त्वेवैषम्यनै
र्घृण्यदोषनिवृत्त्यर्थं तत्तत्प्राणिकर्मानुसारेणैव ॥ जीवस्तत्प्रेरणये व वासनाबद्धो भवति वासनापि तेन प्रेरिता
सती प्राणिनः प्रयाणसमये कर्मशरीरं विक्षेपयति तत्काले तत्तद्वासनाफलोन्मुखस्तत्रपतितं बोधिका च भवति ॥
एवं सर्वमप्यंतर्याम्यधीनं तस्माद्धे शिशो त्वं सर्वकर्मफलं त्यक्त्वा त्यागाभिमानं च त्यक्त्वा तमेव शरणं व्रज ॥ यमेवै
ष वृणुते तेन लभ्य इति प्रमाणेन त्वानि नित्यं सर्वकर्मफलाशां परित्यज्य भगवत्प्रसादमेव प्रार्थयेत ॥ शुभशुभत्वेवा
ऽनेकजन्मकर्मानुसारेण शुभाशुभफलं प्राप्नुवंतोऽपि तच्छुभफलेन प्रसीदंति न सज्जंते ॥ अशुभफलप्रा
प्तावपि न मादार्थ्यादिकं पुरस्कृत्य यथा यथा भगवच्चरणमाप्नुवंति तथा तथा तत्प्रसादेन तेषामनेकजन्मा
र्जितसंचितनाशो भवति ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमित्यपि प्रमाणं ॥॥॥ अथ ममपितृकृतविचा
रः ॥ ॥ सर्वे जनाः किं भवतीति वदंति बुद्धिमंतः किमभूदिति वदंति ॥॥॥ अस्यार्थः ॥ सर्वे संसारिणः अज्ञाने

नै० २० नवकल्मषहृदयाः संतः संसृतिसमरणेप्रा किं भवतीति इदानीं किं भवति अग्रे किं भविष्यतीत्युक्त्वा चिंतां कुर्वंति
न तु न किंचिज्ज्ञातं न किंचिन्नष्टं तथा सति किं भविष्यतीति चिंता कथं संभवतीत्यभिप्रायेणाह॥ बुद्धिमंतो वि
वेचनशीलास्तान्हीनानां विवेचनाभावाज्ज्ञानवंत इत्यर्थो लभ्यते किमिति वाक्यार्थेन किंचिद्भूदित्यर्थः॥
बुध्या किमभूदिति ईश्वरेण स्वतंत्रेण यल्लिखितं तद्भूतं तथा च न किंचिदाश्चर्यमस्ति चिंतायाः प्रसक्तिरेव ना
स्तीति भावः॥ एतेन पूर्वं न किंचिज्ज्ञातं न किंचिन्नष्टमिति यदुक्तं तत्संगतं ज्ञातः लोके सर्वेषां जीवानां कर्म
भोक्तृत्वेन कर्मणः संचितागामिप्रारब्धरूपत्वेन तेषां मेलनं विना जीवस्य सुखदुःखाद्यसंभवेन कर्मफल
भोक्तृत्वमेव न स्यादित्याशंकाप्यपास्ता॥ अयं भावः॥ प्रारब्धादीनामनात्मकसंयोगजनकत्वेन कश्चन ईश्वरो वरि
वर्तीति वक्तव्यं यथा मृदि मूलकारणीभूतपरमाणुसंयोगजनकत्वेन कर्त्ता तिष्ठतीति॥ न च प्रारब्धादीनामेव मे
लनात्मकसंयोगसंपादकत्वमिति वाच्यं प्रारब्धादीनां जडत्वेन कर्त्रांतरमंतरेण फलोपधानं न संभवति न हि वास्या
दीनां छिदादिव्यापाराणां कर्त्रारमंतरेण फलोपधानं दृष्टमिति दिक्॥ आत्माराम उवाच॥ हे मधुपर विरागदणन
त्परमविचारं श्रुत्वा विगतसंशयो जातः॥ पुनरेकस्मिन्विषये संदिग्धः सन्पुरं पृष्टवान्॥ ह विरागद उवाच॥ ॥
भो गुरो वेदाश्चत्वारः॥ एवं त्रयीधर्ममनुप्रपन्ना इति वेदानां त्रयीति संज्ञा कृता॥ तत्कथं संभवति॥॥॥ वीरसेन (७२
वाच॥ हे शिष्य एतस्मिन्विषये बहुशिष्टानामगणाणां मतद्वयमस्ति॥ तदेव मतद्वयं निरूपयिष्यामि शृणु॥ जय
सेनस्यैवं मतं वेदचतुष्टयस्य ब्राह्मणान्तर्नियवै पूर्ववर्णत्रयाधिकारकत्वेन त्रयीति संज्ञेति॥ हे शिष्य एतद्वयं युक्तिर्वि ३६

द्विकल्पितानन्तप्रमाणसिद्धा ॥ सदज्ञानंदरूपमनंतंत्वेवं ॥ सर्वज्ञश्रौतवार्मेस्तु कृष्णस्तुः साम्नांचयाणमेवचेदानामुप
योगात्त्रयीशब्देनतेषामेवग्रहणं ॥ अथर्वणोवेदत्वेप्युपासनाकांडत्वेननतस्यपृथग्ग्रहणमिति ॥ द्वेशिशेणात्तन्मतं
बहुप्रमाणसिद्धतयाऽस्मदभिमतं ॥ ॥ ॥ ॥ इत्यद्वैतादित्येदक्षिणायनेनत्तीयार्केवीरसेनदेवांगदसंवादेसंचिंतादिक
र्मविषयविवेचनंनामदशमोरश्मिः ॥ ॥१०॥ ॥ ॥ ॥ इतितृतीयार्कः ॥ समाप्तः ॥३॥ ॥ ॥ ॥ ॥ ॥

ॐश्रीगुरुभ्योनमः॥ ॥अथचतुर्थार्कःप्रारंभः॥॥॥आत्मारामउवाच॥॥॥अथरोहिताख्योपाख्यानं॥ ॥तद्देशे
पारंपर्येणैवंसंप्रदायः॥ स्वात्मन्यन्यत्रचपरमात्मानंसमंपश्यंति॥स्वात्मानंब्रह्माभिन्नंमन्यंते॥तथैवस्वात्मन्य
न्यत्रचयत्तेजोबलबुद्ध्यादितद्भगवत्तेजोबलबुद्ध्यादिकमेवमन्यंतेतत्स्वरूपेणयाभिन्नंनमन्यते॥एतद्वृत्तेःकदा
पिनचलंति॥रोहिताख्यस्यबुद्धिरग्रादृष्टिस्तीव्राचास्तियेयेपदार्थास्तद्दृष्टिगोचरास्तेसर्वेप्रथमंब्रह्मत्वेनभा
संतेपश्चात्तन्नामरूपेण॥तस्यकुलेपारंपर्येणस्वपितृसकाशादेवब्रह्मोपदेशोभवति॥तस्यद्वौशिष्यौस्तः॥तत्रैको
विचित्रनामाचित्रजातीयः॥तत्पितृपितामहादयोरोहिताख्यपितृपितामहादिभिरुपदिष्टाः॥द्वितीयःसात्वि
कनामाचातकजातीयः॥एतत्कुलेसर्वेब्रह्मनिष्ठाःसर्वेस्वपितृसकाशादेवब्रह्मविद्यांप्राप्नुवंतः॥सात्विकस्तुबा
ल्येस्वपितुःपरलोकगमनात्स्वपितुर्विद्यामप्राप्यविद्यार्थीसन्बहुस्थलेषुसद्गुरुमन्वेषयन्हिवासंकृत्वाऽध्ययन
तपःसाधनादिकंसंपाद्यपरिणामेतज्ज्ञानस्यरोहिताख्यनिकटेविद्यमानत्वात्तंप्राप्यतत्प्रसादेनस्वरूपसिद्धिंप्राप्तः॥
रोहिताख्यस्यसर्वज्ञत्वेनतत्पितृसंप्रदायानुसारेणैवब्रह्मविद्यामुपदिदेश॥विस्तरेणएतद्वृत्तांतस्त्वेवं॥यदासप्रौढो
जातस्तदामात्रैवमुपदिष्टः॥इतोनिर्गत्यगुरुंसंप्राप्यविद्याद्यध्ययनंकृत्वापितुःसंप्रदाययोग्यतापालनीयेति॥त
तःसगृहान्निर्गत्यकुत्रचिद्विद्याकरणंकुत्रचिन्न्यायादिकमधीत्यांततोरोहिताख्यशरणंगतवान्॥रोहिताख्यस्तस्य
शिष्यंविचित्रमेनंवेदांतशास्त्राध्ययनंकारयसाधनाद्युपदेशंचकुर्वित्युवाच॥सात्विकस्तथैववकियत्कालेनतत्समी
पेशास्त्रादिकमभ्यस्यततउदासीनोभूत्वापक्षिराजसमीपंगतवान्॥पक्षिराजस्तुतानदृष्टातज्ज्ञाविपलंज्ञात्वा

साचारवर्णनंनामप्रथमोरश्मिः ॥ १ ॥ ॥ आत्मारामउवाच ॥ हेमधुपरोहिताहंनिजशिष्योविचित्रः शास्त्राध्य
यनेनतपःसाधनादिकंचसंपाद्यतेत्वोपदेशयोग्यतांप्राप्तःसन्यथागुरुणोपदिष्टोयथावातयोःसंवादोज्ञातस्तं
शृणु ॥ ॥ विचित्रउवाच ॥ ॥ भोगुरोब्रह्मणोनिर्विकारत्वेनजीवस्यचतथानिद्रादिविकारित्वेननतयोरभेदः क
थंसंभवति ॥ रोहिताहउवाच ॥ ॥ हेशिष्यजीवस्यतुत्वयानज्ञातं ॥ जीवस्यव्यावहारिकपारमार्थिकभेदेनद्वैवि
ध्ये द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते ॥ तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशी
तीतिश्रुतेः ॥ ॥ विचित्रउवाच ॥ ॥ भोगुरोअहंस्वेकएवमयिद्वैविध्यंकदापिनानुभूतंतस्माज्जीवस्यद्वैविध्यंक
थं ॥ रोहिताहउवाच ॥ उभयजीवयोर्भेदःपरमार्थतःनतस्मात्तयोर्भेदोनानुभूयते ॥ त्वंतुनिर्विकारःह्य
धादयोऽन्यधर्मास्त्वय्यारोप्यंते ॥ अस्मिन्विषयेतवयथायथासंदेहउत्पद्यतेतथातथामयासर्वंविवादंकृत्वा
पुनःस्वमनसिविचारयसिचेत्तदायंविषयस्त्वयाज्ञातोयेत ॥ इदानींत्वंयदहंपृच्छामितदुत्तरंनिर्भयोवद ॥ त्वंतव
वस्थात्रयसाक्ष्यसितनस्त्वयिवः स्वपितिवंकः स्वापयतिपुनःसुप्तंत्वांकोजागरयतिजागृतंत्वांकउत्थाप
यति उत्थितंत्वांकश्चेष्टयति ॥ प्राणप्राप्तिभ्यामतीतस्त्वंनित्यतृप्तोसिवास्त्वयिअतृप्तः ॥ चक्षुरूपात्तृप्यतिश्रो
त्रंशब्दाद्रसनारसात्त्वक्स्पर्शात्घ्राणंगंधात्उदरंभोजनात्तृषार्तंकंठोऽप्यतःप्यतिरसरूपादिप्राप्तिसत्यामपि
योनतृप्तोभवतिसर्वजगदिदिप्राप्ताववियोनतृप्तोभवति ॥ सोपिवास्त्वयिनमेववद ॥ ॥ विचित्रउवाच ॥ अह
मेवसुप्तोस्मिअहमेवजागृतोस्मिअहमेवोत्थितोस्मिअहमेवचेष्टितोस्मिअहमेवतृप्तोस्मिअहमेवअतृप्तो
२१

यो० स्मिमयिमदन्यः कोपिनास्ति ॥ ॥रोहितास्व उवाच॥ ॥त्वदन्यः कोपिनास्तीति केवलं परं तु सर्वे एते गुणास्तव नि
५१ जस्वरूपादन्ये त्वय्येकस्मिन्निर्गुणे निर्विकारे एते गुणविकाराः कस्मात्कथमागताः ॥ कालत्रयेऽवस्थात्रयेपि त्वं यासि
नथैवासि परं तु दिक्कालभूतानां परिणामित्वं कुतः कस्य स्वात्मन्यारोप्याहमेव परिणामीति विकल्पसे एकस्याम
वस्थायां प्राप्तो भूत्वा किमपि नानुभवसि एकस्यामवस्थायां तेजसो भूत्वा नानत्र विषयेन विषयेंद्रियसंयोगं कल्पि
तान्विषयान्सहे वेति मत्वाहं क्वचिद्दीनः क्वचिद्वीरः क्वचिद्धीरः क्वचिद्विद्वान् क्वचिद्विद्वेकः कुत्रेहार्तः क्वचिन्मुदितो ना
नाभावं स्वात्मन्यारोप्य स्वयं भ्रमसि एकस्यामवस्थायां बालीनोहं धनाढ्योहं मेधाव्यहं ममेदं गृहं समेपितासामा
तासौ भ्राता पुत्रश्च ममेदं नाम ममेदं गोत्रमिति निश्चयं कृत्वा एकस्मिन्काले बालोहमिति मत्वा क्रीडसि एकस्मिन्का
ले तरुणोहमिति मत्वा न्मायसि ॥ एकस्मिन्काले वृद्धोहमिति बुध्वा नानापदार्थान्संग्रह्णासि ॥ लाभे प्रमोदसे हा
नौ संतपसि मिथ्यापदार्थानां प्राप्त्यप्राप्त्योः सुखी दुःखी च भूत्वा नंदसि व्यथसि च विदर्भदेशे वैदर्भोहं मिथिलादे
शे मैथिलोहमिति जानासि दिक्कालभूतादयो जडास्त्वदधीनाः नियम्यास्तान् यथा त्वं स्थापयसे तथैव भवंति तान्
यत्र त्वं निदधासि तत्रैव ते तिष्ठंति ॥ एतस्माद्विपरीतभावात्त्वं तु तेषामधीनोसि यस्मिन्विषयेंद्रियाणि त्वां प्रेरयंति
तत्रैव त्वं गच्छसि देशस्त्वां यत्र स्थापयति तत्रैव तदधीनस्सन् तिष्ठसि कालस्त्वां यथा कलयति तथैव त्वं कल्पसि
तस्माद्बुद्धेर्भ्रांतिमनसो मोहं विज्ञाद्धि स्मृतिमहंकारादृश्यं च यस्सम्यङ्नाशयति स पुनः स एव ब्रह्मस्वरूपः ॥ नि
मिषार्धस्य शतभागोपि तव मनो ज्ञानात्स्वयं विमुच्य स्वरूपेन तिष्ठति पुनस्त्वं स्वयं ब्रह्मास्मीति कथं कल्पसे ॥ ५१

शिष्युनोऽज्ञं भवानेवतं स्वज्ञं बोन्नागरयति कज्ञन्यापयति वास्तव्यतिनन्त्ययति च मां बोधयत्विति ॥ रोहिताश्व उवाच
॥ शुक्तौ चाकचक्यं शुक्लनीलादिवर्णो मुखे हष्टं अङ्गुलिश्च सर्वतः शुक्तिरेव ॥ यथा चाकचक्यादेः शुक्तिरधिष्ठानं त
थारोपितरजतस्यापि शुक्तिरेवाधिष्ठानं शुक्तिस्तु वस्त्वारोपितं रजतमवस्तु यथा चाकचक्यादयो वस्तुतः शुक्त्यभि
न्नास्तथारोपितं रजतं वस्तुतः शुक्तेरभिन्नं न भवति ॥ शुक्तौ यद्यप्यारोपितं रजतं तत्त्वदर्शिनस्तद्रजतमवस्तुत्वा
त्कथं शुक्तिरेव मन्यन्ते ॥ तथात्मनि भूतेन्द्रियाद्यवच्छिन्नचैतन्यं सर्वत आत्मैवेति आत्मनि कुलगोत्रनामसंबन्धाभि
मानो यस्तत्त्वदर्शिनस्तं कथमात्मैवेति मन्यन्ते ॥ ॥ विविचिरुवाच ॥ अध्यासवतः पुरुषस्य पूर्वं रजतानुभूतस्मा
दिदं रजतमिति सिध्यति ॥ तथैवाद्वितीयात्मनो भेदमयान्यथाभिमानस्य कुतोऽनुभवो भूत् ॥ ॥ रोहिताश्व उवाच
॥ संसारस्यानादित्वयाध्यासस्य नैसर्गिकत्वात्तथा हि ॥ सच्चासच्चेति द्वे अनादितः कल्प्येते तयोः सद्वस्तु तत्सि
द्धं कालत्रये प्यबाध्यं ॥ असत्तु वस्तुतः शून्यं कालत्रयेऽपि भावरहितं ॥ यथा सति अस्तित्वं नित्यमस्ति तथासति
नास्तित्वमपि नित्यमस्ति ॥ तस्मात् सत्तु नित्यत्वादस्तित्वात्सत्यारोपितं सत आत्मनि नाहं ब्रह्मास्मि अबोऽहमित्यभिमन्य
ते ॥ शुक्तिस्तु सत्त्वकाशात् सदा जागद्रूपा शुक्तौ चारोपितं रजतमसत्त्वकाशात्सदा मूर्च्छितरूपं भ्रमात्मकधियो
जागद्रूपशुक्तेरभावात् तन्मूर्च्छितरूपं रजतमेवानुभवन्ति ॥ तथात्मनि यदहं ब्रह्मेत्यहंपदं सद्रूपत्वात्सदा
प्रबुद्धरूपं महात्मानस्तस्मिन्नहंपदे विलीयन्ते ॥ अन्यथाहंपदं मिथ्यात्वादात्मनि सदा मूर्च्छितरूपं भ्रमात्मका
स्तस्मिन्नहंकारे तन्मया भवन्ति ॥ अस्याहंत्वस्यैव सोमदत्तो देवदत्तो वेति बहूनि नामानि संति अविद्या या अयमध्य

६२

च० स्तत्तस्मादविद्यारोपितान्मन्त्रादिकान्पदार्थान्भजत्याध्यायति प्रेम्णाः लोचनेन हितेन संग द्रुताति॥ तेषु मिथ्यापदार्था
५२ नाभावेषु विमग्नः स्वपिति मिथ्यापदार्थानामिच्छा पुनस्तं स्वरूपं न जागरयति॥ तं जागरं नमाशातं स्थापयति॥ तन्तु
५२ स्थितं लोभमश्च्युष्यति तत्तं नसदात्स्वरूपोसि त्वद्धितु भावात्तत्वेव योध्यस्तस्य निजतत्वाभावात्सत्येन कथं तत्प्राप्तिमा
प्नोति॥ शुद्धौ तातायां यथा नतत्त्वज्ञतेन यातत्त्वा प्राप्नोसत्यांसकुनः॥ कोदेश्वर्य प्राप्नोक द्रावै भवप्राप्नोतत्वः स्वामि
तिकल्पते॥ कदात पसः सकाशादहं तत्प्राप्नोभवेयमिति निश्चयं करोति ईदृशं संदेहान्त देशेदेशे वने वने च भ्रमति
त्तीर्दि यथा भास्कराभावादियं निशा हि कांते भूत्वा विंनवित्ते भूतले गिरौ च देशे देशे वने वने ध्यौ च भ्रमति मार्तंडं वि
ना कथं महत्प्राप्नोति॥ तथा नव निजस्वरूपोहि भास्करस्तं प्राप्नोवाहत्तमोरूपा विद्याजन्याहंकारोहि निशाय
दासनिजस्वरूपादित्याभावात्तत्प्राप्तिरूपमहदिच्छति तद्दास्वरूपादित्यं विना कथमाप्नोति॥ तदहं त्वम
गजलमेव न कोपि तेन नत्यति नंत्वे न तत्प्यतेत तदपि भ्रांति रूपं योभ्रमात्मकस्ततस्मात्तत्प्राप्तिकांत्वा सकाश
ततत्प्राप्नोति द्भवति॥ तस्माद्दवास्तवाविद्यामयमिथ्यारोपितादहं त्वनिषेधं कृत्वा विद्यामयेसर्ववास्तवेऽहं ब्रह्मा
स्मीति निजपदे विलीयस्वेति सिद्धं॥ ॥ इत्यद्वैतादित्यप्रद्ध्युलायनेच तुर्थाकं आत्मारामयुधपसंवादेरोहिता
ह्मोपाख्यानमध्ये विचित्रसमाचारवर्णनं नाम द्वितीयो रश्मिः॥२॥ आत्माराम उवाच॥ ॥ अथ विजयनाम
वासाविका ज्ञाती योपाख्यानवर्णनं॥ ॥ हे मधुप स्वलोचननामा मम त्यित्रकृष्णपुत्रोस्ति॥ मम स्वलोचनस्य बाल्याव
स्थायां पितरौ परलोकं गतौ॥ यथाहं दीप्तिमतः पारगांगतस्तत्कृतां तं पूर्वमेवोक्तं स्वलोचनोऽपि यदा तातारएव

प्राप्तस्तदा विजयस्य शरणं गत्वा तच्छिष्यो जातः ॥ कियत्कालेन विद्याद्यभ्यासेन गुरुसंप्रदायानुसारेण सिद्धिं प्राप्तः
हे मधुप विजयस्तु महायोगयस्तत्संप्रदायरीतिरपि विलक्षणा ॥ अनेन काव्यशृंगारादिषु द्वैतभावं स्थापयित्वा
स्वात्मनि सर्वीभावं दर्शयति ॥ मधुप उवाच ॥ ॥ भो प्रभो काव्येनु लौकिकं शास्त्रं तच्छृंगारादौ बहुधाऽश्लीलभा
वो वर्ण्यते एवं च तत्राश्लीलभावः क्व परमार्थभावः ॥ ॥ आत्माराम उवाच ॥ ॥ इहैमेवाद्भुतमश्लीलभावेऽद्वैतभाव
दर्शनं रसशृंगारशास्त्रं तु तत्वनादि सिद्धमृषिप्रणीतं तस्मात्परमार्थहीनं कथं स्यात् ॥ ॥ मधुप उवाच ॥ ॥ शृंगार
नायिकाभेदादिषु यथा परमार्थभावो वर्ण्यते स विस्तरेण निरूपणीयः ॥ ॥ आत्माराम उवाच ॥ ॥ आज्ञोक्तिरन्यो
क्तिरिति पर्यायः ॥ अन्यमुद्दिश्य यान्यं प्रति कथनमन्योक्तिः ॥ सा तु काव्यस्य मुख्यो धर्मः एवमन्योक्त्या शृंगारनायिका
भेदादिषु परमार्थभावं स्थापयति ॥ तत्र प्रकारद्वयं ॥ तत्रैव माद्यः ॥ सर्वस्याधिपतिरिति श्रुत्या सर्वाधिपतिः परमा
त्मा नायकस्थानापन्नः ॥ आजगदुत्पत्ति प्रलयपर्यंतं ये ये मुमुक्षवो भक्ता ज्ञानिनश्च ते सर्वे नायिकास्थानापन्नाः ॥ ना
यिका त्रिविधा स्वीया परकीया सामान्या चेति तत्र ये ज्ञानिनः स्वरूपस्थितिं नयोपायं ये ते ब्रह्मैवेत्यादि इति जगति
प्रकटा भवंति ते स्वीयास्थानापन्नाः ॥ ये तु स्वरूपस्थितिमन्येभ्यो गोपायंति परमात्मविषये स्वभक्तिमनुरागं च
न प्रकटयंति ते परकीयास्थानापन्नाः ॥ ये तु राज्यदारपुत्रधनादैहिकफलप्राप्त्यर्थं स्वीयप्रतिष्ठार्थं वा स्वर्गाद्युत्तम
लोकावाप्त्यर्थं वा तपोव्रतसाधनादिकं कुर्वंति ते सामान्यास्थानीयाः ॥ स्वकीयास्थानीयमुमुक्षोरिह लोको मातृ
गृहस्थानीयः ॥ परलोकस्तु श्वशुरगृहस्थानीयः ॥ परमात्मनि प्रथमं मनो लग्नता विवाहस्थानीया ॥ मातृग

५० ह्लादकत्वं स्मरणं देवतिर्द्विगगमनस्थानीयमिह लोकात्परलोकप्रयाणं ॥ देहाभिमाननिवृत्तिपूर्विकाविद्यानिवृत्त्यव
स्था वा ॥ एवं दिव्यादृष्टनायिकाभिन्ना धीरादिनायिकाः भिन्ना स्वीयामुग्धामध्याप्रौढाभेदेन त्रिविधा ॥ तत्र मुग्धाया
श्चत्वारो भेदाः ॥ अज्ञातयौवना ज्ञातयौवना नवोढा विस्रब्धनवोढा चेति ॥ यस्य मुमुक्षोर्हृद्वृत्तिर्न स्वरूपव्याप्ता सा मु
ग्धास्थानीयः ॥ यस्य मुमुक्षोः साधनसंपत्तिसिद्धावपि तेन सा सिद्धिर्न ज्ञायते सोऽज्ञातयौवनास्थानीयः ॥ येन सा
सिद्धिर्ज्ञायते स ज्ञातयौवनास्थानीयः ॥ यस्य धारावाहिकं ज्ञानं न जातं महद्भयं वत्त्वमुग्धनमिति प्रमाणेन यस्य वृ
त्तिः स्वरूपाभिमुखीभवितुं बिभेति स नवोढास्थानीयः ॥ यस्य मुमुक्षोर्मनो गुरूपदेशद्वारा किंचित्स्वरूपाभिमुखि सपि
पुनर्व्याकुलं सद्बहिर्निर्गच्छति स विस्रब्धनवोढास्थानीयः ॥ यस्य धारावाहिकज्ञानं प्राप्तं वृत्तेः स्वरूपाभिमुखे
भीतिरपि नास्ति स्वरूपेणानृतनसंसर्गाद्वस्थायाश्च परिपक्वत्वेन वृत्तिः स्वरूपसंलग्नापि पुनस्ततश्चलति ब्र
ह्मसदसि स्वरूपलक्षणनिर्णयसमये लज्जितवत्स्वरूपरहस्यं प्रकटीकर्तुं बिभेति स मध्यास्थानीयः ॥ यः स्वरूपे
णरमते यस्यावस्थापि परिपक्वा जाता स प्रौढास्थानीयः ॥ प्रकारांतरेण पुनः स्वीयाया भेदद्वयं एका उत्तमा ज्येष्ठा
कनिष्ठा चेत्यन्या ॥ योऽव्यभिचारेण स्वरूपस्थः यः कामपि पदवीं नापेक्षते यः ॥ कदाचित्स्वापेक्षयाधिकपदवीमंत
मपि दृष्ट्वा नेर्ष्यति यश्च स्वकुटुंबशायां तामाद्यापत्कालेवाविं विचिदपि रोषं शोकं ग्लानिं च नाप्नोति स उत्तमास्थानीयः स
लोकेऽतिदुर्लभः ॥ ययोर्ब्रह्मज्ञयोर्मध्ये वसिष्ठविश्वामित्रयोर्विवादमधिकोऽहमधिक इति विवादः प्राप्तस्तयोरधि
कपदवीमान् ज्येष्ठास्थानीयः ॥ न्यूनपदवीमान् कनिष्ठास्थानीयः ॥ अथ धीरादिनिरूपणं ॥ धीरा ॥ धीराधी ५२

43

रा॥ अधीरा च॥ तत्र कस्यापि पुरुषस्य वृत्तिः सर्वदा स्वरूपाकारा न तिष्ठति॥ समाधिप्राप्तिर्न तु नान्याधीना किं तु यमेवैष
वृणुते तेन लभ्य इति श्रुत्या परमात्माधीना॥ यो मुमुक्षुर्ह्यवितर्कं समाधिस्थं दृष्ट्वा ममाप्येवं समाधिर्भवत्विति तत्प्राप्त्य-
र्थं यतते कदाचित्तद्दशाप्तिसमये ऽथवा स्वस्य रोगादिदुर्दशाप्राप्तौ वा मायोपत्ताले च किंचिद्विपरीयं क्लेशं ग्लानिं
च न प्राप्नोति प्रसन्नः सन्नेव तिष्ठति स तत्र क्षमास्थानीयः लब्धिसारः पूर्वमेव निरूपितः॥ यः कदाचित्समाध्यप्राप्ति-
समये ऽथवा रोगादिदुर्दशायां वा मायोपत्ताले च रोषादि प्राप्तोऽपि कस्यापि न प्रकटयति समाधिप्राप्त्यर्थं दुर्द-
शादिनिवृत्त्यर्थं वा परमात्मानं स निर्दृन्न प्रार्थयते किं तु युक्त्या विनयेन च॥ स धीरास्थानीयः॥ यः कदाचित्समाध्य-
प्राप्तौ वाथवा दुर्दशाप्राप्तौ वा पत्ताले च रोषादिकं किंचित्करोति किंचित्सहते तत्प्राप्त्यर्थं दुर्दशादिनिवृत्त्यर्थं वा किं-
चिन्निर्दृया किंचिद्विनयेन च परमात्मानं प्रार्थयति स धीराधीरास्थानीयः॥ यः कदाचित्समाध्यप्राप्तौ वा दुर्दशाप-
त्ताले प्राप्तौ वा रोषादिकं प्रायत्नं प्रकटयति तत्प्राप्त्यै दुर्दशादिनिवृत्त्यर्थं च परमात्मानं निर्दृयैव प्रार्थयति सोऽधी-
रास्थानीयः॥ अथाष्टविधनायिका॥ प्रोष्यत्प्रेयस्यागतपतिकाभ्यां सह दशधा॥ खंडिता॥१॥ विप्रलब्धा
॥२॥ कलहांतरिता॥३॥ अभिसारिका॥४॥ वासकसज्जा॥५॥ उत्कंठिता॥६॥ स्वाधीनपतिका॥७॥ प्रोषित-
पतिका॥८॥ प्रोष्यत्प्रेयसी॥९॥ आगतपतिका च॥१०॥ तत्र खंडितायाः कालभेदं विना धीरादिलक्षणलक्षित-
त्वेन पृथङ्नोदाहृता॥ यस्याः सुखकाले स्वरूपावस्था न भविष्यतीत्यभिप्रायेणागतस्यापि तत्र स्वरूपावस्थाप्राप्तिर्न
जाता स विप्रलब्धास्थानीयः॥ ज्ञानिनः परमात्मना सार्धं नित्यशोऽव्यवहारोऽस्ति अर्थ्यज्ञानशयनादि पुनस्य परमा

त्मैव भासते येन व्यापारेण भगवत्प्रसादो भवेत् पुनश्चेष्टया तद्दृष्टौ परमात्मैव भासेत सैव चेष्टा ज्ञानिनोऽभिमता ॥ यदि
कदाचिद्येन ज्ञानिना भगवत्प्रसादज्ञानकीभूतो चेष्टा न प्रवर्तिता ततो भगवद्दोह्रासीन्येन तस्य ब्रह्मसामीप्यावस्था-
या भ्रंशो जातः स स्वचेष्टायां निंदितोऽपि ज्ञातः सकलहीनतविता स्थानीयः ॥ यो ज्ञानी नूनावस्थलगमनेन तत्र मम
चित्तं प्रसन्नं स्यादिदृढेन तन्मयं भवेदिति निश्चयं धृत्वा तत्र ज्ञाह्लादेन गच्छति सोऽभिसारिका स्थानीयः ॥ यस्य मनसः प
रमात्मनि संलग्नत्वेन स्वचित्तप्रसादेन चाद्यरात्रौ स्वरूपसाक्षात्कारो भवेदिति निश्चयस्तत्र रात्रावेव साक्षात्कारो भ
वति स वासकसज्जा स्थानीयः ॥ यस्याद्यरात्रौ मम स्वरूपसाक्षात्कारो भवेन्नवेति संशयेन प्रयत्नं कृत्वापि साक्षा
त्कारो न भवत्यतः खिन्नः क्लेशो भवति स उत्कंठिता स्थानीयः ॥ यस्य चित्तं समाधावत्यंतं रमते यस्योपरि परमा
त्मनः प्रसादोऽधिकः ॥ यः परमात्मनं प्रति [illegible] दूतिलक्षणमेव सिध्यति स स्वाधीनपतिका स्थानीयः ॥
यस्य केनचिन्निमित्तेन स्वरूपस्थितावंतरो भवति स श्च पुनस्तत्प्राप्त्यर्थं प्रलपति स प्रोषितपतिका स्थानीयः ॥
यस्य केनचिन्निमित्तेन स्वरूपस्थितेः च्युतिर्भविष्यतीति चित्तवैकल्यं स्यात् स प्रोष्यत्प्रेयसी स्थानीयः यस्य भग
वत्प्रसादेन स्वरूपांतर्वर्तिं मनः पुनः स्वरूपे लग्नं भवेत् स आगतपतिका स्थानीयः ॥ ॥ ॥ ॥ इत्यद्वैतादिवे
दशिरोमणौ येने चतुर्थार्के आत्मारामममथुपसंवादे विज्ञयोपाख्याने रसशृंगारादौ परमार्थभावस्थापनं नाम तृ
तीयो रश्मिः ॥ ३ ॥ ॥ आत्माराम उवाच ॥ ॥ अष्टनायिकास्तु स्वीया परकीया सामान्या साधारणाः तत्र
स्वीयायाः प्रकटव्यवहारः परकीयायाः गुप्तव्यवहारः सामान्यायाः आर्थिकव्यवहारः परकीया पुनरष्टधा ॥

अनूढा ॥१॥ ऊढा ॥२॥ अनुशयना ॥३॥ गुप्ता ॥४॥ मुदिता ॥५॥ लक्षिता ॥६॥ स्वयंदूतिका ॥७॥ विदग्धा
च ॥८॥ परकीयास्थानीयस्तानी राजयोग्येव भवति न संन्यासी ॥ धर्मशास्त्रस्य शास्तान्तत्पतिस्थानीयस्तदुपपतिस्तु
परमात्मा लोकमर्यादापातिव्रत्यस्थानीयां तच्च यो मुमुक्षुः परमात्मनि लग्नानुरागं न प्रकटयति यस्यावस्था
परिपक्वा न जाता सो ऽनूढास्थानीयः ॥ यस्यावस्था तु परिपक्वा जाता स ऊढास्थानीयः ॥ यो ज्ञानी कालवि
शेषस्वात्मनि मग्नो भवति तत्स्वरूपेणानुमानादिना तद्रहस्यं ज्ञात्वा प्रकटीक्रियते तत्प्राज्ञेन गोपायति स गुप्तास्थानी
यः ॥ सा गुप्ता भूतभविष्यद्वर्तमानकालभेदेन त्रिविधा ॥ भूतादिकालत्रयरहस्यगोपनेन तत्तज्ज्ञाधिकास्था
नीयः ॥ ज्ञानिनः परमात्मैवेष्टस्तद्व्यतिरिक्त[illegible]लाभालाभादि सर्वसंसारव्यवहारो ऽनिष्टः परं तु तज्ज्ञानी लोका
न्प्रति मम परमात्मा ऽनिष्टः संसार एवेष्ट इति दर्शयति ॥ यस्य धनगृहादिहानिर्भवति सो ऽत्र मुदितः स
न्बहिः प्राकृतवल्लोकान्प्रति रोदनादिकं दर्शयति तत्समये को ऽपि तन्मर्मज्ञो ब्रह्मस्वभूतात्मा ऽगतश्चेत्तं दृष्ट्वा भ्र
मं गतकटाक्षविक्षेपादिना संसारमिथ्यात्वं स्वीयात्मस्थितिं च सूचयति स मुदितास्थानीयः ॥ अनुशयना च स्था
नविघटनादिभेदेन त्रिविधा ॥ यस्य ज्ञानिनः स्वरूपस्थितिगोपनस्येष्टत्वेन समाध्यर्थमुचितदेशे प्रतिष्ठाप्ये
ति प्रमादेन किंचिद्रहस्यस्थलमपेक्षितमिति तेन निर्णीतं स्थलं केनचन निमित्तेन नश्यति तेन तस्य मनसि
ग्लानिर्जायते सो ऽनुशयनायाः प्रथमभेदस्थानीयः ॥ यस्य तन्निर्दिष्टस्थलवियोगेन ग्लानिर्जायते स द्वितीया
नुशयनास्थानीयः ॥ यस्य तन्निर्दिष्टस्थलगमने केनचिन्निमित्तेन प्रतिबंधो जातः पुनस्तत्स्थलीयचिन्हः

र॰ ४५ दर्शनेनतज्ज्ञामश्रवणेनवाग्लानिर्नीयतेसतन्तीयानुशायनास्थानीयः॥हितहस्तहेलास्वरतललिताभेदेनललि
ताद्विविधा॥यस्यपरमात्मविषयकप्रीतिःकेनचित्प्रकटिताचेदहंसंसारीयस्यमनसःप्रदत्तं त्याकिमितियोनिवारयतिस
हितललितास्थानीयः॥यस्याखंडसमाधिःप्रकटितश्चेन्नेनस्वापादिव्याजेनगुप्तानिवार्यतेचेत्ससुरतललिता
स्थानीयः॥योज्ञानीवामदेवजडभरतादिवज्जन्मतःस्वतःप्रकाशज्ञानगुरूपदेशमंतरासिद्धःसस्वयंदूतिका
स्थानीयः॥विदग्धाद्विविधावाग्विदग्धाक्रियाविदग्धाचेतितत्रयोवाग्व्याजेनैर्थेणान्योहेशव्याजेनस्ववरणा
र्थंपरमात्मानंविज्ञापयतेसवाग्विदग्धास्थानीयः॥एवंक्रियाचातुर्येणप्रत्युपकारमनपेक्ष्यदीनसत्वाचादि
संरक्षणादिविधिपालनार्थंकेवलंभगवत्प्रीतयेतत्प्राप्त्यर्थंचयोदत्तेष्टापूर्तादिकंसततमेवकुर्वन्नपिप्रत्युपका
रफलाभिसंध्यादिकंव्याजेनदर्शयतिसक्रियाविदग्धास्थानीयः॥एतदन्यच्छायाष्टभेदंविनालेडिताद्यष्टना
यिकाभेदंविनाचपरकीयायाःकुलटाप्येकोभेदः॥यःशास्त्रशासनलोकमर्यादादिभ्योभ्रष्टःस्वरूपस्थितेर
पिभ्रष्टःएतस्यचिन्नंपरमात्मनिसंलग्नमितिलोकाजानीयुर्वस्तुगत्यायस्यचित्तंपरमात्मनिनलग्नंकिंत्वैहि
कामुष्मिकविषयेषुसंलग्नंसज्ञानादेवताअनुधावति॥सकुलटास्थानीयः॥अथसामान्याभेदवर्णनं॥॥
खंडिताद्यष्टनायिकाविनासामान्यायाभेदत्रयं॥अन्यसंभोगदुःखिता॥१॥रूपादिगर्विता॥२॥मानवतीच
॥३॥तत्रयोःर्थार्थीभक्तःस्वशिष्येणभक्त्येनवापरमात्मप्रसादेसंपादितेसतितेनहात्वादुःखितोभवतिसोऽ
न्यसंभोगदुःखितास्थानीयः॥गर्वितात्रिविधारूपगर्विताप्रेमगर्विताग्रुणगर्विताचेति॥यस्यरूपंनामलह ४५

एवं तादृशं नास्ति भगवति तादृशी प्रीतिर्नास्ति तादृशो गुणः दिनास्ति परं तु स्वलक्षणप्रीतिगुणैर्गर्वीं तायते स

रूपादिगर्विता स्थानीयः॥ योऽर्थीश्री भक्तः वासैर्हि दर्शयतप‍ः प्रभृतिविशेषेन भगवंतं प्रार्थयन्नपि तमप्राप्य भ

गवंतं निंदत्येतन्मम व्रतसेवादृष्टापि तवप्रसादेन जातः काठोरोसीति कुप्यति च स मानवती स्थानीयः॥॥॥ इ

त्यद्वैतादित्येदक्षिणायने चतुर्थार्के आत्मारामसधुपसंवादे विज्ञयोपाख्याने रसशृंगारमध्ये परमार्थभावस्था

पनं नाम चतुर्थो रश्मिः॥४॥ मधुप उवाच॥ श्रीकृष्णे रसशृंगारे भवत्येकः प्रकारो दर्शितः अपरः प्रकारोऽपि

वक्तव्यः॥॥ आत्माराम उवाच॥ हे मधुप किंचिन्न्यूनाधिकभावेन प्रकारद्वयमप्येकरीत्या वर्ततेतत्र हे लक्षणं य

द्दृश्यामि तच्छृणु नायकनायिकासखीदूत्यादयः सर्वे तानि षेव वर्तन्ते॥ योऽयं दक्षिणे तत्स्वरूपम् इति॥ अ

थैतद्धामे हि लिपुरुषरूपसेषा स्यपत्नी विराजिति च श्रुतिप्रमाणेनोन्नाव्यवहारः सर्वोपि तानि षेव भासते

एतद्विषयविस्तारोऽनंतरं वर्ण्यते॥ एतन्मतं तद्विलक्षणं बहुत्तानि संमतं कलियुगे जयदेवपांचालदेश

स्थगुरुनानकवृंदावनस्थसूरदासकबीरनामकबुबिंदादीनामिदमेव संमतमभूत् तत्तत्कृतकाव्येनैत

न्मतं सूच्यते॥ अथ नायिकाभेदस्य द्वितीयप्रकारप्रारंभः॥॥॥ बुद्धिमतिशब्दौ पर्यायौ तानि नो मतिर्नायि

कास्थानीया सर्वाधिपतिः प्रत्यगात्मा नायकस्थानीयः॥ क्षमा वाग्धृति सत्यादयः सखी दूती स्थानीयाः

प्रमत्त्वमतो प्रथमसाधनदशायां मुग्धाभावः स्थाप्यते॥ महद् अयं वस्तु प्रयत्नमिति प्रमाणेन प्रथमाभ्यासे प्र

मत्तमतिः प्रत्यगभिमुखी भवितुं भीरुर्भूत्वा यदा बहिर्मुखी भवति तदा स नवोढा स्थानीया पुनः शनैः

र० ५६

शनैः धृतिरिति हार्दिकरूपसाक्षादुपचारेण यदि सा मतिः प्रत्यगात्मनि विमृश्यमाना भवति तदा तस्यां दिव्यस्थभा
वः स्थाप्यते॥ यदि सा मतिः प्रत्यगात्मन्याधिक्यं विमृश्य तामसलीलेन साकं रमते परं तु पूर्वभावसंस्कारेण लज्जते
ऽथ ना सम्यग्विगतभया न ज्ञाता तिष्ठेत्या स्वरूपं प्राप्ताधिकृता दि पावं न प्राप्ता तदा तस्यां मध्याभावः स्थाप्य
ते॥ यदि सावस्था परिपक्वा जायते भयमपि निःशेषं निवर्तते तदा तस्यां प्रौढाभावः स्थाप्यते॥ जातिर्द्विवि
धा स्वमतिः कुमतिश्चेति तत्र स्वमतिर्ज्येष्ठास्थानीया कुमतिः कनिष्ठास्थानीया॥ यदात्मा स्वमत्या साकं रमते
तदा कुमतिः क्लिश्यति यदा कुमत्या सह रमते तदा स्वमतेर्ग्लानिर्भवति॥ यदि कुमत्या सह रमते तदा स्वम
तिर्युक्त्या प्रत्यगात्मानं व्याजेन निंदति तदा तस्यां धीराभावः स्थाप्यते॥ यदि स्वमत्या साकं रमते तदा कुमतिर
तीव निंदां प्रकटयति तदा तस्यामधीराभावः स्थाप्यते॥ उभयलक्षणवत्यां मतौ धीराधीराभावः स्थाप्यते॥ या
मतिराध्यात्मिकाधिदैविकाधिभौतिकदुःखेष्वपि न चलति परमात्मानमनिंदित्वा प्रसन्ना तिष्ठति सोत्तमा
स्थानीया॥ एवं डिताद्युक्तनायिकाभेदाः स्वप्रकारद्वयेऽपि समानाः इति न पुनरुदाहृताः॥ या मतिः प्रत्यगात्मनि
स्वसक्तिं न प्रकटयति तस्यां परकीयाभावः स्थाप्यते॥ स्वमतिं परकीयास्थानीया कुमतिः कुलटास्थानीया
परकीयास्थानीयमतेर्व्यावहारिको जीवः पतिस्थानीयः प्रत्यगात्मा मित्रस्थानीयः॥ लोकमर्यादा लौकि
कशास्त्रं च श्वश्रूश्वशुरस्थानीये स्वकीयकुलरीतिर्ननंदृस्थानीया धृतिर्मातृयः सात्वीहृतीस्थानीयाः॥
परकीयावशिष्टभेदाः पूर्वोक्तरीत्यैव द्रष्टव्याः॥ या मतिरैहिकामुष्मिकार्थविषयिणी सा सामान्यास्थानी ५६

या तद्भेदाः पूर्वोक्तरीत्यावगंतव्याः ॥ यद्यपि किंचिन्न्यूनाधिक्येन प्रकारद्वयभावोऽपि समानः परंतु द्वितीय
प्रकारस्तु समीचीनस्तथा भाति ॥ किं बहुनोक्तेनानुभविकानामतिदर्ष्यद्धायद्वा मिदं मत मत मत्तानि नांतु तु
र्यदेमेव ॥ एतत्साहित्यशास्त्रनिर्माणतत्परैर्भरतर्षैरेवमेवतान्यर्थतत्स्यानुभवविवेकयोर्माहात्म्यवर्णने कोवास
मर्थः ॥ श्रीकृष्णो भगवान् परमात्माविर्भावैर्विभुर्भवति लोकदृष्ट्या मनुष्यभावेन गोपिकाभिः साकं विक्रीडे
एवमंतर्बाह्यतस्तस्यैव नायकत्वं संभवति तस्मात्साहित्यशास्त्रेस एव नायकत्वेन वर्णितः ॥ एवं देवास
रगंधर्वोरगाप्सरोमनुष्यादिस्त्रीप्रबन्धाः सौंदर्यवत्योरसिकाश्चवर्ण्णतेन तथापि ताः सर्वाः परित्यज्य श्रीराधि
काया एव नायिकात्ववर्णनं ब्रह्मवैवर्त्त प्रमाणेन तस्याश्चिच्छक्तिस्वरूपत्वेन सर्वजगत्कारणत्वेन लोकदृ
ष्ट्या मनुष्यभावेन चांतर्दृष्ट्या बहिर्दृष्ट्या च स्वीयातदेंतर्गतनायिकाभेदकुलटाख्यनिविक्तपरकीयात
देंतर्गतनायिकाभेदानां श्रीराधायामेव संभवेन दाक्ष्यशास्त्रेसैव नायिकात्वेन वर्णिता ॥॥ ॥॥ इत्य
द्वैताद्वित्येदक्षिणायने चतुर्थीर्वा आत्मारामंमधुपसंवादे विजयोपाख्याने श्रृंगारादेः परमार्थभावस्थाप
नं नाम पंचमोरश्मिः ॥ ५ ॥ आत्माराम उवाच ॥ ॥ हे मधुप सत्पुरुषाणां महिमत्त्वः पावनानि योयो भा
वो जगति प्रकटीभवति तेत्तान्निनस्तत्तत्तस्वाभीष्टार्थपर्यवसानं कुर्वंति ॥ अस्मिन्नर्थे कांचित्कथां वच्यामि
शृणु ॥ कश्चिदनुभवी सन्यासी कंचित्क्षुद्रामं प्राप्याग्रिमसमीर्गे व्याघ्रादिभयंप्रस्तुत्वात तद्विपयत्वात् स्थितः ॥ तत्र
केचन युवानोऽतिस्त्रीलंपटाः सन्मार्गभ्रष्टाः प्रतिदिनं स्वामिसमीपमागत्य परिहासादिकं कुर्वंतः स्थि

च०
५८
57

तां॥ स्वामिनीनां मानापमानयोस्तुल्यत्वेन स्वामीनतदीयोपहासवाक्यमन्यच्च स्वाभिप्रायपर्यवसानं कृत्वा प्रस
न्नोऽभूत॥ तत्रैकस्मिन्दिवसे ते सर्वे स्वामिनिकट उपहासार्थमेवमगायन॥ पदेकोऽनंतस्तिष्ठति द्वौ बहिष्ठौ न
द्वाकथं वास्यादिति स्वामीनद्वाक्यं स्वाभीष्टार्थपर्यवसानं कृत्वाररोद॥ तेऽब्रुवन्दंडिनिं त्वत्वा रोदिषि॥
स्वाम्युवाच॥॥ अहमेतावत्पर्यंतं जगति चिंतारहितो भूवमिदानीमवदेतद्गानश्रवणेन मम चिंता जाताऽ
तो रोदिमि॥ तेऽब्रुवन्का वा चिंतेति॥ स्वामी प्राह तनवद्वारं देहं दृष्टवान॥ अहं शरीरं नश्वरमजानन्देहे लि
प्तोऽभूवं॥ अद्यम वद्गानेन देहत्यागत्तानं जातं॥ एवं चेतद्देहमंतर्गतं संस्थाप्य द्वौ तद्द्वाहबौ बहिस्तिष्ठ
तस्तद्द्वाकथं स्यादिति रोदिमि तदानीं ते सर्वे लज्जितास्तूष्णीमासन॥ हे मधुपतेऽनन्तमतानुसारेण विजय
स्य संप्रदायोऽस्ति॥ तदीयाद्भुतचरित्रं दृष्ट्वा सर्वे त्वगशिरोमणयो विस्मितास्संति॥ तस्य शिष्यः सुलो
चनः शास्त्रसाधनाद्य स्यैतत्संप्रदायरहस्यं तत्प्रसादात्प्राप्तवान॥ सुलोचनः स्वमनस्येतत्सर्वं विचार्य
पृष्टवान॥ भोगुरीकाव्येष्वधूपदीपपर्यंकपुष्पादिस्रगंधद्रव्याणां वर्णनमस्ति तत्र कोऽसौ परमार्थभावः
किं च नायिकानायकयोः परस्परहासविलासनेत्राद्यंगाभूषणानां वर्णनं चास्ति तत्र कस्मिन्कः परमा
र्थभावोऽस्ति सर्वणीयः॥ विजय उवाच॥ हे शिष्योऽधितांतःकरणं पर्यंकस्थानीयं॥ ध्यानधारणा धू
पस्रगंधस्थानीये॥ मानसोल्लासचित्तविकासौ पुष्पस्थानीयौ॥ यथा दीपो निवातस्थो नेंगते इति प्रमा
णेन मनःस्थैर्यं दीपस्थानीयं॥ स्वरूपलक्षणानायकस्थानीयं परमात्मनो नेत्राद्यंगस्थानीयं तटस्थ ५८

लक्षणमाभूषणस्थानीयं ॥ शौचस्थैर्यनित्यत्वन्नत्वेष्टानिष्टसमभावादिकं नासिकानेत्राद्यंगस्थानीयं ॥ यत्तद्दानज्ञ
पतपःस्वाध्यायादिकं भूषणस्थानीयं ॥ परमात्मनः प्रसादो योक्तानिनः प्रतियत्नापितानिनोमनः परमात्मन्त्र
परमतिसंतुष्यतिचताबुभौ भावौ परस्परहासविलासस्थानीयौ ॥ सुलोचनउवाच ॥ ॥ भोगुरो काव्येतुंबंधननी
विमोचनस्वरतानिवर्ण्यंतेतत्रकथं परमार्थभावः ॥ ॥ विज्ञयउवाच ॥ ॥ हृदन्नेः स्वरूपप्राप्तिविच्छित्तिनीतुंब
नस्थानीये ॥ भिद्यते हृदयग्रंथिरिति श्रुत्या हृदयग्रंथिभेदनं नीविमोचनस्थानीयं ॥ तद्यथा प्रियया स्त्रिया सं
परिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमि
ति श्रुतिप्रमाणेन समाध्यानंदस्य ग्रानंदपराकाष्ठात्वेन स्वरतानंदस्य लौकिकानंदपराकाष्ठात्वेन चायंवड
समाधिस्वरतस्थानीयः ॥ सुलोचनउवाच ॥ ॥ विपरीतस्वरतस्य कोवापरमार्थभावः स्थापनीयः ॥ विज्ञ
यउवाच ॥ ॥ श्रुतिस्मृत्यादौ जगदुत्पत्तिः परमात्मनः सकाशादिति प्रसिद्धायः काश्चनत्तान्यभेदहृष्ट्या
या ५ मत्सकाशादेव ब्रह्मादयो देवा भूतानीन्द्रियाणि चेति सर्वं जगदुत्पन्नमिति मन्यते सामतिर्यद्यपि भगवन्तीति
वरातथापि विपरीतस्वरतस्थानीया ॥ ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने चतुर्थार्के आत्माराम मधुपसंवा
देविज्ञयोपाख्याने शृंगारादौ परमार्थभावस्थापनं नाम षष्ठो रश्मिः ॥ ॥ ६ ॥ ॥ ॥ सुलोचनउवाच ॥ ॥ भो
गुरोक्तानि नो महिमा श्रुतिस्मृतिप्रसिद्धस्तस्मात्कथं तस्य नायिकात्वं कल्पनीयं ॥ ॥ ॥ विज्ञयउवाच ॥ ॥ त्वानि
नोमुमुक्षादशायां नायिकात्वं संभवति ज्ञानदशायामपि प्रकारांतरेण संभवति तन्निर्णयं वक्ष्यामि स्मृण्व

च० ५८

३+ कार्य

48

ममयोर्निर्भेदश्रुतस्तस्मिन्नर्थे दृष्टान्तमाह इतीति श्रमालोन परमपुरुषस्य तत्त्वसंचिंतनबद्धचैतन्यरूपगर्भधारणेम
हत्त्वं योनिः॥ देवादिपिपीलिकांतवपुर्महत्तत्त्वजन्यं देहं तु वस्तुतो देहाद्भिन्नः परं त्वनादितत्तज्जातादात्म्या
पन्नत्वेन देहोऽस्मीति मन्यते महत्तत्त्वं कारणं देहं कार्यं कारणयोरैक्येन कार्यस्य कारणधर्मः प्राप्नस्ततो यावद्दे
ही देहतादात्म्यापन्नस्तावत्तस्य नायिकात्वमवश्यमंगीकर्तव्यं॥ ज्ञानदशायामपि यावत्प्रारब्धानुसारेण
देहधारणं तावदुपलक्षणतया तस्यापि नायिकात्वं संभवति॥॥॥ सुलोचन उवाच॥॥॥ भो गुरो भवद्भिर्ज्ञा
निपरमात्मनोर्नायिकानायकभावः प्रतिपादितः श्रुतिस्तु तयोरैक्यं प्रतिपादयति॥ लोके नायिकानायक
योः संयोगो भवति न तु तादात्म्यं॥ तस्मात्कथं ज्ञानिनो नायिकात्वे॥ विजय उवाच॥॥॥ स्त्रीत्वं पुंस्त्वं वा देहध
र्मो न त्वात्मधर्मः॥ अन्यत्रान्यधर्मारोपणं काव्यरीतिरेवं ज्ञानिनि परमात्मनि च मतौ प्रत्यगात्मनि वा नायिका
त्वं नायकत्वं च कल्पयंति वस्तुतो ज्ञानिनो न नायिकात्वं न परमात्मनो नायकत्वं॥ यदि त्वं वदसि नायिकाना
यकौ दृष्टांतौ ज्ञानिपरमात्मानौ दार्ष्टान्तिकौ दृष्टांते ये धर्मास्तत्समानधर्मा दार्ष्टान्तिकेऽपेक्षिताः एवं च यथा ते
नायिकानायकयोर्भेदः सत्यास्ति दृष्टांते ज्ञानिपरमात्मनोरभेदाद्विषमो दृष्टांत इति न हि शृणु दार्ष्टान्तिकभूत
ज्ञानिपरमात्मनोर्विवक्षितोऽभेदः कदाचिद्दृष्टांतभूतनायिकानायकयोरपि वर्ण्यते यथोन्मादावस्था
यां नायिका स्वात्मानं नायकमेव मनुते अस्मिन्नर्थे श्रीमद्भागवतं प्रमाणं॥ अथ श्रीमद्भागवते दशमस्कंधे रासक्री
डायां॥॥॥ श्रीशुक उवाच॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः॥ लीला भगवतस्तास्ता ह्यनुचक्रु ५८

स्तदात्मिकाः ॥ २ ॥ कस्यांचित्तस्यवृत्तेन्यस्यचलंत्याहापरानन्त ॥ कस्मोहंपश्यतगतिंललितामितितन्मनाः ॥ २
माभैष्टवातवर्षाभ्यांनत्राणंविहितंमया ॥ इत्युक्त्वैवेनहस्तेनयतंतस्मन्निर्दधेंऽवरं ॥ ३ ॥ किंचहेशिशोश्रीमद्भग
वत्पादपूज्यशंकराचार्याणांबालयतीनोरसश्रृंगारादिनिरूपणीयद्यपिग्रंथोजन्नास्तितथाप्येतदद्भुतपरमार्थतात्प
र्येणश्रृंगारशतकंतैर्निर्मितं ॥ श्रृंगारशतकेऽपिवयंनिपुणाइतिस्वपांडित्यप्रकटनार्थेननिरूपितंविंतवेषां
चिन्तात्राणंबोधार्थं ॥ आत्मारामउवाच ॥ ॥ सुलोचनएतत्सर्वमद्भुतसंवादंश्रुत्वाविगतसंदेहः सन्नुरंजन
नाम ॥ वियताकालेनगुरुसंप्रदायानुसारेणसिद्धिंप्राप्तवान् ॥ ॥ ॥ इत्यद्वैतादित्येदक्षिणायनेचतुर्थार्क
आत्माराममधुपसंवादेविजयोपाख्यानेश्रृंगारादौपरमार्थभावस्थापनंनामसप्तमोरश्मिः ॥ ७ ॥ आत्मा
रामउवाच ॥ ॥ अथसखिशिष्यस्तविचित्रनामकमर्मोपाख्यानवर्णनं ॥ ॥ हेमधुपयथाविजयेनश्रृंगारादिषु
परमार्थभावःस्थापितस्तथास्तुविचित्रेणापिसंगीतादिषुपरमार्थभावःस्थाप्यते ॥ तस्याप्यद्भुतःसंप्रदायः ॥ तदीय
संप्रदायानुसारेणविचित्रनामकवदरंगस्यसंप्रदायः ॥ तयोरवस्थाविदेहसमानेताभुभावपिगोवर्धनगिरिवा
सिनौपरस्परसखायौच ॥ युगंधरस्तस्तविचित्रशिष्यः परंतुविचित्रेऽपिभक्तिभावंदधाति ॥ स्तुविचित्रसंप्रदायस्य
विधानिष्ठा ॥ तत्राद्या ॥ भजनकीर्तनाभ्यासेनस्वधारावाहिकत्तानमानंदावाप्तिश्चजायतेऽतोनारदतुंबुरुवदह
र्निशंभगवद्भजनकीर्तनादिषुसक्तास्तिष्ठंति ॥ क्षणमपितद्विनेनरव्यापारेणकालंननयति ॥ द्वितीयंचतुष्पस
रूपदादिसंगीतवाक्येषुयथाविजयेनश्रृंगारादौपरमार्थभावःस्थापितस्तथास्तुविचित्रेणापिपरमार्थभाव

ष्यते ॥ भजनेन तच्छ्रवणेन वा मदिरामदांधवदुन्मत्तो भवति बाह्यपदार्थानां स्वदेहस्य च भानं तस्य नैव तिष्ठति ॥ भजन-
वेलायां यदोन्मत्तो भवति तदातिशेमालत्वं परित्यज्य त्वद्वा चिन्नृत्यति वा विटं दोलयति ॥ भगवद्भक्तिरेव तं नर्त्त-
यति अत एव स्ववशो न भवति नृत्यगानकलायामतिप्रवीणः यं भगवत्यस्यैतावान्प्रेमास्तीत्येवं लोकान् दर्शि-
यितुं स्वप्रतिष्ठार्थं वा विषयभोगार्थं वा नृत्यगानादिकं न करोति ॥ अथ द्वितीया ॥ स्ववीरमतानुसारेणास्तु वि-
त्रोः पिमनुष्यतिर्यगादीनां लोके यं कंचन शब्दं शृणोति तिन्न सर्वत्र प्रणवनादं महावाक्यघोषं चानुभवति ॥
अथ तृतीया ॥ सर्वत्र नरनारीपुरुषेषु यद्यत्त्वं तत्सौंदर्यमस्ति तत्तद्भगवत्सौंदर्यमेव प्रतिफलितमिति म-
त्वा तत्तद्रूपलावण्येषु प्रेमासक्तो न ॥ मधुप उवाच ॥ ॥ भो प्रभो तृतीयनिष्ठां श्रुत्वा तद्वैचित्र्येणात्यंतं विस्मि-
तोस्मि ॥ एतद्विषयरहस्यं विस्तरतो वद ॥ आत्माराम उवाच ॥ ॥ हे मधुप ज्ञानिनः परमात्मानं प्रकारद्वयेना-
नुभवंति ॥ तत्रैकः प्रकारः सामान्यतः शोधितांतःकरणलोचनेन सत्यं ज्ञानमनंतमित्यादिमहावाक्यलक्ष्य-
त्वेन परमात्मानमनुभवंतीति ॥ द्वितीयस्तु विशेषतस्तन्महावाक्यलक्ष्यमेव सुंदरनरनारीषु कांतिमद्रत्ना-
दिषु सुगंधितपुष्पादिषु च सुंदरः सुंदर इति कामी कांत इत्यादिविभूतिरूपेणावतीर्णमिति मत्वा बहि-
र्लोचनेनानुभवंति न नरनार्यादिरूपमित्यनुभवंति ॥ हे मधुप यदि त्वमेवं वदसि निर्गुणपरमात्मनि रूपं
नास्ति यदवतरेदिति तर्हि शृणु ॥ इदं तु सत्यं ब्रह्मणो व्यापकत्वेनावतरणं न संभवति किंतु भगवद्विभूती-
नामेवावतरणं ॥ एवं च कांतत्वसुंदरत्वयोर्भगवद्विभूतिविशेषयोरवतरणेन तु सर्वत्रानुस्यूतस्य ब्रह्मणः ५५

परमात्मानुसकललावण्याब्धिर्यैर्ये स्तु दृ नरनारीरमणीयरत्नपुष्पादयस्ते सर्वे तल्लावण्याब्ध्यंशग
हीतत्वेनोत्पद्यंते कारणधर्माणामेव कार्येऽनुगमदर्शनात्॥ ज्ञानिनो लावण्यवन्नरनारीरत्नादिषु पर
मात्मलावण्यमत्र प्रतिफलितमित्यनुभवंति॥ अत एव श्रीमन्महाभारते द्रोणपर्वणि षोडशराजकी
येनारदपर्वतौ शैब्यस्य संजयस्य कन्यां दृष्ट्वा तद्रूपे मोहितवंतावितिकथा स्मर्यते॥ तत्र ब्रह्मनिष्ठयोर्ना
रदपर्वतयोरूर्ध्वरेतसोः कन्यारूपलावण्ये यो मोहो जातः स कन्यासंबंधिलावण्येन भवति॥ किं तु प
रमात्मसंबंधिलावण्यमेवात्र प्रतिफलितमिति दृष्ट्वा मोहो जात इति भाति॥ ज्ञानिनस्तु तल्लावण्येन तत्
त्संबंधित्वेन गृहीत्वा न तत्रैव मुह्यंति॥ अज्ञानितमास्तु विषयसक्तास्तेन तल्लावण्यं तत्तत्संबंधित्वेना
नुभूयापि लोकप्रतारणार्थं न तत्र तत्र परमात्मसंबंधिलावण्यमेवानुभवाम इति वदंति ते नैव यथेष्टाः परा
न पि भ्रंशयंति॥ मधुप उवाच॥ ॥ भो प्रभो भगवद्विभूत्यवतरणं यदुक्तं तत्सम्यङ्न ज्ञातमतः कृपया
तद्विस्तरेण वक्तव्यं॥ आत्माराम उवाच॥ ॥ अत्र प्रसंगतः प्राप्तमिति समासेनोक्तं तद्विस्तारं तन्नारायणपदि
राजर्षिप्रिमत्संवदे वक्ष्यामि॥ हे मधुप पैतानावत्यर्थंतं स्वचित्रसंप्रदायनिष्ठा विस्तरेण मयोक्ता॥ इतः परं त
त्समाचारं वक्ष्यामि शृणु॥ स तु पिकमयूरजातीयानां गुरुस्तार्क्ष्यशिष्यशिरोमणिर्युगंधरनामा पिकः॥ स चित्रः
पूर्वस्मिन्काले कस्यचिन्मयूरस्यातिसुंदर्याः कन्यायाः रूपे स्वसंप्रदायानुसारेण परमात्मलावण्यमनुभू
यात्यमुह्यत॥ तत्कन्याशोभायाः कवितां गायति तद्गुणान्कीर्तयति तत्सीत्यारोहिति तद्वियोगे विलपति कि

च० ५० यत्कालमेवं तत्स्लावण्यं ब्रह्मसंबंधित्वेनानुभूयानंतरं तादृशपरमात्मानुभवसकाशाच्च्युतः सन्विषयप्राव
ल्येन तल्लावण्यं तत्कन्यासंबंधित्वेनैवानुभूतवान् ॥ परं तु लोके विहं न ज्ञायते ब्रह्मदृष्टिरेतस्य च्युतेति किं तु
पूर्ववीत्या ब्रह्मदृष्टिरस्तीत्येव ज्ञायते वस्तुतस्त्वेतन्न ब्रह्मदृष्टिर्भग्ना ॥ सत्यवित्रस्तु दैवसंपद्वान्सुपात्रभूतश्रोतः
स्वान्यायं स्वयमेव ज्ञात्वा स्वशिष्यादिसमूहमेकीकृत्य तानुवाच ॥ भवद्भिस्तु सत्यचित्रस्य तत्कन्यारूपलाव
ण्याद्दृष्टेः परमात्मभावोऽस्तीति ज्ञायते मम चैवं न किं तु तत्कन्यालावण्यमात्र एव दृष्टिरस्तीति तस्मान्मयि सद्बु
श्वासं त्यजत ॥ भवतोऽहं भगवति शापेऽतोऽयं मां गृहीत्वा नवत्वं तं दृग्भिर्मम पत्त्वविदारणं कुरुत मध्यासु
वेकालिमां संपादयत चरणयोरज्जेर्बध्वा वने प्रति वनस्थावार्षणं कुर्वतोऽयं पापाधमः कपटी भगवद्भिसु
खोऽतो भगवद्भिर्हिणमेवमेव गतिर्भवतीति कोलाहलं कुरुत ॥ इति श्रुत्वा ते सर्वे शापथभीत्या तत्सर्वं क
र्तुमुद्युक्ता बभूवुः ॥ एतस्मिन्समये गगनेऽशरीरवाणी जाता ॥ सत्यचित्रस्य सत्यभाषणेन निष्पापत्वं जातं न चेत
दुपरि भगवत्प्रसादो जातः ॥ तस्मादेनं मुंचत ॥ तस्मादेवं सत्यचित्रः सत्यवादी महाप्रतापी च ॥ ॥ ॥ इत्यद्वै
तादित्ये दक्षिणायने चतुर्थार्के आत्मारामसमधुपसंवादे सत्यचित्रसमाचारवर्णनं नामाष्टमो रश्मिः ॥ ८ ॥ आत्मा
राम उवाच ॥

॥ अथ विजयबाहूपाख्यानं ॥

॥ तस्य शाक्तिकः संप्रदायः ॥ यद्यपि शाक्तिक इति व्यवहारस्तथा
प्ययं परमाद्वैतनिष्ठावान् ॥ लोकान्दर्शयितुं स्वपारंपर्येण बहिस्तु शाक्तिकाचारः ॥ अंतर्दृष्ट्या तु स्वरूपसाग
रे मग्नः ॥ शाक्तिकास्त्रिविधाः ॥ अधमाः ॥ अधमाधमाः ॥ मध्यमाः ॥ उत्तमाश्चेति ॥ तत्रेंद्रियजन्यसुखेषा ५०

प्रार्थमेहिवैः स्वर्गादिप्राप्त्येयं त्वसाधनद्वाराद्देवतावशीकरणार्थं च येशाक्तिकमतमनुसृत्य मद्यमांसादि
भक्षणं कुर्वंति ते ऽधमाः॥ येषां वैष्णवशैवादिसंप्रदायोस्ति ये चेंद्रियजन्यसुखार्थं लोकान्प्रतार्यानर्मद्यमां
सादि भक्षयित्वा बहिर्वैष्णवाः शैवा वैष्णवा इति वदंतस्तदीयाचारं दर्शयंति अथवा ये लोकापवादभयान्मद्य
मांसभक्षणं परित्यज्य तद्भक्षणेच्छयांतः संतपंति ते ऽधमाधमाः॥ येऽहंतनिष्ठावंतो ऽपि लाभहेतोर्दे
शेन शाक्तिकमतमंगीकृत्य मद्यमांसादिकं भक्षयंति ते मध्यमाः॥ लाभहेतुं विकिमित्युक्ते सर्वप्राणि
नां चित्तं शुभकर्मकरणे प्रसीदति अशुभकर्मकरणे ग्लानिं प्राप्नोतीति लोकरीतिः॥ नद्वेष्ट्यकुशलं
कर्म कुशलेनानुषज्जत इति प्रमाणेन ज्ञानिनां शुभाशुभयोः साम्यमपेक्षितं॥ यदि कदाचिदशुभ
कर्म प्राप्नोतत्स्वाज्ञापवर्हः सन्नजन्ममरणादिप्रवाहं प्राप्स्यामीति परीक्षार्थं पूर्वमेव सदोषं कर्मा
न्नपानादि प्राणधर्मो नात्मधर्म इत्यसंगभावेन तन्मतमाचरंतीत्येको लाभः॥ मद्यपानेनेतरचिं
तां विस्मृत्य प्रसादं प्राप्य स्वाभिलषितवस्तु सर्वभावेनालोचते॥ चित्तं स्थिरीभूय धारावाहिकवृत्ति
४ती मद्भवतीति द्वितीयो लाभः॥ वेदांतरहस्यं तु राजगुह्यमिति गोप्यं च यदि रहस्यं प्रकटं स्यात्तर्ह्यनुत्पातः स्या
दिति यावद्रहस्यस्य गोपनं तावत्क्रमं विज्ञाप्यात्मद्रोहोऽपि भवति॥ तस्माद्ब्रह्मस्वरूपस्थितिगोपनार्थं बहिर्दे
ष्टा शाक्तिकरीतिमंगीकृत्यैते मद्यमांसभक्षकाः शाक्ता इति लोकान्दर्शयंतो वस्तुगत्या मद्यादिस्प
र्शमपि न कुर्वंति॥ किं च सर्वेऽपि लोका एते ज्ञानिनो ध्यानपरायणाः स्वकर्मशीला इति स्वप्रतिष्ठामि

क्षेति चित्तस्याभिलाषहरणं वेदान्तमतविरुद्धं ॥ तानि नोन्तु मानापमानादिद्वंद्वसाम्यमप्यपेक्षितं ॥ त
स्मादस्माकं प्रतिष्ठाकीर्त्यादिकं भवत्विति लोकवादो विभूतिरित्येतदर्थं लोकापवादेन चित्तं चाञ्चल्यमप्राप्य
प्रसन्नं भवत्वित्येतदर्थं च शाक्तिकमतमंगीकुर्वंतीति ते उत्तमाः ॥ हे मध्यमशाक्तिकानां प्रकारचतुष्टयं व
र्णितं पुनरपि दृष्टीकरणार्थं संक्षेपतस्तदेव वक्ष्यामि शृणु ॥ ये तु लोकाचारेण मद्यमांसभक्षणं
त्याज्यमेवेति तादृशानिंदितवस्त्विंद्रियजन्यसुखप्राप्त्यर्थमैहिककामनासिद्ध्यर्थं च येऽंगीकुर्वंतीते ऽ
धमाः ॥ एतदाचरणेनेह लोके प्रायश्चित्तस्य लोकापवादस्य च परलोके नरकस्य च भयेन तदाचरणं
परित्यज्य दुष्टसंगत्या मद्यमांसयोरानंदप्रवृत्तिदायकत्वश्रवणेन च येषां मनस्तत्रैव लग्नं तेन तद्ग्रहकाप
ट्यातिनिंदितत्वेनाऽधमाधमाः ॥ ये विचक्षणाः स्वमनसि तत्त्वासनोत्पत्तेः पूर्वं मनःपरीक्षार्थं शाक्तिक
मतमंगीकृत्य तद्भोगान्मनो निग्रहं कुर्वंति यदि मनो निग्रहः कर्तुमशक्यस्तदा तन्निग्रहाग्रहं परित्यज्य
भोक्तृत्वादिकमन्यधर्म इति मत्वाऽद्वैतनिष्ठामपरित्यज्य येन तदंगीकुर्वंति तेषामवस्थायाः पर्यवसानम
ध्यमशाक्तिकेषु भवति ॥ यदि मनोनिग्रहः कर्तुं शक्यते स्वीयमतविधिना स्वकुलाचारेण च प्राप्तवस्तु नि
येषां मनश्चंचलं न भवति तेषामवस्थापर्यवसानमुत्तमशाक्तिकेषु भवति ॥ अद्वैतनिष्ठानां शाक्तिकम
तानुसरणं तद्ग्रहणांगीकारादौ कापट्येन प्रवर्तनं च किमर्थमिति चेत्तच्छृणु ॥ ते लाभत्रयमुद्दिश्य त
न्मतमनुसरंति ॥ यावदात्मरहस्यगोपनेनावच्चित्तसमाधानं साधनादौ स्वास्थ्यं च जायते यदा तत्स्वक

च४

ढी भवति तत्त्वलोकेऽर्थार्थिनः केचिदेनं परमसिद्धं त्वा त्वामसहाय प्रच्छथनादिकं भवत्कृपया भवत्विति बद्ध
धा पीडयंति रहस्यगोपनमेतद्दुःखाभावश्चैको लाभः॥ दूषितकर्माचरणेन लोकनिंदा भवति निंदया तत
स्यापमानो भवति॥ मम चित्ते मानापमानयोः समतास्ति न वेति चित्तस्य परीक्षणमेव द्वितीयो लाभः॥ अप्रा
प्तवस्तुत्यागः किंचित्सुलभः प्राप्तवस्तुपरित्यागस्तु दुस्तरस्तस्माद्दृढीकरणेनांतस्तुष्टिरत्राभगव
न्निकटे सत्यसंकल्पत्वादिकं तृतीयो लाभः॥ हे मधुपैवं विजयबाहुरुत्तमशान्तिकः॥ ॥ ॥ ॥ इत्य
द्वैतादित्ये दक्षिणायने चतुर्थावर्ते आत्माराममधुपसंवादे विजयबाहूपाख्याने शान्तिकमतभेदनिरूपणं नाम
नवमो रश्मिः॥ ९॥ ॥ ॥ ॥ मधुप उवाच॥ भो प्रभो उत्तमशान्तिको मे द्वावस्मिंस्त्वया वर्णितं तत्कुर्वतोनंतसौ
ख्यं तं भासते परं तु स राजयोगिसांख्ययोगिभ्यामधिको वा समो वा तद्वक्तव्यं॥ ॥ आत्माराम उवाच॥ ॥ हे
मधुप राजयोगिसांख्ययोगिनौ सर्वोत्कृष्टौ कापि परवीनत्वमेव नास्त्यधिकाकृतः॥ तयोरुत्तमशान्तिकस्य
च योर्विशेषस्तं वक्ष्यामि शृणु॥ यद्यप्युत्तमशान्तः श्रेष्ठस्तथापि दोषत्रयेण कलुषितः॥ दोषत्रयं किं॥ न त्र त
दृष्टो जगतोऽनिवृत्तत्वेन ब्रह्मणः सम्यगभासमानत्वेन च स्वस्वभकर्मणः स्वरहस्यस्य च गोपनं करोति य
दितस्य ब्रह्मव्यतिरिक्तपदार्थभानं न स्यात्तदैवं प्रवृत्तिर्न स्यात्॥ यद्यद्वितीयं ब्रह्म भासेत तर्हि को वा कस्य
प्रतारणार्थं किं गोपयेत् यथानस्य दृष्टो जगतो निवृत्तिर्नास्ति तथाहंतायाश्च पि निवृत्तिर्नास्ति कस्मादयं प्रश्न इति
लोकान्दर्शयित्वांतस्तुष्ट्यणादिकं विहायाहं भगवत्समीपे सत्यवादी निष्कपटोऽहमिति स्वत्वमगत्याभिमा

चं
५२
52

नवान्भवति ॥ यदितस्याहं ब्रह्मेति निश्चयः स्यात्तर्ह्येवममभिमानं कथं कुर्यात् ॥ सांख्यनिष्ठावतस्तु ब्रह्मातिरि
क्तजगतोऽनभानं स्वात्मन्यन्यभावोऽपि नोस्थितः ॥ अंतर्बहिश्च सर्वदा तस्य ब्रह्मैव भासते ॥ तथैव राजयोगिनोऽपि
जगद्व्यवहारसत्त्वेऽपि सर्वत्र ब्रह्मैव भासते तेन तस्याहं त्वममतयोर्नष्टत्वेन सर्वदैकभाव एवास्थितिरित्युत्तमशा
न्तस्यैतद्भावादेको दोषः ॥ यद्यप्युत्तमशान्तस्याद्वैतनिष्ठास्ति तथापि धर्मशास्त्रनीतिशास्त्रलोकमर्यादानां वि
वेको नास्ति सांख्यनिष्ठावतस्त्वात्मव्यतिरिक्तार्थमधर्मशुभाशुभादीनां भानं नास्ति किंतु केवलं स्वरूपस्थि
तिः ॥ राजयोगिनस्तु यथा स्वस्वरूपस्तानं तथा धर्मशास्त्रादीनामपि ज्ञानं वर्त्तते ॥ यद्यपि राजयोग्यनन्यभावेर्ध नर्द
र्मणाच्च लोकव्यवहारे प्रवर्त्तते तथापि तद्दशायामपि तस्य स्वरूपस्थितेर्भंगो नास्ति ॥ शान्तिकस्यैतद्भावाद्द्विती
यो दोषः ॥ उत्तमशान्तिकस्य स्वमोहमात्रे प्रयत्नोऽस्ति ॥ इतरे मुक्ता वा भवंतु भ्रष्टा वा भवंतु तच्चिंता नास्ति ॥ सां
ख्यनिष्ठावतस्तु यद्यपीतरमोहचिंता नास्ति तथापि परमोहनार्थं दृष्टिनकर्माचरणमपि नास्ति ॥ राजयो
गीतु विधिपालनार्थं लोकसंग्रहार्थं च ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतमितिरीत्या सर्वसत्कर्माणि
प्रवर्त्तमानोऽपि कर्मणा तत्फलेन चालिप्तः सन्प्रकाशते ॥ शान्तिकस्यैतद्भावात्तृतीयो दोषः ॥ हे मधुपयद्य
प्युत्तमशान्तिकोऽद्वैतनिष्ठावान् तथाप्येतद्दोषत्रयग्रस्तत्वेन सांख्यराजयोग्यपेक्षया न्यूनपदवीमानेव हे
मधुपैवं विजयबाहुरुत्तमशान्तिकः ॥ तच्छिष्यो हृद्दाह्वाकुस्तन्निकटे सर्वविद्यातपःसाधनादिकं संपाद्य
योग्यतां प्राप्तस्ततो विजयबाहुःस्वसंप्रदायानुसारेणोत्तमां दिशान्तिकचतुष्टयभेदमुपदिश्यात्तमशा ५२

ज्ञिकमतेतंस्थापयामास॥ ततः कदाचिद्वृहद्वाहुः परापरप्रकृतिस्वरूपं विजयबाहुं पृष्टवान्॥ विजयबाहुर्य
थातत्त्वं तं वृहद्वाहुं सत्कृत्य॥ ॥विजयबाहुरुवाच॥ ॥ ॥हे शिशो परापरप्रकृती जगत्कारणे ः रूपत्वात्तयो
र्नमेयेन च परा शीलसंतोषादिदैवसंपत्कारणं॥ अपरा कामक्रोधाद्यासुरसंपत्कारणं॥ अथमाधमाधमयोः
पा ज्ञिकनिष्ठयोरपरा प्रकृतिः कारणं॥ उत्तमशाज्ञिकनिष्ठायाः परा कारणं॥ मध्यमशाज्ञिकनिष्ठायास्तूभे प्रकृ
ती कारणं॥ बहिर्व्रह्मनित्यत्वजगदनित्यत्वयोर्जगद्ब्रह्मणोर्भेदस्य चांतर्जीवत्वांतःकरणयोर्मिथ्यात्वस्य साक्षि
स्वरूपस्यांतःकरणधर्मसाक्षिलक्षणानां भेदस्य च याऽऽवरणं करोति साऽपरा॥ या बहिर्व्रह्मसर्गयोर्भेदं नि
राकरोत्यंतर्दृग्दृश्ययोर्विवेकमुत्पादयति च सा परा॥ हे शिशो महायोगी स्वैरपि परप्रकृतिस्वरूपं ज्ञातुमश
क्यं॥ वेदपुराणादौ देव्या माहात्म्यं यद्दर्शितं तत्परप्रकृत्या एव॥ यः परया प्रकृत्या युक्तः स स्वतंत्रः स एव मुक्तो यो
ऽपरया प्रकृत्या युक्तः स दीनः स एव बद्धः॥ पराप्रकृतिस्त्वात्माभिन्ना सद्रूपा निजभावप्रकाशिका॥ सैव चि
च्छक्तिः सैव योगमाया॥ अपराप्रकृतिस्तु सद्भिन्नान्यथारूपा निजाभावभासिका सैव मलिनसत्वप्रधा
निनी माया सैवाविद्या॥ आत्मा तु सदसद्विलक्षणो ज्ञप्तिमात्र एवेति सिद्धं॥ वृहद्वाहुरुवाच॥ ॥ आत्मन्ये
कभावसिद्धः॥ अस्मिन्नर्थे परापरात्मा चेति भावद्वयं संभवति॥ तथा चैकमेवाद्वितीयमिति श्रुतिविरोधः
विजयबाहुरुवाच॥ ॥ असत्त्वापेक्षासत्काषाशान्त्वात् सद्विलक्षणं ब्रह्मेत्युच्यते॥ वस्तुतस्तत्सदेव श्रुतिप्रमाणं स
देव सौम्येदमग्र आसीदिति तस्माद्ब्रह्मणः सद्रूपत्वमेवेति सिद्धं॥ परा तु सद्रूपैवापरा त्वन्यथारूपेति विप्रतिप

च० ५३ 53

न्निवाक्येन पूर्वोक्तायाः नपरात्परेति श्रुत्यानिषेधवृत्तिपाद्यायाः निषेधरूपत्वेन वस्तुत्वाभावान्नाद्वैतभंगः॥
तथाचयदात्मापराविरहात्मद्भावान्नाद्वैतहानेतिकल्प्यतेनतदाद्वैतपदेसद्व्याप्तिनद्वैवास्तिनिषेधपदेत्वसन्नि
षृतियानिषेधपदनिषेधंकरोतिसानिजभावभासिकापरा॥ ततः परयाप्रज्ञोद्यात्माद्वैतभावेनत्यज्ञानिषेधस्तन
परमात्मनिपदेसन्मात्रएवविजृंभतइति॥ ॥ ॥॥ इत्यद्वैतादित्यदक्षिणायने चतुर्थार्के श्यात्मारामसधुपसंवादे
विजयवाङ्समाचारवर्णने नाम दशमो रश्मिः॥१०॥ इति चतुर्था
र्कः समाप्तः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पं० ५८ 54

ॐ श्रीगुरुभ्यो नमः॥ ॥ अथ पंचमार्कप्रारंभः॥ ॥ आत्माराम उवाच॥ ॥ अथ सुवीरोपाख्यानं॥ ॥

सहजजपयज्ञाचरणमेव तस्य संप्रदायः श्रीवस्यायां भगवतः सगुणनामाभ्यासं पुनर्निर्गुणनामाभ्यासं क-
रोति॥ तस्य रात्रिंदिनं निर्गुणनामाभ्यासेन परमात्मानुसंधानं तिष्ठति॥ भेरीदुंदुभिमृदंगवीणादीनां घोषं प-
श्यपक्षिकीटादीनां शब्दं हंसादिषु वायुसंचारोत्पन्न शाखोपशाखादि शब्दं प्रणवनादो महावाक्यध्वनिरि-
ति तेनानुभूयते॥ तस्य समाधिसंप्रदाय उत्तरसंप्रदायाद्भिन्नलक्षणः॥ यदा तस्याहंता ममता च निःशेषं
नश्यति स्म तं ताभ्यासेन तस्य विस्यायां च परिपक्वा भवति तदा यत्त्वयं ब्रह्मणो निर्गुणनाम हृदि जपति तत्प-
रमात्मैव जपतीति मन्यते॥ एतदभ्यासे स्थिता स्वजपस्य परमात्मजपे लयं करोति॥ यदा स्वस्य जपसंबं-
धो निवृत्तस्तदा केवलपरमात्मजप एवावशिष्यते॥ एतद्विषयरहस्य मग्रस्वशिष्येण साकं तत्संवादस-
मये किंचिद्विस्तरेण तया ज्ञायते॥ तच्छिष्यो दुर्जयः सकलविद्यातपःसाधनादिसंपाद्य यदा योग्यतां प्रा-
प्तस्तदा सुवीरस्तं स्वसंप्रदायानुसारेण जपयज्ञं परमात्मभजनप्रकारं चोपदिदेश॥ दुर्जयउपदिष्टः
संस्तदभ्यासे स्थितः॥ प्रथमतः सगुणनाम्नो वाचिकजपं ततो निर्गुणनाम्नो मानसिकजपं च कार
तदनंतरं सुवीरस्तं यथोपदिदेश तदृश्याभिश्रूणु॥ परमात्मनो गुणा विभूतयश्चानंताः यावत्यो भगव-
द्विभूतयस्तावंति भगवन्नामानि॥ तस्मादस्मिंश्चराचरब्रह्मांडे यद्यत्किंचित्पदार्थजातमस्ति तत्र सर्वत्र स्वस्मि-
न्नपि परमात्मानं तद्विभूतीश्च व्यापकतेन पश्य॥ ये ये प्रत्येकं प्रत्येकं पदार्था यद्यद्भगवद्विभूतिमवलंब्य राम ५८

त्यक्त्वान्ये ते नानाविभूतीर्भजंते॥ तस्माद्यथा त्वमंतःसमाध्यर्थं परमात्मानं स्वहृदि भजसि तथा बहिःसमाध्यर्थं तत्त
त्पदार्थेषु तत्तद्विभूतिभजनमनुभव॥ जगति यावंतः शब्दाः ध्वन्यात्मका वर्णात्मकाश्च प्रकटीभवंति तत्तच्छब्देष्वेव
नादब्रह्मणा वाक्यं घोषत्वेनानुभव॥ परमात्मा निर्गुणस्तद्विभूतयस्तु सगुणाः त्वं तु तद्भिन्नत्वेन प्रकृतिधर्मान्विहाय
तत्स्वगुणनिर्गुणलक्षणाभ्यां लक्षितो भव॥ प्रकृतिधर्माः कीदृशा निर्गुणसगुणलक्षणे कीदृशे इत्युच्यते एवं॥
क्षुत्पिपासालस्यनिद्रादयः प्रकृतिधर्माः॥ विद्याविवेकशीलसंतोषादयः सगुणलक्षणं शुद्धत्वबुद्धत्वमुक्त-
त्वादयो निर्गुणलक्षणं॥ यदा त्वं क्रमेणोभयलक्षणतादात्म्यापन्नो भविष्यसि तदा सविकल्पकनिर्विकल्पक-
समाध्योर्विश्रामं प्राप्नोषि॥ दुर्जयो यदा स्थूलाभ्यासानंतरं सूक्ष्माभ्यासे प्रवृत्तस्तदा स्ववीरो यद्यद्विषयवासना
त्वन्मनसि विवेचितानं तत्तद्विषयस्य मिथ्यात्वमात्मनो नित्यतां च दृढीकृत्य विचिंत्य तत्तद्विषयाद्विमुखीकृत्यात्मनि-
योजयेति तमुपदिदेश॥ किंच स्वस्य परमात्मभिन्नत्वेनामुकोऽमुकगोत्रनामादिमत्वेनासर्गाद्यन्निश्चितं तन्नि-
श्चयनिवृत्त्यर्थं प्रयत्नं कुरु॥ स्वस्य परमात्मभिन्नत्वेन यो निश्चयः स एवाहंकारः॥ अभ्यासद्वारा यथा यथा परमात्म
साक्षात्कारो भवति तथा तथाहंकारस्य विस्मरणं भवति॥ यदेहलोकपरलोकसकलपदार्थविषयकवासना
विनाशेन सर्वपदार्था विस्मृता भवंति तदा सर्वनिषेधावस्था प्राप्यते॥ एषैव ब्रह्मसामीप्यावस्थेत्युच्यते॥ यदा
च निषेधनिषेधकयोर्भाननाशेन स्वरूपमात्रभानमवशिष्यते तदा सा सर्वनिषेधावधिभूतावस्था सैव निर्वि-
कल्पकसमाधिरित्युच्यते॥ परं त्वेतदवस्थाप्राप्तिरतिदुर्लभा॥ अत एव तत्प्राप्त्यर्थं स्वरूपलाक्षणिकनामा

भ्यासेन सर्वदा स्वरूपानुसंधानं कर्तव्यं ॥ यश्चित्तं स्वरूपलाक्षणिकनाम्नः श्रवणस्य वा जपं करोति तत्स्वरूपा
नुभवपूर्वकमेव कर्तव्यं ॥ यत्स्वरूपानुसंधानं विना जपति तन्न तथा ॥ दुर्जय उवाच ॥ भो गुरो यत्त्वयोपदि
ष्टं तच्छ्रुत्यादिप्रमाणमस्ति चेच्चित्तसमाधानं भवति ॥ सवीर उवाच ॥ अस्मिन्विषये बहुश्रुतिस्मृतयो वर्तन्ते त
न्मध्ये श्रुतिद्वयमत्राहं विलिख्यते ॥ तद्यथा धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं संधयीत ॥ आयम्य
तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥ अप्रमत्ते
न वेद्धव्यं शरवत्तन्मयो भवेदिति ॥ तत्रौपनिषत्पदस्य तत्त्वमस्यहं ब्रह्मास्मि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिमहावा
क्येषु तात्पर्यं ॥ यावत्सर्वानात्मकपदार्थानां निरूढत्वमारोपिताहंकारस्य मिथ्यात्वं स्वरूपमहिमा च चित्ते न
चिन्तनं भवेत्तावदनात्मपदार्थेभ्यो विरक्तिरहंकारस्य विस्मरणं च न जायते ॥ चित्तस्यासर्गादनात्मकपदा
र्थसंकल्पस्फुरणाभ्यासोऽस्ति क्षणमपि संकल्पस्फुरणं विना न तिष्ठति ॥ अतः सर्वदा ब्रह्मणो निर्गुणनाम
जपे चित्तं योजनीयं एतदभ्यासाच्चित्तस्य व्यवधानं चेत्तदा चित्तं विषयोन्मुखं भवेत् ॥ एवं रीत्यानात्मकसंकल्प
स्य निवृत्तिर्जायते ॥ परं तु समाधिप्राप्त्यर्थं संकल्पनिवारकनिर्गुणनामजापकस्य निवृत्तिरप्यपेक्षिता ॥ तस्मा
त्तस्य जपकर्तृत्वमममत्वापरमात्मैव स्वजपकर्तेति विजानीयात् ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह
मिति भगवद्वाक्यतात्पर्यगर्भितं ॥ यदा परमात्मैव जप्तेति दृढीभवति तदा स्वस्य जपसंबंधो निवर्तते प
रमात्मनि जडभावोऽवशिष्यते ॥ इयमेव ब्रह्मसामीप्यावस्था ॥ भजनं तु क्रियाविशेषो यावत्क्रियाभानं ता ५५

वद्विषयस्वरूपप्राप्तिर्दुर्लभा॥ यंभजतितस्मिन्यद्वाभजनभजनकर्त्रोर्लयोभवतिदेशकालभावेनेनसहभज
नभजनकर्त्रोर्भावेनेनश्यतितद्वाः विषयस्वरूपमात्रंविज्ञंभतेसएवनिर्विकल्पकसमाधिः॥ ॥ ॥ इत्यद्वैता
दित्यदहिरण्यगर्भेपंचमार्के आत्मारामममधुपसंवादेसवीरोपाख्यानेसमाधिभेदनिरूपणंनामप्रथमोरश्मिः
॥२॥ आत्मारामउवाच॥॥ तस्यसंप्रदायरीतिरेवं॥ स्वस्यसर्वजगतश्चब्रह्माभिन्नत्वेननमन्यतेकिंतुब्रह्मस्व
रूपत्वेनेव॥ जपतपःस्वाध्याययज्ञाद्यनुष्ठानंज्ञानध्यानादिसाधनंचकुर्वन्नपिस्वस्यतत्कर्तृत्वेनमन्यते
किंतुपरमात्मैवकर्त्ताहर्त्ताजनार्दनइतिप्रमाणेनकर्त्तेतिमन्यते॥ कुर्वन्नप्यकर्तृत्वंमन्यमानस्यशुभक
र्मणामस्याःशुभकर्मणामभयंवाकथंस्यात्॥ अशनपानगमनशयनादिकंयद्यत्करोतितत्तत्सर्वंपरमात्मैव
करोतिनाहंकरोमीतिमन्यते॥ तस्यलाभोहानिर्वायद्भवतितत्परमात्मनएवनममेतिलाभहानीचभगवत्स्व
रूपएवेतिमन्यते॥ तथासुखदुःखेतद्भोक्तारंचब्रह्मैवेतिमन्यते॥ पांडवानामिवसांसारिकपदार्थानांग्रहण
त्यागयोराग्रहोनास्तितस्ययोगक्षेमनिर्वाहकः सएवदीनबंधुः॥ वंशवाद्यवन्निजहृदयंमिथ्यारोपितनाहं
त्वादिरिक्तंकृत्वासपरमात्माधीनोजातः॥ यथावंशवाद्यंशब्दंकरोतिगायतिचपरंतुनतज्ज्ञायकोऽन्यस्तथाय
मपिहसतिवदतिपरंतुतद्धसनवदनकर्त्तारंपरमात्मानंमन्यते॥॥ मधुपउवाच॥ भोप्रभोएतद्धिलक्षणंसं
प्रदायरीतिंश्रुत्वाहंविस्मितोऽस्मि॥ एतद्विस्तरेणश्रोतुमिच्छामि॥ आत्मारामउवाच॥॥ हेमधुपएतन्मतप्रका
रोराजविद्याविशेषः॥ सांप्रतंराजविद्यायामस्यगुरुःपक्षिराजः॥ एतत्सकाशादेवैतत्परमविद्यावसिष्ठ

पं० ५६ 46

त्वगमङ्गत्कालेपृष्टवान्॥ अहं तु तच्छिष्यशिष्यस्तस्मात्पूर्वं यत्किंचिदुक्तवानस्मि॥ एतस्य विस्तारमुत्तरायणे
पद्विराजद्वीपे शिमन्त्संवादे पुनस्तत्रैव यत्किंचित्सहज्ञानंदसत्यसंधसंवादे च वक्ष्यामि॥ सद्बुद्धिस्तस्य शिष्यो
यदा विद्यासाधनादिसंपन्निःशान्नस्तदैकस्मिन्दिवसे तं प्रार्थयामास॥ भो गुरो त्वत्प्रसादेन मम यत्किंचिच्छा
स्त्रश्रुत्यन्निर्णीतास्तच्छास्त्रानुसारेण मया तपःसाधनादिकमपि संपादितं परं तु मम परमात्मानुभवो न जातस्त
स्माद्यथा स्वरूपानुभवो भवेत्तथानुग्रहेण वक्तव्यं॥ देवसेन उवाच॥ ॥ हे शिष्य परमात्मानं सकलचराचर
ब्रह्मांडव्यापकं प्रतिव्यक्त्य नुस्यूतं चानुभव॥ आत्मानं सत्यनित्यानंदस्वरूपं ज्ञात्वा तदितरनामरूपा
त्मकान्पदार्थान्मिथ्याभूतान्जानीहि॥ योस्ति स आत्मैवास्ति परं त्वदृश्यत्वान्नास्तिवद्भाति यन्नास्ति तदिदं
जगन्नास्ति परं तु दृश्यत्वादस्तिवद्भाति॥ यथा धूलिरूर्ध्वानिलसकाशान्नभसि भ्रमति अज्ञानिनो वायुमदृश्य
त्वान्नमत्वा धूल्यां स्वतश्चेष्टामारोपयंति तथैव भ्रमात्मानोऽदृश्यत्वादात्मानं नमत्वा नामरूपात्मनि जगति
दृश्यत्वात्सद्भावमारोपयंति॥ यथात्मनोन्यस्सर्वमिथ्यापि नामरूपमात्रेण सदिव भाति वस्तुतस्तुच्छ न्यः स्य
स्तस्य न चिन्हं भूतन्न भविष्यन्निरस्य मिथ्यारूपेण सर्वमिथ्या स्तिंसद्भाति यथा गतदिवसेनाभूत्तथैवाग्रेपि न भविष्यति
तस्मान्नामरूपात्मकमिदं सर्वमात्मनि बाधित्वा सद्रूपं चिन्मात्रं नित्यमात्मानमेव भजनाभिमानमपि त्य
क्त्वा भजस्वेति॥ सद्बुद्धिरुवाच॥ भो गुरो यस्त्वया ऽस्मोपदेशः कृतस्तच्छ्रुत्वाहं कृतार्थो जातः॥ परं तु शा
स्त्रीयमात्मज्ञानं भवदनुग्रहेण ज्ञातं साक्षादपरोक्षानुभवो न जातस्तस्माद्यथा साक्षादपरोक्षानुभवो भ

वेन्नयोपदिश ॥ ॥ देवसेन उवाच ॥ अत्रास्मिन्सर्वस्मिन्यत्प्रत्यक्त्वमस्ति तद्दर्शयति सिद्धं तस्य प्रत्यक्त्वादिमानि सर्वा
णि प्रत्यक्त्वानि भासंते इमानि सर्वाणि नामविकारात्पृथक्पृथक्प्रत्यक्त्वानि वस्तुतोऽप्रत्यक्त्वानि तद्वस्तुतः प्रत्य
क्त्वं वस्तुयानामविकाराद्प्रत्यक्त्वमिव भाति यथाब्धौ तरंगाः नामतः प्रत्यक्त्वा अब्धिस्तु सर्वतो वस्तुतः प्रत्य
क्तः ॥ फेनतरंगावर्त्तशैवालबुद्बुदादिभ्यो नामविकारेभ्योऽब्धिरप्रत्यक्त्वमिव भाति श्रोत्रं तद्रूपप्रत्यक्त्वं कर्त्तुं न श
क्नोति येन श्रोत्रं श्रोत्रत्वं प्राप्तं तत्कथं प्रत्यक्त्वं करोति ॥ तथैव त्वग्घ्राणचक्षूरसनाः स्वविषयभिन्नविषयं ग्रहीतुं स्व १
न शक्नुवंति येन त्वगादीनां त्वक्त्वादि प्राप्तं तत्कथं प्रत्यक्त्वं कुर्वंति मनस्त्विंद्रियागोचरान्पदार्थान्प्रत्यक्त्वान्कर्त्तुं न शक्नो
ति येन मनो मनस्त्वं प्राप्तं तत्कथं प्रत्यक्त्वं करोति बुद्धिस्तु मनोगोचरपदार्थान्प्रत्यक्त्वान्कर्त्तुं न शक्नोति येन बुद्धिर्बु
द्धित्वं प्राप्ता तत्कथं प्रत्यक्त्वं करोति यद्गुणस्सजातीयेन स्वगुणं प्रत्यक्त्वं न करोति तद्गुणिनं कथं प्रत्यक्त्वं करोति
यथाब्धौ तरंगो बुद्बुदं प्रत्यक्त्वं कर्त्तुं न शक्नोति येन तरंगस्तरंगत्वं प्राप्तस्तमब्धिं कथं प्रत्यक्त्वं करोति यथाब्धे
रप्रत्यक्त्वास्तरंगा अब्धेः प्रत्यक्त्वमाच्छादयंति तथात्मन उत्पन्नाः गुणा आत्मप्रत्यक्त्वमाच्छादयंते ॥ यथा
तरंगो बुद्बुदात्भिन्नः बुद्बुदोऽपि तरंगात्भिन्नस्तथैव फेनशैवालादयः परस्परं नामरूपभेदात्प्रत्यक्त्वाः अब्धिस्तु
तरंगो न तरंगरूपः बुद्बुदेऽपि बुद्बुद रूपः ॥ आवर्त्ते आवर्त्तात्मा तस्माद्भेदाद्प्रत्यक्त्वमिव भाति तथाकाशादिभू
तानि श्रोत्रादीनींद्रियाणि च परस्परभेदात्प्रत्यक्त्वानीव विभांति ॥ आत्मा तु भूतेषु भूतात्मा इंद्रियेष्विंद्रियम
यस्तस्माद्भेदाद्प्रत्यक्त्ववत्भाति ॥ सर्वेषु घटपटादिपदार्थेषु भेदः प्रत्यक्त आत्मनि तु भेदः प्रत्यक्त इति

१० ५८ 57 सिद्धं ॥ इत्यद्वैतादित्ये दक्षिणायने पंचमार्के आत्मारामसमधुपसंवादे देवसेनसमाचारवर्णनं नाम द्वितीयोऽध्यायः
॥ २ ॥ आत्माराम उवाच ॥ ॥ अथ सहजानंदेण व्याख्यानेन तस्य शिष्याणां समाचारेण सह ॥ हे मधुप अस्मिन्समये ज
गति तन्महद्यशो वसिष्ठः सोऽपि नाऽलिनत्वोपमास एव ॥ जातितोऽहं सोऽवस्थानः परमहंसः ॥ अंतर्बहिश्च त
च्छरीरे तैष ब्रह्मतेजो भाति ॥ सर्वाः सिद्धयो भक्त्यवत्तच्चरणौ सेवंते परं तु तस्यात्मानं विना कस्मात् विप्रयोजनं ना
स्ति सर्वदा समाधावेव निमग्नः संतिष्ठति ॥ मुमुक्षूणां तारकमंत्रब्रह्मोपदेशं विद्यार्थिनां विद्याध्यापनं च ।
कृत्वा स्वयं निर्विकल्पकसमाधिस्थो भवति ॥ एतद्भिन्नेतरव्यापारं न जानाति ॥ यद्यपि स स्वतः प्रकाशवांस्त
थापि स पित्रा स काशाद्वेदब्रह्मविद्यादि प्राप्तवान् ॥ तत्पिता पूर्णानंदः पितामहो ब्रह्मानंदः ॥ एकस्मिन्का
ले ब्रह्मसत्रे नरः कश्चन कपोतो भयेन व्याकुलो गगनमार्गेण गच्छति स्म तन्तु श्यानेन गृहीतं श्येनो धावति ।
स्म ॥ सहजानंदस्तु निजानंदे स्थितः सन्नकस्मात्तद्दर्शी ॥ तत्क्षणं तद्दृष्टिमात्रात्कपोतः प्राप्तबलः स
न्नश्वरो ह्यन्यश्येनेन युद्धं कृत्वा तं न गृहीत्वा सहजानंदपुरतः पातयामास ॥ हे मधुप सहजानंदस्य साधार
णदृष्टेरेवं महात्म्यं किमुवक्तव्यं तद्यावदाह्वीक्षणस्य ॥ सर्वप्राणिनां मनः संकल्पो भूतभविष्यद्वर्तमानं
च यद्यपि तस्य स्पष्टं भासते तथाप्येतज्ज्ञाने तिरस्कृत्य सदा केवलात्मस्थो भवति ॥ तस्यैवं संप्रदायो मुमु
क्षोः प्रथमं साधनाभ्यासमुपदिशति यदि साधन द्वारा सर्ववासनानिवृत्तिपूर्वकं तस्य चित्तं शुद्धं भवति
तदा ऽन्तरहस्यमुपदिशति ॥ शमदमादिसाधनदशायां यदि साधकचित्तं कस्मिंश्चिद्विषये धावति । ५८

तदा सहजानंदेनोक्तानदृष्टानन्तसंकल्पं ज्ञात्वा तं प्रत्येवं वदति न वचिन्न मम मुक्त विषये गतं मम विषयो नमस्तदोयस्येन्द्रिय
स्य स्वत्वार्थेनं विषयमिच्छसि तदिंद्रियमप्यनात्मकं मिथ्याभूतं तस्मान्निजानंदांह्रेमुख्येन वानुचिंतं॥ एवं शिक्ष
णेन साधकोलक्षितः सम्मुनः साधने दृढतया प्रवर्त्तते॥ देमधुपतस्य शिष्यचतुष्टयस्य नाम पूर्वमेवोक्तं मि
दानीं ते चत्वारो यथा सहजानंदेनोपदिष्टाः क्रमेणैतत्समाचारं पृथक् पृथक् वक्ष्यामि शृणु॥ सर्वज्ञतस्तु तस्य
निजशिष्यः पारंपर्येणैतत्पितामहादयः सहजानंदपितृपितामहादिशिष्याः॥ सर्वज्ञतस्तु यद्यपि यो +स्त २५५
त्वपि
थापि सहजानंदस्यानुग्रहपात्रं सत्यसंध एव॥ सर्वज्ञतस्तु यदा तत्समीपे विद्यासाधनादिकमभ्यस्य योग्यतां
प्राप्तस्तदा गुरुर्जीवजगतोः स्वरूपं पृष्टवान्॥ सहजानंदेन यथा सदृष्टांतं तेषां स्वरूपं निरूपितं तद्वक्ष्यामि
शृणु॥॥ सहजानंद उवाच॥ ॥यथैकस्मिन्समुद्रे आवेष्टे भानुरसंख्येस्तरंगैरनंतधा प्रतिबिंबितो भवति भा
नुरप्येकोऽब्धिश्चैको नानानश्यमाने स्थिरेतरंगे यो यः प्रतिबिंबोऽस्ति स प्रतिबिंब इतरान्वीचीतरंगान् स
स्थितवीचीतरंगात्भिन्नादृतिविकल्पस्वयमेव स्वमपीतरस्मात्प्रतिबिंबात्भिन्नोऽस्मीति मन्यते न बिं
बो गच्छति नाब्धिश्च गतागतास्तरंगा एव प्रतिबिंबस्तु तरंगागमनं स्वात्मन्यारोप्याहमेव गतागतात्मकोऽस्मीति क
ल्पनेदेशिशोसर्वेषु वीचीतरंगेषु येप्रतिबिंबास्ते वस्माद्भेदनामयास्संतित्वयानन्ताताः एकस्मिन्तरंगे तूणम
न्यतरंगास्थितप्रतिबिंबोदृष्टुं सान्तृणसंपन्निर्ममेनेति मत्वावेदनामयोभवति॥ तथासौ जगदब्धिश्चैकस्तद्वत्स
भानुश्चैको नानातरंगात्व्यभूतेषु यं जीवः प्रतिबिंबितोऽस्ति स प्रतिबिंबाख्यो जीवः स्वस्थिततरंगाख्यदेहात्

पं
५८
48

इतरान्भिन्नाइतिविकल्पयस्त्वयमेवत्वमपिइतरस्मात्प्रतिबिंबाख्यजीवान्भिन्नोस्मीतिमन्यतेनेदंजगद्गच्छ
तिनतत्तुल्यश्चद्रुमानितरंगस्थानीयानिभूतानिगतागतानिप्रतिबिंबाख्यजीववस्तुभूतगमनेस्वात्मन्यारोप्य
अहमेवगतागतात्मकोस्मीतिविकल्पतेएकस्यतरंगाख्यदेहस्यत्वंएवत्वंसंपन्निमन्यतरंगाख्यदेहस्थितप्रति
बिंबाख्यजीवोहष्टासासंपन्निर्ममनेतिमत्वारोदिति ।। सत्यव्रतउवाच ।। अंतःकरणेबिंबितोयंजीवइतिशा
स्त्रसिद्धं ।। जगत्स्वं(ति)बिंबितोयंजीवइतित्वयोक्तंशास्त्रप्रमाणेनत्वयोक्तोविरोधःसंभवति ।। सहजानंदउवा
च ।। मदीयाभिप्रायस्तुत्वयानज्ञातःसमष्ट्यभिप्रायेणजगदितिवर्णितं ।। देहेंद्रियादिसंघातरूपव्यष्ट्यभि
प्रायेणभूतानिवर्णितानि ।। समष्ट्यब्धौमनुष्यादीनामंतःकरणरूपवीचीतरंगाःबहवउद्भवंतिविनश्यं
तिच ।। यान्यंतःकरणदेहेंद्रियाणिममतान्येवतवचसर्वेषांजीवजंतूनांचापि ।। सर्वेषांजंतूनामंतःकरण
देहेंद्रियमेकरूपंसमष्ट्यब्धिश्चैवरूपोब्रह्मभानुश्चैकोविराजते ।। अमुष्यप्रतिबिंबाख्यजीवस्यनानाभिमाने
ननानाभावाःविद्यमानाःसंति ।। तस्माद्देशुद्धेस्वतःसिद्धभ्रांतिचासात्मांचाद्वितीयाद्विभेदाभिमानपाशान्मां ।
पाहिपाहि ।। सत्यव्रतउवाच ।। ब्रह्मभानुश्चजगदब्धिश्चेतिसमस्तेनपदार्थद्वयंभवतिएकमेवाद्वितीयमितित्व
योक्तवाक्यश्रुतिविरोधःसंभवति ।। सहजानंदउवाच ।। ब्रह्मभानुरेकोद्वितीयस्तेजसास्वस्मिन्नेवप्रकाशतेन
केनबाध्योभवतिनकिंचिदपिबाधतेस्वतःप्रकाशात्स्वमहिम्निराजते ।। अयंजगदब्धिस्तुतस्यैवब्रह्मादित्यस्यम
रीचिकायांमृगजलंभासते ।। ब्रह्मज्ञानाद्बाध्यःस्वरूपभिन्नज्ञानात्स्वरूपास्थितिबाधकःरूपतःसत्यमिवभातिअर्थाद्भ्र
न्त्यः ।। भ्रमात्मकानांबुद्धिहीनोकांमोहावर्तेनकदाचिदाकर्षतिकामक्रोधवीचीभिःकदाचिदांदोलयति ।। शोकरूपपंकेकदाचिन्म

जयति श्रवणेनैव कर्षैस्त्वतः प्रकाशराशेः सहस्ररश्मेश्चिदंबरमणेरपतनपतितं मृगजलतृषार्त्तस्तां शं मां स्वान्त
र्यहरूपरश्मेर्न कर्षति ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने पंचमार्के आत्माराममधुपसंवादे सहजानंदोपाख्यानांत
र्गतसत्यव्रतसमाचारवर्णनं नाम तृतीयो रश्मिः ॥ ३ ॥ आत्माराम उवाच ॥ अथ सत्यसंधसमाचारकथनं
॥ पूर्वावस्थायां तस्य हृदये भगवत्प्रेमाग्निः संजातस्तस्मादहर्निशं नीरविहीनमीनवत्संतापं प्राप्तः ॥ परंतु तस्य
हृदय एवं चिंता स्थिता यद्यहं सर्वदा परमात्मविषयकृत्रिमानस्यां तर्हि सांसारिकप्रयोजनानां साध्यानि भवंति प्रयो
जनाभावे च भक्त्यादिप्राप्तिः स्यात्तदा प्राणे देहसंरक्षणं कथं भवेदिति ॥ कदाचिदरण्ये वृक्षस्थं नेत्रविहीनं कंचि
त्पक्षिणं ददर्श ॥ नेत्रविहीनस्यैतस्य भक्त्यादिप्राप्तिः कथं भवेदिति तस्य हृदये संकल्पो जातः ॥ एतस्मिन्नंतरे सो
ऽपक्षी वृक्षादवरुह्य तुंडेन भूमिं खातवान् ॥ तत्सकाशादन्नोदकपूरितं शरावद्वयं प्रादुरासीत् ॥ स पक्षी यथे
च्छं भुक्त्वा जलं पीत्वा पुनर्वृक्षमारुह्य स्थितः ॥ ततः शरावद्वयमंतर्धानमभूत्सत्यसंधस्तदिदं कौतुकं दृष्ट्वा च वि
तः संस्तत्प्रदेशं गत्वा स्वतुंडेन तद्भूमिमाखनत्तत्र किमपि न प्राप्तवान् ॥ तदा स पक्षी तमुवाच हे मूर्ख इदं भगवद्वा
क्यं त्वया न श्रुतं ॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति ॥
य एवमनन्यभावेन भगवंतं भजति स किं बुभुक्षितस्तिष्ठतीत्युक्त्वा सोऽप्यंतर्दधौ ॥ सत्यसंधो विस्मितश्चकितः तच्छ्रुत्वा उ
सत्परमात्मैव मां चेतयितुमेवं कौतुकं दर्शयामास ॥ एवं निश्चित्य विरक्तः संस्ततो घोरारण्येऽतिदुर्गमं पर्वते
प्राप्तः ॥ तत्र पर्वते कश्चिद्देवालयस्तत्र क्षात्रिकाश्चित्पुरुषश्छिन्नैकपादः स्थितः ॥ तत्सुखेमधुमक्षिकामधुविं

पं० ५९ 59 दृष्ट्वा त्रिपंतीरं कौतुकं दृष्ट्वा विस्मितो जातः ॥ एतस्मिन्समये कश्चित्साधुस्तत्रागत्य तं छिन्नपादमुवाच ॥ कस्त्वं
केन तव पादौ छिन्नौ कुत आगतोऽसीति ॥ तेनोक्तं मया साकं तव किं प्रयोजनमस्ति त्वं स्वीगंतव्यमिति ॥ स साधुस्तं
पुनरुवाच मम प्रयोजनमस्त्येव सर्वथा त्वं वृत्तांतं वद ॥ एवं पुनः पुनः प्रार्थितः सन्सतमुवाच ॥ अहं तु क्षत्रि
यः संसाराद्विरक्तः सन्नेकांतनिवासार्थमत्रागत्यास्मिन्देवालये स्थित्वा जीवनार्थं वन्यफलादिकं तद्दृशाङ्गीक
त्वा विकुष्ठमृगादीन्हत्वा प्राणरक्षणमात्राहारं कुर्वन्द्वादशवर्षपर्यंतमहर्निशं देवार्चनादिना ध्यानधारणा
दिना च कालक्षेपं कृतवानस्मि ॥ एकस्मिन्दिवसेऽहं देवालये स्थितस्तदा काचिद्रूपलावण्यनवयौवना स्त्री
मद्दृष्टिपथं प्राप्ता ॥ तां दृष्ट्वा मच्चित्तं व्याकुलमभूत् ॥ मयानेकप्रकारेण वारितमपि चित्तं मद्वशं नैव प्राप्तं ॥ ततः
म८ कामस्तु युवतीमेलनार्थं बलान्मां बहिराकृष्टवान् ॥ एतस्मिन्नंतरे द्वादशवर्षपर्यंतं देवतावशोऽस्थित्वाः
धुनाः स्मरवशं प्राप्तं न लज्जसे किं ॥ एवमशरीरवाणीमयाश्रुता ॥ ततोऽहं सावधानो भूत्वा चित्तं धिक्कृत्य म
मनिग्रहमुल्लंघ्यानात्मकामवशंकृतोयातः इति कोपेनायुधं गृहीत्वा स्वहस्तेन स्वपादं छिन्नवानस्मि ॥ त
दनंतरं दिनद्वयपर्यंतमन्नपानादिविहीनश्चात्मनि चित्तं संस्थाप्य तत्रैवावस्थितोऽस्मि ॥ तथापादपीडयाच
यदा मच्चित्तं चंचलं न जातं तदा मयि भगवत्प्रसादो जातस्ततो भगवदाज्ञया मधुमक्षिका [illegible] मज्जीव
नार्थं मन्मुखे मधुबिंदून्निपंति ॥ हे पथिक तन्मधुमात्रेण संतृप्य सदा स्वरदशिस्थितोऽस्मि स साधुरिदं
श्रुत्वागतवान्सत्यसंधोऽपि तत्रैव स्थितः सन्निदं सर्वं श्रुत्वाऽतिचकितो जातः ॥ तत्र तस्यैव राज्यं परिपश्यं जा

तं भगवति दृढविश्वासः सन्निश्चिंतो भूत्वैवं प्रतिज्ञामकरोत् ॥ अद्यप्रभृति येन केन चिदन्नं मुखे दीयते चेदङ्गीकरणीयं

नो चेन्न द्रष्टव्यं यत्नो न कर्तव्यो यत्र स्थितोस्मि तस्मात्स्थानाच्चरणं न कर्तव्यं स्वात्मविचारं विनान्यत्र कालक्षेपो न कर्तव्यो वृत्ति

रात्मव्यभिचारिणी न कर्तव्येति ॥ स एवं दृढप्रतिज्ञां कृत्वैकांतस्थले स्थितवान् आत्मानुसंधानतत्परो जातः ॥ ततो दि

नचतुष्टयपर्यंतं केनाप्यन्नपानादिकं न दत्तं न वा नापि किंचिद्दृष्टं च ॥ तस्य चित्तमनेकदा व्याकुलीभूयानेकसंक

ल्पमकरोत्तथापि सत्यसंधो युक्त्या तन्निवार्य स्वनिष्ठातो न चचाल ॥ पंचमे दिवसे सत्यसंधे भगवत्प्रसादात्सहजा

नंदस्य स्वप्ने भगवदाज्ञा जाता सत्यसंधं स्वसमीपमानीय भोजयित्वा स्वरूपरहस्यानुभवो यथा भवेत्तथा बोधयस्वे

ति ॥ भगवदाज्ञानुसारेण सहजानंदस्तत्संनिधिमागत्य तदवस्थां दृष्ट्वा प्रसन्नो जातः ॥ ततः सत्यसंधस्य स्वाश्रमा

गमनार्थमाज्ञां दत्वा स्वस्थानं गतवान् ॥ सत्यसंधः स्वमनसि विचारितवान् सद्गुर्वाश्रमं गतश्चेत्प्रतिज्ञाहानिर्भविष्य

तीति ॥ तन्मध्ये शरीरवाणी जाता हे सत्यसंध त्वं गत्वा सहजानंदस्य शरणं गत्वा तत्सेवातत्परो भवेति ॥ स तथा

चकार ॥ यदा तदाश्रमसमीपं गतस्तदा स्वस्थानसमीपे तन्मार्गं प्रपश्यन्नितस्ततः संचरंस्तं ददर्श ॥ यदा त्वं तत्स

मीपं गतस्तदा सहजानंदः स्मितवदनः संस्तमुवाच ॥ भो सत्यसंध यावच्छरीरवाणी न जाता तावत्तव मद्वा

क्ये विश्वासो न जातः ॥ तच्छ्रुत्वा सत्यसंधो लज्जितवत्तच्चरणयोः प्रपात ॥ सहजानंदस्तमुत्थाप्य कृपयालिंग्य स्वा

श्रमं नीत्वा स्वचंच्वा सिद्धमन्नकवलं तन्मुखे प्रक्षिप्य तृप्तिं चकार ॥ तदनंतरं सत्यसंधं प्रति कृपया स्वस्वरूपर

हस्यमुपदिदेश ॥ सत्यसंधहृदयरूपवर्तिकाया भक्तिवैराग्यसाधनरूपस्नेहेन स्निग्धत्वात्तस्य तत्काल एव

पं० ६०
60

प्रकाशोजातः गुरुकटाक्षवीक्षणेनानधीतसकलविद्याशास्त्रिरपिजाता ॥॥॥ इत्यद्वैतादित्येदक्षिणायनेपंचमा
र्केआत्मारामप्रधुपसंवादेसहजानंदोपाख्यानेसत्यसंधसमाचारवर्णनंनामचतुर्थोरश्मिः॥ ४ ॥ आत्माराम
उवाच॥॥॥ ॥ अथसत्यमतिसमाचारवर्णनं॥ हेमधुपसत्यमतेः पितासहजानंदेऽतिमतिमान्स्थितः यदासत्
यमतिः किंचिज्ज्ञानार्हत्वंप्राप्तस्तदातत्पिताममत्वात्तंसहजानंदायार्पितवान्॥ सहजानंदस्तुप्रथमतोविद्यारंभं
शास्त्राध्ययनंकारयित्वासाधनाभ्यासेयोजयामास॥ सत्यमतिः कियंतंकालंविद्यासाधनाद्यभ्यासंकृतवा
न्तेतस्मिन्नंतरेतत्पितापरलोकंप्राप्तः॥ ततस्तारुण्याद्दुष्टवशाच्चैतत्सर्वंविहायकियत्कालंविषयासक्तोजातः॥ ए
कस्मिन्दिवसेसत्यमतेः पितृव्यपुत्रोऽन्यायेनतन्नीडंतद्भार्यांचैतेमदीयेवृत्तिबलात्कारेणापाहरत्॥ ततः सत्य
मतिर्हृतवनपक्षिणंराज्ञः शकुनेर्निकटेगत्वेदंतत्कृतंनिवेदयामास॥ तत्पितृव्यपुत्रस्तुतत्प्रधानप्रभृतिभ्यउत्को
चंवित्तंदत्वोततस्तेनतत्पक्षपातंचकार॥ शकुनिर्धर्मतत्वेनतदुभयोर्विवादंश्रुत्वाचिंतितः सन्किंचिन्मनसिविचा
र्यसत्यमत्यमुक्तवानिदानींसहजानंदः सर्वशास्त्रज्ञोधर्मतत्परः परमगुरुश्चतस्मात्तावुभौतन्निकटेप्रेषणीयोस
त्यन्यायेनैतयोर्निर्णयंकरिष्यतीति॥ सभृत्यस्तौगृहीत्वातत्रगत्वासहजानंदमेतत्सर्वमुक्तवान्॥ तत्समयेसहजा
नंदः स्वावस्थायांस्थितस्ततस्तयोः संवादंश्रुत्वासत्यमतेः स्वशिष्यत्वेनतत्पित्रास्वार्पितत्वेनचज्ञातान्यायमपि
तत्पितृव्यपुत्रंविहायानुग्रहेणसत्यमतिमुवाच॥॥॥ सहजानंदउवाच॥॥॥ सर्वोयंसंसारसागरोहिमृगजल
प्रतिमस्तवमनस्तुतस्मिन्सागरेमीनवन्मग्नंसन्निष्ठतित्राणमपितस्मान्निर्गतेसतिवैरंनामयातिचंचलंमन ६०

ति॥ पुनस्तत्स्माग्निं विनानोत्सहते॥ सागरे पिङ्गलदाया: लोचनमिव निश्चलं न तिष्ठति॥ लघुमीनस्य भक्षणा
र्थमनेकप्रयत्नं करोति॥ महामत्स्यत्रासात्स्वरक्षणार्थं बहूपायं करोति॥ मीनकोनुनाममनसिजं स्वशिशुं भक्ष
णमपि स्वहृदयात् भिन्नं न करोति॥ तस्माद् सद्गुरो त्वमतिमस्यारोपितसागरस्य मिथ्या। त्वं ज्ञापयित्वा
स्वस्वरूपस्तथा सिंधुं तं निमज्जय॥ आत्मारामउवाच॥ हे मधुपेता हृश सहज्ञानंद हतं भगवत्प्रार्थनेन सह त्वम
मतेस्तत्वालोत्यन्न संसारविरक्तिमत्वेन गङ्गदकंठः सस्तु नरपदेष्टुं सहज्ञानंदं प्रार्थयामास॥ सहज्ञानंद
स्तु पुरं जनोपाख्यानरीत्यानमुक्तवान्॥ सहज्ञानंदउवाच॥ ॥ हे सहत्वममतेतन्मृगजलपूरितसिंधुतीरेम
याद्भुतविनोदो दृष्टः गंधर्वनगरवासिनः पंच धीवरास्तस्य तटे आसंस्तत्रैकः पिशितमाधाय बाणं संधा
यातिष्ठत्॥ एको बडिशं न्यस्य स्थितः॥ एको जालं पातयित्वासीत्॥ तत्रैको बडिशमाकृष्टवान् बडिशलग्न
जं तु भारवशात् स धीवरः पन्याकृष्टो जातः॥ ततः पंचभिः पुनराकृष्टस्तदा दीर्घः सर्पो निर्गतस्तेपलायिताः
येन जालं पातितं तस्मिन् जाले दीर्घो मत्स्यः पतितः परं तु जालं विदार्य गतः॥ यो बाणसंधानेहतवान् स बा
णो व्यर्थो जातः॥ ततः पंचापि धीवरास्तत्रकंटारस्तु॥ तत्रैको मदीयपाणिकृतशून्यजालेविदीर्णम
भूत्मन्स्योः पिनलब्ध इति प्रलपितवान्॥ अन्यस्तु स्वज्ञापणे यद्बडिशं क्रीतं तत्र मीनो न पतितो धिङ्मम भा
ग्यमिति रुरोद॥ अपरस्तु विचक्षणो तीरादसद्बाणो निष्फलो व्यासङ्गयुधियो योजितः स निरर्थको जातो धिङ्म
म भुजदंडं॥ एकेनोक्तं मृगयागमनसमये दुर्मुहूर्तः स्थितः॥ अन्येनोक्तं मम सन्मार्गे मार्जारस्तिर्यग्गतः

पं०
६१
61

सृगालोऽपि दिगन्तराणि पार्श्वगतः ॥ एवमुक्त्वा सर्वेऽरुदन् हे स्वामिन्नेतेनैषां कावासं पङ्क्तौ येनैवमरुदन् ॥ पुन
स्तेस्तस्य मुद्गन्तालादिकं निष्पिन्नमन्यादिकमपि लब्धं ततस्ते सर्वे संतुष्टाः सन्तः कावासंप न्याज्ञायेनैवं
प्रसन्ना बभूवुः ॥ एतस्मिन्नन्तरे शृंगिनुरंगारूढः कंचुकी सुतनस्तनुरंगजलपानार्थं यत्र यत्र धीवरो वडिशं
निःक्षिप्तवांस्तत्र तत्र धीवरसमीपे प्रागमन् तत्कालेव डिशे भारं ज्ञात्वा स वडिशं कर्षयामास ॥ तत्कंपनशब्देन
स तुरंगश्च कितः सन् प्लुतः ॥ ततस्तुरंगसादी तं धीवरमुवाचरे रे धमास्मदमूल्यतुरंगोऽस्तवनेन तुरं
गेन सहाहं पतन्निव स्थितः ॥ किं कृतं त्वया ॥ ततो धीवरेणोक्तं रे मूर्ख त्वत्तुरंग एव मरार्दभे स्थित्वा किं वला
से पश्चात्तत्तव तुरंगजलपानशब्देनास्मद् दृष्टिशालमद्दीर्घ मीनो गतः ॥ पुनर्मामेव निंदसि ॥ एवं परस्परं कल
हो जातः ॥ ततः कंचुकी स्वतोऽन्वतनामानं वध्या पृष्टं स्वस्वामिनमेतत्सर्वमुक्त्वा ज्ञानीतवान् ॥ अन्यतस्त
त्रागत्य तानुवाचरे मूर्खः स्वयमब्धिः पारंपर्येणमदीयस्ततो मदाज्ञां विना त्वं यौमनो मीनग्रहणं कथं क्रिय
ते ॥ धीवरा ऊचुः ॥ अरे रे धमास्मद्राजा ब्धीवपुत्रो ऽहं वारन्नामको मम तानामवाभीष्मवान्यया सहाऽश्वा
रूपनौकामारुह्य समुद्रविनोदार्थं जगाम ॥ तदा तत्र यास्माभिर्मनो मीनो गृह्यते तन्मदृशाः सेवका मम
स्वामिनि वाटे बहवः संति ॥ अस्मदीयप्रभुसहायेन हिरण्यकशिपुर्लौकाचयाधिपत्यं प्राप्तवान् ॥ रावणोऽ
पितद्विश्वासेनैव यमसूर्यादिदेवताप्रभृतीन् जितवान् ॥ एतत्समुद्रस्यास्मत्प्रभुस्वामिकत्वेन ममायं समुद्र
इति वक्तुं किं न बिभेषि ॥ तच्छ्रुत्वा तेनोक्तं संविदुःल्लानजदंभनामा मम गुरुरहं च तव स्वामिनः सेवको य

द्विसोः हंकारो मामात्तापयेन्नदाहं ज्वालादिसाधनपरिश्रमं विनैव जल्पविद्यया सर्वान्मनोमीनान्वशीकुर्यां ॥ ए
तच्छ्रुत्वा ते धीवरास्तेन सह मैत्रीं चक्रुः ॥ हे स्वल्पमते समृगजलपूरितसिंधुः संसारः पंच धीवरास्त्वंतः करणें
द्रियविषयप्राणभूतकूटाः ॥ चिदाभासेन सहजज्ञानादन्यापन्नोऽहंकारस्तु राज्ञा ममता तु तत्पत्नी ॥ एवं प्रत्ये
कं प्राणिनोऽन्तःतदंभादिभिः संयुक्ताः संतो लोका मनोमीनवशीकरणार्थं छलादनेकोपायान्कुर्वंति ॥ मिथ्या
पदार्थान्प्रति ममेदं ममेदमिति कल्पहं कुर्वंतः परिणामे सर्वं परित्यज्य श्वन्यगर्ते प्रपतंति ज्ञालवस्त्राभालाभाभ्यो
रहितास्तथापि कामनाप्रेरितास्सदा मृगयासक्ता इत्थं वदंति ॥ इदमद्य मायालब्धमिमं प्राप्स्ये मनोरथं ॥ इदम
स्तीदमपि मे भविष्यति पुनर्धनं ॥ १ ॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ॥ ईश्वरोहमहंभोगी सिद्धोहं ब
लवान्सुखीति ॥ २ ॥ स्वल्पमतिरेतच्छ्रुत्वा परिपक्ववैराग्यः संस्त्रां युवतीं स्वनीडं च हित्वा प्रसन्नचेतसा सद्गु
रुं शरणं प्राप्य कियत्कालेन सद्गुर्वनुग्रहात्तत्गुरुभ्रातृसिद्धिनल्पसिद्धिं प्राप्नवान् ॥ ॥ ॥ इत्यद्वैतादित्यदक्षि
णायने पंचमार्के आत्मारामम धुपसंवादे सहजानंदोपाख्याने स्वल्पमतेः समाचारवर्णनं नाम पंचमोरश्मि
॥ ५ ॥ अथ सहजानंदोपाख्यानांतर्गतचित्ररथसमाचारवर्णनं ॥ ॥ आत्माराम उवाच ॥ ॥ ॥ चित्ररथो
ऽपि स्त्रुतनद्ववसहजानंदस्य निजशिष्यः ॥ सकलविद्यासाधनाभ्यासानंतरं विजयबाहोः प्राज्ञिका संप्रदा
यं स्तु चित्रस्य संगीतसंप्रदायं च श्रुत्वा संदिग्धः संस्तयोर्निर्णयं सहजानंदं पप्रच्छ ॥ चित्ररथ उवाच ॥ ॥
भो गुरो स्तुरापानस्य वेदशास्त्रप्रमाणेन निषिद्धत्वेऽपि गोरक्षकादियोगीश्वरैस्तेनेश्वरादिसाधुभिश्च

प० तदंगीकृतं ॥ तथैव संगीतमपि तस्माद्धेयं न ॥ स्त्रियः कामयंतो कामुकाः एन ॥ स्त्रियो भवंतीति श्रुतिप्रमाणेन
६२ निषिद्धं ॥ एवं यजनं जनयस्य पाशुपतास्त्रप्राप्त्यनंतरं स्विंद्र एनं स्वर्गं नीत्वा तत्र चित्ररथं गंधर्वं संगीतशास्त्राध्यापना
62 य योजयित्वा यजनं जनयमेतन्निकटे संगीताभ्यासं कुर्वित्युवाच ॥ अर्जुनस्त्वस्मत्कुलेऽनंतद्विद्याध्ययनसंप्रदायो
नास्त्यस्मद्धर्मोऽपि न भवत्यनेन प्रयोजनमपि नास्तीत्युक्तवान् ॥ पुनरिंद्रो यद्यपीदं सत्यं तथाप्यग्रेऽनेन तव
प्रयोजनमायास्यतीति तदभ्यासं कुर्वित्युक्तवान् ॥ एतत्संवादपर्यालोचनयाप्येतच्छास्त्रं निषिद्धमिति भास
ते केचित्तत्सुरस्यैरंगीकृतमपि तस्मादेतदुभयोर्निर्णयोः नुग्रहेणवक्तव्यः ॥ सहजानंद उवाच ॥ ॥ देवि
शोगोरक्षादिभिर्यत्सुरापानमंगीकृतमन्यैरपि केश्चिद्यत्संगीतश्रवणमंगीकृतं तदुभयमपि नेंद्रियजन्यसु
खार्थं किंतु लाभद्वयोद्देशेन ॥ तत्र नदृष्टकुशलं कर्म कुशलेनानुषज्जत इति प्रमाणेन मुमुक्षुणा यद्यद
शुभं कर्म कदाचित्कृतं स्यात्तद्दानस्य पश्चात्तापेन चित्तग्लानिर्माभवतु तदुत्पन्नावपि तत्र समन्नतामास्तु किंतु
ज्ञानिनः शुभाशुभकर्मणोः समदृष्टित्वमपेक्षितमित्येको लाभः ॥ मद्यपानेन गानेन वा स्वेष्टेन साकं प्रीतेरा
धिक्यं विना द्वारस्थं किंच धारावाहिकज्ञानमपि जायत इत्यपरो लाभः ॥ वेदशास्त्रादिषु यो निषेधः श्रूय
ते सोऽज्ञानिन इहलोकपरलोकभ्रष्टान भवेयुरित्येतत्तात्पर्यकः ॥ सुरापानादेः परलोकनाशकत्वेऽप्यै
१२ नस हिकस्तु वज्जनः कस्यै कथमिहलोकनाशकत्वमिति यदित्वं शंकेथास्तर्हि यः कश्चन प्राणी सर्वदा सुरापा
नेनोन्मत्तः सन्मूर्छितवत्पतति ॥ अथवा वारांगनादिभिः सा कामहर्निशं संगीतकालक्षेपेण सुहृत्स्ति ६२

ष्ठतिनदासंसारप्रयोजनत्वात्साध्यत्वेनपरलोकवदिहलोकोऽपिनश्येत् ॥ तस्मात्तदुभयंसर्वथात्याज्यमेव ॥ हे
शिशोवाचस्पत्यादिभिः सत्पुरुषैरेतत्सर्वथानिषेधः कृतस्तेषांतात्पर्यमिन्यदेव ॥ गोरक्षादिभिर्यल्लाभद्वयोद्दे
शेनांगीकृतंतल्लाभद्वयंतैर्युक्त्यानिराकृत्यप्रत्युतदोषवत्वेनदूषितं ॥ गोरक्षाद्युक्तप्रथमलाभप्रमाणत्वेनवर्णितेय
न्नेहेष्टाकुशलंकर्मेत्यादिभगवद्वाक्यस्याकुशलपदेनतदभक्ष्यभक्षणागम्यागमनान्यायहिंसाचौर्यादिरूपनिषिद्ध
कर्मपरंनभवति ॥ किंतुदंडानांदंडनंहिंसकानांप्रतिहिंसनंचोराणांताडनमित्यादिपरं ॥ यदिराज्ञेतदकुशल
कर्मेतिमत्वात्यज्येततदाराज्यस्यनाशः साधूनांहानिरपिस्यात् ॥ तस्मात्कर्मैतद्राज्ञैतादृशकर्माचरणेमनसिग्ला
निंनकुर्यान्नरकप्राप्तिर्भवतीतिद्वेषंचनकुर्यात्कुशलकर्माचरणेस्वर्गादिप्राप्तिर्भवेदितितत्ररागमपिनकुर्यादित्ये
तत्तात्पर्यपरंभगवद्वाक्यं ॥ यच्चोक्तमानंदप्राप्तिधारावाहिकत्वानलाभार्थंसुरापानादिकमितितदपिनसमीचीनं
यावत्पर्यंतंवारुणीमदस्तिष्ठतियावच्चगानश्रवणंभवतितावदेवाऽऽनंदाविर्भावोधारावाहिकत्वानंचभवतित
दभावेतयोरभावात्तन्नैरव्यभिचारोभवतीति ॥ तस्मात्तदवस्थातस्यस्वाधीनानभवतीतियः पुमान्पुरुषार्थहीनः
परमात्मनिमग्नत्वादिहीनः सइतरपदार्थसहायतामिच्छति ॥ यः पुरुषार्थीसइतरपदार्थसहायतामनपेक्ष्यम
ग्नत्वादिनासर्वदास्वरूपानुसंधानेनिमग्नस्तिष्ठतितस्यहिनिरव्यभिचारीएवत्वेदानंदश्चभवति ॥ हेशिशोतेवाचस्प
त्यादयस्तल्लाभद्वयंदूषयित्वासर्वथातत्कर्मत्याज्यमेवेतिमन्यंते ॥ मधुपउवाच ॥ हेप्रभोसत्यचित्रोपाख्यानेसं
गीतेपरमार्थभावंसंदरनरनारीषुपरमात्मानंचानुभवतीत्युक्तंतच्चसंगीतेपरमार्थभावप्रशंसाचित्ररथंप्रति

सहजानंदेनवर्णितात्द्वितीयेन्नप्रश्नोनकृतइतिसहजानंदेनतत्प्रशंसापिनकृतातस्तद्विस्तारोवक्तव्यः ॥३॥ ॥ आत्मा
रामउवाच ॥ यद्यपिचिरंरथेनदृष्टवांस्तथाप्यहंदीप्तिमंतंदृष्टवांस्तदुत्तरंयथादीप्तिमताद्दृष्टंतदेतदुपाख्यानेवक्ष्या
मि ॥ इत्याद्यैतादित्येद्दक्षिणायनेपंचमार्धेआत्माराममधुपसंवादेसहजानंदोपाख्यानेचित्रस्थसमाचारवर्णनंना
मषष्ठोरश्मिः ॥६॥ आत्मारामउवाच ॥ अथसहजानंदोपाख्यानांतर्गतवायसेंद्रसमाचारवर्णनं ॥ ॥ हेमधुपपूर्वा
वस्थायामनेननास्तिकमतमंगीकृतंपुनर्व्याकरणकोशतर्कमीमांसाद्यध्ययनंकृत्वानास्तिकमतंपरित्यज्यमीमांसा
मतमंगीकृतं ॥ यदामीमांसाशास्त्रेनिपुणोजातस्तदागर्वारूढोऽभवत् ॥ कदाचित्सहजानंदसमीपमागत्यस्वीयशा
स्त्रव्युत्पत्तिसंसत्स्वयतेनसाकंशास्त्रप्रसंगंयाचितवान् ॥ सहजानंदस्तच्छ्रुत्वास्मितवदनःसन्नवृतंस्वशिष्यमनेन
प्रसंगंकुर्वित्याज्ञापयामास ॥ ततस्तत्संप्रवृत्तयोर्योविवादोजातस्तंवक्ष्यामिशृणु ॥ वायसेंद्रउवाच ॥ ॥ प्रपंचस्य
मिथ्यात्वंनसंभवतिघटस्सन्नित्यादिप्रतीत्याघटादेःसत्यत्वावगमादिति ॥ स्ववृत्तउवाच ॥ ॥ घटस्यसद्रूपचैतन्य
तादात्म्यापन्नत्वात्चैतन्यगतमेवसत्यत्वंघटादौभासतइतिनघटादीनांसत्यत्वंनचघटस्यसत्तादात्म्यापन्नत्वे
सतःस्वप्रकाशतयाऽलोकसंयोगादिशून्यकालेघटस्यभानंस्यादितिवाच्यंवास्यभानंस्यादित्युच्यतेकिमीश्वर
स्यजीवस्यवानाद्यःइष्टत्वान्नद्वितीयःघटादीनामंधकारेणछन्नादितत्वेनसन्निकर्षाभावात्जलांतर्गतघटवत्
सतःप्रकाशरूपत्वादेवतत्तादात्म्यापन्नस्यांधकारस्यभानमुपपद्यते ॥ अन्यथाभासकाऽलोकादीनामभावात्त
दानतभानंनस्यात् ॥ तस्मात्प्रपंचस्यमिथ्यात्वंसिद्धं ॥ वायसेंद्रउवाच ॥ रजतभ्रमानंतरंबाधेसत्यसदेवेदंरज

तमभूदित्यनुभवान्नतु रजतस्यासत्त्वमिति ॥ स्वच्छन्द उवाच ॥ असद्वस्तुनोऽनुभवाभावात्कथमसद्रजतमनुभूय
ते अन्यथा वंध्यापुत्रादेरप्यनुभवापत्तेरिति ॥ ॥ वायसेन्द्र उवाच ॥ वंध्यापुत्र इति वाक्यात्सतो वंध्यापुत्रस्याभानसंभ
वेनासतोपि भानमस्त्येव ॥ ॥ स्वच्छन्द उवाच ॥ वंध्यापुत्र इति वाक्यान्तु वंध्यासंबंधोभासतेन तु वस्तुगत्या वंध्या
पुत्रोभासते वंध्यायाः पुत्राभावात् वंध्यासंबंधस्तु वंध्यावयवेषु प्रसिद्धः तथा चान्यत्र प्रसिद्धपुत्रेऽन्यत्र प्रसि
द्धवंध्याया अन्यत्र प्रसिद्धसंबंधोभासते न त्वसतो भानं ॥ वायसेन्द्र उवाच ॥ यद्येवं तावता प्रबंधेनासत्त्वनिराकर
णेऽसत्त्वे शान्ते तथा चेदं रजतमिति ज्ञानमिदमंशेऽनुभवात्मकं रजतांशे स्मरणात्मकमिति सत्ख्यातिरेव सिद्धा
भवति ॥ स्वच्छन्द उवाच ॥ इदं सामान्यं शुक्तिस्तु विशेषणं तयोस्सहजत्वात्तादात्म्यं तस्मात्तादात्म्यसकाशात्प्रतीतितनुव्य
वहारे पृथक् पृथक् सत्यतयावभासते विशेषस्तु नामरूपात्मकः सामान्यं तु सदेव कदापि सामान्यं विना विशे
षस्थितिर्न भवति केवलसामान्यमपि विशेषसंबंधं विना व्यवहारेषु नापि न भासते ॥ सामान्यविशेषतादा
त्म्यात् घटसामान्ये पटविशेषः पटसामान्ये घटविशेषः सत्यं न भवति तस्मात् सामान्यं विना रजतविशेषभानं
सत्यतया वा कथं संभवेत् ॥ वायसेन्द्र उवाच ॥ इदं सामान्यं विना रजतविशेषस्थितिः स्मृतो भवति ॥ स्वच्छन्द उवाच ॥ ॥
योयोऽनुभूतः पदार्थः स एव संस्काररूपः सन्तिष्ठति तत्रापि सामान्यं विना विशेषमात्रानुभवो भवेच्चेत् विशेष
मात्रस्मृतिरपि जायेत ॥ वायसेन्द्र उवाच ॥ विशेषस्तु नामरूपात्मकस्तस्मात्सामान्यवस्तु विना नामरूपात्मक
विशेष एव संस्काररूपः संतिष्ठति ॥ स्वच्छन्द उवाच ॥ अनादितः सामान्यविशेषतादात्म्यं तस्मात्स्वप्ने सर्वपदा

सं
६४
65

र्थोपिसामान्यसहितव्यवहारात्मकाहंवभासंतेनतत्संस्कारएवपदार्थवत्भातिसामान्यंविनाविशेषसंस्कारो
भवेच्चेदयंयद्यदइदंयंशुक्तिरिदंरजतमिदमंशसहिताः कस्मात्भांतिश्चशुक्तिरजतस्थलेशुक्तेरिदंसामान्यांशेनुभ
वोरजतविशेषांशे स्मृतिस्तत्रस्वस्वेयदिदमंशसहितोद्यदोभातितस्मिन्नवष्टविशेषस्मृतिर्यद्दसामान्यांशेनुभवः
कथंस्यात्॥वादीसंदेहउवाच॥जाग्रत्कालीनप्रातिभासिकस्यस्वाप्नप्रातिभासिकाहृष्टांतोनसंभवति॥स्वाप्निकेद
मंशस्यप्रातिभासिकत्वात्व्यावहारिकेदमंशस्यव्यावहारिकावस्तुत्वाच्च॥सद्गुरुरुवाच॥संन्निकृष्टेस्मृतिकल्प
नायाःप्रयोजनंनास्तिकदाचित्स्वाप्नदेदंतदिदितिव्यवहारःस्यान्नत्विदमेवेतिनिश्चयःस्मृतिर्भवति॥ग्रामी
णः पुरुषोमोदवंनजानातितत्पुरंकोप्येकोमोदकंधृत्वाहच्छतिकिमिदं॥सकथयतिमोदनभोगाख्यंमिष्टा
न्नंजगतिभवतीतिमयाश्रुतंतदिदंस्यादितिपरंत्वयमेवमोदनभोगइतिनिश्चयोनजायतेतन्मोदनभोगविष
येणद्रष्टानुभविकमोदनभोगस्मृतेर्याथार्थ्यंकल्पनीयंतत्स्वरूपमिदंरजतमितिव्यवहारोनभवतिपुनरिदं
रजतमितिज्ञानस्यकिंकारणं॥वादीसंदेहउवाच॥इदंरजतमितिज्ञानेनेदंरजतमितिज्ञानंप्रतिबंधकंतदभा
वस्तस्यकारणं॥सद्गुरुरुवाच॥प्रतिबंधकस्याभावःकस्मादुत्पन्नः॥यद्यज्ञानादुत्पन्नस्तर्हितदज्ञानमेव
भवतांमतेपीदंरजतमितिज्ञानंभवतिनत्वज्ञानंप्रतिबंधकस्याभावएतज्ज्ञानस्यकारणंसचाभावोप्यज्ञा
नादुत्पन्नः॥इदंरजतमितिज्ञानंनतत्प्रतिबंधकाभावस्यकार्यंतदभावोप्यज्ञानस्यकार्यंकिमितिज्ञानमज्ञा
नस्यकार्यंक्वचापिवर्ततेप्रतिबंधकाभावस्त्वज्ञानकार्यमिदंरजतमितिज्ञानंप्रतिबंधकाभावजन्यमेवं ६४

चेदं रजतमिति ज्ञानस्याज्ञानकार्यत्वं सिद्धं तथा चाज्ञानकार्यमपिज्ञानापियथार्थंभवितुमर्हति तस्मात्सदसत्
भिन्नमनिर्वचनीयमिति सिद्धं ॥॥ ॥॥॥ इत्यद्वैतादित्ये दक्षिणायने पंचमार्के आत्मारामसमधुपसंवादे सहजानंदो
पाख्यानांतर्गतस्वप्नवृत्तेनसहवायसंज्ञाख्यहेतुवादिनः संवादवर्णनंनामसप्तमोरश्मिः ॥७॥ आत्माराम उवाच ॥
अथ सहजानंदोपाख्यानांतर्गतोग्रबुद्धिसमाचारवर्णनं ॥॥॥ उग्रबुद्धिमित्रवंतौ भ्रातरौ तयोः पारंपर्येणाद्वैत
संप्रदायः परंतु कुसंगत्यात्तयोश्चित्तं विषयासक्तमभूत् ॥ तौ यद्यपि स्वपितृसमीपे विद्याध्ययनं कृतवंतौ तत
थापि बाल्यात्साधनादियोग्यतां न प्राप्तौ ॥ ततस्तत्पिता परलोकं प्राप्तः तदनंतरं वेदांतशास्त्रमधीतवंतौ वि
परीतज्ञानेन सर्वं खल्विदं ब्रह्मेत्यादिवाक्यमन्यथालापयित्वा सर्वस्यापि ब्रह्मत्वेन सर्वांतर्गतस्त्र्यापानपरदार
गमनयोः कथं ब्रह्मत्वं न स्यात् ॥ एतादृशनिश्चयेन स्त्रीलंपटौ भूत्वा दयालुनेमिवत्स्वसंप्रदायनिष्ठानश्रुतौ
मधुप उवाच ॥ हे प्रभो कोवा दयालुनेमिः कथं वा भ्रष्टो जातस्तत्समाचारो वक्तव्यः ॥ आत्माराम उवाच ॥ दयालुने
मिनामा सारस्वतविप्र आसीत् काशीं गत्वा किंचिच्छास्त्रमधीत्य वासपचिंत्वामिनो निकटे संन्यासं गृहीत्वा
वेदांतशास्त्रमधीतवान् ततस्तस्य विद्यागर्वो जातः नगराद्नगत्यानेके स्त्रीपुरुषाः प्रत्यहं तत्समीपे कथादि
कं शृण्वंति सोऽपि उच्चस्थाने स्थित्वा दंभेन घूर्णितनेत्रः सेल्लान्कथां श्रावयति तस्य गुरुरेकस्मिन्दिने तं शि
क्षितवान् दुःसंगात्मदोन्मत्तराजव्याघ्रादीनां संगो वरः तस्मात्तु संगं त्यज स्वप्रतिष्ठां मा वर्द्धय बहुकष्टेन वि
द्याभ्यस्य दांभिकप्रतिष्ठावर्द्धनेन निष्फलां मा कुरु यद्यपि दयालुनेमिरितित्वयाभिहितं तस्य ज्ञाणिकात्वेनत

पं०
६५
65

न्हातकीर्त्यादिकमपिक्षणिकमेव ॥ दयालुनेमिरुवाच ॥ भो गुरो ऽस्तानि नांतारणार्थं कथां श्रावयामि नन्तु
स्तत्प्रतिष्ठावर्द्धनार्थमहं त्वत्तो नेय परिपन्नो ऽस्मि ॥ तच्छ्रुत्वा गुरुस्तत्क्षानंतमेव ज्ञानासीत्तुष्णीत्तस्त्रीबभूव ॥ तद
नंतरं कालांतरे नवयौवनासुंदरी दयालुनेमिं दृष्ट्वा समोहसो ऽपि तत्सौंदर्यं दृष्ट्वा तत्सक्तो भूत ॥ एवमुभावप्यन्यो
न्यं मिलित्वा दुष्कर्मं चक्रातुः ॥ तस्य निष्ठारूपछंदः पूर्वं समीचीनमासीदधुनातस्य यतिभंगो जातः ॥ ततो गुरुः
सन्गुरुरुवाच स्वात्मनो निर्दोषत्वादेवं कर्म हृतं मया ॥ पुनर्गुरुणोक्तमरे दुष्टमते ऽभागिन्धिकतत्व विपरीतज्ञा
नेस्त्वयं नष्टः परान्नाशयसि तस्मात्त्वं स्यात्त्वं नयो ग्यो स्यत इतोयथेच्छं गच्छेति ॥ ततस्तां स्त्रियं गृहीत्वा लाहो
राख्यनगरं गतवान् ॥ ततस्तद्गुरुः सारस्वतविप्राणां सत्यासं न हास्यामीति प्रतिज्ञामकरोत् ॥ हेमधुपकाल
एतस्य कलंकेन सर्वे कलंकिता भवंति तस्मात्तत्संगात्तेरधिकपापं तुः संगतेरधिकपापं चलोदे नास्ति ॥ पु
नर्दयालुनेमिस्तत्र लाहोराख्यनगरे द्वितीयां युवतिं स्त्रीकृत्य तत्रैव कस्याः चरीत्यपरस्याः पत्नीति तस्य दयालु
नेमिरिति नाम मालिनं चक्रे ॥ कियत्कालं तत्र नगरे दांभिकत्वेनोदरपोषणं कुर्वन्स्थितः ॥ ततः कालेन तस्य होमि
गाहनिः सर्वैर्यदा सत्तातातत्रापदधा पीडित स्थितः ॥ पुनरुदरपोषणार्थं श्रीभगवद्गीताहस्तामलकगीतादि
वेदांतग्रंथान् भाषया निर्मायतद्विक्रयेण कालक्षेपं कृतवान् ॥ यस्य कस्यचित्पुरुषस्य यच्च कुत्र पुराणादिग्रं
थे भाषाकरणेच्छा जायते स स्वागत्य तं प्रार्थयत्यमुकं ग्रंथं भाषया रचयेति ॥ तदा स तं प्रति वदत्येत योर्मत्त्वि क ४
योर्वस्त्रालंकारादिकं दीयते चेत्तर्हि रचयिष्यामीति ॥ एतादृशव्यापारेण कालयापनं कुर्वंस्तत्रैव तस्थौ ॥ अंततो

६५

दारिद्र्येणदुःखादिरोगेणचपीडितोऽभूत् ॥ हेमधुपैवंसुप्रबुद्धिमित्रवतोर्विद्यानिष्ठयाकालोयासीत् ॥ आत्मनोऽखंडते
ननकर्मणावर्द्धतेनोकनीयानित्यादिश्रुत्याशुभकर्मणावृद्धिरशुभकर्मणाह्रासोवानास्तितस्मात्सुरापानपरदार
गमनादिकमनर्थकरंनभवतीतिविपरीतज्ञानेनतच्छ्रुतितात्पर्यमैंद्रियकसुखेपर्यवसानंनीतौक्रूरस्ततः ॥ कदाचि
त्तौभ्रांतौतौसदेशेनमत्तौस्त्रीसमूहेनसार्धंवनविहारंकुर्वंतौसहजानंदाश्रमसमीपस्थवनेजग्मतुः ॥ तत्समयेस
हजानंदोऽपिब्रह्मानंदेनिमग्नःसन्विनोदार्थंतत्रैवागतवान् ॥ तौदूरात्तमागच्छंतंदृष्टवंतौ ॥ तयोर्मित्रवान्किंचि
न्निषेणभ्रांतरमतुंतावत्तावच्छ्रमंगतवान् ॥ हेमधुपपुनःकालांतरेमित्रवान्यदिराज्यंप्राप्ययथातेनोपदिष्टस्तथाव
र्तितंतदुपाख्याने ॥ इदानींसुप्रबुद्धिसमाचारंशृणु ॥ यदासहजानंदस्तत्रागतस्तदासुप्रबुद्धिर्गर्वेणतस्यप्रत्युत्थाना
दिकंनकृतवान् ॥ सहजानंदस्तस्त्रीसमुदायेनसहक्रीडंतंमदेनमत्तंतमुवाच ॥ रेमंदमतेपारंपर्येणब्रह्मनिष्ठकु
लोत्पन्नःसन्विद्यामप्यधीत्यविषयासक्तइंद्रियलोलुपोभवितुंनार्हसि ॥ तत्त्वतोपिनित्याविनाशयानंदाब्धिपदा
द्विमुखीभूयक्षणिकेंद्रियजन्यसुखेनिमग्नस्य[illegible]नवश्रेयःकथंभवेत् ॥ सहजानंदोक्तमेतत्सर्वंश्रुत्वासतत्सु
न्नरतत्परोऽभवत् ॥ इत्यद्वैतादित्यदक्षिणायनेपंचमार्केआत्मारामसधुपसंवादेसहजानंदोपाख्यानेंतर्गतोसुप्रबुद्धिस
माचारवर्णनंनामाष्टमोरश्मिः ॥८॥ सुप्रबुद्धिरुवाच ॥ ॥ यद्यात्मातिरिक्तंकिंचिदपिनास्तितदाविषयेंद्रियाण्या
त्मातिरिक्तानिकथंभवंतियद्येकोभावस्तत्रकःकस्याभिभवःकोवाकस्यविभवोभवति ॥ सहजानंदउवाच ॥ ॥ ८२
अरेमूर्खआत्माभास्यभासकभानरूपत्रिपुटयातीतः ॥ यद्दृश्यंनामरूपात्मकंतन्मिथ्यैवयावन्मिथ्याबाधोनभवे

न्नावद्यात्मसाक्षात्कारोन ॥ नित्यानित्यविवेकशब्दोक्तानित्यबाधं विनैवाभावं कथं भासेत ॥ उग्रबुद्धिरुवाच ॥ आत्मन्य
नात्मपदार्थस्य सर्वदा बाधितत्वेन बाधितस्य बाधः किमर्थमपेक्षितः ॥ सहजानंद उवाच ॥ यद्यप्यात्मनि सर्वेषां बा-
धः सिद्धस्तथापि त्वय्यनादितः सर्वपदार्थसंस्कारस्य विद्यमानत्वेन कोऽपि पदार्थस्त्वया न बाधितः ॥ यथा राज्ञो नि
कटे कोटिशो धनसत्त्वेऽपि तव दारिद्र्यं न निवर्तते [illegible] तद्धनं त्वदीयं चेत्तदा दारिद्र्यनिवृत्तिरपि भवेत् ॥ तस्मान्नित्या
नित्यवस्तुविवेकेन सर्वसंस्कारबाधे सति सर्वनिषेधावधिभूतस्वरूपसाक्षात्कारो भवति ॥ केवलं किंचिच्छास्त्रा
ध्ययनमात्रेण सिद्धिप्राप्तिर्न भवति ॥ यथा राज्ञो धनकोष्ठागाररक्षकस्य तत्स्थयुक्तं स्वत्वं नास्ति तद्धनस्वत्वं राज्ञ एव
तथा तत्त्वताद्दृशानां च शास्त्रमात्रे मुह्यतां ब्रह्मभूतात्मनां स्वत्वं नास्ति तत्तु तेषामेव ॥ जडतादात्म्यापन्नत्वेन जडरू
पत्वान्न वस्तुस्वरूपानुभवो नास्ति यथा दर्वी मधुरान्नरसं न जानाति लेखनी च शास्त्रतत्त्वं नानुभवतीति तद्वत् ॥ उग्रबु
द्धिरुवाच ॥ ॥ तत्त्वमसीति प्रमाणादहं ब्रह्मैव ॥ यद्यहं ब्रह्माभिन्नः स्यां तदा ब्रह्मणि बाधितानां सर्वपदार्थानामपि
बाधो न स्यात् ॥ किंचाहं चेतनो दर्वीलेखिन्यादिकमचेतनं तस्माद्विषमो दृष्टान्तस्त्वया दत्तः ॥ सहजानंद उवाच ॥
साधनचतुष्टयमध्ये प्रथमसाधनभूतो नित्यानित्यवस्तुविवेकोऽपि तवाधुना नास्ति किमुत महावाक्यार्थ
विचारः ॥ किं तत्त्वं चिन्मयोच्यते श्रोतव्यं ॥ तच्च तत्त्वंपदयोर्भागद्वयं त्याज्यभागो ग्राह्यभागश्चेति तत्र वाच्यार्थे
चैकभागत्यागः पूर्वं वा परभागयोरभेदस्तु तदर्थः ॥ एवमज्ञात्वा वाच्यार्थयोरभेदस्त्वया ज्ञातः स तु बाधितः ॥
यदुक्तं त्वया विषमो दृष्टान्त इति तत्र स्पष्ट एतत् चेतनत्वेऽपि पुरीषादिकीटवद्धिकारित्वेन बद्धत्वेन च जडोऽ

सि यथावा नद्या गंगाजलयोर्जलत्वेन साम्येऽपि नद्या जलस्य विकारित्वेन बद्धत्वेन च गंगाजलं न भवति ।
किंतु यदि तद्बंधकीभूतबंधननिवृत्तौ गंगाभिमुखीभूय गंगां प्रविशति तदा गंगैव भवति तद्वत्त्वमपि रागद्वेषादिबंधनि
वृत्तौ ब्रह्माभिमुख्येन ब्रह्म प्राप्नोषि तदा ब्रह्मैवासि ॥ एतद्बंधनिवृत्तिरात्मभजनं विना न भवति तस्मात्सर्वदा त्वयाऽत्मै
व भजनीयः ॥ **उग्रबुद्धिरुवाच** ॥ यद्यहमात्मस्वरूपो न स्यां तदाऽऽत्मभजनमपि कुर्यां तस्मादात्मभजनं किमर्थं ॥
सहजानंद उवाच ॥ यद्यपि त्वं परमात्मैवासि तथापि त्वय्यनादितः परमात्मभिन्नभाव आरोपितस्तदारोपणं त्वया न
त्याने आत्मभजनमंतराऽऽरोपनिवृत्तिर्न भवति आरोपनिवृत्तिं विना स्वरूपप्राप्तिर्न भवति ॥ यथा रज्ज्वविचारमं
तराऽऽरोपितसर्पनिवृत्तिस्तद्विना रज्जुलाभो न भवति तस्मादात्मभजनं कर्तव्यमेव ॥ **उग्रबुद्धिरुवाच** ॥ अहं तु
सर्पो न किंत्वात्मरूपरज्जुरेव ॥ **सहजानंद उवाच** ॥ अरे मूर्ख यावदात्मरूपरज्जुं सर्परूपचोरमभावरूपाग्नौ
न भस्मीकरोति तावत्सर्पस्त्वं विषयुक्तमसि ज्ञाविन्याशिनस्त्वज्ञो दुःखिताः केऽप्यछिन्नमपि दुःखितः ॥ अरे
कार सर्पस्त्वमनादितो मनोमणिना संस्कारधने तिष्ठसि ततस्तद्धनं न नाशयसि किंतु वर्द्धयसि ॥ अयं सर्पो महा
दुष्टो मिथ्यापदार्थान्सादिवपद्दर्पोऽत्मानं छलयति यदा केन चित्तोचरूपनागस्वरो वाद्यते तदोन्मत्तो भूत्वा
नंदेन शिर आलयति यदा केन चिन्निंदारूपपादस्पर्शादिकं क्रियते तदा घोरफूत्कारेण दष्टुं धावति ॥ अपशांति
शीतेन संकुचति शांतिग्रीष्मेणोत्साहेन क्रीडति ॥ तपःस्वाध्यायादिकाम्यकर्मक्षीरवत्तस्य विषवर्द्धकमेव भव
ति ॥ यथा स्वातीवृष्टिबिंदुः शुक्तौ मौक्तिकं कदल्यां कर्पूरं सर्पमुखे गरलं भवति तथा तपःस्वाध्यायादि स्वाती

प० ६८ 67 विंदुरहंकारसर्पस्य विरागद्वेषादिविषोभवति॥ अनहंकारहातत्तपस्वाध्यायादिस्तान्निर्विंदुः सत्वशुद्ध्यादिमौक्तिका
दिरूपोभवति॥ सयद्युपनिषन्मंत्रांछुरेणोतिनद्दामोहरूपवल्मीकेतिरोभूयविषयस्त्रावसंस्कारसंपदंपुंजुहत्यति
ष्ठति॥ सर्वंखल्विदंब्रह्मेति श्रुतेः सर्वस्यापिब्रह्मस्वरूपत्वेनविषयेंद्रियादीनांब्रह्मस्वरूपत्वेनज्ञात्वातत्त्वज्ञोभवति
॥ तत्वमस्यादिश्रुतेरात्मनएकत्वंज्ञात्वास्वदारपरदारादिभेदंपरित्यज्याकार्थकारणभयंनकरोति॥ स्वोभावामर्त्ये
स्ययदंतवैतत्सर्वेंद्रियाणांजरयंतितेजइत्यादिवैराग्यप्रतिपादकश्रुतिस्मृतिश्रवणादृशायांस्वयंपंडितः सन्म
नोबोधयति येमनएतच्छुरत्यादयोऽज्ञानिविषयाअहंतपरमचैतनी॥ आत्मनएवात्तेनदारपुत्रधनादीनामात्म
स्वरूपत्वेनतेषुप्रीतिर्भगवत्प्रीतिरेव॥ तैःसहक्रीडाप्यात्मक्रीडैव॥ परधनपरदारादीनांस्वधनदारादिभ्योऽभिन्न
त्वेननत्परिग्रहणेकोवादोषः एवंप्रज्ञयामनस्तत्वविचारंप्रत्यगमयित्वास्वाधीनंकरोति येमुर्खविसहस्रोपायैर
प्ययमध्यस्तसर्पोननश्यति॥ अवसरप्राप्तेनयाविधतर्कमानीयविवेकिनामपिबुद्धिंभ्रमयति सद्गुरुकटाक्षंवि
नातस्यस्वरूपंनज्ञायतेतन्नाशोऽपिनभवति॥ तस्मादहमेवदमनेयदिस्वश्रेयइच्छसि तदागुरुहातधिकारति
रस्कारांवंशीकारस्वीकारत्वेनज्ञात्वातच्चरणावपरित्यज्यतच्छरणमेवव्रज॥ ॥ इत्यद्वैतादित्यदक्षिणायनेपं
चमार्के आत्मारामसमधुपसंवादेसहजानंदोपाख्यानांतर्गतोग्रबुद्धिसमाचारवर्णनंनामनवमोरश्मिः॥९॥ आत्मा
रामउवाच॥ ततउग्रबुद्धिःस्वान्यायंज्ञात्वाऽभिमानंत्यक्त्वासहजानंदचरणयोःपतितःसन्नेतावत्कालंममजन्म
वृथाजातमितिपश्चात्तापंकृतवान्॥ ॥ सहजानंदउवाच॥ अरेउग्रबुद्धेकाम्यंकर्मयत्कृतंतत्तदज्ञानादेवमयैनत ६८

मे किमर्थं हातमिति प्रश्नाज्ञापोः पिबंध एव यद्दत्तानेनैतत्कर्म हातं तन्नाशे प्रयत्नं महात्मा प्रश्नात्पेन हृयाका
लयापनं किमर्थं क्रियते॥ उग्रबुद्धिरुवाच॥ भो गुरो दयानिधे एतन्महासर्पस्य यथा नाशो भवेत्तथोपदिश॥॥॥
सहजानंद उवाच॥ हे उग्रबुद्धे तत्त्वत एतत्सर्पज्ञानं विना जपतपःस्वाध्यायादिकं ज्ञानोपयोगि न भवति।
किं तु तस्यैव वर्द्धकं भवति॥ लोके केचन जना यज्ञदानतपःस्वाध्यायादिकं स्वप्रतिष्ठार्थं धनार्थमैहिकामुष्मि
कसुखप्राप्त्यर्थं च कुर्वंति॥ अपरे तु केवलं दंभेन दुष्कर्म हातानायितत्क्षोपनार्थमनेकाच्छलं कुर्वंति केनापि स्वा
त्मनिष्ठ भवार्थं न क्रियते॥ एतत्सर्पस्य प्रतिष्ठादंभफलयोरासक्तित्वं तु तत्प्रतिष्ठानिहत्यर्थं फलेच्छां परित्यज्य वि
हितं कर्म हात्वा तज्ज्ञोपनं कुरु॥ यदि कदाचित्कामवशेन दुष्कर्म हातं स्यात्तत्प्रकटं हात्वा तं दंभरूपं प्रतिष्ठाही
नं कुरु॥ सर्पस्य चक्षुःश्रवाः इत्यन्वर्थनामांतरात्तस्याध्यस्तसर्पस्य प्रत्यक्षप्रमाणं विना शब्दप्रमाणज्ञानं नास्ति
स्वाभिमतानुरोधेन श्रुतितात्पर्यमपि प्रत्यक्षसिद्धार्थ एव संकल्पयति॥ तस्मात्त्वमेतत्स्य श्रद्धाविचाररूप
श्रवणे प्रकटय॥ श्रद्धया श्रुतिस्मृतिश्रवणं हात्वा तत्त्वविचारे मनो नियोजय॥ लोके यः कश्चन पुमान्धनं सं
पाद्य प्रीत्या तद्भूमौ संस्थाप्य स्वांतकाले तद्वासनया कलेवरं परित्यज्य सर्पो भूत्वा तदुपरि स्थित्वा तन्नाशे न
श्यतीति लोकप्रवादः॥ यस्मिन्यं वस्तुनि तस्मिन्नेवेच्छा जायते ततो यत्नः ततो जन्मभवत्यनुभवात्संस्कारो जा
यते॥ सर्वथा स्त्रैव प्रियस्तद्व्यतिरिक्तं प्रियार्हं न भवति॥ आत्मातिरिक्तवस्तुनि या प्रीतिः सा ज्ञानजन्या
॥ एतद्ध्यस्तसर्पस्याप्यज्ञानमेव मूलं॥ तस्मात्तद्भयकारणीभूताज्ञाननाशार्थं यत्नः कर्त्तव्यः॥ अता

प०
६९

नंतद्द्विविधं मूलाज्ञानेन तूलाज्ञानेन च ॥ यद्यद्वस्त्वात्मातिरिक्तत्वेनाभावत्वेन प्रियत्वेन च भासते तत्तदस्तु भानं तू-
लाज्ञानकार्यं ॥ मूलाज्ञानस्य शक्तिद्वयमावृतिशक्तिर्विक्षेपशक्तिश्च ॥ यदा तद्वस्तुरूपमावरणशक्त्याऽऽवृतं तदा
विक्षेपशक्तिस्तं मिथ्यासर्पं विक्षिपति ॥ हे उग्रबुद्धे यदाऽऽवरणशक्तिनाशेन तद्वस्तुरूपं साक्षाद्भवति तदाऽयं
विक्षिप्तसर्पः समूलो नश्यति ॥ तस्मात्सद्गुरुशरणं व्रजतस्तत्प्रसादेनैव तद्वस्तुरूपसाक्षात्कारो भवेत् ॥ आत्मारा-
म उवाच ॥ ॥ एवं सहजानंदेनोपदिष्टः स उग्रबुद्धिर्विगतसंशयस्तच्चरणयोः पपात ॥ ततः सहजानंद उग्र-
बुद्धिमनुगृह्य तज्ज्ञानदार्ढ्यार्थं स्वसंप्रदायानुसारेण साधनादिसिद्ध्यर्थं च तं स्वज्येष्ठशिष्याय सत्यसंधायार्प-
यामास ॥ स तदाज्ञानुसारेण स्वाश्रमं नीत्वा कियत्कालेन तमुग्रबुद्धिं कृतार्थं कृतवान् ॥ मधुप उवाच ॥ ॥ भोः प्र-
भो सहजानंदेनोग्रबुद्धिः सत्यसंधायार्पितत्वेन तदुपदिष्टत्वेन च स तच्छिष्य इति ज्ञायते ॥ एतद्व्यतिरिक्तः क-
श्चन शिष्यः सत्यसंधस्यासीद्वा न वा ॥ आत्माराम उवाच ॥ उग्रबुद्धिस्तु सहजानंदेनोपदिष्टत्वेन तस्यैव शिष्यः
परं तु कियत्कालपर्यंतं साधनादिद्वारा स्वानुभवदार्ढ्यार्थं सहजानंदस्तं तस्मै दत्तवान् ॥ सत्यसंधस्य निजशि-
ष्यस्तु स्वसुखनामा खंजरीटः ॥ मधुप उवाच ॥ भोः प्रभो स्वसुखस्य समाचारो मे प्रियः वाश्च न वक्तव्यः ॥ ॥ आत्मा-
राम उवाच ॥ ॥ स्वसुखस्तु पारंपर्येण ब्रह्मिष्ठवंशोद्भवस्तत्पिता तद्बाल्यदशायामेव परलोकं गतः स्वसुख-
माता विचक्षणा तस्मात्तत्समये सत्यसंधस्य ब्रह्मिष्ठत्वात्तस्मै तमर्पयामास ॥ ततः स्वसुखस्य शुश्रूषया सत्यसं-
धस्तुष्टः सन् तं सुखेनैव स्वीयत्वेनांगीकृत्य तत्क्रमेण (तोष्य) विद्यासाधनादिसंपन्नं कृत्वा पुनः स्वस्वरूपोपदेशं कृतवा- ६९

न॥ ततः सत्यसंधः स्वगुरुं विकटाद्रिंच्छास्त्रपरीक्षार्थं यथा पृष्टवान् तच्छृणु॥ सत्यसंध उवाच॥ भगवन् द्वैतो-
द्विसदा समदर्शी द्वैताद्रहितो नः॥ ॥ स्वगुरुरुवाच॥ ॥ भगवान् भक्तश्चेति द्वंद्वः प्रसिद्धस्तस्मात् द्वैताद्भक्तः कथम-
तीतो भवति॥ सत्यसंध उवाच॥ भगवति स्वात्मनि च भक्तस्य समभावस्तस्माद् द्वैतोऽप्यद्वय इति॥ स्वगुरुरुवाच॥
पदार्थद्वयं विना समो न संभवति तस्माद् अस्मिन्नर्थे त्रिपुटी स्पष्टा भाति समपदार्थोर्द्वयोर्भावस्तत्त्वद्वयस्तयोः
पदार्थयोः समभावं धरति सद्दृष्टेति॥ सत्यसंध उवाच॥ ॥ ज्ञानवित्तेये च या समदृक् सा साक्षिणी तस्मात्स भक्तो
द्वन्द्वाच्च एव भवतीति॥ स्वगुरुरुवाच॥ ॥ हे गुरो तव प्रसादाद् अस्मिन् विषये मम समाधानं जातं॥ यद्विषये यम-
म संशयो वर्त्तते सोऽपि निवारणीय इत्युक्त्वा स आह॥ यथाद्य घटस्य ग्रीवानाशे सति नष्टग्रीवोऽयं घट इति व्यवहारः न
तु नष्टग्रीवो घटाकाश इति॥ तथास्मिन् देहे च हस्तकर्णनाशे सति काणोऽयं देह इति व्यवहारो न जायते किंतु काणोऽह-
मित्येव जायते तत्कथं॥ सत्यसंध उवाच॥ ॥ यथायसो दाहकत्वाभावेऽप्यग्निसंसर्गाद् अयो दहतीति व्यवहारस्तथा-
त्मनः काणत्वाभावेऽपि देहसंसर्गाद् आत्मनि काणोऽहमिति व्यवहार उपपद्यते॥ ततः स्वगुरुर्गतसंशयो भूत्वा
स्वरूपे मग्नो जातः॥ ॥ ॥ इत्यद्वैतादित्यदक्षिणायने पंचमार्कश्चात्मारामगधुपसंवादे सहजानंदोपाख्याने नंतर्ग-
तो गुरुबुद्धिसमाचारकथनानंतरं सत्यसंधस्वगुरुसंवादवर्णनं नाम दशमो रश्मिः॥ १० ॥ इति पंचमार्कः समाप्तः

पं० ६९

69

६९

ष० १० 70 श्रीं श्रीगुरुभ्यो नमः ॥ ॥ अथ षष्ठार्कप्रारंभः ॥ आत्मारामउवाच ॥ अथ दीप्तिमत्समाचारवर्णनं ॥ हे मधुप मम गुरु-
दीप्तिमान्पत्तिराजसहजानंदयोः शिष्याणां मध्ये श्रेयान् ॥ तस्यावस्था सहजपदवस्थानेतरेषां सत्वनतुभयगुरुरूप-
पापात्रभूतः ॥ हे मधुप दीप्तिमानस्मद्गुरुरिति मया स्तूयत इति न मंतव्यं ॥ किंतु याहशी तस्यावस्था तन्माहात्म्यले-
शमपि वर्णयितुमसमर्थाव्यदायुष्यमपि नालं ॥ तस्य पिता प्रसन्नात्मनामको ब्रह्मनिष्ठः पारंपर्येण ब्रह्मनिष्ठकुलोद्भ-
वश्च ॥ तन्माता च शीलवतीनाम्नी सा तु पतिव्रता ब्रह्मवादिनी चास्ति ॥ प्रसन्नात्मनस्त्वेवं संप्रदायः ॥ तत्कुलोद्भ-
वो यद्यत्कर्म करोत्यशनपानादिकं च यत्करोति तत्सर्वं भगवदर्पणमेव करोति ॥ यथा कर्माणि भगवतेऽर्पयति तथा
स्वात्मानमपि तस्मा एवार्पयति ॥ स्वस्वाधीनतां परित्यज्य भगवत्स्वाधीनतां सर्वदा पादयति ॥ प्रारब्धानुसारेण य-
त्किंचन प्राप्यते तेनैव संतुष्टः सन्नधिकलाभार्थं न प्रार्थयत इति ॥ प्रसन्नात्मनः सहजानंदपित्रा पूर्णानंदेन सहा-
त्यंतं प्रीतिः स्थिता ॥ यदा शीलवती दीप्तिमंतं गर्भं धृतवती तदैकदास्मिन्दिने पूर्णानंदः प्रसन्नात्मनो गृहमागत्यैव
मुक्तवानच ब्रह्मतत्त्वस्य सुगंध आयाति ममांतर्दृष्ट्यापि तत्प्रकाशो भासते तस्माद्रत्नकावा गर्भवतीति विचार्यमाणे
प्रसन्नात्मनः पत्नी गर्भिणीति ज्ञाते ॥ ततः पूर्णानंदस्तां समीपमाहूयाशीर्भिरभिनंद्य प्रसन्नात्मानमुवाच ॥ ए-
तस्या गर्भे ब्रह्मतत्त्वः स्थितस्तस्मादतीव प्रयत्नेन गर्भरक्षणं कर्तव्यमित्युक्त्वा स्वाश्रमं गतः ॥ तदनंतरं यदा दीप्तिमा-
नुत्पन्नस्तदा मानससरोवरे पूर्णानंदस्य तत्तेजसः प्रकाशो जातः ॥ ततः पूर्णानंदो विंध्याचलमागत्य तद्बाल-
कं दृष्ट्वा प्रसन्नः सन्दीप्तिमानिति नाम कृत्वा पुनः स्वाश्रमं गतः ॥ दीप्तिमतो बाल्यादारभ्य भगवत्यतीव प्रीतिः ७१

स्थिता ॥ अशनपानक्रीडादौ कदाचिदपि लोभं न कृतवान् ॥ यदा मात्रादिभिर्मिष्टान्नं दत्तं तदातिस्वल्पमात्रप्रमाण-
मिदमन्नं योग्यमित्युक्त्वा स्वयं कठिनं कृत्वा ग्रन्थं भुक्तवान् ॥ बाल्येऽपि स्वपित्रा साकं रात्रौ भगवच्चिंतनादौ मग्नः
सन्नतिष्ठत् ॥ यदा तत्पिता तं बालक इति ज्ञात्वा स्वापनार्थमाज्ञां दत्तवांस्तदा किंचित्कालं स्वप्नवत्स्थित्वा पुनरु-
त्थाय तेन साकं ध्यानधारणादितत्परोऽभूत् ॥ यदा स यत्किंचिज्ज्ञानं एवं प्राप्तस्तदा पिता तं गृहीत्वा पूर्णानंदाश्रमं ग-
त्वा तस्मै समर्प्य पुनः स्वगृहमागतः ॥ पूर्णानंदोऽपि तं विद्यादिकमध्याप्य स्वसंप्रदायानुसारेण सांख्ययोग-
मुपदिश्य तदभ्यासतत्परं कृतवान् ॥ यदा दीप्तिमान् पूर्णानंदनिकटे तपःसाधनाद्यभ्यासतत्परोऽभूत्तस्मिन्का-
ले सहजानंदो मानससरोवरे नासीत् किंतु स्वावस्थापरिपाकार्थं स्वपितुराज्ञया हिमालयशृंगे तपस्तप्तुम-
तिष्ठत् ॥ ततः कियता कालेन स्वपितुः शरीरस्यावस्थानास्तीति श्रुत्वा दीप्तिमान् पूर्णानंदाज्ञया स्वगृहमागतः
तस्मिन्काले प्रसन्नात्मा प्रारब्धानुसारेण परलोकं प्राप्तः ॥ दीप्तिमांस्तत्संस्कारं कृत्वा पूर्णानंदनिकटे गंतुमि-
च्छंस्तत्रैवासीत् ॥ एतस्मिन्नंतरे मानससरोवरादेवं वाञ्छी समागता सहजानंदस्तपःसिद्धिं प्राप्य मानस-
सरोवरमागत्य स्वपितुः सकाशाद्वशिष्ठरहस्योपदेशं प्राप्य कृतकृत्यो जातः पूर्णानंदोऽपि सहजानंदाय
स्वगुरुपदवीं दत्त्वा विदेहकैवल्यं प्राप्तवानिति ॥ दीप्तिमानेतच्छ्रुत्वा द्विगुणदुःखितो भूत्वा संसाराद्विरक्तो
जातः ॥ तदनंतरं दीप्तिमानधुना मम विद्यादिसिद्धिः सम्यङ्न जातातः कस्यचित्सद्गुरोः शरणं व्रजामीति
मनसि चिंतितवान् ॥ ततो दीप्तिमान्विजयं वाहूस्तु चित्राणामाश्रमान्क्रमेणागतवान् ॥ तेऽप्यादरेणैनं
विजय

१० स्वाश्रमे पुस्थापयित्वा स्वस्वसंप्रदायानुसारेण बोधितवंतः परं त्वेतेन तस्य चित्तसमाधानं न जातं ॥ ततो जैनसेनसु
७१ वीरयोः समीपं गत्वा तच्चैन्नत्संप्रदायानुसारेण तपः साधनादिकं कृतवान् ॥ ततोऽप्युदासीनो भूत्वा रोहिता
श्वनिकटे गतः ॥ रोहिताश्वोप्येनमादरेण स्वाश्रमे स्थापयित्वा स्वसिद्धांतानुसारेण बोधितवान् ॥ यदा दीप्ति
मोऽस्त न्निकटेऽभ्यासपरो बभूव तत्तैकस्मिन्दिवसेऽभ्यासस्समये तस्य विस्मृतिर्जाता ॥ सा विस्मृतिः सुषुप्ति मू
र्छाभ्यां विलक्षणा ततः स रोहिताश्वायैतन्निवेदितवान् ॥ रोहिताश्वः प्रसन्नः सन्मदीयसंप्रदायसिद्धिरेतावत्येव
त्वयैतदेवस्यादार्ढ्यं संपादनीयं ॥ ततो दीप्तिमांस्तदनुज्ञां गृहीत्वा स्वाश्रमं ययौ ॥ स एवमनेकसत्पुरुषसमीपे त
त्तन्मतानुसारेण विद्यासाधनादिकमभ्यस्य क्रमेणाष्टमहासिद्धीः प्राप्तवान् ॥ कापि विद्या विमपि तपः साधनादि
कं तस्यौर्वतिनाभूत् ॥ अतो ब्रह्मिष्ठपश्चुपादिषु याः याः संप्रदायरीतयस्ताः सर्वास्तेन ज्ञाताः ॥ अहो मधुपतद
नुग्रहेणाहमपि ताः सर्वा ज्ञानामीति त्वामेतत्सर्वं वदामि ॥ ततो दीप्तिमान्देवसेनसमीपं गतः ॥ सोऽपि स्व[illegible]सं
प्रदायरहस्यं यदुपदिदेश ॥ तद्वक्ष्यामि शृणु ॥ देवसेन उवाच ॥ हे दीप्तिमन्नहं ममतादिकं तिरस्कृत्य यथा लेख
कः स्वहस्तलेखिनीतया त्वमंतर्याम्यधीनो भव ॥ यद्यपि लेखिनी सर्ववेदशास्त्राणि लिखति तथापि लेखक
प्रेरणयैव ॥ तद्वत्त्वमपि सर्वेषु कर्मसु प्रवर्तमानोऽपि प्रवर्तकमंतर्यामिणं जानीहि ॥ यदा त्वमंतर्यामिणि लीनः
सन्नात्मरूपपीनत्वं देहमरूपशिरश्छित्वा हंतारूपहृदयं विदारयसि तदा लेखिनीवत्स्वन्मार्गप्रवृत्तो भ
वेः ॥ एतद्देवसेनमतं किंचिन्न्यूनाधिकेन स्वपितृमततुल्यमिति मत्वा दीप्तिमान्प्रसन्नो जातः ॥ इत्यद्वै ७१

नादित्यदक्षिणायने षष्ठोऽर्क आत्माराममधुपसंवादे दीप्तिमन्तसमाचारवर्णनं नाम प्रथमो रश्मिः ॥१॥ आत्मा
राम उवाच ॥ ॥ हे मधुप यद्यपि दीप्तिमान्देवसेनप्रभृतिभिर्विद्यातपःसाधनादिसंपन्नः हातस्तपःसाध
नादिप्रभावेनाष्टमहासिद्धीरपि प्राप्तस्तथापि यादृशः स्वरूपसाक्षात्कारोऽपेक्षितस्तादृशो न जातः ॥ दीप्तिमा
नेवं प्रकृतिमानितिकृत्वाऽष्टमहासिद्धिप्राप्त्यावगृह्यमानः सन् बहुगुरूपदेशप्रभावे एव स्वसामीप्यावस्था
प्राप्तावप्यलं बुद्धिमहत्त्वाकेवलस्वरूपावस्थाप्राप्त्यर्थं को वा गुरुर्भवेदिति चिंतितवान् ॥ पक्षिराजवृत्तांत
मत्ताद्वा देवसेनप्रभृतीनां सह[illegible]वासस्य हातत्वेन सहजानंदस्यतरणात्वेन मत्सदृशत्वेन चोपदेशयोग्य
तायां संदिग्धः सन्नितः परं वास्य शरणं व्रजामीति चिंतयाकस्यांचिद्रात्रौ स्वप्नं प्राप ॥ तत्र स्वप्ने कोटिसूर्यसम
प्रभं सिंहासनस्थं सत्यभामासहितं भगवंतं श्रीकृष्णं ददर्श ॥ तद्दक्षिणपार्श्वे महर्षिवृंदं वामपार्श्वे वृंदारकस
मूहं संमुखे राजर्षिसंघं पश्चाद्वादरवगणं सिंहासनकोणस्थं संपुटीकृतहस्तं वैनतेयं तन्मध्ये आत्मानमशाः स
प्तस्वर्णजातीयपक्षिणश्च दृष्ट्वा भगवंतं दूरात्प्रणनाम ॥ तदा श्रीभगवान्वैनतेयमुवाच ॥ दीप्तिमान्नामायं
चक्रवाको मम परमभक्तस्तस्मादेतं तत्त्वोपदेशाय कस्मैचिन्त्वत्कुलोद्भवायार्पयेति ॥ ततः श्रीवैनतेयो दी
प्तिमंतं सर्वपक्षिपश्चाद्भागस्थाय स्वपर्णायार्पितवान् ॥ एतस्मिन्नंतरे प्रबुबोध ॥ ततो दीप्तिमान्प्रातःकाले
स्वप्नवृत्तांतं पक्षिणः स्वमातरं प्रति चोक्तवान् ॥ इतरपक्षिणः स्वप्नफलं वक्तुमशक्ताः स्तूष्णीं तस्थुः ॥ त
न्माता विचक्षणत्वेन स्वप्नफलमुवाच ॥ दीप्तिमति श्रीभगवद्गुरुग्रहः पूर्णोऽस्ति न स्मादेतस्येतादृशस्व

४ ७२ 72

प्रोज्झितः॥ श्रीवैनतेयं पृष्टाज्ञाङ्गेये सत्र सुपर्णः स्थितास्ते पुत्र सर्वपक्षाज्ञाज्ञास्थोयः स इदानीं कुत्रचिद्देहधारी भूत्वा
जीवन्स्थितः॥ इतरे षट्पक्षिणस्तु तत्पितृपितामहादयः स्थूल देहरहिता लिंगदेहमात्रावशिष्टाः स्वर्गे
इष्टाः॥ हे पुत्र श्रीवैनतेयस्त्वां यस्मै सुपर्णायार्पितवांस्त्वमिदानीं तं दृष्ट्वा सोऽयमेवेति परिचिनोषि॥ ततो दीप्तिम
तोक्तं तमहं त्वा स्मारयामि॥ पुनर्मा चोक्तं तवोद्धारस्तेनैव भविष्यतीति लक्ष्यते। तत्त्वं तमन्विष्य तच्छरणं व्रज॥
तदा तव मनोरथः पूर्णो भविष्यतीति॥ ततो दीप्तिमान्माताऽनुज्ञात इतस्ततोऽन्वेषणं कुर्वन्नेवाभ्यश्चित्पक्षि
राजमाहात्म्यं श्रुत्वा केश्चित्पक्षिभिः सार्धं गंधमादनं गतवान्॥ पक्षिराजस्तु योगदृष्ट्या तदागमनं ज्ञात्वा
तत्सन्मानार्थं स्वयमेव तत्संमुखं जगाम॥ दीप्तिमांस्तं दृष्ट्वा सोऽयं सप्रमः सुपर्णो यस्मै श्रीवैनतेयः स्वपक्षमा
मर्पितवानिति ज्ञात्वा तं प्रणनाम॥ ततः पक्षिराजेनोक्तं यस्मिन्दिवसे भगवताऽत्रत्यः सन्नैवनतेयो महा
त्मा मर्पितवांस्तत्प्रभृति त्वन्मार्गावलोकनं कुर्वन्स्थितोऽस्मि॥ ततो दीप्तिमांस्तदाश्रमे स्थित्वा तत्सहवासं कृत
वान्॥ पक्षिराजस्तु दीप्तिमतः कथनं विनैव दीप्तिमान्यस्य यस्य गुरोर्निकटे यां यां विद्यामधीतवान्॥ तत्त
दुरुसंप्रदायानुसारेण साधनोपासनाद्यभ्यासद्वारा यां यां सिद्धिं च प्राप्तवांस्तत्सर्वं तं कथयामास॥ स तत
च्छ्रुत्वा विस्मितः सन्नुवाच भो गुरो भवता यदुक्तं तत्सर्वं सत्यमेव॥ अनन्तरं पक्षिराजः स्वसंप्रदायानुसा
रेण साधनाद्युपदिदेश॥ यत्र यत्र साधनाभ्यासादौ तस्याप्रतिपन्नात्वमासीत्तत्र तत्र परिपक्वतां संपादया
मास॥ किं च तस्य ब्रह्मविद्यायां यत्र यत्र विषये संदेहः स्थितः पक्षिराजानुग्रहेण तत्र सर्वत्र निःसंदेहो जा ७२

नः ॥ कियत्कालेन दीप्तिमान् विद्याप्रत्युत्पन्नो स्वरूपावस्थायां च पक्षिराजसहवासेन तत्प्रसादेन स्वयोग्यतया
च तत्त्वमो जातः ॥ हे मधुपपक्षिराज दीप्तिमतोः प्रथमं यो विचारो जातस्तं वक्ष्यामि शृणु ॥ ॥ ॥ दीप्तिमानुवाच
निर्गुणे किं प्रमाणं प्रत्यक्षं वा अनुमानं वा शब्दो वा नाद्यः रूपादिकारणकलापाभावात् न द्वितीयः ब्रह्मणो नि
र्विकारत्वेन निर्धर्मिकत्वेन च तदनुमापकलिंगासंभवात् ॥ नापि तृतीयः यतो वाचो निवर्तन्त इति श्रुत्या श
ब्दस्यापि प्रमाणत्वासंभवात् ॥ पक्षिराजउवाच ॥ ॥ तं त्वौपनिषदं पुरुषं पृच्छामि इति श्रुत्या ब्रह्मणः उपनिषदे
कवेद्यत्वप्रतिपादनात् उपनिषदामेव ब्रह्मणि प्रमाणत्वं ॥ दीप्तिमानुवाच ॥ ॥ उपनिषदां निर्गुणप्रति
पादकत्वं न संभवति ॥ शब्दस्य हि वस्तुप्रतिपादकत्वं त्रिधा मुख्यवृत्त्या लक्षणवृत्त्या गौणीवृत्त्या च ॥ मुख्या
पि द्विधा रूढियोगभेदेन रूढिस्तु जात्या गुणेन स्वरूपेण च प्रवर्तते ॥ यथा गौः शुक्लो डित्थः ॥ योगस्तु प्र
तिपदिकार्थप्रत्ययार्थयोर्योगेन योगः ॥ ब्रह्मणि च रूढिर्न संभवति जात्यादेरभावात् योगोपि न संभवति अ
विद्त्वात् ब्रह्मणः अत एव न लक्षणा लक्षणाया शक्यसंबंधरूपत्वेन असंगो ह्ययं पुरुषः इति श्रुत्या ब्र
ह्मणि संबंधात्यंताभावप्रतिपादनेन शक्यसंबंधरूपलक्षणासंभवात् ॥ नापि गौणी गौणीवृत्तेः गुणसं
बंधानुसारित्वेन निर्गुणे तदसंभवादिति ॥ एवं च प्रमाणाभावान्न निर्गुणसिद्धिरिति ॥ पक्षिराडुवाच ॥
सगुणस्य वेद्यरूपत्वेन सगुणभासकमपि किंचिद्वस्तीति वक्तव्यं ॥ यद्भासकं तदेव निर्गुणं न हि तस्यापि
सगुणत्वं तथा सति तस्यापि भासकांतरसापेक्षितया अनवस्थापत्तेः ॥ तस्मात् यद्भासकं तदेव निर्गु
णं तत्तु न भास्यं भास्यत्वभासकत्वयोर्विरोधात् ॥ एतावता प्रबंधेन निर्गुणे प्रमाणं लब्धमिति ॥ श्रुति

७३

रेवप्रमाणेन च हृत्यसंभवो लक्षणाहृतेः संभवात् ॥ न च शाकासंबंधाभावः आध्यासिकशाकासंबंधस्यसत्
त्वात् ॥ ॥ इत्यद्वैतादित्यदक्षिणायने षष्ठार्कआत्मारामसमधुपसंवादे दीप्तिमहोपाख्याने पक्षिराजदीप्तिमत्संवा
देवर्णनं नाम द्वितीयो रश्मिः ॥२॥ आत्माराम उवाच ॥ ॥ हे मधुप कदाचिद्दीप्तिमान् भक्त्या पक्षिराजमात्मोपदे
शाय विज्ञापयामास ॥ सोपि यथोपदेशं कृतवांस्तद्विचारं वक्ष्यामि शृणु ॥ पक्षिराज उवाच ॥ यथाऽरण्याम
ग्निः सूक्ष्मरूपेण सर्वत्र व्यापकोऽस्ति ॥ यदा प्रज्वलिताग्निसंयोगात्परस्परसंघर्षणाद्वा प्रबुद्धो भूत्वा येन का
ष्ठविकारेण स्वयं प्रकाशमानोऽप्रकाशवद्भूवंतं विकारं भस्मीकृत्य तेजःपुंजे लीनो भवति ॥ तथा चैत
न्यं देहे सर्वत्र सूक्ष्मरूपेण व्यापकं भवति ॥ गुरूपदेशस्पर्शेन महावाक्यश्रवणद्वारा विचारघर्षणेन वा प्रबु
द्धो भूत्वा येन संघातविकारेण स्वयं प्रबुद्धोऽप्यप्रबुद्धो जातस्तं विकारं नाशयित्वा स्वानंदे विलीयते ॥ काष्ठेऽग्नि
सद्भावे संदेहो नास्ति परंतु प्रबोधं विना स काष्ठं दग्धुं न शक्नोति ॥ एवमंतःकरणावच्छिन्नचैतन्याग्निरपि
प्रबोधं विनांतःकरणकाष्ठं दग्धुमसमर्थो भवति ॥ यस्याग्नेः स्वोपाधिभूतकाष्ठदाहे शक्तिर्नास्ति तस्येह
लोकपरलोकफलजातं दग्धुं कथं शक्तिर्भवेत् ॥ दीप्तिमानुवाच ॥ भो गुरोऽग्निरुपाधिभूतकाष्ठं दग्ध्वा स्वय
मपि यथा शाम्यति तथा चैतन्याग्निरपि स्वोपाधिभूतांतःकरणादिकं दग्ध्वा स्वयमपि शाम्यति चेद् नित्यत्वप्र
संगः ॥ ॥ पक्षिराज उवाच ॥ नाशवत्काष्ठसंगदोषेणाग्नेरपि नाशो भासते ॥ वस्तुगत्याग्नेर्भंगो गमनागमना
दिकं वा नास्त्युपाधिगतभंगागमनादिकमेवाग्नौ भासते ॥ वस्तुतः स्वतेज एवाग्नेः शरीरं परंत्वज्ञानतः का
ष्ठमेवास्य शरीरं कल्पयित्वा तन्नाशे स्वनाशो भवतीति मन्यते ॥ एवमंतःकरणावच्छिन्नचैतन्यमपि ॥ दे

शिशो छायाप्रकाशौ परस्परविरुद्धौ यत्र छाया तत्र प्रकाशाभावो यत्र प्रकाशस्तत्र छाया नास्ति भगवतो माया
चरित्रं पश्य सर्गादारभ्य प्रकाशरूपाग्नेश्छायारूपकाष्ठस्य वा यथेष्टं मेलनमस्तीति ॥ तस्मात्प्रकाशरूपाग्नेश्छा
यारूपकाष्ठनिवारणे सामर्थ्यं नास्ति ॥ यस्य प्रकाशस्य छायासंगस्तस्य प्रकाशरूपत्वेऽपि सप्रकाशवानिति
वोऽपि न मन्यते ॥ अत्रानन्तोऽयमग्निः स्वमहात्म्यं काष्ठतुच्छत्वं स्वभक्ष्यत्वं च न जानाति तस्मात्काष्ठस्यारो
पितमहत्वेन भीतवत्तस्मिंल्लीनो भवति ॥ तथैव देहतादात्म्यापन्नचैतन्यमपि ॥ यस्य छायाधीनत्वं तद्द्वयं चा
स्ति सगृहे वने स्वर्गादौ वा गत्वापि निर्भयो न भवति ॥ तस्माद्धे मंदाग्ने सद्गुरुप्रज्वलिताग्निरूपपदं स्पृष्ट्वा स्व
प्रकाशेन स्वच्छायां विनाशय ॥ यदेदं काष्ठं प्रज्वलिताग्निं स्पृशति तदाग्नेर्लेलायमानजिह्वायां कुत इयं छा
या ॥ अयमुपमानरूपाग्निः काष्ठं भस्मीकृत्य स्वस्मिन्नपि विलीयते ॥ तद्रूपमेयाग्निचेतनस्त्विदं काष्ठरूपश
रीरं दग्ध्वा सूर्यवत्स्वयमेव प्रकाशाविर्भूत्वा स्वतेजसा ज्वलति ॥ यदायं सन्निधिगुह्याग्निः स्वप्रकाशेन विद्धं भवे
त्तदान्तरंग्नेः प्रकाशमसौ सूर्यो रश्मिभिराकर्षति तत्रस्य समित्छायाधूमो भूत्वा निरस्यति तं धूमसमभ्रमावर्षति
यथेदं काष्ठमु[illegible]पमानरूपाग्निं स्वस्मिन्नाच्छादयति तथेदमधं सर्विहरतनं मध्ये व्यवहितं सत्सूर्यमा
च्छादयति ॥ परं तु यमग्निः सन्निधिनातादात्म्यसकाशात्तन्मयो भूत्वा स्वस्वरूपत्त्वानादासक्तोऽप्रकाशः संस्ति
ष्ठति ॥ त्रिलोकदीपोऽसौ सूर्यस्तस्य विपरीतीभूयाश्राभिमानादतीनः स्वस्मिन्नेव स्वतेजसा ज्वलति ॥ भा
नोस्तेजसेदं छायारूपाधंभासतेन न त्वग्निकाष्ठतुल्यं सूर्यभाश्चंश्रेण निरस्यति ॥ हे प्रिशिशो यदित्त्वमेवं वदस्यसौ

यो०
७४
74 भानुरेतत्तस्वाच्छादकमभ्रं कस्मान्न दहतीति चेदुच्यते ॥ इदमभ्रं भानोः स्वरूपं नाच्छादयति तस्मादेव रवेस्ते
जो येन सहितं स्थितेनात्मवृत्तिः स्वतेजोगोपनार्थं स्वाच्छादकमभ्रं न दहति ॥ यथोपमाने ऽयं सूर्यः स्वरश्मिभिस्तोमं
दीपयति सोमरश्मिभिरभ्रं संचयत्यभ्रं स सान्द्रधारान्नान्नं स्तर्पयति ॥ तथोपमेये ऽयं वत्सभूतात्मा विद्यासामनत्वे
नयति प्रबुद्धमनसेंद्रियाणि सत्कर्मसु योजयित्वा ब्रह्मतेजो ऽसहमानानपोषयति ॥ ॥ आत्माराम उवाच ॥ ॥
हे मधुप दीप्तिमान्पूर्णेनेदानीन्तु गृहेण सांख्यविद्यारहस्यं प्राप्तः ॥ एतत्पक्षिराजोक्तं श्रुत्वा विस्मितः संस्तं विज्ञाप
यामास ॥ भो गुरो भवदुक्ता विचारेयच्च रसवाक्यमुक्तं तदतीव विलक्षणं भाति ॥ अतस्तद्विस्तारं श्रोतुमिच्छामि
ततः पक्षिराजेनोक्तमिदं तु राजगुह्यपरमविद्यास्ति ॥ हे शिष्य तव विद्यासाधनादिसिद्धिर्जाता स्वरूपस्थि
तिरपि त्वया प्राप्ता परं तु सांख्यनिष्ठानुसारेण ॥ इयं तु राजविद्यास्ति तस्मादिदानीं त्वं स्वस्थानं गत्वा स्वपितृ
गुरुपदव्यां स्थित्वा पुनः कालांतरे मत्समीपमागमिष्यसि चेन्मत्तस्तदा सेनैतत्परमविद्यारहस्यमपि प्रा
प्स्यसि ॥ तदनंतरं दीप्तिमान्स्वस्थानं गत्वा स्वपितृगुरुपदव्यां स्थितवान् ॥ अथ द्वावेतो ऽनेकपशुपक्षिणः सं
सारतापेन संतप्तान् दीप्तिमच्चरणारविंदमकरंदेन शांतिमगमन् ॥ हे मधुपे तावत्पर्यंतं दीप्तिमतः साधना
वस्थावृत्तांतमुक्तमस्य उत्तरायणसंततिकोत्तरार्धादिमार्कचतुष्टये ऽपि स पक्षिराजेन यथोपदिष्टस्तथा
वक्ष्यामि ॥ इदानीं तु तस्य सिद्धावस्थासमाचारं यत्किंचिद्वक्ष्यामि तच्छृणु ॥ हे मधुप चारु मुखकपोत
सहायेन यथाहं दीप्तिमच्छरणं गतो ऽस्मि तत्समाचारः प्रथमार्के मया निरूपितः परं तु तत्र सयथामा ७४

सुज्ञावानहमपितेनयथोपदिष्टःएतद्वृत्तांतंनोज्ञासिदानींतदुच्यतेशृणु ॥ चारमुखोममपरमसखेतितद्
वृत्तांतमपिवर्णनीयमतस्तदप्यग्रेवक्ष्यामि ॥॥ ॥ इत्यद्वैतादित्येदक्षिणायनेषष्ठार्केआत्मारामसमधुपसं
वादेदीप्तिमद्गुणाख्यानेपक्षिराजदीप्तिमत्संवादवर्णनंनामतृतीयोरश्मिः ॥३॥ आत्मारामउवाच ॥
हेमधुपपूर्वकालेऽहंमरणव्याजेनपंजरान्निर्गत्यचारमुखेनसार्धंदीप्तिमंतंप्रत्यागतस्तदातेनयथोप
दिष्टस्तद्वक्ष्यामिशृणु ॥ दीप्तिमानुवाच ॥ अरेआत्मारामजगतिसर्वेषांप्राणिनांमध्येषट्संज्ञाः ॥ तत्र
प्रथमसंज्ञस्यप्राणिनएतालक्षणाः ॥ इंद्रियजन्यसुखमत्रमेवेच्छंतितेषामिहलोकपरलोकनाशभयं
नास्तिसर्वदामद्यपानवेश्यागमनादिषुमुह्यंतस्तिष्ठंति ॥ स्तेयद्यूतकपटादिभिःसर्वदाकालक्षेपंकु
र्वंति ॥ हिंसादिकर्मकर्तारोदैहिकवारागद्वादासुखिवानरकान्नबिभ्यति ॥ द्वितीयसंज्ञप्राणिनस्तुसं
सारमात्रमेवेच्छंति ॥ मनसावाचाकर्मणातेषांश्रद्धासांसारिकश्रेष्ठतायामेवपर्यवस्यति ॥ परलोक
नाशात्तेनबिभ्यतीहलोकसुखमेवेच्छंति ॥ पशुभूमिद्रव्यादीन्यग्रेपुत्रपौत्रादीनांद्विदायकानीति
मत्वा मरणपर्यंतंकस्मैचिदपिनददति ॥ तेशरीरपुष्ट्यर्थंनव्रतोपवासादिकंकदापिनकुर्वंत्यभक्ष्य
भक्षणेऽपिनबिभ्यतिधनलोभाद्यज्ञादिकमपिनकुर्वंतिसांसारिकचातुर्यगुणेषुनिपुणाःयेनका
व्यशास्त्रादिनासंसदिप्रतिष्ठासभास्थानांमनोरंजनंचभवतिसम्यक्तदुपस्थितिंकुर्वंति ॥ राजराजकु
मारादीनांप्रीत्युत्पादनार्थंतत्पूर्वेषांनामचरित्रादिकोपस्थितिंकुर्वंत्येवंधनिकप्रधानादीनामपितेषां

ष प्रीत्यर्थमेव लोकरंजकप्रहेलिकादंतकथागीतप्रबंधादीनामप्युपस्थितिं कुर्वंति ॥ तृतीयसंज्ञप्राणिनां वस्तु
७५ तोऽन्तःकरणवृत्तिः प्रथमद्वितीयसंज्ञप्राणिवृत्तिसमाना बहिरेतेषां व्यापारः पंचमषष्ठसंज्ञप्राणिव्यापार
75 वद्दृश्यते ॥ ते सर्वदैहिकविषयसुखमेवेच्छंति बहिर्विषयवैराग्यं छलेन लोकान्दर्शयंति ॥ लोके स्वकी
र्त्तिर्धिका भवेत्स्वमहत्त्ववृद्धिश्च भवेदित्यभिलाषः सर्वदा तेषां श्रद्धालिप्सा ॥ परं तेन चतुर्थसंज्ञप्राणिनां व्या
पाराचरणे दृष्टापूर्त्तादौ द्रव्यव्ययायासादिकं भवतीति तत्संज्ञवृत्तिं न दर्शयंति ॥ किंतु पंचमषष्ठयोरीश्वर
याद्युपसत्तेस्तयोरेव स्वप्रवृत्तिं दर्शयंति ॥ रहस्ये हिंसाकर्मणि सुरापानवेश्यागमनादौ च प्रवर्त्तंते अ
८७ नेन कर्मणा नरके पतिष्यामि इति न बिभ्यति ॥ बहिस्तु हिंसासुरापानादिकं किमपि न जानंतीति स्वशुद्धाचा
रं दर्शयंति ॥ वस्तुगत्या तेषामभिरतं पर्यवसाने प्रथमद्वितीयसंज्ञप्राणिनामिव वर्त्तते परं तु लोके यद्यत्सं
सदि यद्यत्प्रकरणे प्रथमसंज्ञमारभ्य षष्ठसंज्ञपर्यंतं यत्संज्ञव्यापारस्याधिकः प्रचारः स्वयमपि तत्र तत्सं
ज्ञानुकूल्येन तैः संवादं कुर्वंति ॥ अत एवैते षड्विधसंज्ञवृत्तिं सम्यग्जानंति ॥ एतेषां दंभवंचनाऽनृतभाष
णछलादिरेव चातुर्यगुणः ॥ चतुर्थसंज्ञप्राणिनस्तु परलोकमात्रमेवेच्छंति ॥ तेषां श्रद्धेष्टपूर्त्तदत्तदा
नापरलोकप्राप्तावेव पर्यवस्यति ॥ ते परलोकं शाश्वतमिहलोकं नश्वरं ज्ञात्वा पशुभूद्रव्यादिकमग्रेऽस्मत्पु
त्रपौत्रादीनां प्रयोजनाय भविष्यतीति तत्संग्रहं न कुर्वंति ॥ यत्तद्दानाद्यर्थमेव सांसारिकव्यवहारेण धनं
संपादयंति न संग्रहार्थं पंचमसंज्ञप्राणिनस्तु सिद्धिमेवेच्छंति ॥ मनसोऽभिलाषमपूरयित्वाऽस्यं ७५

तत्प्रयत्नेन मनोवशीकर्तृन् तेषां श्रद्धा सर्वदा वर्द्धते ॥ तेषां प्रवृत्तिनिवृत्ती सदा विधिनिषेधयोरेव इंद्रिया
णामग्राह्यग्रहणं माभूदित्यंतविंद्रिय[बहिरिंद्रिय]निग्रहं कुर्वंति ॥ सर्वेंद्रियाणां शरीरस्य च स्तुत्वत्यागएव तेषां चातु
र्यगुणः ॥ षष्ठसंज्ञप्राणिनः स्वरूपमेवेच्छंति ॥ ब्रह्मातिरिक्तपदार्थानां संस्काराद्दंतःकरणशो नेस ५२
र्वदा तेषां श्रद्धा वर्द्धते ॥ कदाप्यन्यभावोद्भूतिना यात्वनात्मवस्तुवृत्तिरपि मा भवतिति सर्वदा ते श्रवणा
दिद्वारा स्वरूपानुसंधानमेव कुर्वंति ॥ साधनादौ स्वरूपसिद्धिं विनाऽनात्मकसिद्धावर्वाक्पदे च
संतुष्टा विश्रामं न करिष्याम इति यं संकल्पं कुर्वंति तत्पूर्णार्थं स्वरूपमात्रं लब्धीकृत्य तत्प्राप्तिं विना म
ध्येन विश्राम्यंति ॥ देशिशोएवं षट्संज्ञनिरूपणं कृत्वा तत्त्रयः संज्ञस्तवेष्टः कस्य पदं वीत्वमालोच यसि
तदृष्ट ॥ ततो मयोक्तं षष्ठसंज्ञ एव ममेष्टः परं तु सांप्रतं तद्योग्यता नास्तीति तत्प्राप्त्युपायं पंचमसंज्ञरीतिमु
पदिश्य तत्सिद्ध्यनंतरं षष्ठसंज्ञरहस्यं मामुपदिशेति ॥ मद्विज्ञापनं श्रुत्वा दीप्तिमान्प्रसन्नः सन्मामंगी
कृत्य सर्वविद्यामुपदिश्य शमदमादिसाधनसंपन्नं कृत्वा स्वरूपोपदेशं कृतवान् ॥ ततः सर्वब्रह्मनिष्ठ
संप्रदायरीतिमुपदिदेश ॥ मधुपानएवाहं विद्यमानत्वानि समाचारं तत्संप्रदायरीतिं चत्वामुक्तवान्
सहजानंदप्रभृतीनां कथाप्रसंगनिरूपणानंतरं क्रमतः स्वचित्तस्यापि कथाप्रसंगश्चागतः ॥ तत्संप्रदा
ये संगीते पारमार्थिकभावं स्थापयंति स्त्रीपुरुषादिसौंदर्येऽपि परमत्मानमनुभवंतीत्युक्तं ॥ तत्र संगी
ते पारमार्थिकभावश्चित्तरथवृत्तांते सहजानंदेन यन्निरूपितो भवदनुग्रहेण समयापित्तातः ॥ सौं

श्री० ७६ 76 दर्थेषु परमात्मानुभवः ससमीचीनो मध्यमो वा तं वदेति मया विज्ञापितं ॥ ॥ ॥ दीप्तिमानुवाच ॥ हे आत्मारामस्सा
धनदेयामहे कियत्कालं तत्र चित्रसहवासं कृतवान् तत्संप्रदायरीतिं विचारितवान् ॥ तत्समये देवसेनो विनो
दार्थं गोवर्धनगिरिमकस्मादागतः ॥ तत्र तच्चित्रमित्रं विचित्र एकस्याः कुरंग्याः रूपे सौंदर्ये परमात्मसौंद
र्यप्रतिफलितत्वमनुभवंस्तत्रैवासक्तः स्थितः ॥ एतच्च चित्रं देवसेनो दृष्ट्वा किमवलोकसे इति तं पृष्टवान् विचित्रे
णोक्तं तलेस्त सौंदर्यमनुभवन्निह सामि ॥ पुनर्देवसेनेनोक्तं यदि त्वं पुरुषार्थवानसि यदि च तत्वचक्षुः सार्वाधि शिर५
नीस्तितदा सौंदर्यं सर्वव्यापकत्वेन साक्षात्किं न पश्यसि । अरे स्वरूपे परमात्मप्रतिबिंबत्वं कल्पयसि चेत्तर्हि कु
रूपे तद्विना कस्य प्रतिबिंबत्वं कल्पयसि ॥ नेह नानास्तीति प्रमाणेन स्वरूपे तु भेअपि परमात्मचरित्रैस्तः ६ कुरूपे
यथा स्वरूपं सौम्यविभूतिप्रतिबिंबितं तथा कुरूपमपि क्रूरविभूतिप्रतिबिंबितं ॥ अत एव महात्मानः प
रमात्मानं समीचीनपदार्थेषु सौम्यविभूतिसंसृष्टं ज्ञात्वा स्वहृदये लोकबंधवे कांतायेति नमंति ॥ असमी
चीनपदार्थेषु परमात्मानं क्रूरविभूतिसंसृष्टं ज्ञात्वा घोराय कठोराय दारुणायेति नमंति ॥ एतच्छ्रुत्वा
विचित्रस्तत्क्षणीव भूत्वा हृष्टः हं तं परित्यज्य देवसेनशरणं गत्वा कंचित्कालं तत्सहवासं कृतवान् ॥ ॥ ॥
इत्यहेत्वादित्ये दक्षिणायने षष्ठार्के आत्मारामधुपसंवादे दीप्तिमद्गुपाख्यानेन तत्समाचारवर्णनं नाम च
तुर्थो रश्मिः ॥ ४ ॥ आत्माराम उवाच ॥ हे मधुप कदाचिद्दीप्तिमान्मया साकं जयसेनसंमेलनार्थं तन्निक
टं गतवान् ॥ तत्र कंचित्कालं स्थित्वा तदा ज्ञानग्रहणसमये जयसेनेनोक्तं भो दीप्तिमं स्त्वं तत्वरयागच्छसि ७६

चेत्पुनरत्रतवागमनंभविष्यतीति ॥ दीप्तिमानस्वरूपस्थितत्वेनतद्रूपविराण्यस्वाश्रमाभिमुखंगतवान् ॥
मार्गेदृष्टेतवनराजः शकुनिर्दीप्तिमंतंदृष्ट्वाप्रणम्यजयसेनदर्शनार्थमहंगच्छामिभवताऽप्यागंतव्यमिति
प्रार्थयामास ॥ तेनोक्तमधुनैवतत्समीपादागतोस्मि ॥ शकुनिनोक्तंयद्यपितन्निवासादागतोसितथापिम
दर्थंपुनरागंतव्यमिति ॥ सतद्भक्तिभावेनतेनसार्कंतत्रगतवान् ॥ ततोजयसेनेनोक्तंभोदीप्तिमन्नितस्त्व
द्गमनसमयेतवपुनरत्रागमनंशीघ्रमेवभविष्यतीतिमयोक्तंतत्तथैवाभवदिति ॥ दीप्तिमानेतच्छ्रुत्वास्मि
तवदनःसंस्तूष्णींबभूव ॥ तत्रकंचित्कालंसत्कालक्षेपंकृत्वापुनःशकुनिनासहतदाज्ञां[illegible]गृहीत्वाग
च्छन्मार्गेकुत्रचिद्रम्यप्रदेशेस्थितवान् ॥ तत्रशकुनिनादीप्तिमान्प्रार्थितोभोगुरोतवजयसेनस्यचाव
स्थानंलक्षितमयाज्ञातंपरंत्वेतदाश्चर्यंतवमयासार्कंपुनस्तत्समीपगमनेनेनज्ञातंत्वयातन्नज्ञातमिति
ततोदीप्तिमतास्मितवोक्तंमद्रूपेच्छयासोऽधिकपदवीमानितितेनभविष्यज्ज्ञातं ॥ शकुनिःसद्भाववा
त्वेनपुनर्विज्ञापयामासभोगुरोपूर्वमनेकधापरमसिद्धयस्त्वयाप्रकटितामयादृष्टास्तस्माद्भविष्यज्ज्ञा
नेतस्यास्तित्वनास्तीत्यत्रममविश्वासोनजायते ॥ ततोदीप्तिमतोक्तमेतद्रहस्यमतिस्पृष्टंतथापित्वं
भक्तइतिकृत्वावक्ष्यामिशृणु ॥ भविष्यज्ज्ञानमितरसिद्धयश्चतद्रूपेच्छयाममाधिकाःपरंत्वहंक्षण
मपिब्रह्माकारवृत्तिविच्छेदंकर्तुंनेच्छामीतिकृत्वावृत्तिंभविष्यज्ज्ञानाद्यभिमुखींनकरोमि ॥ यदिवृ
त्तिंस्वरूपव्यभिचारिणींकुर्यांतदाभविष्यज्ज्ञानादिकंसुलभमेव ॥ अनेनोत्तमालोकेस्वप्रभुताह

ष
७८
77
ध्यर्थं लोकहितस्वसन्मानार्थं च बह्वीः सिद्धीः प्रकटयंति ॥ यद्यहं ब्रह्मातिरिक्त इति निर्देशं कुर्यां तदास्वप्र
तिष्ठाद्यर्थं सिद्धीरपि प्रकटयेयं ॥ यद्यहं न ब्रह्मभिन्नस्तर्हि परमेश्वरैश्वर्यं सर्वं ममैव ॥ इतः परं का वा सिद्धिर
धिका स्याद्यदर्थं देहेंद्रियैर्ब्रह्मानंदाद्वियोगमंगीकुर्यां ॥ ततः शकुनिरेतच्छ्रुत्वा विगतसंदेहस्तच्चरणयोः पपा
त ॥ हे मधुपैवं दीक्षिमच्चरित्राणि बहूनि संति कियंत्यर्थं वर्णनीयानि ॥ किंतु तव बोधनार्थं यत्र यत्र शा
स्त्रविषये मम ये ये संशया जातास्तेषां समाधानं तेन यथा कृतं तथैतदारभ्य नवमरश्मिसमाप्तिपर्यंतं
समासेन यतिं किंचिद्वक्ष्यामि श्रृणु ॥ श्रीमद्भारतविवादसमये ममायमेकः संशयो जातः ॥ दुर्योधनेन
पांडवानामश्रेयः प्राप्त्यर्थं दुर्वासार्षिः प्रार्थितः सन्यां पांचाली भोजनोत्तरं शिष्यैः सह गत्वा धर्मराजमा
तिथ्यं ययाचे ॥ तत्समये द्रौपद्या सह पांडवा व्याकुलाः संतो भगवंतमनंतं ध्यात्वा प्रार्थयामासुः ॥
ज्ञानिनां संसारस्य मिथ्यात्वेन राज्यादेः स्वशरीरादेश्चापेक्षा नास्ति पांडवास्तु पामरा न भवंति किंतु ज्ञा
निन एवंभूताः संतोऽपि किमनुरोधेन र्षिशापान्मिथ्याभूतराज्यस्वशरीरादिनाशभीत्यैवं भगवत्प्रा
र्थनं चक्रुरिति ॥ एतन्मदीयसंशयं श्रुत्वा दीक्षिमानुवाच ॥ हे शिष्य पांडवैरेवमृषिशापाद्राज्यस्व
शरीरादिरक्षणार्थं भगवत्प्रार्थनं न कृतं किंतु धर्मसंरक्षणार्थं विधिपालनार्थं च ॥ आतिथ्यस्य वि
धिचोदितत्वेन तदकरणे धर्मलोपो भविष्यतीति तथा व्याकुला भगवत्प्रार्थनं चक्रुः ॥ ॥ आत्मारा
मउवाच ॥ भो गुरो भीष्मद्रोणप्रज्ञार्हा निर्दोषो धर्मब्रह्मवेत्तारस्तः ॥ यद्यपि पांडवानां दैवसंपद्वत्वे ७८

न भगवद्भक्तत्वेन च द्रव्यश्रियौ तथापि पांडवपक्षं परित्यज्य कथमास्त्वरासंपन्नौ भगवद्द्वेषिकौरवपक्षसंगी
भूत्यता हे शपांडवैः सार्कं युद्धं कृतवंतौ ॥ अत एव द्रोणवधानंतरं धनंजयेन धर्मराजं प्रत्यश्वत्थामा हत
इति मिथ्याभाषणं कृतत्वात्त्वयास्मद्गुरुर्मारित इति दूषणं दत्तं तत्र भीमसेनेन धनंजयवाक्यप्रत्याख्यानाय त
त्वमप्यत्र कौरवकृतद्रौपदीमानभंगादिकर्मोपेक्षयास्वधर्मं परित्यज्य युद्धं कृतवंताविति दूषणं दत्तं ॥ दीप्ति
मानुवाच ॥ ॥ हे शिष्य एतयोर्युद्धे प्रवृत्तौ निमित्तत्रयं तत्र धृतराष्ट्रस्य ज्येष्ठत्वाद्राज्याधिपत्यं तदाज्ञा
नुसारेणैतयोः प्रवृत्तिरुचिता ॥ यद्यपि पांडवा निर्दोषत्वेनैतत्प्रियास्तथापि धृतराष्ट्रपोष्यत्वेन राजानुम
तो धर्म इति न्यायेन तत्र पांडवपक्षं परित्यज्य दुर्योधनसहायेन युद्धकरणमित्येकं निमित्तं ॥ अथवा भीष्म
मरणमुद्दिश्यानेकधा तपश्चर्यादिकं कृत्वा शिखंडिरूपेणावतीर्णः तत्तपश्चर्यादेर्वैफल्यं मा भूदि
ति गांगेयस्य युद्धे प्रवृत्तिः ॥ एवं द्रोणवधार्थं द्रुपदेन तपो यज्ञादिना धृष्टद्युम्नः संपादितस्तस्य वैयर्थ्यं
मा भूदिति द्रोणस्य युद्धे प्रवृत्तिरिति द्वितीयं निमित्तं ॥ तयोः स्वाधीनमृत्युमत्वेन प्रपंचविषयकमिथ्या
त्वालयत्वेन मर्त्यदेहस्यावश्यत्याज्यत्वेन चेदानीं युद्धांगीकारे साक्षाद्भगवत्समक्षे मरणं वरमिति युद्ध
संगीकृतं ॥ यदि पांडवपक्षसंगीकृत्य युद्धकरणेपीदं संभवतीत्युच्यते तर्हि दुर्योधनपक्षे तन्मारका
भावेन मृत्युर्न स्यादिति पांडवपक्षं विहाय दुर्योधनपक्षे स्थित्वा युद्धं कृतवंताविति तृतीयं निमित्तं ॥ तस्मा
द्भीष्मद्रोणयोर्योयं दोष आशंकितः स न संगच्छते ॥ ॥ इत्यद्वैतादिव्यदक्षिणायने षष्टोर्कः आत्माराम

वे० १८

मधुपसंवादे दीप्तिमदुपाख्यानेन तत्त्वज्ञानवर्णनं नाम पंचमोऽध्यायः ॥५॥ आत्माराम उवाच ॥ भो गुरो ब्रह्मवि
दाप्नोति परमित्यादिश्रुत्या ब्रह्मज्ञानमपेक्षितं तपःसाधनाद्याचरणस्य किं प्रयोजनं ॥१॥ दीप्तिमानुवाच ॥
रे आत्माराम अयं मार्गो न सुकरः किंतु क्षुरस्य धारा निशिता दुरत्यया इति श्रुत्या असिधाराव्रततुल्यः ॥ वयं ज्ञा
निन इति वाङ्मात्रनिपुणा अत्र भवंत्याधुनिकज्ञानाभिमानिनस्तेषां संवादे दृष्टिमात्रं ॥ तत्त्वंपदा
र्थशोधनमंतरा तत्त्वज्ञानं न संभवति ॥ प्रथमं तत्त्वंशोधनमेव दुर्घटं ॥ शास्त्रेण तत्त्वंपदार्थशोधनरीति
रस्ति महावाक्यरहस्यनिर्णयोऽप्यस्ति तथापि तत्त्वंपदार्थशोधनमकृत्वा महावाक्याध्ययनमात्रेण वयं
ज्ञानसंपन्ना जाता इति मत्वा गर्विष्ठा भवंति ॥ शास्त्राध्ययनमात्रेणैव ज्ञानमाप्तं न [illegible] ज्ञानमित्यज्ञानं
तो वयं पंडिता इत्यधिकाः पूज्या इति विवादेन ये कालं यापयंति ते जननमरणप्रवाहावर्ते भ्रमंति ॥ अ
रे सर्वं ब्रह्म न तद्व्यतिरिक्तं न किमपीति कथनं सुलभं तन्निष्ठता स्वमते स्थितिश्च दुर्लभा । कामक्रोधा
दिवैरिणो यद्यपि साधारणा दृश्यंते तथापि समयं प्राप्य कस्मिंश्चिद्विषये यदा चित्तमपहरंति तदा तन्नि
ग्रहाचरणं कृत्वा मनोनिग्रहोऽतिदुर्घटः ॥ विभूतिरुद्राक्षादीनां गोपीचंदनजपमालादीनां दंडकमंड
ल्वादीनां धारणं धनुर्बाणखड्गादिशस्त्रधारणतुल्यं ॥ कोऽपि शस्त्रधारणमात्रेण शूरो न भवति किंतु
वैरिहननेनैव ॥ तद्वद्विभूतिजपमालादिधारणेन सिद्धो न भवति किंत्वनात्मसंघातजयेनैव ॥ अरे
जपमालाद्यायुधान्युच्चस्य जटादिपताकादीन्प्रसार्य जल्पसंवादादिभिर्यादिवादयित्वा कामक्रोधा १८

दिवैरिणं प्रतीतो यदा शूयं तिष्ठत तदाहं भवतः प्राणमन्ये ॥ अत्रेतिहासं वक्ष्यामि शृणु ॥ यदा विराटराजः कौ
कादिभिः सेनया च सह सुशर्माणं युद्धार्थं गतवांस्तदा कौरवसैन्यमागत्योत्तरगोग्रहणं कृतवदिति गोपा
लका आगत्य राजद्वारे कोलाहलं प्रति चक्रुः ॥ तच्छ्रुत्वा ततः पुरे राजपत्नी राजप्रभृतयः सर्वे युद्धार्थं गता अ
त्र युद्धार्हः कोऽपि नास्तीति चिंतयामास ॥ तत उत्तरेणोक्तम् अहमस्त्रशस्त्रादौ निपुणः सैन्यं विनापि युद्धे
शत्रुपराजयं कर्तुं समर्थोऽस्मि रथशस्त्रादिकं तु सिद्धं परं तु सारथिर्नास्ति यदि सारथिं स्यात्तर्हि क्षणमात्रे
णैव शत्रून्निर्जित्य सर्वगोभिः सह तदीयवस्त्राभरणादिकमानेष्यामि ॥ एतच्छ्रुत्वा सैरंध्र्योक्तं बृहन्न
लः सारथ्यं कर्तुं समर्थः ॥ राज्ञी तच्छ्रुत्वा स्मितोवाच ॥ संग्रामगमनसमये क्लीबदर्शनं नामश्रवणा
दिकमप्यवशकुनं मन्यंते कथं सार्थं तेन क्लीबेन सह गंतव्यं ॥ तस्मात्त्वयोपहासार्थमुक्तं स्यात् ॥ तत उत्तर
कुमार्योक्तं सैरंध्र्या यदुक्तं तत्सत्यमेव वेषतः क्लीबत्वेऽपि शूरश्चिन्हदर्शनात्स सारथ्यार्हो भवतीति भाति
तदा राज्ञी तद्वाक्यं विश्वस्य बृहन्नलेन सहोत्तरं युद्धाय प्रेषयामास ॥ स यदा नगराद्बहिर्गतवांस्तदा बृह
त्सैन्यसंघट्टेन धूलीपटले इंद्रधनुराकारं देदीप्यमानं दुर्योधनपताकं दृष्ट्वा शूराणां शंखगर्जनं भेरीप
टहादिध्वनिं च श्रुत्वा भीरुः सन् बृहन्नलमुवाच हे सारथे पुरस्तु मेघाडंबरो महान् दृश्यते ॥ तस्माद्रथं प
श्चाद्व्यावर्तय ॥ ततो बृहन्नलेनोक्तं नायं मेघाडंबरः किंतु कौरवसैन्यधूलीपटलः ॥ तच्च देदीप्यमानं
वस्तु न विद्युत् किंतु दुर्योधनपताकं श्रूयमाणाः शब्दा न मेघशब्दाः किंतु वीराणां गर्जनं भेर्यादिशब्दाः ॥ अ

घ ७६ 79 तच्छ्रुत्वा नरेण तं सैन्यं स्वल्पमित्यहमागतोस्मीदं तु महत्सैन्यमत्र भीष्मद्रोणप्रमुखयोर्महारथिकावर्तंते
ऽतैः सार्धं ममैकस्य युद्धं कथं संभवत्यतः पलायनमेव वरमर्थं निवर्तय॥ ततो वृहन्नलेन त्वात्र धर्म उपदिष्ट
स्तच्छ्रुत्वा देहजीवप्राणत्यागः स्वलमोन भवति भवतः किं गच्छतिमत्सा ऽऽणोपर्यायासपतीत्युत्तार रथा
दाप्लुत्य पलायितः॥ ततो धनंजयोऽपि रथादाप्लुत्य बलात्कारेण तमानीय रथे स्थापयित्वा स्वयं यथा युद्धं
कृतवांस्तत्सर्वं भारते प्रसिद्धं॥ हे आत्माराम एवं प्रकारेण स्त्रीगणे स्थित्वा बल्लानमात्मज्ञाद्यनं च स्वलभं
शत्रूणां संमुखे स्थित्वा युद्धकरणं दुर्घटं॥ ये शूरास्ते न वलांते किं तु कार्यं ज्ञात्वा दर्शयंति धनंजयवत्स्वस्वरू प
मन्यवेषआच्छादयंति॥ तद्वदनात्मसंज्ञजयो दुर्घटः॥ अहं ब्रह्मेति वाङ्मात्रेणार्थसिद्धिर्न भवति॥ यदे
वांते विषयप्राप्तावनेकजन्मार्जितसंचितानुसारेण तज्ज्ञानार्थं चित्तं चंचलं भवति तदा तद्विषयान्मनो नि
वर्त्य स्वरूपानुसंधाने ये योजयंति ते शूरास्त एव ज्ञानिनः॥ तस्मात्तपः साधनादिद्वारा जडतादात्म्यग्रं
थिविच्छेदनं विनाऽध्ययनमात्रेण ब्रह्मज्ञानसिद्धिर्न भवति॥ इत्यद्वैतादित्यदक्षिणायने षष्ठार्के आत्मा
राममधुपसंवादे दीप्तिमदुपाख्याने दीप्तिमदात्मारामसंवादवर्णनं नाम षष्ठो रश्मिः॥६॥ आत्माराम उवा
च॥ भो गुरो ऽयः पिंडे ऽग्नेरध्यासं मन्यंते॥ अत्राग्निसंयोगं विनाऽयः पिंडे दाहो न जायते तस्मादयसि संयो
गेनाग्निरेवास्तीति मंतव्यं न त्वग्नेरध्यासः॥ दीप्तिमानुवाच॥ हे शिशोऽतस्मिंस्तद्बुद्धिरित्यध्यासल
क्षणं॥ अयमध्यासो बहुप्रकारः सत्पुरुषैस्तस्य सप्तविधत्वमंगीकृतं क्रमेण तच्छृणु॥ शुक्तौ रज ७६

३४

तभानं रज्जौ सर्पभानं वा ॥ शुक्तौ रजतं न भवति न च चाकचक्यरूपसाधारणधर्मेण दोषेण वा साधारणधर्मे
णा वा धर्मिणो रजतस्य सर्पस्य वा ऽध्यास इति प्रथमप्रकारः ॥ आकाशस्य निराकारत्वेन नीरूपत्वेन च वस्तु
तः कटाहाकारत्वं नीलरूपवत्त्वं च नास्ति किंतु तद्व्यवच्छेदकदेशस्य दूरत्वेन कटाहत्वं गंभीरत्वेन नील
त्वं चाध्यस्यते ॥ अथवा मरुभूमौ यज्जलमध्यस्यते तन्मरीचिकासंयोगेवेति द्वितीयः प्रकारः ॥ यावद
धिष्ठानाज्ञानं तावद्रजतसर्पयोर्भानमधिष्ठानज्ञाने तु तन्निवृत्तिः ॥ द्वितीयप्रकारे त्वधिष्ठानतत्त्वज्ञाने
ऽपि कटाहत्वं नीलत्वं च भासत एव ॥ अथवा ऽधिष्ठानभूतमरुमरीचिकाज्ञाने ऽपि जलं भासते परं त्वधि
ष्ठानज्ञानिनः कटाहत्वनीलत्वमृगजलानां मिथ्यात्वज्ञानिनः सत्यत्वेन च भानमिति ॥ अथ तृतीयः
मृगमदपूर्वसंबंधेन वस्त्रादौ मृगमदाध्यासो ज्ञायते पूर्वोक्ताध्यासापेक्षया विलक्षणः ॥ पूर्वोक्तप्रका
रे शुक्तिनिष्ठचाकचक्यं रजताध्यासनिमित्तमत्र तु गंधो वस्त्रादिधर्मो न भवति किंतु मृगमदस्यैव धर्मः
परं त्वयमध्यासः कैश्चिदाचार्यैर्नांगीक्रियते ॥ अत्राध्यासासंभवे न तत्सं[illegible] युक्तानुरूपमृगम
दस्यैव गंधो भातीत्युच्यते ॥ अतस्तत्परित्यज्य कस्तूरीमृगः स्वनाभिगतगंधमितरपदार्थगतत्वेनाध्य
स्यतन्नाभार्थं वने इतस्ततो भ्रमतीति ॥ अथ चतुर्थः प्रकारः जपापुष्पसामीप्यात्स्फटिके रक्तरूपं न
[illegible]द्यां नौकागमनेन तीरस्थवृक्षगमनमभ्रखंडधावनेन चंद्रबिंबधावनं चाध्यस्यते ॥ रक्तत्वं गमनं धाव
नं च स्फटिकवृक्षचंद्रधर्मा न भवंति किंतु जपानौकाभ्रखंडानां धर्माः ॥ पूर्वप्रकारापेक्षया वैलक्ष

+४ प्रथमद्वितीययोरेषभेदः

५० एवमेवं ॥ तत्रोपाधिसान्निध्येनास्तु उपाधिधर्माधिष्ठानधर्मयोः साम्यादधिष्ठाने उपाधेरध्यासः ॥ अत्र तदुपा
८० धिसान्निध्येनेति ॥ अथ पंचमः ॥ शंखे पीतरूपाध्यासश्चक्षुर्दोषेण ॥ पूर्वोक्तस्थलेष्वधिष्ठानाज्ञानं कारणमत्र
80 तु चक्षुर्दोष एव कारणं न त्विदं निपर्यंतं तथैव भातीति वैलक्षण्यं ॥ अथ षष्ठः ॥ दर्पणे योऽयं प्रतिबिंबस्तत्ता
नी स्वप्रतिबिंब इति मन्यतेऽन्ये तानी तु स्वापेक्षया भिन्न इति मन्यते ॥ यथा बालको दर्पणे स्वप्रतिबिंबं दृष्ट्वा
तं स्पृष्ट्वा क्रीडितुं च धावति यथा वाश्वादिः प्रतिबिंबं दृष्ट्वा कलहार्थं धावति भुंक्ते ति च ॥ यथा वा लोके प्राक्
तश्शुकशारिकानां पंजराग्रे दर्पणं संस्थाप्य स्व[illegible]यं दर्पणस्य पश्चाद्भागे स्थित्वा शुकं पाठयति तं पाठं दर्पण
स्थशुकादिमुखनिःसृतं मत्वा स्वयमपि पठति पूर्वोक्तगगनतलमलिनाध्यासापेक्षयामरमरीचिकाज
५८ लाध्यासापेक्षया च वैलक्षण्यमेवं ॥ तत्र गगनाद्यधिष्ठाने इतरवस्तुधर्माध्यासः ॥ अत्र तद्धर्माध्यासो ना
स्ति स्वस्मिन्स्वभिन्नाध्यासो धर्म्यध्यास इति ॥ अथ सप्तमः ॥ अयःपिंडेऽग्निसंसर्गादग्नेरध्यासः ॥ यद्ययः
पिंडोऽग्निः स्यात्तर्हि तत्रायस्त्वं न स्यात् ॥ अतोऽयःपिंडेऽग्नेराभासमात्रमिति मंतव्यं ॥ प्रतिबिंबाध्यासा
द्यपेक्षया वैलक्षण्यमेवं ॥ पूर्वोक्तप्रकारेषु कुत्रचिद्धर्माध्यासः कुत्रचिद्धर्म्यध्यासः ॥ अत्र तु प्रकार
भेदेनोभयाध्यासोऽपि संभवति ॥ अयमग्निरिति धर्म्यध्यासोऽयो दहतीति धर्माध्यासः ॥ अथ च आ
भासो न प्रतिबिंबः किं तु तेजोविशेषः यथा सूर्यातपयोगेनार्द्रं शुष्यति तत्प्रतिबिंबेन तु न शुष्यति
तथाग्निसमीपस्थवस्तु शुष्यति प्रतिबिंबसंयुक्तं तु न शुष्यति ॥ तस्मादयस्यग्न्याभासस्तत्वेन दाहकत्वमि ८०

ति॥॥इत्यद्वैतादित्येदक्षिणायनेषष्ठार्केआत्माराममधुपसंवादेदीप्तिमदुपाख्यानेदीप्तिमदात्मारामसंवादेऽध्या
सप्रकारनिरूपणंनामसप्तमोरश्मिः॥७॥दीप्तिमानुवाच॥हेशिशोतदुभयप्रकारभेदमप्युपमेयेयोजया
मिश्रृणु॥तत्राग्नेःसंसर्गात्तप्तंदृष्ट्वाचायःपिंडमयमग्निरितिमन्यतेतद्वत्तानादेव॥किंचायसपिंडोऽग्नि
दृश्यतेसोऽग्निर्नभवतिकिंत्वग्नेराभासस्तस्मात्काष्ठादीनितरान्पदार्थान्सभस्मीकरोतिपरंत्वयोभ
स्मीकर्तुंनशक्नोति॥यद्ययःपिंडःकंचित्कालंजंबूफलरसेपरिप्लुतोभवतितदातदंतर्वर्त्यग्न्यंशोयोऽ
यस्तादात्म्यादप्रबुद्धोभूत्तजंबूरसगुणप्रभावेणप्राबल्यतामग्निसंसर्गेणचप्रबुद्धोभूत्वाऽयोभस्मीकरोति॥
तथोपमेयेऽयःपिंडस्थानापन्नोलिंगदेहस्तस्यसारांशभूताबुद्धिर्यदिचिच्छायायासंयुक्तासाबुद्धिर्जंबू
फलरससदृशभगवल्लावण्यध्यानेनपरिसिक्ताभूत्वाशमदमादितपोरूपाग्नेसंतप्ताभवतितदातदंत
र्व्यापीसाक्षीभ्रांतिजन्यतादात्म्याद्विमुक्तःस्वमहिम्निप्रबुद्धःसन्नयस्थानापन्नंलिंगदेहंभस्मसात्करोती
तिधर्म्यध्यासनिवृत्तिः॥अथधर्माध्यासस्योपमेयेयोजनं॥यावदग्न्ययसोर्विवेकोनास्तितावदयोदहती
तिव्यवहारोजायतेतद्विवेकेतुसोऽध्यासोनिवर्त्तते॥तथोपमेयेयावच्चिज्जडविवेकोनास्तितावदहंस्थू
लोऽहंबधिरोऽहंहाशट्न्यादिव्यवहारोजायतेतद्विवेकेत्वतादृशोऽध्यासोनिवर्त्तते॥हेशिशोयथाऽयः
पिंडदृष्टांतेनाऽत्मनीदमुपलक्ष्यंतथापूर्वोक्ताध्यासदृष्टांतषट्केनाप्यधिष्ठानरूपंप्रकाशस्तत्त्वत्तेरूप
लभ्यते॥तत्कथमित्युच्यते॥ ॥अथप्रथमप्रकारस्यनिर्णयः॥हेशिशोमुक्तेश्चाकंचकारूपोधर्मोय

घ
८१
81

द्रागज्ञानसंबंधित्वेनभासेततद्राग्ज्ञानमेवेदमितिप्रतीतिर्जायते॥ यदावाऽधिष्ठानात्तानानाशेनसम्युक्तिसंबंधि
त्वेनभातितदा धिष्ठाननिष्ठधर्मोऽधिष्ठानरूपोभासते॥ तथोपमेयेसाक्षिधर्माः सच्चिदानंदाखण्डत्वादेनदे
हेंद्रियांतःकरणसंबंधित्वेनघटपटादिसंबंधित्वेनचभासंते॥ तदादेहेंद्रियादिरूपाएवभांति॥ यदावानद
ज्ञाननाशेनतत्संबंधित्वेनभांतितदासाक्षिरूपाएवभासंते॥ अथद्वितीयः॥ यथाकाशेमरुमरीचिकायां
चवकदाहत्वनलमालिन्येमृगजलंचाविद्यमानमपिविद्यमानवद्भातितथाब्रह्मण्येवविद्यमानोऽपिप्रपंचोऽब्र
ह्मानेताद्भुतशक्त्याविद्यमानइवभाति॥ परंतुतज्ज्ञानमत्तानिनांसत्यत्वेनज्ञानिनांतुमिथ्यात्वेन॥ अथतृ
तीयः॥ एतस्मिन्प्रकारेपक्षद्वयं॥ अत्रपूर्वाचार्यैरध्यासोनमन्यते॥ वस्त्रपात्रादौमृगमदगंधोयोऽनुभूयते
सोऽएतद्रूपेणतत्रविद्यमानमृगमदस्यैवगुणइत्युच्यते तत्रवस्त्रादौमृगमदस्यादृष्टत्वेनगंधस्याध्यासइ
तितत्राध्याससाधनेयुक्तिरप्युच्यते॥ भवद्भिर्वस्त्रादौगंधविशिष्टमृगमदाणूनांस्थितिरुक्तासातुभवति
रुद्धालोकेकुत्रचिद्वायुप्रदेशेपलमात्रंमृगमदंस्थापयित्वादिनचतुष्टयानंतरंतन्मृगमदेगंधोनानु
भूयतेतौल्येचपूर्ववत्पलमात्रमेवतिष्ठतियदिगंधविशिष्टाणूनांनिर्गमःस्यात्तर्हितौल्येन्यूनतास्यात्त
स्माद्गंधस्याध्यासएवेति॥ अत्रपुनर्वादिभिरुच्यतेपृथिव्याद्यणूनांचियांविशिष्टाणूनांनिःसरणंतं विशिष्टत्वेनयथागंधइ
थाऽप्यवंतरेणमपिमेलनेनतौल्येन्यूनतानजायते॥ यदिगंधविशिष्टाणवोगच्छंतितिनिर्गंधाएवस्या
योतीत्यत्रकिंनियामकमितिपृच्छेत्तत्रभगवल्लीलेवनियामिका॥ नचेदंकथंवेनेतिवक्तुंनशक्यतइ

ति ॥ हे आत्माराम विचार्यमाणे पूर्वाचार्याणां मतमनुभवपूर्वकशास्त्रानुसारकथनेन समीचीनतया भाति
वादिनां मतं तु युक्तियुक्तत्वेऽपि शास्त्रविरुद्धत्वेन संशयार्हं ॥ शास्त्रसिद्धांतस्त्वेवं ॥ गंधादयो गुणाः स्वाश्रय
द्रव्यं परित्यज्यान्यत्र गंतुं स्थातुं वा न शक्नुवंति यदि कदाचिदन्यत्र भासेरंस्तर्हि तत्र तेषामारोप एव ॥ तस्मादध्या
ध्यासो न संभवतीति तद्रूपे त्वयकस्तूरीमृगः स्वनाभिगतगंधेऽन्यदीयत्वमध्यस्य भ्रमतीत्युदाहृतं ॥ दार्ष्टांति
केन योजनमेवं ॥ यो वेद निहितं गुहायामित्यादिश्रुत्या स्वदहराकाशस्थं स्वरूपं चैतन्यमज्ञात्वा गिरिगव्हरा
दौ मृगत्वाद्भ्रमंति ॥ सद्गुरुकटाक्षेण तेषां यदाहं ब्रह्मेति ज्ञानं जायते तदेतादृशाध्यासनिवृत्तिरपि जायत इति
॥ इत्यद्वैतादित्यदर्शिणायने षष्ठार्के आत्माराममधुपसंवादे दीप्तिमद्रूपाख्याने दार्ष्टांतिकेऽध्यासयोजनं नामाष्ट ति७
मो रश्मिः ॥८॥ ॥ आत्माराम उवाच ॥ ॥ भो गुरो मम मद्रूपाचार्येण नानाध्यासा यद्यपि पूर्वाचार्यैर्नांगीकृतस्त
थापि यैरंगीकृतस्तेषां मतानुसारेण दार्ष्टांतिके योजनप्रकारो वक्तव्यः ॥ दीप्तिमानुवाच ॥ ॥ हे शिष्य तेषां मते
त्वेतत्प्रकारस्य पक्षद्वयं आद्यः पात्रमधिष्ठानं कस्तूर्युपाधिर्गंधस्तद्धर्मः ॥ पात्रस्थानापन्ने आत्मनि गंधस्था नाप५
न्नांतःकरणादिधर्मभानेन कस्तूरीस्थानापन्नप्रधानस्यास्तित्वस्यात्तानिनः प्रतीतिर्जायते ॥ प्रधानं तु शशशृ
ङ्गवदवस्तु ततोऽवस्तुनः प्रतीतिर्मिथ्यैव ॥ द्वितीयः ॥ कस्तूर्यधिष्ठानं गंधस्तद्धर्मः पात्रमुपाधिः पात्रस्थानापन्न
घटपटादौ कस्तूरीस्थानापन्नस्य ब्रह्मणः सच्चिदानंदधर्माः पात्रस्थानापन्नघटपटादेर्धर्मा एव भासंते स
च्चिदानंदाः घटपटादेर्धर्माः कथं भवंतीति तस्मादिदं भानमप्यन्यथैव ॥ अथ चतुर्थः ॥ नौकास्थानीयं शरी

घ
८२
84

रं वृक्षस्थानीय आत्मा चंद्रस्थानीय आत्माऽभ्रस्थानीयं शरीरं वा ॥ अशनपानादि शरीरधर्माः काणत्वमूकत्वादी
न्द्रियधर्माः सुखदुःखाद्यंतःकरणधर्मा आत्मन्यारोप्यंते ॥ अज्ञानिन एत आत्मधर्मा इति मत्वाऽहं सुख्यहं दुः
खीत्याद्यभिमन्यंते ॥ ज्ञानिनस्त्वेते नात्मधर्माः किंत्वनात्मधर्मा इति मत्वा न गृह्णंति ॥ स्फटिके लौहित्याध्यास
स्थलमप्येतत्सदृशमेव तथापि तत्र किंचिद्विलक्षणमस्तीति पृथग्दृष्टांतः ॥ स्फटिकवदात्मनो येन पदार्थेन संगो
भवति तदा तत्तद्रूपो भवति ॥ साक्षीत्वनादित्वतः स्वरूपाविच्छेदेन ॥ यावत्स्वस्वरूपज्ञानेन सा न निवर्त्तते तावत्त
स्य स्वसंगिधर्मांगीकारस्वभावोऽपि न निवर्त्तते ॥ अत एव श्रीभगवतोक्तमसंगशस्त्रेण दृढेन छित्त्वेत्यादि ॥
अथ पंचमः ॥ चक्षुर्दोषेण पीतशंखवद्बुद्धिचक्षुषो विपरीतभावनारूपदोषेण निर्विकार्यात्मा सविकारो भा
सते ॥ यावत्सद्गुरुवैद्यप्रसादौषधेन तद्दोषो न निवर्त्तते ॥ तावदात्मनः स्वरूपानुभवो न जायते अथ षष्ठः
दर्पणप्रतिबिंबन्यायेनाज्ञानी चित्प्रतिबिंबरूपव्यावहारिकोऽहमिति मत्वा संसारव्यवहारेषु लिप्तो भवति
यदा सद्गुरुप्रसादेन स्वस्वरूपानुभवो भवति तदा साक्षिरूपः सञ्जीवभावं विहाय संसारव्यवहारेऽसंग
स्तिष्ठति बालकः स्वच्छायां पिशाच इति मत्वा भीरुर्भवति सोऽध्यासोऽप्येतादृशो ज्ञेयः लोके शुकग्रह
णार्थं व्याधो वृक्षशाखांतरे नलिकायंत्रं बध्वा तत्रामिषं स्थापयति शुकस्तद्ग्रहणार्थमागत्य नलिकोपरि
तिष्ठन्नलिकाभ्रमणेन स्वयमधोमुखो भूत्वा नलिकात्यागेऽधः पतिष्यामीति भ्रांत्या तामपरित्यज्य व्याधव
शो भवति तद्वदयमज्ञानी जीवः संसारत्यागेन स्वहानिं मत्वा न च बद्धः सन् दुःखी भवति यथा वा ८२

नरोपजीवी व्याधो वानरग्रहणार्थं पाषाणेन लघुमुखं दृढं बिलं कृत्वा तत्र चणकादिकं स्थापयति ॥ त
तो वानर आगत्य तद्ग्रहणार्थं तत्र हस्तं निक्षिप्य चणकान्मुष्टिमात्रं गृहीत्वा पुनर्हस्ताकर्षणे मुष्टिप्रतिबंधो
जायते च [illegible] का लोभान्मुष्टिं न त्यजति ॥ एतस्मिन्नंतरे व्याध आगत्य गृहीत्वा तत्र ताडनादिपूर्वकं नृ
त्यादिचेष्टां शिक्षयित्वा तं प्रतिगृहं भ्रामयन्नर्त्तयति ॥ तथायमज्ञानी लोभाद्ज्ञानतत्त्वसंसारमपरित्य
ज्य लोकप्रसादसंपादनार्थं प्रतिगृहं गत्वाऽकर्त्तव्यचेष्टामपि कृत्वा दुःखी भवति ॥ आत्मारामउवाच ॥
हे मधुपे तन्त्सर्वमध्यासनिरूपणं श्रुत्वाहमेव ज्ञानेन सर्वाज्ञाननिवृत्तो संदिग्धः सन्गुरुं पृष्टवानस्मि तेन
समाधानमप्युक्तं तत्संवादं वदामि शृणु ॥ आत्मारामउवाच ॥ भो गुरो ब्रह्मसाक्षात्कारेण सर्वाज्ञाननिवृत्ति
र्भवतीत्युक्तं तन्न संगच्छते ॥ यद्विषयकं ज्ञानं जायते तद्विषयकमेवाज्ञानं निवर्त्तत इति नियमेन ब्रह्मज्ञा
नेन ब्रह्मावरकमूलाज्ञानस्य नाशसंभवेऽपि तूलाज्ञानानां निवृत्त्यसंभवेन सर्वाज्ञाननाशासंभवात् ॥
दीप्तिमानुवाच ॥ यथेदंमंशभूतसामान्याश्रितो विशेषभूतघटत्वाद्याकार इति सामान्यज्ञानाधीनं वि
शेषज्ञानं तद्विषयीभूतसामान्याधिष्ठानवं तथा सामान्यरूपनिर्विशेषचैतन्यावरकं मूलाज्ञानं तद
धीनं तदाश्रितं घटत्वादिविशेषाज्ञानं ॥ अत एव निर्विशेषचैतन्याज्ञानं मूलाज्ञानं घटत्वादिविशेषाज्ञा
नं तूलाज्ञानं तदवस्थाविशेष इति गीयते ॥ अतो निर्विशेषचैतन्यविषयकाचरमसाक्षात्कारे साक्षात्
द्विरोधिनो मूलाज्ञानस्य निवृत्तौ तदधीनानां तदाश्रितानां विशेषाज्ञानानामाश्रयाभावेन स्थित्यसंभ

ष
८३
83

वेन निहतेन निर्जीयत इत्युपपद्यते ॥ ॥ इत्यद्वैतादित्ये दक्षिणायने षष्ठार्के आत्माराममधुपसंवादे दीप्तिमदुपा
ख्याने ध्यासानां दार्ढ्योतिकेयोजनं नाम नवमो रश्मिः ॥ ९ ॥ दीप्तिमदुपाख्यानांतर्गतचारमुखसमा
चारवर्णनं ॥ ॥ ॥ आत्माराम उवाच ॥ हे मधुप चारमुखस्तु पारंपर्येण सद्युम्नशिष्यः ॥ यदा सद्युम्नः
सं+ संसाराद्विरक्तः सन्सर्वान्स्वशिष्यानाहूय भो शिष्या मम माद्यापि सिद्धिर्न जाताऽतः कस्यचित्सद्गुरोः शर
णं गंतुमिच्छामीत्युक्तवान् ॥ तदा चारमुखेणोक्तं भवानेव सर्वगुरुरतस्त्वं वयं गुर्वपेक्षा किमर्थेति ॥
ततस्तेनोक्तं मदीयावस्था मयैव ज्ञायते त्वया तु न ज्ञायते ॥ चारमुखस्त्वेतच्छ्रुत्वा रुष्टः संस्ततो निर्गतः
तदनंतरं सद्युम्नः पतिराजशरणं गत्वा तत्प्रसादेन सर्वसिद्धीः प्राप्य तद्वत्तया स्वस्थानमागत्य स्व
पितृगुरुपदवीमध्यतिष्ठत् तथापि चारमुखस्तन्नि[damaged]कटं नागतवान् ॥ कदाचिच्चारमुखो विनो
दार्थं विंध्याचलं गतवान् ॥ तत्र दीप्तिमान्स्वाश्रमनिकटे तस्थौ तं दृष्ट्वा चारमुखो नमस्कारं न कृत्वा तत्स
मीपमपि न गतवान् ॥ गर्ववशेन तं दृष्ट्वाऽप्यदृष्ट्वेवानतशिराः सन्नन्यत्र गतवान् ॥ तत्रैकः प्रेयनोऽ
स्थितः ४ भ्रहितः सन्नागच्छन् तं चारमुखं दृष्ट्वा तद्भक्षणार्थमभिमुखं ययौ ॥ चारमुखोऽपि समीपमागच्छंतं तं दृष्ट्वा
पश्चात् दुद्राव ॥ परं तु भयेन गंतुमशक्तः सन्व्याकुलो बभूव ॥ ततो निराशः सन्स्वहृदये दीप्तिमतः शर
णं गत्वा प्रार्थनं कृतवान् ॥ भो सद्गुरो दयानिधे यद्यप्यहमधमः पापी गर्ववशेन भवन्माहात्म्यमज्ञात्वा
त्वद्विमुखो जातस्तथापि त्वं करुणानिधिस्त्वं न शरणागतपालनात्मकसत्यप्रतिज्ञावत्त्वेन च मत्कृतापराधं

विस्मृत्य शेषेन रूपमन्त्योर्मारस्त ॥ ततो दीप्तिमानुग्रचरत्नपाषेयं दर्शनं तदवलोकनमात्रेण शेषेन ः स्तब्धो जातः ॥ ततस्
श्चारुमुखस्त्वरया गत्वा दीप्तिमच्चरणयोः पपात ॥ शेषेणोऽपि चकितो ऽयं दीप्तिमन्परमसिद्धोयस्यदृष्टिमात्रेण
हं स्तब्धो जात इति तन्महात्म्यं ज्ञात्वा तच्छरणं ययौ ॥ ततो दीप्तिमांस्तमुवाच नर्मदादक्षिणतटे दुष्टरवेगाबह
वः संत्यक्त स्तत्र गत्वा स्थानत्वं तत्र भक्तयाभोज्यादिकं यथेच्छं प्राप्स्यसीति ॥ स तथा चकार ॥ पुनश्चारुमुख
मेरेसंदमते गुरवि मुखानां कल्याणं कथं भवेदित्युक्तवान् ततश्चारुमुखो लज्जितः सन्नद्यप्यहमत्यंताप
राधी तथापि मदीयापराधं विस्मृत्य ममात्मोपदेशं कुर्विति पुनस्तच्चरणयोः पपात ॥ दीप्तिमतोक्तं कठिनेव
स्तु नियमाश्रयेण प्रविशति तथा न वहृदयस्य मौर्ख्यकाठिन्येनोपदेशप्रवेशो न प्रवेक्ष्यत्यतः सत्सहवासेन तत
पः साधनादिना च यदा तव हृदयं मृदु भवेत्तदा त्वमुपदेशार्हो भविष्यसीति ॥ चारुमुखस्तच्छ्रुत्वोवाच
भो गुरो यदाज्ञापयसि तत्तथा करिष्यामि परंतु ममेदानीं संसाद्वैराग्यं जातमतो यदुपदेशस्तन्ममवि ते
त्वचिंतं भवेदित्युपदेशं याचे ॥ ततो दीप्तिमांश्चारुमुखं स्वद्युम्नशरणं गत्वा तत्संप्रदायानुसारेण तपः सा
धनादिकं करिष्यामीति शपथं कारयित्वा तं यथोपदिदेश तद्वदामि शृणु ॥ दीप्तिमानुवाच ॥ हे चारुमुख
प्रकृतिपुरुषावनादिसिद्धौ तत्र पुरुषो भेदरहितः सर्वव्यापी च प्रकृतिस्तु स्थूलसूक्ष्मावस्थाभेदेन द्वि
विधा ॥ एतद्भेदद्वयरूपेण सापि सर्वव्यापिका ॥ अतः सर्वप्राणिषु प्रत्येकं प्रकारत्रयं स्थूलं सूक्ष्मं चेतनं चेत
न त्र स्थूलं मलिनात्मकं सूक्ष्मं स्वच्छस्वभावं चेतनं तु शुद्धं निर्विकारस्वरूपं ॥ यदाऽस्त्वन्यन्यभावश्चा

पृ० ८४
84

रोप्येतेनतदासविकारइवभासतेतेनतद्भावेनस्फटिकवच्छुद्धोनिर्विकारश्च ॥ सूक्ष्मदेहेसारांशोबुद्धिरात्माना
सर्गाद्बुद्ध्यासंसृष्टः ॥ सकलपदार्थानांज्ञानेनतद्ग्रहणत्यागादिव्यवहारेचबुद्धिःकारणं ॥ यदात्मनोग्रहणंदा
नंश्रवणंवदनंवाबुद्धिद्वारैवनोचेत्तद्ग्रहणदानादिव्यवहारातीतः ॥ आत्मास्फटिकवत्स्वच्छत्वेनयद्यत्पदा
र्थाभिमुखस्तत्तत्संगीवभवतितदांतत्तत्पदार्थतादात्म्येनतत्तद्रूपोभवति ॥ यदाकंजेनसाकंतस्यबुद्धिर्लिप्ता
भवतितदाकंजरूपेणशोभमानंसद्भ्रमरादीनांमोहकंभवति ॥ यदातुभ्रमरेणसाकंलिप्ताभवतितदा
हंभ्रमरइतिमत्वाकंजेप्रीत्यागुंजायमानोभवति ॥ लिंगदेहसंगेनलिंगदेहोहमितिमत्वासुखदुःखादी
न्मनोधर्मान्स्वस्मिन्नारोप्येहलोकपरलोकयोर्भ्रमतिस्थूलदेहतादात्म्येनचपीनत्वकृशत्वादीन्स्थूलध
र्मानात्मन्यारोप्यव्यवहारेभ्रमति ॥ अनादितउभयदेहधर्माभ्यासेनोभयदेहतादात्म्यापन्नोजातः ॥ यथा
रेचारुमुखदेहद्वयधर्माभ्यासेनदेहद्वयात्मकोऽसितथानाहंदेहोद्वयस्यैवाहमितिमत्वाऽसंगत्वादिव्र
तलक्षणाभ्यासेसंयुक्तोभव ॥ स्वरूपलक्षणंस्वेष्टंकृत्वाऽहारविहारशयनादौसर्वदातन्निदिध्यास
नपरोभव ॥ क्षणमात्रमप्येतदभ्यासाद्विरमसिचेत्तदापुनर्मनोविषयासक्तंभवति ॥ यथादेहधर्माभ्या
सेनदेहरूपोसितथायःसर्वोत्कृष्टःसर्वसौंदर्यपारावारःसर्वव्यापीयस्यभासासर्वंभातियस्यप्रतिबिं
बग्रहणेसर्वभूतानिदर्पणानि ॥ लोकेयेयेकांतिमंतस्तेषांकांतिर्यत्प्रतिबिंबभूतायेज्ञानवंतस्तेषांज्ञा
नमपियज्ज्ञानमात्रावच्छेदकंतद्भजनेननमिथ्याहंत्वंविस्मृत्यतद्रूपोभविष्यसि ॥ तद्भजनंकीदृशंय

दात्वं तद्गुरुस्वस्वन्वेषणं वा रोषितद्वान[illegible]व निजस्वरूपोपलब्धिर्भविष्यति यदा वा स्वस्वरूपान्वेषणं वा-
रोषितद्वानवतद्गुरुस्योपलब्धिर्भविष्यति ॥ एवं प्रकारेणानन्यभावेन तन्मयो भवेति ॥ आत्मारामउवाच ॥ ॥
चारुसुव एवमुपदिष्टः सन्निः संदेहो जातः ॥ ततो द्वीप्निमानेनं तु सुद्युम्नं निवाटे प्रेषितवान् ॥ चारुसुवो ऽ
पि कियत्कालेन तपः साधनादिद्वारा सुद्युम्नप्रसादेन स्वरूपसिद्धिं प्राप्तवान् ॥ हे मधुप चारुसुवस्यास्म
त्वात्तोपकारित्वेन तत्समाचारो वर्णितः इतः परं यच्छ्रोतुमिच्छसि तत्पृष्टव्यं ॥ ॥ ॥ मधुपउवाच ॥ ॥ ॥ भो
प्रभो त्वया श्रीहरिहरस्वरूपनिर्णयं विभूतितत्वं च वक्ष्यामीति यत्प्रतिज्ञातं तत्कद ॥ ॥ ॥ इत्यद्वैतादित्योद
क्षिणायने षष्ठार्के आत्मारामममधुपसंवादे द्वीप्निमाद्गुपाख्यानांतर्गतचारुसुवसमाचारवर्णनं नाम दशमो

रश्मिः ॥१०॥ इति षष्ठार्कोदक्षिणायनसंज्ञिकप्र

र्वाधश्च समाप्तः ॥ ॥ शुभमस्तु

॥ ॥ ॥

॥

८५
85

८५

स० ८६
86
ॐ श्रीगुरुभ्यो नमः ॥ ॥ अथोत्तरायणप्रारंभः ॥ ॥ आत्मारामउवाच ॥ ॥ एकस्मिन्समये विंध्याचले साधुसमागा
मोऽभूत् तत्र मम गुरुर्द्वौ त्रिमानत्वरहस्ये स्थितवान् ॥ देवगिरिवासी सुव्रतनामा सारसः श्रीशैलवासी मित्रवन्नामाश्ये
नो मैनाकगिरिवासी भद्रकाङ्क्षो भारद्वाजः सह्यगिरिवासी चारुमुखोभिधः कपोतकूटप्रस्थवासी सत्यसं
धनामकः कलहंसो नीलाचलवासी सात्त्विकाख्यश्चातकः इंद्रनीलगिरिवासी नीलकंठाह्वयः क्षीरपक्षी कू
टगिरिवासी सोमपनामा चकोरो मंगलप्रस्थवासी वीतमन्युनामा गृध्रश्चैते सर्वे खगशिरोमणयः स्वरूपसो
रभेनतत्पराः संतः सत्कालक्षेपार्थं परस्परं वेदांतविचारं चक्रुः ॥ द्वौत्रिमांसस्तु साक्षीवतेषां विचारं शृण्वन्स्थितः
॥ तत्र देवगिरिवासी सुव्रतः सत्संवादेच्छया विज्ञापितवान् ॥ सुव्रत उवाच ॥ ॥ भो विद्वांसो वेदांतशास्त्रे शु
द्धशबलजीवनिर्णयो वर्त्तते हरिहरविरिंचिविचारो नास्ति ॥ इतिहासपुराणादौ तेषामुपासनामाहात्म्यं च
पृथक्पृथग्वर्णितं परंतु विशेषतस्तत्स्वरूपनिर्णयो नास्ति तत्र तेत्रयोऽपीश्वरत्वेन संप्रतिपादिताः ईश्व
रस्यैकत्वेन त्रयाणामीश्वरत्वं कथं भवति ॥ तच्छ्रुत्वा मित्रवतोत्तरं दत्तं ॥ मित्रवानुवाच ॥ योगपातंजले मणि
पूरकादिचक्राधिदेवतात्वेन ते वर्णिताः ॥ शास्त्रेषु बहवः संप्रदायाः संति स्वस्वसंप्रदायानुसारेण बहवः स
त्पुरुषा बहुधा वर्णयंति ॥ तत्र कैश्चिदुच्यते प्रणवांगभूताकारोकारमकाराभिमानित्वेन हरिहरविरिं
चयो वर्ण्यंते वैष्णवैरुच्यते श्रीहरिः शुद्धः श्रीशिवः शबलो विरिंचिर्जीव इति ॥ शैवैरुच्यते शिवः शुद्धो
हरिः शबलो विरिंचिर्जीव इति ॥ अपरैस्तूच्यते हरिहरविरिंचयः ईश्वरहिरण्यगर्भविराजः समष्टाव ८६

स्थात्रयाभिमानिनइति॥ तत्रश्रीहरिः समष्टिस्वप्नाभिमानीश्रीहरः समष्टिसुषुप्त्यभिमानीश्रीविरिंचिस्तुसम
ष्टिजाग्रदभिमानी॥ एतन्मित्रवचनंश्रुत्वाभद्रकेणोक्तं॥ भद्रकउवाच॥ योगपातंजलस्यद्वैतवादित्वेनात्रप्रा
माण्येनांगीक्रियते॥ वैलक्षण्यचतुष्टयमपिस्वस्वमतपक्षपातित्वेनाप्रमाणं॥ हरिहरविरिंचीनांयत्प्रणवावयवत्व
मुक्तंतत्प्रणवस्तवमात्रमेव॥ तेषांसमष्ट्यवस्थात्रयाभिमानित्वंयदुक्तंतदपिनसंभवति॥ व्यष्टेःसमष्टेर्वाऽ
वस्थाऽविद्याभ्रांतिंविनानसंभवति॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितइतिश्रुत्याप्रतिपादिते
हरौभ्रांतिःकथंकल्पनीया॥ एवंप्रपंचोपशमंशांतंशिवमद्वैतमितिश्रुत्याप्रतिपादितेहरेःऽप्यविद्याकथं
वाकल्पनीया॥ स्वज्ञोमनोविकारोवैलक्षण्यपदंत्विंद्रियांतःकरणानांब्रह्मादिदेवानांचागम्यं॥ ब्रह्मादयोदेवा
असुरपीडिताःसंतःक्षीराब्धितीरेस्थित्वाचतुर्भुजशब्देनतत्समीपंगंतुंसमर्थाः॥ एतादृशपरपदस्यभगव
तःकथंस्वप्नाभिमानित्वंसंभवति॥ सर्वंविष्णुमयंजगदितिप्रमाणेनजाग्रत्स्वप्नसुषुप्त्यभिमानीतुरीयश्च
सएवपरंतुसोऽभिमानातीतोऽनिर्देश्यः॥ तद्भक्ताअप्यवस्थात्रयात्स्वप्नजनकमनसस्तदधिदेवाच्चातीताः
संतिकिमुतसाक्षात्तस्यस्वप्नाभिमानित्वंनास्तीति॥ मित्रवानुवाच॥ व्याप्यनारायणस्थितइतिशिवमद्वैत
मितिचश्रुतिद्वयस्याद्वितीयब्रह्मपरत्वेननहरिहरपरत्वमेवंसर्वंविष्णुमयंजगदित्यप्यवगंतव्यं॥ व्यष्टिस
मष्ट्योःकार्यकारणभावेनकारणेऽविद्यमानयोःस्वप्नसुषुप्त्योःकथंव्यष्टौकार्येसंभव[illegible]ः॥ समष्टि
जाग्रदवस्थांतदभिमानित्वंचविरिंचेरंगीकृत्यसमष्टिस्वप्नसुषुप्त्यवस्थयेतदभिमानित्वंचहरिहरयो

स० ८७
87

नास्तीत्यंगीकारेऽर्धजरतीयापत्तिः॥ तस्माद्यथा विरिंचेः समष्टिजाग्रदभिमानित्वं तथा हरिहरयोरपि समष्टि
स्वप्नसुषुप्त्यवस्थाभिमानित्वमवश्यमंगीकर्त्तव्यं॥ भट्ट उवाच॥ यौ सांबशिवश्रीरमणौ यज्ञभागं गृह्णीतोः सु
रैः साकं गृह्णीतस्तौ पितामहजन्यौ यदि समष्टिजाग्रदवस्थाभिमानी पितामहस्तर्हि तज्जन्ययोर्हरिहरयोः का
र्यं समष्टिस्वप्नसुषुप्त्यवस्थाभिमानित्वं॥ यथा व्यष्ट्यवस्थात्रयवत्त्वं जीवस्यैव तद्वत्समष्ट्यवस्थापि चतुरानन
स्य प्रथमजीवत्वेन तस्यैवावस्थात्रयवत्त्वमुचितं॥ हरिहरयोरवस्थातीतत्वेनावस्थाभिमानित्वं न संभवति॥ वि
रिंचे रात्रिदिनवत्त्वेन जाग्रन्निद्रादिमत्त्वेन चावस्थाऽभिमानित्वं संभवति॥ हरिहरयो रात्रिदिनादिव्यवहाराभा
वेन तदसंभवः॥ यद्येवं शंकेथाः श्रीहरेरपि शेषशायित्ववर्णनेनावस्थात्रयवत्त्वं भातीति तर्हि भवदुक्त
रीत्या समष्टिस्वप्नावस्थाभिमानिनो हरेरवस्थात्रयांगीकारे व्यष्टौ विश्वादीनामपि प्रत्येकमवस्थात्रयव
त्त्वापत्त्याऽनवस्थाप्रसंगः॥ एतत्सर्वं श्रुत्वा मित्रवान्तुपरराम॥ ततो दीप्तिमतोक्तं भट्टवेदाः सम्यगुक्तं परं तु प्र
णवस्येश्वररूपत्वेन स्वरूपकथनं विनाऽर्थवादाद्यसंभवः॥ यदि प्रणवो देवतर्ष्यादिप्रतिपादकः स्यात्त
दाऽर्थवादोऽपि संभवेत् तस्मादयं विषयो न सुलभः किंतु विचारणीयः॥ इत्यद्वैतादित्ये उत्तरायणे सप्तमा
र्के आत्मारामसमधुपसंवादे श्रीहरिहरस्वरूपनिर्णयो नाम प्रथमो रश्मिः॥॥१॥ आत्माराम उवाच॥॥ तद
नंतरं सुद्युम्नशिष्य आरसुद्वनामा कपोत उक्तवान्॥ भो विद्वांसः पूर्वकाले ममाप्यस्मिन्विषये संदेहो जा
तस्ततोऽहं महेंद्राचले गत्वा गुरुं पृष्टवान्॥ तेन यथोपदेशः कृतस्तं विचारं वक्ष्यामि शृणुध्वं॥ चार ८७

भृगुरुवाच ॥ ब्रह्मा विष्णुः शिवश्चेति तेषां भावः पृथक् पृथक् ॥ किं रूपं किं पदं तेषां वेत्तुमिच्छाम्यहं गुरो ॥१॥
सनत्कुमार उवाच ॥ पद्मोद्भवः कर्मरूपो क्रियारूपः शिवः सदा ॥ अकर्मकर्मणोर्विष्णुर्व्यापकश्च विलक्ष
णः ॥२॥ शिवस्यैकांतिकं नित्यं सर्वांतकं पदं ध्रुवं ॥ नश्यमानं यथा देहो ब्रह्मणः पदमुत्तमं ॥ शारीरं निर्म
लं कर्मस्थानं नोक्रियतापि वै ॥ उभयं पाति यत्तस्माद्विष्णोः परमं पदं ॥४॥ यं यं सृजति ब्रह्मासौ तं तं ना
शयते शिवः ॥ जनिनाशावुभौ भावौ पाति विष्णुरलेपतः ॥५॥ शिवपदं निर्गुणं चतुराननपदं सगुणं सगु
णनिर्गुणयोर्यद्व्यापकं तद्विष्णोः परमं पदं ॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चैवामृतं चेति
श्रुतिः ॥ शिवस्यामूर्तममृतं पदं ॥ कमलोद्भवस्य मूर्तं मृतं पदं ॥ यस्य पुरुषस्य मूर्तं चामूर्तं चोभे रूपे स
विष्णुरेवेति ते उभे पदे ऽपि विष्णुस्तयोरुभयोः पदयोर्व्यापकोपि विष्णुस्ताभ्यामुभाभ्यां पदाभ्यां विलक्ष
णोपि हरिः ॥ शिवपदस्यार्थः शुभः सुखं पुंजत्वस्मात्छिवः स्वस्वरूपानंदमात्रमेव मत्वेतस्य त्तान
निश्चयोपर्यावस्थायं दुःखरूपं खंडपदं तदकाररूपत्रिशूलेनापारशक्त्याछितः खंडस्यानंदपदे स
दा तिष्ठति ॥ विष्णुपदस्यार्थो व्यापकस्तस्माद्विष्णुं शिवस्य कारणस्त्वपि निश्चयवादहं नैपियज्ज्ञानेन
शिवः स्वस्वरूपं वेत्ति तस्मिन् ज्ञानेपि यया शक्त्या सर्वान्नाशयति तस्यां शक्त्यामपि व्यापकः ॥ यं पदा
र्थं शिवो नाशयति तस्मिन्पदार्थेप्यलेपतो व्यापकः ॥ यच्च तत्खंडं तत्त्वध्यस्तं यथाध्यस्तसर्पे नष्टे सति
रज्जुर्न नश्यति तथैव खंडवस्तुनाशे सति तदधिष्ठानं न नश्यति ॥ अखंडस्याखंडत्वे राध्यस्तं तस्य

स· ८८ विरोधि मतं सतोः सद्विरोधि स्वत्वस्य विरोधी हि एवं तथा व्यापकस्य विरोध्य व्यापकम् इति वक्तव्यं यो व्याप
कस्य एव व्याप्यः व्यापकस्य विरोधी व्याप्यः कदापि न भवति तस्मात् व्यापकः सदा विरोधीति ॥ शिवात्म
जत्वं देऽपि तस्याकाराकारशस्त्रमपि धर्मरूपवृषभोऽपि शक्तिश्च विष्णुरिति सिद्धं चेत्तदा शिवोऽपि तद्भि
न्नः कथं भवेत् ॥ तस्माच्छिवोऽपि विष्णुरेवेति सिद्धं परं त्वस्त्वागन्याहं तत्तत्स्वरूप कार्तत्वाभिमाननिह
त्यर्थमीश्वर इति नाममात्रमनुत्थापयामास ॥॥ वादमुखउवाच ॥ पूर्वं त्वमक्रियः शिवः इत्युक्तो दानीं हं
तृत्वादि धर्मवत्त्वेन सक्रिय इति वदसीति पूर्वोक्तरवाक्ययोर्विरोधः ॥ सद्युम्नउवाच ॥ शिवपदस्याक्रि
यत्वे कोऽपि संशयो नास्ति परं तु क्रियां विच्छेदः तस्मादक्रिय एव ॥ गुणान् निषिषेध तस्मान्निर्गुणः ॥ कर्म
एव कर्ममयः पश्येद् कर्मणि च कर्मयत् इति प्रमाणेनाक्रियत्वेऽप्यर्थात् क्रियासंभवति ॥ बहिष्टः पालनध
र्मः क्रियाविशेषः परं त्वक्रियां पातितस्मादर्थादक्रियरूपः ॥ ततः क्रियाक्रियाभ्यां हरिर्विलक्षणः ॥
वादमुखउवाच ॥ भो गुरो शिवस्य पुत्रकलत्रायुधवाहनानां विष्णुस्वरूपत्वमुक्तं न तत्कथं संगच्छते
सद्युम्नउवाच ॥ ब्रह्मवैवर्त्त प्रमाणेन श्रीगणपतिस्कंदौ विष्णववताराविति प्रसिद्धौ ॥ हरिवंश प्रमाणे
न त्रिपुरासुरवधसमये श्रीहरिः श्रीशिवस्य शरो जातो वृषभावतारश्च भूत्वा तमुवाह ॥ भस्मासुरव
धसमये पार्वतीरूपोऽपि जातः ॥ एतच्चाश्मसुबोक्तं सर्वेश्वरत्वादीश्वरमतोक्तमेतत्संवादपर्यालोचनया
विस्ताराधिक्यं जायतेऽतो वेलक्वानामिदं संमतं तेन तत्वेहेन वादिनां ॥ एतस्मिन्नंतरे तत्र सद्युम्नोऽप्याग ८८

त्यदीत्त्विमं तेन नाम सर्वे सभासदस्तस्य वृत्तमुत्थानादिकं ज्ञात्वा स्थापयामासुः॥ ततश्चारुश्रवस्तस्य भार्यायो यो
विचारो जातस्तत्सर्वं तस्य शुश्रूषायन्निवेदयामास॥ तच्छ्रुत्वा तेनोक्तं मद्गुरुः पूर्वं संवादस्तथा संक्षेपेण कथितस्त
स्यैतेषां मनसि सम्यग्ज्ञात्वागतस्ततोऽहमिदानीं विस्तरेण वक्ष्यामि॥ स्रुद्युम्न उवाच॥ यदुक्तं शून्यं तदसन्न
यायामासा मायातत्त्वतो मायाः सद्रूपा॥ सत्त्वसत्त्वापेक्षत्वं सृष्टिप्राक्काले सदासीन्नो सदासीदिति सदसद्विल
क्षणमेवासीत्॥ परं तु यत्सदसद्विलक्षणं तस्य पदं स्वात्मसिन्धुरेवासीत्॥ तस्मिन् सदसद्विलक्षणे क्रीडनेच्छा
स्फुरिता॥ असदपि सद्विभासयितुं तस्यैव सामर्थ्यं तस्मात्तस्येच्छावशाद्यासदभूत्तथैवासदपि व्य
क्तिमदभवत्॥ पुनस्तत्पुरुषोत्तमस्तस्मात्स्वात्मसिन्धोरंशं गृहीत्वा तदंशार्धार्धं ज्ञात्वा तयोरर्थयोर्व्याप्ता तास
त्सिन्धुस्तस्मिन्सिन्धाववमेलयत तन्मेलनवशात्सदसदात्मकं मिथ्यारूपं जगदभवत्॥ जगति यदुक्तं
तत्सत्यं यन्नामरूपं च तदसदात्मकं मिथ्येति॥ सतोंशार्धभागमसति युयोज॥ अवशिष्टसतोंशार्धं द्विधा
विभज्य सत्सिन्धुशुद्धमात्रसंस्थापनार्थं तत्र भागद्वये चैकं भागं शान्तस्वरूपं सर्वेश्वरं विधाय तस्मात्
द्वंद्वमोहात्तानाद्यसद्विकारान्निर्गत्य सर्वान् कर्मासक्तान् जीवान् गुणासक्तान् देवांश्च सत्सिन्धोः स्वप
दात् दूरीकरोति स्म॥ तस्माच्छिवपदं न चलति न नश्यति शाश्वतं ध्रुवं सदा राजते॥ तत्र पूर्वोक्ता भागद्व
यस्यान्यैकभागं सगुणाकारं चतुराननं सदसतो निर्माणार्थं सर्वांल्लोकान् देवांश्च यन्न दृश्यं नामरूपात्म
कं तन्मिथ्या यद्दृश्यं सर्वं तत्कं शिवपदं तदेव ध्रुवमिति बोधयितुं च संस्थापयति स्म॥ हे साग्रेजलमि

स०
८९
89

श्रितेगोरसेनिहितेसतिजलंहित्वागोरसमेवपिबतितस्मान्निर्णयदृष्टेर्ब्रह्मणोवाहनंहंसइतिकथ्य
ते स्वयंतुव्याप्योपिव्यापकोपिव्याप्यव्यापकाभ्यांविलक्षणएवनिर्दिश्यो ऽ तर्क्योद्भुतरूपः॥ पूर्वोक्तस
दृसन्निश्रितार्थोदीयस्सगुणाकारोजगज्जनकात्तिष्ठतितस्यासत्त्वकाशाद्विमोहनार्थंसर्वेषांदेवा
दीनांस्वविलक्षणपदज्ञापनार्थमसदात्मकासुराणांनाशनार्थंचादित्यानामहंविष्णुरितिदेवयोनौ
शंखचक्रगदादीनिधृत्वावनरति॥ निर्गुणशिवपदेपिशिवात्मासगुणब्रह्मदेवपदेपिसएवदेवात्मा
॥ हेब्रह्मगवराक्तस्ययोगमायांविपश्यथशरीरंधृत्वासदाकायोस्मि॥ योन्यांमुद्धृयसदायोनिस्थितः॥ [illegible]
तस्यप्रवृत्त्यांनिवृत्तिर्निवृत्त्यांप्रवृत्तिश्चतस्मात्तस्यप्रवृत्तिनिवृत्तीकोपिनजानाति॥ यथाप्रागभूत्तथैवा
तोपिसतुच्चोपिसवाश्रिद्रूपिनीचोच्चविकारस्तस्मिन्नोत्थितः॥ करोतीवनकर्तासोगच्छतीवनगच्छ
ति॥ शृणोतिनशृणोतीवपश्यतीवनपश्यति॥ २॥ यत्कल्पितंतत्स्वकंटंचकारविलोपयन्त्वस्यप्रसि
द्धरूपं॥ ततस्ससर्वेषुसएवसर्वस्ससर्वैरतीतश्चससर्वमच्च॥ २ ॥ दृष्टास्वयंदृश्यदृश्यस्सएवदृश्या
दिभेदात्तुपरः स्वयंच॥ चलत्यजस्रंचचलनादतीतोविचित्ररूपाबलुतस्यचेष्टा॥ ३॥ इत्यद्वैताधि
त्यात्तरायणेसप्तमार्कण्डेयश्रात्मारामममधुपसंवादेश्रीहरिहरस्वरूपकथनंनामद्वितीयोरश्मि॥ २॥ श्रा
त्मारामउवाच॥ ॥एतत्सुद्युम्नोक्तंसर्वंश्रुत्वादीप्तिमतोक्तंपद्मपानरीत्येदमपिसंभवतिपरंतुयःप
रात्परस्तस्यविष्णुरितिनिर्दिश्योनोचितः॥ यथासुद्युम्नेनपरात्परत्वेनहरिर्वर्णितस्तथाशैवेशि ८९

वोवर्ण्यतेपरमात्मात्वेकएवमतभेदेनतंशैवाःशिवइतिवैष्णवाविष्णुरितिचवदंति॥ यौगेचैनोक्तोयथावि-
ष्णुःशैववैष्णवशिवस्तथा॥ तस्माच्छ्रुतिःपुरोवाचसब्रह्मासशिवोहरिः॥२॥ सत्यधृतउवाच॥॥॥ मत्तः
परतरंनान्यदितिश्रीभगवद्गीताप्रमाणेनश्रीहरिर्विपरात्परःपुरुषोत्तमः॥ पत्निराज्ञसहवासप्रभावेणतत्स्व-
पाज्जनिततपःसाधनादिसिद्ध्याचममास्मिन्विषयेयथास्फुरणंज्ञातंतथामयावर्णितं॥ दीप्तिमानुवाच॥ ॥
मत्तःपरतरंनान्यत्किंचिदस्तीत्यादिगीतावाक्यस्यास्मच्छब्दार्थोहरिरेवेतिनिर्दिष्टमशक्यत्वस्यपरात्प-
रत्वात्॥ किंचादित्यानामहंविष्णुः॥ रुद्राणांशंकरश्चास्मि॥ वृष्णीनांवासुदेवोस्मीत्यादिप्रमाणेनशिववि-
ष्ण्वादिसर्वात्मकःसएव॥ पत्निराज्ञःसमदर्शीपरमदेशीवास्तस्माद्यत्त्वयोक्तंतथातेननोपदिष्टंस्यादतस्त्व-
येवकल्पितमितिज्ञायते॥ अयंविषयःसुलभोनभवतिकिंत्वसिधारावद्दुर्घटः॥ एतद्दीप्तिमद्वचनंश्रु-
त्वाकृष्णमृगवासीसत्यसंधाख्यःकलहंसउन्नावान्॥ सत्यसंधउवाच॥ पुरुषस्त्वेकोह्यनिर्देश्योराज्ञते
॥ सएवविष्णुस्सशिवोवाविरिंचिःपुनस्तत्वतोनेतिभावेननसविष्णुर्नशिवोवाविरिंचिः॥ अनामरूपोहिसद- नेति ११
सद्विलक्षणः॥ शुद्धत्वंचशबलत्वंचोभौभावावपितस्मिन्वर्त्तेतेसर्वेषांभूतानांयोबीजभूतःसोपितस्य
शाक्त्यांवर्त्तते॥ यदातस्मिन्क्रीडनेच्छास्फुरतितदाशबलभावमीक्षतेयदाक्रीडनयोदासीनोभवतितदा
शुद्धमात्रमेवतिष्ठति॥ शबलत्वंचशुद्धत्वंचतस्यदेहेअंगुलीद्वयवत्तयोरंगुल्योर्मध्येभूतानांबीजंतिष्ठति
तद्बीजंशबलांगुलिचेष्टयाविरिंच्याकारंभूत्वाविश्वजनकंभवति॥ शुद्धांगुलिसकाशात्बीज मात्रमे-

स० वतिष्ठति ॥ एतन्मतत्रसंधोक्तं श्रुत्वादीप्तिमानुवाच ॥ बहिकल्पितेयं युक्तिरेकास्मिन्नपक्षे संभवति ॥ परंत्वस्मिन्वि
९० षयेपूर्वंसर्वलोकबीजं तत्त्वज्ञानौ तिष्ठतीत्युक्तं पश्चात्स्थूलत्वं शाबलत्वं च देहे अंगुलीद्वयतयोर्मध्ये भूतबीजं तिष्ठ
९० तीत्युक्तं ॥ तत्र देहे अंगुलीशालिस्थानीये जाते यदि सूक्ष्मत्वमपि शालिः स्यात्तदाऽनर्थः स्यात्तस्मादियं युक्तिः स
दोषा स्यात् ॥ ततो नीलगिरिवासी सात्त्विकनामा जातक उवाच ॥ ममास्मिन्विषये बहुकालतः संशयचतुष्ट
यमस्त्येतन्निवारणार्थं बहवः सत्पुरुषा मया पृष्टाः कैरपि समाधानं न कृतं ॥ न कुरु त्वादीप्तिमतोक्तं तत्सं
शयचतुष्टयं निरूपणीयं ॥ सात्त्विक उवाच ॥ सृष्टिस्थितिसंहारकर्तृत्वं च क्रमेण ब्रह्मविष्णुमहेश्वराणामि
ति प्रसिद्धं तत्र मधुकैटभहिरण्याक्षरावणादीनां वधो वैपरीत्येन पालकधर्मवता विष्णुना कथं कृत इति प्र
[illegible]थमः संशयः ॥ १ ॥ वेदपुराणादौ यत्र शिवस्तोत्रवर्णनं तत्र शिव एव सर्वोत्कृष्टत्वमितरयोः शिवभक्त
त्वं ॥ यत्र विष्णुस्तोत्रवर्णनं तत्र विष्णोरेव सर्वेश्वरत्वमितरयोस्तद्भक्तत्वं च प्र[illegible]तिपादितमिदं कथमिति द्वि
तीयः ॥ २ ॥ एवमितिहासादौ विष्णुशिवयोः परस्परयुद्धं परस्परभक्तत्वं परस्परात्मकत्वं च प्रतिपादित‹
मिदं कथमिति तृतीयः ॥ ३ ॥ शिवस्तमोऽभिमानीति प्रसिद्धं तमोगुणस्य निकृष्टत्वेन शिवमाहात्म्यस्य
सर्वोत्कृष्टत्ववर्णनेन तस्य तमोऽभिमानित्वं कथं संघटतीति चतुर्थः ॥ ४ ॥ इत्यद्वैतादित्ये नरनारायणेस
न्मार्के आत्माराममधुपसंवादे श्रीहरिहरस्वरूपनिर्णयो नाम तृतीयो रश्मिः ॥ ३ ॥ आत्माराम उवाच
एतत्सात्त्विकोक्तप्रश्नचतुष्टयं श्रुत्वा नीलगिरिवासी नीलकंठनामा हीरणद्दीशैव उक्तवान् ॥ नील‹ ९०

कंठ उवाच ॥ ॥ हरिः श्यामवर्णस्तमोगुणोऽपि श्यामएवं श्रीशिवोऽपि शुभ्रस्सत्वगुणोऽपि शुभ्रोऽतो वर्णसा
दृश्याच्छिवः सत्वाभिमानी हरिस्तमोऽभिमानीति मंतव्यं ॥ श्रीशिव एव परात्परः सर्वेश्वरः सर्वात्मवास्तत्पर
कोऽपि नास्ति ॥ यदा जगति दैत्येभ्य उपद्रवो जायते तत्तन्नाशार्थं श्रीशिवो हरिं प्रेषयत्यतो हरिः शिवकिंक
रः ॥ एतच्छ्रुत्वा हीन्निमांस्तं प्रत्युक्तवान् ॥ हे नीलकंठ सत्वाभिमानी तमोऽभिमानी च न हृष्टोऽनयोर्हरिः ॥ गु
णातीतो गुणाभिमानित्वं कथं संभवेत ॥ यदि शिवस्य सर्वात्मत्वात्तेन वाभिमतं नहि स एव साधुसंरक्षणार्थं ह
रि[illegible] रूपेणावतरतीति किं न मन्यसे ॥ यन्नामरूपाभ्यामतीतं वस्तु तस्यैव सत्यं ज्ञानं
मनंतं स्वरूपलक्षणं तच्च शिवविष्णुपदयोरानंदव्यापकार्थत्वेन तद्द्वयमपि स्वरूपलक्षणमेव भो नी
लकंठ व्यापकं व्याप्यत्वेन निर्[illegible]कानंदेकदुःखसापेक्षित्वेन विपर्यानंदत्वे नैज्ञात्वा भेदं कल्पयसि ॥ नील
कंठ उवाच ॥ ॥ यद्भवतोक्तं शिव एव हरिरूपेणावतरतीति तन्न पुराणादौ तयोः परस्परं संमेलनसंभाषण
संग्रामादिकं प्रतिपादितमतस्तयोरेकत्वं कथं ॥ हीन्निमानुवाच ॥ श्रीरघुवीरजामदग्न्यौ विष्ण्ववतारतेऽपि त
योः संमेलनसंभाषणसंग्रामादिकं प्रसिद्धं तथा हरिहरयोरेकत्वेऽप्यवतारभेदेन संमेलनादिकम[illegible]वि
रुद्धं ॥ ततो नीलकंठेनोक्तमिदमस्माभिर्न मन्यते किंतु नमकादिश्रुत्या स्कंदलिंगपुराणादिना च श्रीशिव
एव सर्वेश्वरः परात्परस्तदधिकः कोऽपि नास्तीत्यस्मदभिमतं ॥ एतच्छ्रुत्वा कूटगिरिवासी सोमपनामा वै
ष्णवश्रेष्ठो ऽरे स्वमतपक्षपाततया क्रुद्धः सन्नुवाच पुरुषसूक्तनारायणादिश्रुत्या भागवतपद्मपुराण

स० ५२
९१

दिनाच श्रीहरिरेव परात्परः ॥ एतयोरुभयोर्भेदवादं श्रुत्वा समदर्शिनः सदस्याः सर्वे विमनस्का बभूवुः ॥ ततो
दीक्षिमान्नुवाच हे सूरिवैदिकाः अग्निहोत्रप्रकरणे शाखाभेदेन उदिते सूर्ये प्रातर्जुहोत्यनुदिते सूर्ये प्रातर्जुहोतीति
होमस्य विकल्पः श्रूयते ॥ तत्रोदितपक्षे अनुदितहोमदूषणमनुदितहोमपक्षे उदितहोमदूषणमपि वर्ण्यते
तत्र परपक्षदूषणं तत्पक्षनिन्दितं न प्रवर्तते किंतु स्वपक्षस्योत्कृष्टताद्योतनार्थं ॥ यदि वादाविन्निन्दायामेव श्रु
त्योस्तात्पर्यं स्यात्तर्हि परस्परदूषितत्वेन तयोरप्रामाण्यप्रसंगः ॥ एतन्न्यायेन वैष्णवशैवमते नादिभूते वैष्णवा
नां गोपीचंदनादिधारणे पद्मपुराणादिकं प्रमाणं तत्र विभूतिरुद्राक्षादिधारणे यन्निन्दावाक्यं वर्ण्यते तन्न नि
न्दातात्पर्यकं किंतु स्वमतानुल्लंघनपूर्वकगोपीचंदनादिधारणस्योत्कृष्टताद्योतकं ॥ शैवानामपि स्कंदलिं
गपुराणादिस्थगोपीचंदनादिनिन्दावाक्यानामप्येवं (मेव) स्वमतोत्कृष्टत्वे तात्पर्यं ज्ञेयं ॥ एतद्दीक्षिमतोक्तं श्रुत्वा नो
भेदवादिनो तूष्णीं बभूवुस्तु रन्ये समदर्शिनो दीक्षिमंतं साधु साध्विति तुष्टुवुः ॥ ततो मंगलप्रस्थवासिना
वीतमन्युनैव मुक्तं ॥ पूर्वकाले स्वभ्रात्रेध्मबाहुनामहादमेतद्विषये संदिग्धः सन्परस्परं विचार्य तदुहस्य
मत्तात्वा तद्बोधनार्थं गंधमादने पक्षिराजसमीपं गतोस्मि ॥ तत्प्रणामाद्यनंतरमिध्मबाहुस्तं विज्ञापया
मास ॥ भो गुरो वेदपुराणादौ हरिहरयोः कुत्रचित्कुत्रदुष्टत्वेन कुत्रचित्छबलत्वेन वर्णनमस्ति ॥ एवं कु
त्रचित्तयोः संमेलनादिकं कुत्रचिद्विरोधादिकं चास्ति परं त्वेतयोस्तत्त्वनिर्णयो मम न जातः ॥ अत्र तत्त्वं दे
ण तन्नन्तमुपदेष्टव्यं ॥ ॥ ॥ पक्षिराज उवाच ॥ वेदपुराणादौ यत्तयोः स्वदुष्टत्वेन वर्णनं तत्तन्मूलस्वदूषे

तन्याभिप्रायेण यत्र तत्त्वयोर्यत्संमेलनादिकं तत्तद्वक्त्राभिप्रायेण ॥ एवमप्ययं विषयो महान्दुर्ग्रहः
यस्य सर्ववेदपुराणादिषु सर्वशास्त्रादिषु च सम्यग्गतिर्भवति यस्य हृदयं गुरुकृपा[illegible]यातपः साधनादि
नाशुद्धं जातं स एवैतद्विषयरहस्य[illegible]श्रवणयोग्यः ॥ भो इध्मवाहो यद्यपि वेदशास्त्रादिकं त्वयाऽधी
तं तथापि सम्यग्ज्ञानदृष्ट्युपस्थितिमेकांतसेवनं गुरुकुलवासं च त्वया न कृतं ततस्तदुपदेशार्हो भविष्यसि ॥ इदा
नीं दीप्तिमानेव तपःशीलत्वेन तत्त्वज्ञानित्वेन गुरुवाटाल्लब्धसकलविद्यावत्त्वेन च तच्छ्रवणार्हस्त्वं
विनेतरस्य योग्यता नास्ति ॥ यदा वीतमन्युर्दीप्तिमन्निकटे एतत्सर्वं निवेदयामास तदेध्मवाहुर्विन्ध्या
चले दीप्तिमदाश्रमे संसदि हरिहरस्वरूपनिर्णयविचारो भविष्यतीति श्रुत्वा तच्छ्रवणार्थं तत्रागतः
॥ ततो दीप्तिमान्सर्वान्सदस्यानाह भो विद्वांसः एतद्विषयस्य चात्रवोक्तसंशयच्छेदस्य च समा
धानं पक्षिराजं विनाऽन्येन कर्त्तुं न शक्यते मयापि चिरकालप्रभृति तद्दर्शनं न जातं ॥ अतस्तत्रैवागं
तव्यमित्युक्त्वा नीलकंठसोमपाभ्यां विनायकसुद्युम्नादिभिः सर्वैः सह गंधमादनं गत्वा पक्षिराजं नना
म ॥ ततः पक्षिराजस्तमुत्थाप्यालिंग्येभिंसांकं किमर्थमत्रागतोऽसीति पृष्टवान् ॥ दीप्तिमानुवाच ॥
भो गुरो बहुकालाद्भवद्दर्शनं नास्तीति तदर्थमपरं च मदाश्रमे एते सुद्युम्नादयः सर्वे सत्कालक्षे
पार्थमध्यात्मविचारं कृतवंतः ॥ तत्र श्रीहरिहरस्वरूपनिर्णयविषये संदिग्धाः संतः परस्परं विवा
दं चक्रुः सुव्रतमित्रवसुदेवकाचार्यसुदेवसुद्युम्नसत्यसंधनीलकंठसोमपैर्यथायथा तद्विषयस्तस्व

स० ५२ 92

बुद्ध्यनुसारेणोक्तं तन्मया च तत्तत्रस्थत्युक्तं यथायथावदुक्तमेतत्समाचारं सात्त्विकोक्तप्रश्नचतुष्टयं चत-
स्रो निवेद्यैतत्समाधानार्थं चागतोस्मीति ॥ पण्डितराज उवाच ॥ भद्रकस्त्वद्युम्नो यद्यपि बुद्धिमत्तोऽसत्तीर्थी
तथापि स्त्वद्युम्नः स्वमतपक्षपातित्वेन समदर्शी न भवति भद्रवास्त्वत्तदभावेन समदर्शीती बुद्धिश्च ॥
स्त्वद्युम्नो यद्यपि पूर्वकाले श्रीहरिहरतत्त्वविचारं ज्ञानदृष्टवान् कस्मपि नोक्तवांस्तथापि शिवस्यहंतत्त्वधर्म-
तत्प्रतिपादकयुक्तिर्विविचेदर्हसस्य हीरनीरन्यायदृष्टांतयुक्तिश्च समीचीने एतदन्यत्सर्वं यदुक्तं तत्स्व-
बुद्धिकल्पितमेव ॥ हे दीक्षितमं स्त्वया यस्य यस्य मते यद्यदूषणं दत्तं तत्सर्वं समीचीनमेव ॥ एतद्द्विषयस्य
सात्त्विकोक्तप्रश्नचतुष्टयस्य चात्यंतवाटितत्वेपि मदभिलाषानुसारेण मत्कालतेपार्थ्य प्रथमत-
उत्पत्तिचामंततोमूर्तिचतुष्टयनिर्णयविषये तद्वयनिर्णयं सात्त्विकोक्तप्रश्नचतुष्टयसमाधानं च क्र-
मेण वक्ष्यामि सावधानमनाः शृणु ॥ ॥ ॥ इत्यद्वैतादित्यउत्तरायणे सप्तमार्के आत्मारामसधुपसं-
वादे श्रीहरिहरस्वरूपनिर्णयो नाम चतुर्थो रश्मिः ॥४॥ पण्डितराज उवाच ॥ ॥ तदैक्षत बहुस्यां प्र-
जायेयेति ॥ तत्स्वैर्द्रष्टा श्रुतयं यदीक्षणादिविशिष्टं तद्वाच्यं बहुभवनात्मकं शबलमिति ॥ यदीक्षणोपहि-
तं तल्लक्ष्यमीश्वरसाक्षिसदेव ॥ यथा जीवसाक्षिणि जीवत्वं भाति तथैव तत्पदलक्ष्य ईश्वरसाक्षि-
णि विशिष्टांशस्यांशत्वं भाति परंतु जीवसाक्षी स्वरूपाविद्ययोपेतः ॥ भ्रांतिजनकात्मकः ॥ ईश्व-
रसाक्षिणि न भ्रांतिर्नापि स्वरूपविद्या न चान्याविद्यालेशः ॥ तदेव परमपदं प्रणवलक्ष्यं सर्वान्त- ५२

यो मि सर्वेदृक ॥ तदेव स्वाधीनशक्तिकं शक्तेर्योगवियोगावस्थायां समं तस्य शक्तेर्योगावस्थायामपि शक्तेर्वियो
गे तान्नाभिभवति ॥ स एव सौम्येति सत्यं दृष्टं केवलं चिन्मात्रं सर्वनिषेधावधिभूतं न तत्र शक्तिर्न च शक्तियो
गः ॥ शुद्धसन्मात्रं ॥ ईक्षणं चिच्छक्तिः सैव परा योगमाया चेतना च ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभावि
की ज्ञानबलक्रिया चेति श्रुतेः तथा व्यवहारात् सैव लोके निश्चयादिहेत्वानुकूलत्वेन चेतनेत्यपि व्यवह्रि
यते सा च ज्ञानरूपा ॥ न च बुद्धेर्ज्ञानमिति तां विना व्यवहाराच्चिच्छक्तेस्तथात्वमप्रामाणिकमिति वाच्यं
॥ उक्तश्रुतौ ज्ञानबलक्रियारूपत्वप्रतिपादनेन तस्या एव मुख्यज्ञानत्वेन बुद्धावेव तत्परिणामत्वेन तत्प्रति
बिंबत्वेन वा तद्व्यवहारः सौपचारिकत्वं गौणत्वात् ॥ अत एव बुद्धेरपरात्वं ॥ यच्छक्तिविशिष्टं तच्छक्ति
रूपं ज्ञानोपाधिकं तस्य ज्ञानं बहुभवनविषयकं तस्माद्दर्शनात्तस्य स्वरूपाविद्या भवति ॥ शक्तितादात्म्यापन्नं
तस्माच्छक्त्यधीनं ॥ स्वरूपाविद्योपेतेन तस्मात्स्वस्वरूपस्य शक्तेर्विवेकाभावात् ॥ अस्मिन्नेव विशिष्टां
शे ज्ञानेच्छाप्रयत्नावास्तवाः ॥ परंतु परारूपा एवेति जीवज्ञानादिविलक्षणाः ॥ ते ज्ञानादयः तस्माद्धि
एवपि भासंते ॥ या तदाश्रिता स्वरूपावरिका विद्या सैवापरा परं तु यावत्परापरयोर्मेलनं न भवति ताव
त्तस्या अपरात्वस्य व्याकरणं च न भवति तावत्तस्या अपरात्वं परायाम् व्याहृतरूपेण तिष्ठति यथा बहु
भवनाभिमुखेश शक्त्यार्थात्स्वरूपाविद्या भवति ॥ तथैव स्वरूपाविद्यायाः विशिष्टांशस्य शक्त्या सह तादा
त्म्यं जायते ॥ तस्मादुभयशक्तिव्याकरणमपि युगपत् ॥ माया चा[illegible]विद्या च स्वयमेव भवतीति श्रुतिः प्र

स॰
९३
93

मायां॥ तत्र चोपहितस्यांतर्यामितया प्रेरणास्वकाशात्तत्तत्प्राणिकर्मसंस्कारसहकृतात्परात्यायां स्वरूप
विषयिण्याम् अविद्यायां तच्छक्तिविशिष्टांशः॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहमिति प्रमाणेन प्र
सिद्धो भवति॥ परापरयोर्मेलनान्महत्तत्त्वाकारणं भवति॥ तद्द्वारेण गुणानां विकृत्वकरणं भूतानां
पंचीकरणं च जायते॥ परापरयोर्मेलनात्प्राग्यथाकुलालत्तानेघटव्यक्तिर्वर्त्तते तथा परावस्थायां
शब्दतन्मात्रादयो भूतबीजरूपधर्ममात्रावर्त्तन्ते॥ अपरासम्बंधवशाद्धर्मिरूपेण परिणतास्तद्धर्म
भावमापन्ना भवंतीति तस्माच्छ्रीभगवद्गीतायां परा धर्मानुग्राहीत्वेन प्रदर्शिता॥ रसोहमप्सु इति॥ शा
ब्दः खे इति॥ पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसाविति॥ यथा विच्छक्तिरखंडे केवले चिदे
कामुपहितमन्यं शक्तिविशिष्टं च द्विधादर्शयति तथैवापराविच्छक्तिविशिष्टांशं चैतन्यमेकमुपहि
तमन्यमपराविशिष्टं च द्विधा करोति॥ यदपराविशिष्टं तज्जीवः॥ यदुपहितं तज्जीवसाक्षि॥ अ
पराविशिष्टजीवत्वं भ्रांत्या साक्षिणि भातीति ननु विच्छक्तिविशिष्टस्येश्वरस्यैवापरोपाधिना विशिष्टो
पहितभावेन जीवजीवसाक्षिरूपतास्वीकारे नीश्वरत्वादापत्तिः॥ एकांशस्य विच्छक्तिविशिष्टस्यापरावि
शिष्टतया जीवभावापत्त्याः परांशस्य चापरोपहिततया जीवसाक्षिभावापत्त्या चेतदृति रिक्तांशासंभवा
दितिमेवं तत्तत्प्राणिकर्मसंस्कारसंसृष्टविच्छक्त्यंशविशिष्टस्यैवापरोपाधिना विशिष्टोपहितभावे
न जीवजीवसाक्षिरूपतास्वीकारेणानदसंसृष्टविच्छक्त्यंशविशिष्टस्येश्वरत्वान्नोक्तापत्तिः॥ ननु चि ९३

च्छिन्नविशिष्टस्य शबलांशस्य परोपाधिना जीवजीवसाक्षिभावेन द्विधाकरणं युक्तमनुपपन्नं विच्छिन्नानु
पहितस्यैव साक्षिरूपता युक्ता ॥ एकधर्मोपहितस्यापरोपहितता यथा उत्पलत्वोपहिते नीलत्वोपहितता
या लोकसिद्धत्वेन संभवात् ॥ एकधर्मविशिष्टस्यापरधर्मविशिष्टतायाश्च संभववदुपहितत्वस्याप्यसंभ
वात् ॥ तस्माद्विच्छिन्नविशिष्टस्य न साक्षिरूपत्वमिति चेन्न ॥ एकधर्मविशिष्टस्यापरधर्मविशिष्टत्वासं
भवेपि अपरधर्मोपहितत्वस्य द्रव्यत्वविशिष्टस्य गुणवत्वोपहिततायालोकसिद्धत्वेन संभवात् ॥ नचैव
धर्मविशिष्टस्यापरधर्मोपहितत्वं न सर्वत्र संभवति तथा सति सोयं देवदत्त इत्यादौ तद्देशकालविशिष्ट
स्यैतद्देशकालसंबंधोपहितत्वसंभवे एकपदलक्षणयैवोपपत्तौ पदद्वयलक्षणास्वीकारानर्थक्यप्र
संगात् तस्माद्युक्तमनुपपन्नमिति वाच्यं ॥ पदद्वयलक्षणायां नैकधर्मविशिष्टस्यापरधर्मोपहितत्वासं
भवो बीजं किंतु वाक्यपदस्योपहिते लक्षणायाः त्वपः स्वीक्रियत इत्यत्र विनिगमनाविरह एव ॥ तस्मान्नपू
र्वोक्तानुपपत्तिः ॥ नच तथाप्येकधर्मविशिष्टस्यापरधर्मविशिष्टत्वासंभवान्न विच्छिन्नांशविशिष्टस्यापरावि
शिष्टत्वमिति जीवासंभव इति वाच्यं ॥ न सर्वधर्मविशिष्टयोरैक्यासंभवः ॥ अपितु परस्परासम्बद्धविशे
षणविशिष्टयोरेव ॥ परस्परसंबद्धविशेषणविशिष्टयोस्त्वैक्यमपि संभवति यथा घटत्वविशिष्टप्रमे
यत्वविशिष्टयोस्तथा च विच्छिन्नांशरूपविशेषणस्यापरारूपविशेषणसंबद्धतया तद्विशिष्टयोरैक्यं
संभवतीति नोक्तदोषः ॥ जीवसाक्षी स्वरूपाविद्यायोपेत ईश्वरसाक्षिण्यविद्यालेशोपि नास्ति परोपहिता

स
९४
95

द्विविधैव जीवसाक्षिणं भिनत्ति तत्त्वत एकमेव ॥ विज्ञानमंतरो यमयत्येष त आत्मांतर्याम्यमृत इति श्रूयते ः
स आत्मांतर्यामीति ॥ यत्र यत्रापरा विशिष्टजीवस्तत्रैव जीवसाक्षी तथा यत्र यत्र जीवसाक्षी तत्र तत्रांतर्या
मीति सिद्धं ॥ ननु जीवसन्निहितसाक्षिसन्निहितस्यांतर्यामित्वापेक्षया लाघवाज्जीवसन्निहितस्य साक्षि
ण एवांतर्यामित्वमस्त्विति चेन्न ॥ पृथिव्यादिकमारभ्य विज्ञानात्मशहितजीवांतर्यामित्वस्य विच्छन्नत्व
पहितचैतन्य एव सत्वात् तस्य च तत्तत्प्राणिकर्मसंस्कारोपरक्तविच्छिन्नत्वं च विशिष्टापराविशिष्टचैत
न्यरूपजीवेनात्यंतसन्निहितत्वात् ॥ अत एव यः पृथिव्यामित्यादिर्यो मनसीत्यादिश्च श्रुतिरप्येतदभि
प्रायेणैव संगच्छते ॥ ननु श्रुतिर्यत्रोपाधिगतजीवसाक्षिणः शुद्धेन सहैक्यं प्रतिपादयति तत्वीश्वरेण
सह विच्छिन्नविशिष्टं स्यादथवोपहितं भवतु द्वेऽप्यीश्वरकोटी तस्माच्चिच्छिन्नातीतपरं सन्मात्रं हंत
र्यामीति मेवं ॥ यच्चिच्छिन्नत्वपहितमीश्वरसाक्षित्तचिन्मात्रं सदेवकोप्युपाधिस्तस्य भेदको न भवति वा
द्रापितस्य स्वरूपाखंडावस्थावेकेन विद्रुपाधिनातिरोधापितास्यात्तस्मिन्भेदोपि वाल्पनीयः ॥ यथाद्य
टोपाधिर्निरंशाकाशे घटाकाश इत्यंशत्वं कल्पयति तथा विच्छिन्नं निरंशे खंडे विशिष्टांशं दर्शयति
॥ तस्माद्वि शिष्टांशोंशत्वमीश्वरत्वं च वास्तवं न त्साक्षिणित्वोपचारिकासुपलक्षितधर्मवत् ॥ ईश्व
रसाक्षिणः सन्मात्रावस्थायाश्च एतदेव वैल क्षण्यमेतद्विना न भेदो न भ्रांतिश्च ॥ साक्षी चेता केवलो नि
र्गुणश्चेति स्वरूपलाक्षणिकायां श्रुतौ यः साक्षिपदप्रयोगस्स ईश्वरसाक्षिभावे ह्युपवर्णितः ॥ नन्वजी
रू

वसात्यभिप्रायेण ॥ तस्मादीश्वरसाक्षिणो निर्गुणसन्मात्राद्भेदो न संभवति ॥ ययेदं धार्यते जगदिति गीतायाः
॥ विच्छक्तिव्यवधानेन जगत्स्थितिर्भवति ॥ यदि शक्त्यतीतनिर्गुणपदं प्रकटं स्यात् तदा मदहङ्कायं वस्तु मनु घु
तमिति प्रमाणेन जगत्स्थितिर्न स्यात्तस्मादीश्वरसाक्षिणः शक्त्युपाधिसन्निहितत्वात्सर्वान्तर्यामीति ॥ ॥
इत्यद्वैतादित्यत्रयनारायणे सप्तमार्के पक्षिराजदीक्षिमनसंवादे श्रीहरिहरस्वरूपनिर्णयार्थत्रयनि
क्रमवर्णनं नाम पंचमो रश्मिः ॥ ५ ॥ पक्षिराडुवाच ॥ अथात्र मूर्तित्रयनिर्णये यन्मतद्वयं तद्व्याख्यामि शृ
णु ॥ केचिदाहुर्यत्सर्वनिषेधावधिभूतं शक्तेः परं सन्मात्रं तत्तु दक्षिणामूर्तिशिवपदं ॥ यच्छक्त्युपहि
तमीश्वरसाक्षि तद्विष्णुपदं ॥ यच्छक्तिविशिष्टं तच्चतुर्मुखपदमिति ॥ मूर्तित्रयमध्ये तद्भावमवलंब्य
देवयोनावतरति ॥ यच्चिच्छक्त्युपहितं तदेव शक्तेः परं सन्मात्रमुभयोर्भेदो नास्ति तस्मात्कृतौ स्मृता
वपि विष्णोरात्मा शिवः शिवस्यात्मा विष्णुरित्यभेदं प्रतिपादितं ॥ प्रपंचोपशमं शांतं शिवमद्वैतमिति
श्रुतिर्यच्चिच्छक्तिपरं शुद्धं तत्परा ॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतिः शबलसाक्षि
परा ॥ अपरे त्वाहुर्यत्सन्मात्रं शक्तेः परं तन्निर्विकल्पावमवाङ्मानसंवेरयिकेन गुणेन निर्दिष्टं वो न ल
क्षणेन लक्षितं वो न नाम्ना ख्यापितं न भवति ॥ तस्माद्यदीश्वरसाक्षि तद्विष्णुपदं यत्परा विशिष्टं तच्छि
वपदं यन्महत्तत्त्वं तद्विरिंचिपदमेतद्भावमवधार्य मूर्तित्रयमध्यवतरति ॥ परा विशिष्टांशो जीवसाक्षि
रूपेण सर्वस्मिन् जगति व्यापकस्तस्मात्स भवनाम्ना ख्यापितः परा विशिष्टांशो हीश्वरस्तस्मात्तस्मि

स. न्नीश्वरनामप्रयोगः॥ शक्तिविशिष्टं शब्दद्वयमर्थद्वित्वं बोधयति शक्तं शक्तस्मात्तस्यार्धनारीवेषत्वं च्यते
९५ अपराविशिष्टत्वाद्विविच्य प्रथमं जीवः शिवस्तु जीवसाक्षीत्येवं भण्यते॥ उपहितभावान्नारायणो वतर
95 तिविशिष्टभावेन नरोवतरति तस्मादुपहितो नारायणो मूलं विशिष्टो नरो मूलमित्यमनादितः प्रकाश
ते॥ नारायणो विसृजन्नरो हि शंकर इति॥ पूर्वं समत्वाद्यापि नरत्वादुः॥ वेषोपि नामाप्यवतारे संभवितुं
मर्हति मूलेन प्राक्यते॥ नरपदं जीववाचकं शिवपदे जीवत्वं न संभवति॥ अवतारे यदि नारायणस्सां
ब शिवं तपसा तोषयामास तद्भगवांश्छिवस्तस्मै सर्वास्त्र शस्त्राण्यदत्त तदा नारायणस्सर्वास्त्र शक्तिं
संगृह्य नरावतारं प्रकाशयामास॥ तस्माद्विधेयुक्तिर्न संभवति॥ शक्तेः एवं पदं च शक्त्युपहितपदं च
द्वयोर्मध्ये भेदकल्पनात्तु खिताद्वलुप्तं ह्युपाधिद्वयं मायाजालं जगज्ज्ञातिता वनत उभावद्वयं भासते
जगत्युपशांते सति एकमेवाद्वितीयमिति तस्मात् ज्ञानद्वयं जगत्सापेक्षकं तौ भावाववलंब्य हरिह
रौ द्वे वयोस्तावद्वनवतः॥ तस्मात्पूर्वोक्तसिद्धांत एव समीचीनः पुनस्तेवदंति॥ यत्कृष्णः परं तद्वल्लक्ष
णमचिंत्यमनिर्देश्यं भावातीतं॥ यद्भावातीतमलक्षणं तच्च न जगन्न ग द्वैपक्षाभावाभावांतहि लक्ष ण
भवति तस्मान्नद्भावद्वयं जगत्सापेक्षकं यद्भवद्भिरुक्तं तन्न संभवति॥ यच्छिववरदत्तस्त्र शस्त्र शक्तिं गृही
त्वा नारायणो नरावतारं चकारेत्यन्यक्तिः शिवापेक्षया भिन्नानभवति तस्मान्नरः शिवांशएव॥ ब्रह्म
कल्पसमाप्तौ सत्यां मूलप्रकृतौ विरिंचेर्लयो भवति तथा हरिहरयोर्लयः प्रकृतौ न भवतीति सिद्धांतः॥ ९५

यच्चिच्छक्तिविशिष्टं तत्प्रकृतेः परं यद्द्विविधं चिन्मूलं तत्त्वान्तरान्तस्य लयोऽपि प्रकृतौ न स्यात्तस्मान्महत्तत्त्व
मेव द्विविधं चिन्मूलं शक्तिविशिष्टांशः ॥ शिवमूलं तदुपहितांशो हरिमूलमेतद्भावान्महत्त्वत्रयमप्यवतरतीति
सत्यं ॥ इत्यद्वैतादित्यउत्तरायणे सप्तमार्कपङ्क्तिराजदीप्तिमत्संवादे श्रीहरिहरस्वरूपनिर्णयमतद्वय
निरूपणं नाम षष्ठो रश्मिः ॥६॥ पङ्क्तिराज उवाच ॥ अस्मिन्विषये त्वन्य आशङ्का ॥ परमपुरुषस्त्वेव एव यच्चि
च्छक्त्युपहितः स एव चिच्छक्तेः परस्तयोर्भेदकल्पनमनुचितं ॥ चिच्छक्तिविशिष्टस्तु तन्मात्रात्यापन्न
त्वेन तद्रूप एव ॥ चिच्छक्तिस्तु विभूतिरूपा तद्विशिष्टो विभुरूपः तदुपहितस्तु विभोर्विभुरूपः ॥ यद्विनां
तोऽस्ति मम दिव्यानां विभूतीनामिति प्रमाणेन विभूतीनां नानात्वादेकस्याश्चिच्छक्तेर्नानाविभूतिस्वरूप
त्वं कथं संभवेदिति शंकेत न तद्धि परस्य शक्तिर्विविधैव श्रूयत इति प्रमाणेनैवोक्तत्वाच्चिच्छक्तिर्नानाविभूति
रूपा भवति ॥ यथा चिच्छक्तेर्नानाविभूतिस्वरूपत्वेन नानात्वं तथा तद्विशिष्टस्यापि नानाविभूतिद्वारात्या
पन्नत्वेन नानाविभूतिस्वरूपत्वं ॥ वस्तुगत्या शक्तिगतं नानात्वं तद्विशिष्टे ज्ञानेनारोपितं सन्नानात्मा
त्म्येऽपि भासते ॥ हे शिशो विभोर्विभुरिति यदुक्तं तद्देवपुराणादिस्थपरमात्मपरब्रह्मपुरुषोत्तमदेव
देवपरमेश्वरपरात्परादिशब्दप्रतिपाद्यार्थतात्पर्यकं ॥ विभुत्वं व्यापकत्वं विभोर्विभुत्वं व्यापकस्य व्याप
कत्वं वक्तव्यमतस्तदुभयमेकस्मिन्नात्मनि कथं संभवतीति चेत्पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत ॥ इति श्रुत्यैकस्यैव पूर्णत्वं पूर्णात्पूर्णत्वं चाभिहितं तथैकस्य वि

स०
९९
96

भुत्वे विभो र्विभुत्वं चाविरुद्धं॥ तस्माद्विभुः स एव विभो र्विभूरपि स एव विच्छत्तिरपि तद्भिन्ना न भवति किं तु
रवेः प्रभा चंद्रमसः कला च यथा भिन्ना न भवति तद्वत्॥ यतः सर्वव्यापितद्रूपत्वमतः स्वतंत्रः स्वाधीनमायिकः॥
॥स्वशक्तिं प्रकाशयति संहरति च॥ यदा शक्तिं प्रकाशयति तदा दिव्यरश्मिभिः सूर्यवद्रश्मिस्थानीयानंतवि
भूतिभिर्देदीप्यते॥ तस्यैवाद्वैतादित्यसंज्ञा॥ एकैकविभूत्या भगवत एकैकनाम प्रसिद्धमेवमनंतविभूति
भिरनंतनामानि प्रसिद्धानि तेभ्योऽनंतनामभ्य एव पुराणेतिहासादिषु सर्वसहस्रनामसंग्रहः कृतः॥ त
त्र तत्तन्मतभेदेन विष्णुसहस्रनाम शिवसहस्रनामानि प्रसिद्धानि॥ तन्निर्णयस्त्वग्रे भविष्यति॥ विच्छ
त्तिर्विभूतिमयी॥ अपरा तु गुणमयी परापरयोर्मेलनानंतरं समयोनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहमि
ति प्रमाणेन सर्वविभूतिबीजं महत्तत्त्वे गर्भितं सद्भिन्नभिन्नरूपेणावतरति॥ अत एव सर्गादारभ्य गु
णविभूती परस्परसंसृष्टत्वेन तादात्म्यापन्ने॥ देशकालाद्यंतमनोबुद्धिप्राणभूतादय एते सर्वे विभू
तिविशेषा एव॥ तथैवेंद्रचंद्ररविवरुणयमाग्न्यादयो देवाश्च पितन्नद्विभूत्यंशेनावतरंति॥ तास्व
सर्वासु विभूतिषु काश्चन सौम्याः काश्चन क्रूराः॥ सौम्यविभूत्यनुसारेण देवर्ष्यादयः क्रूरविभूत्य
नुसारेण दैत्योरगादयः॥ महत्तत्त्वव्याकरणानंतरं प्रथमं देवादीनां सृष्टिर्जाता॥ यथा सूर्ये रश्म
यस्तथा परमपदे विभूतय एवं विराट्पदे सर्वे देवादयोऽवयवभूताः॥ परं पदं स्व[illegible]राट् महत्त्व
दं विराडेवं परमपदं श्रेयो विराट्पदं प्रेयः॥ देवादिसृष्ट्यानंतरं मनुष्यादिसृष्टिर्देवादिद्वारा न ९९

त्रद्विभूतिभ्य एव जाता॥ तत्र देवपक्षपातिमंतः सौम्यविभूतिभ्य असुरपक्षपातिमंतः क्रूरविभूतिभ्यः॥
पश्वादयो मनुष्याधीनाः मनुष्या देवाद्यधीना देवादयो विभूत्यधीना विभूतयो विभोर्विभोरधीनाः॥
दीप्तिमानुवाच॥ भो गुरो देवादयः सौम्यविभूतिजा असुरादयः क्रूरविभूतिजा इति यदुक्तं तत्र देवादी
नां मध्ये यमदुर्वासस्यादयः क्रूरा असुरादीनामपि मध्ये प्रह्लादशेषादयः सौम्याश्च दृश्यंते ऽ तत्तत्क
थं संगच्छते॥ पक्षिराज उवाच॥ देवर्ष्यादयो जातिमात्रेण सौम्यविभूतिजा असुरोरगादयस्तु जा
तिमात्रेण क्रूरविभूतिजाः॥ परंतु देवा अपरशान्तिनाशका असुरास्त्वपरशान्तिपालकाः स्वर्गादार
भ्य सौम्यविभूतिषु क्रूरविभूतयो ऽभिभूय तिष्ठंति तथा क्रूरविभूतिषु सौम्यविभूतयः॥ अतो ऽ स्व
र्गादिषु प्रह्लादविभीषणादय उरगादिषु शेषवासुक्यादयः सौम्यविभूतिमंतो जाताः॥ देवर्ष्यादि
ष्वपि यमसूर्यरुद्रदुर्वासस्यादयः क्रूरविभूतिमंतो बभूवुः॥ परंतु ते यमादयः सर्वे क्रूरविभूतिम
त्वेप्यपरापालका न भवंति किंतु तन्नाशकाः एवं ग्रहनक्षत्रादिषु केचन सौम्यविभूतिजाः केचन
क्रूरविभूतिजाश्च॥ एवमेव मनुष्यतिर्यग्गुल्मिन्नजातिषु केचन सौम्यविभूतिं केचन क्रूरविभू
तिं चावलंब्योत्पद्यंते॥ तत्र नरेषु देवपक्षपातिमंतः सौम्यविभूतिजा असुरपक्षपातिमंतः क्रूरविभूति
जाश्च॥ तिर्यक्षु व्याघ्रभल्लूकादयः सर्पवृश्चिकादयो मकरजलौकादयः श्येनोलूकादयश्च क्रू
रविभूतिजाः॥ गवाश्वकुरंगादयो ब्राह्मणीनकुलादयो मीनकूर्मादयः पारावतशुकादयश्च॥

स० ९८ सौम्यविभूतिज्ञाः॥ उद्भिज्जेषु कटुतीक्ष्णफलवंतो तीक्ष्णगंधयाः कंटकिनश्चतरुगुल्मलतांकुर
विभूतिज्ञाः॥ मधुरफलवंतः सुगंधयश्चतरुगुल्मलताः सौम्यविभूतिज्ञाः॥ एवंप्रकारेण सर्वं च रा
चरात्मकं जगद्भगवद्विभूतिमयं॥ अत एव तानि तानि नरपशुपक्षिकीटपतंगतरुगुल्मादिषु भगवद्वि
भूतिविनोदं दृष्ट्वा प्रसन्ना विहरंति॥॥ इत्यद्वैतादित्यउन्नरायणे सप्तमार्कोपत्तिराजदीप्तिमन्त्रवादे
श्रीहरिहरस्वरूपनिर्णयमध्ये भगवद्विभूतितात्पर्यनिरूपणं नाम सप्तमो रश्मिः॥७॥ पक्षिरा
ज उवाच॥ पुराणादिष्वेवं वर्णितं॥ लोके अमुकपुराणे अमुकदेवानामवताराः॥ यथा युधिष्ठिरविदुरौ
धर्मावतारावेवं भीष्मद्रोणादयो वसुबृहस्पत्यादीनामवतारा इति॥ तत्रैवं विचार्यते यदि धर्म एव
युधिष्ठिरादिरूपेणावतीर्णः स्यात्तर्हि कस्मिन्काले स्वयमेकांतःकरणविशिष्टादिविस्थितः सन्नि
हलोके ततः करणद्वयविशिष्टयुधिष्ठिरविदुररूपेणावतीर्णः कथं भवेत्॥ यदि द्युलोकं विहा
य आगत इत्युच्यते तर्हि युधिष्ठिरपरीक्षार्थं धर्मो यक्षरूपेणागत्य युधिष्ठिरेण साकं प्रश्नोत्तररूपसंवा
दं कृतवानिति प्रसिद्धं तत्कथं संगच्छेत॥ एतन्निर्णयस्त्वेवं॥ धर्मो यां परमविभूतिमवलंब्यावतीर्णस्ता
मेवावलंब्य युधिष्ठिरविदुररूपेणावतीर्णोऽस्तीति॥ धर्मयुधिष्ठिरविदुराणामवतरणानंतरमपि सा पर
मविभूतिस्तत्रैव तिष्ठति॥ एतद्धर्मादीनामवस्थात्रितयं योनिदर्शनमेव न त्वेयं॥ परं त्वेते भिन्नजीवाः॥
जीवविभूत्योरैक्यं भेदो नास्तीत्युक्तं चेदुच्यते विभूतिरंतर्यामिणो तर्यामी तु विभोर्विभुः॥ अंतर्यामि
९८

श्रुतिश्चमालेनांतर्यामीयथाभूतेंद्रियादीन्यमयतितथाजीवमपियमयतीत्युक्तंतस्मात्तयोर्भेदस्त्वावश्यकः ।। जी
वोविभूत्यधीनः ।। विभुर्बलात्कारेणशास्त्रव्याख्यानुसारेणजीवंयमयतिजीवविभूत्योर्भेदस्त्वयव्यावहारिकजी
वस्यैवविभूतेर्भेदः पारमार्थिकजीवस्तुअहमात्मागुडाकेशसर्वभूताशयस्थित इतिश्रमालेनविभूति
विशेषः परंतुभ्रांतिजनताहात्म्याव्यावहारिकाधर्मस्वात्मन्यारोप्यभिन्नोस्मीतिकल्पनेभ्रांतिविगमेस्वस्य
तदंशत्वंज्ञात्वातत्रैवलीयते ।। श्रीश्निमानुवाच ।। भोस्तुरोत्वयापूर्वंद्विविधर्मास्थितेसत्येवयुधिष्ठिरविदु
रौभिन्नभिन्नांतःकरणौततोधर्मएवतदुभयरूपेणकथमवतेरेद्विति यां परमविभूतिमवलंब्यधर्मोज्ञात
स्तामेवंवलंब्यतादृभाववतीर्णविस्तुक्तं ।। तच्चममायंसंशयोदेवानांकामरूपित्वेनबहुरूपधारणसाम
र्थ्यंसंभवतीतिधर्मएवयुधिष्ठिरविदुररूपेणावतीर्णइति ।। पक्षिराजउवाच ।। देवानांपरमयोगिनांचबहु
रूपप्रकटनसामर्थ्ययद्यपिवर्त्ततेतथापितस्यप्रकारद्वयंतदुभयमपिप्रकृतेनसंभवति ।। तत्रैकः प्रका
रोयथासौभरिणाकायव्यूहंनिर्मायपत्नीशतेनसहभोगाःकृताः ।। सकायव्यूहः स्वल्पकालिकः योनि
जश्चतेसौभरेरवतारइतिकोपिनमन्यते ।। यथावाभारतेगदापर्वणिवैशंपायनमेजयसंवादेगौतमपु जन
त्रस्त्रितोगवार्थंस्वभ्रात्राकूपेपातितः संस्तत्रपश्चाद्यित्तसामग्रीतपोबलेननिर्मितवान् ।। ततोयत्त
भागग्रहणार्थंदेवाह्वानसमयेबृहस्पतिनेदंप्रत्युक्तंतत्रयीयुगमस्माभिर्गंतव्यंनोचेद्यत्तसामग्रीवत्स
देवानपिसृजेदिति ।। भोशिष्योतांपश्चाद्यित्तसामग्रीमपिचितस्यावतारइतिकोपिनमन्यते ।। द्विती

स॰
९८
98

यः प्रकारो विश्वामित्रेण महिषादीनां सृष्टिः कृता न तु महिषादयो न विश्वामित्रस्यावताराः तस्मात्प्रकृ
ते तत्प्रकारद्वयमपि न संभवति यदि धर्मेण योगबलेन युधिष्ठिरविदुरौ निर्मितौ स्यातां तर्हि स्वल्पकालि
कावयौ निर्जावपि स्यातां तयोर्धर्मावतारत्वमपि न स्यात् ॥ कायव्यूहस्थले मातापित्रादिसामग्री नास्ति तौ
तु मातापितृजन्यौ ॥ संयुक्ता सा हि धर्मेण योगमूर्तिधरेण ह ॥ लेभे पुत्रं वरारोहा सर्वप्राणभृतां वरमिति
भारतप्रमाणेन धर्मो येन शरीरेण कुंत्या भोगं कृतवांस्तच्छरीरं योगबलकालिकं स्यान्न तु तदुत्तोन्य
युधिष्ठिरशरीरं ॥ तस्या धर्मविभूतेर्धर्मदेवताद्वारा युधिष्ठिररूपेणावतरणे कुंती पांड्वोरभिलाषो निया
मकः ॥ विदुररूपेणावतरणे तु आणिमांडव्यर्षिशापो नियामकः ॥ या परमविभूतिर्धर्मदेवतावच्छि
न्ना तस्या विभूतेः शापमंतरा शूद्रयोन्यवच्छिन्नत्वं कथं स्यात् ॥ इत्यद्वैतादित्यउत्तरायणपद्धिरा
जदीप्तिमत्संवादे सप्तमार्थे श्रीहरिहरस्वरूपनिर्णयमध्ये भगवद्विभूतितात्पर्यनिरूपणं नामाष्टमोर
श्मिः ॥ ८ ॥ दीप्तिमानुवाच ॥ ॥ भो गुरो भवदुक्तरीत्या यथा धर्मयुधिष्ठिरविदुराणां कास्याः परमविभू
तेरवच्छेदकास्तथा बृहस्पतिद्रोणादयोऽपि न तद्विभूत्यवच्छेदकाः पृथक्जीवा इति वक्तुं शक्य
ते परं तु श्रीविष्णोरामकृष्णाद्यवताराणामपि पृथक्जीवत्वमंगीकर्तव्यं तेषामपि रामायणस्य पूर्वं सिं
ज्ञत्वमस्माभिः स्वकृतं न कृतमिति वयं राज्यभ्रष्टा वनवासादिदुःखमनुभवाम इत्यादिना श्रीरा
मवाक्येन संचितादिकर्माप्यस्तीति भाति तस्माद्त्र यद्देशेन तत्त्वमुपदिश ॥ पद्मिराजउवाच ॥ ९८

हेशिशेषा श्रीरामकृष्णाद्यवतारेषु जीवत्वं नास्ति यद्यस्ति तर्हि संचितादिकर्मापि स्यात् ॥ त्वदुक्तं श्रीरा
मवाक्यमपि मनुष्यत्वद्योतकं तुच्छलात्मकं ॥ एवं प्रकारेण श्रीरामेण बहुस्थलेषु मनुष्यत्वसूचना
र्थकापरत्वं कृतं तद्विस्तारः साधुस्तमनस्वंडिकायां द्रष्टव्यः ॥ अंशावतारान्विहाय श्रीरामकृष्णादि
पूर्णावतारेषु मनुष्यवैलवविभूतिमात्रस्यैवावतरणं तत्र चिदाभासादि जीवसंबंधः संचितादिक
र्मसंबंधो वा नास्ति ॥ अंशावतारास्तु जीवविशेषा वैलवविभूत्यंशसंस्पृष्टास्तेषामज्ञानादिसंबंधो
स्ति ॥ यदि पूर्णावताराणां जीवसंबंधः कर्मसंबंधो वा नास्ति तर्हि तेषामशनपानादिव्यवहारः
सांसारिकसुखदुःखादिभोगश्च कथं स्यादिति चेदुच्यते ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जु
न ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ इति प्रमाणेन भगवतः श्रीकृष्णस्य पूर्णावतारत्वेन जी
वसंबंधित्वाभावेन चाज्ञानेनास्पृष्टत एव धनंजयं प्रत्युक्तं तान्यहं वेदेति धनंजयस्यांशावतारत्वे
न जीवत्वसंभवेनाज्ञानं संभवतीत्युक्तं न त्वं वेत्थ परंतपेति ॥ यदि श्रीभगवा न्कृष्णोपि जीवः
स्यात्तर्हि ॥ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्म
माययेति कथं वदेत् ॥ स्वयमजत्वादिविशेषणविशिष्टः सन्नपि धर्मसंस्थापनार्थं साधुसंरक्ष
णार्थं चानेकशक्तिमन्निजमूलप्रकृतिमवलंब्य मायामानुषादिविग्रहेणावतीर्णः ॥ मूलप्रकृति
स्त्वनेकशक्तिरूपत्वेन भगवत्यविद्यमानान्संसारधर्मान्विद्यमानानिव दर्शयति ॥ श्रीभगवतोज

स० त्मकर्मादिप्रभावेमूलप्रकृतिसंबंधेनतद्भानेचाध्यात्मरामायणेरामहृदयेज्ञानकीवचनंप्रमाणं ॥ तथा
९९ हिमांविद्धिमूलप्रकृतिमितितत्सान्निध्यान्मयासृष्टंतस्मिन्नारोप्यतेऽबुधैरिति ॥ एवमादीनिकर्माणि
99 मय्येवाचरितान्यपि ॥ आरोपयंतिरामेस्मिन्निर्विकारेऽखिलात्मनि ॥ रामोनगच्छतिनतिष्ठतिनानु
शोचत्याकांक्षतेत्यजति नोनकरोतिकिंचिदित्यादि ॥ अस्मिन्नर्थेनमांकर्माणिलिंपंतिनमेकर्मफले
स्पृहेत्यादिभगवद्वचनमपिप्रमाणं ॥ किंचजन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः ॥ त्यक्त्वादेहंपुन
र्जन्मनैतिमामेतिसोऽर्जुनेत्यादिवाक्येनयोभगवतोजन्मकर्मसुखदुःखादिजीवधर्मसंबंधोनास्ति
किंतुमूलप्रकृतिसंबंधादेवेतत्सर्वंभासतइतिजानातितथास्वात्मानमप्यनन्यभावेनतद्भिन्नंज्ञा
त्वास्वीयजन्मकर्मादिसंबंधंप्रकृतिसंबंधित्वेनमत्वास्वयंनिःसंगोभवतिसविदेहकैवल्यमाप्नो
ति ॥ ॥ ॥ इत्यद्वैतादित्यउन्नरायणोसन्नमार्कंडपक्षिराजदीप्तिमत्संवादेश्रीहरिहरस्वरूपनिर्णयमध्येभग ति
वद्विभूतितात्पर्यनिरूपणंनामनवमोध्यायः ॥ ९ ॥ पक्षिराजउवाच ॥ ॥ हेशिष्योदेवमनुष्यादयःस
र्वेजगदुत्पत्तिप्रभृतिप्रलयपर्यंतमुद्भूतेप्रलीयंतेचविभूतीनांतुनाशोनास्ति ॥ देवमनुष्यादयो
नदीप्रवाहजलवत्विभूतयस्तुचंद्रतारागणवत् ॥ नहीजलेतुतज्जलंनभवतिकिंतुप्रतिक्षणंभिन्नंभि
न्नंभवति ॥ नचचंद्रतारागणस्यप्रतिबिंबःपूर्वचंद्रतारगणस्यनतद्भिन्नस्य ॥ यथाब्रह्मकल्पसमा
प्तिपर्यंतमिंद्रयमादयःप्रतिमन्वंतरंभिन्नाभिन्नाभवंतिपरंत्विंद्रादयोयांयांविभूतिमवलंब्यात्प ९९

यंते विलीयंते च सा सा विभूतिः सर्वदैकरूपा तिष्ठति ॥ देवमनुष्यादिषु बलौजस्तेजो विद्या सौंदर्यत्वमाद
यो राज्यशौर्योदार्यादयश्च भगवद्विभूतीनामेव प्रतिबिंबभूताः ॥ नराधिपो विनश्यति नराधिपत्यविभूति
स्तु न नश्यति ॥ एवं सुंदरनरनार्यः स्मरो देवदेवांगनाः यत्सौंदर्यविभूतिमवलंब्योत्पद्यंते विलीयंते च सा न
नश्यति ॥ सर्वास्तु भगवद्विभूतिषु काश्चन सौम्याः काश्चन क्रूराः परमपुरुषस्य परमविद्यात्मिके द्वे वि
भूती मुख्ये सर्वात्मिका सर्वनिषेधिका चेति ॥ तत्र सर्वात्मिका सर्वजगद्व्यापिनी जगत्प्रवृत्तौ निवृत्तिभा
वस्थापिका ॥ यावत्यः सौम्यविभूतयस्तावत्यः सर्वात्मिकाविभूतिवशास्तद्द्वारा जगत्यवतरंति ॥ अ
न्या सर्वनिषेधिका यद्भयेन सर्वे देवा अंतःकरणेंद्रियाणि च परमपदं प्राप्तुमसमर्थाः ॥ यावत्यः क्रूरवि
भूतयस्तावत्यः सर्वनिषेधिकाविभूत्यधीनास्तद्द्वारा जगत्यवतरंति ॥ प्रवृत्तौ निवृत्तिस्थापनं सत्त्वगु
णेन तस्मात्सत्त्वेन सर्वात्मिका संस्पृष्टा ॥ तामसमंतरा निषेधासंभवेन सर्वनिषेधिका तमोगुणसं
स्पृष्टा ॥ जगदुत्पत्त्यनंतरं यथा सत्त्वगुणे रजस्तमसी अभिभूते तमसि सत्त्वरजसी च तथा सर्वात्मिका
यां विभूतौ सर्वनिषेधिकाभिभूता तस्यां सर्वात्मिका च ॥ कस्मात्सर्वात्मिका यावद्बहिः प्रवृत्तिरंतर्निवृ
त्तिः सर्वनिषेधिका यावद्बहिर्निवृत्तिरंतः प्रवृत्तिश्च ॥ एते द्वे परमविभूती जगद्व्यापिके जगति यावंत उत्पत्तिना
शग्रहणत्यागादिव्यवहारास्ते सर्वे तयोः प्रभावादेव प्रवर्त्तंते ॥ आद्यंते विभूती जगत्सापेक्षिके
सगुणे तयोः परमविभूत्योरधीने ॥ सर्वात्मिका बहिष्ठः कर्मप्रारंभिकाऽतः कर्मनिषेधिका तस्मा

स· १००

जगदुत्पत्तिस्तत एव भवति परं तूत्पत्तावनुत्पत्तिभावस्यापि कात्वेनानेन विभूतावपि व्यापिका ॥ सर्वनिषे
धिकात्तु बहिष्टुः कर्मंदंत्री परंतु निषेधस्य क्रियारूपत्वेनाऽऽदि विभूतावपि व्यापिका ॥ परमपुरुषस्य
यत्नैतेन परमविभूतीतथा प्रवृत्तिनिवृत्तिमयी प्रभवात्मिका विभूतिरप्यस्ति ॥ तस्यामपि पूर्वोक्तपरमवि
भूत्योर्भावोऽभिभूय तिष्ठति ॥ सत्वतमसोः साम्यावस्था रजोगुणस्तस्मादुभयात्मिका विभूती रजोगुणे
न संसृष्टा भवति ॥ परापरमेलनानंतरं सृष्ट्यादावुभयात्मकविभूतिप्रभावेण विरंचिरवततरति ॥ स
र्वनिषेधविभूतिप्रभावेण श्रीसांबशिवोऽवतरति ॥ सर्वात्मकविभूतिप्रभावेण श्रीविष्णुरवततरति ॥
मूलपुरुषः प्रणवरूपः सर्वात्मिका सर्वनिषेधिका तदुभयात्मिका चेत्येतद्विभूतित्रयं पुरुषरूपप्रण
वस्यावयवभूताकारोकारमकाररूपं ॥ वेदः सर्वविभूतिमयः प्रणवः सर्ववेदगर्भितः ॥ सर्वं जगद्वे
दानुसारेणोत्पद्यते ॥ अस्येदं तात्पर्यं वेदस्य सर्वविभूतिमयत्वेन प्राणिमात्रं सर्वभूतानि सर्वलोकादय
श्चैतत्तद्विभूतिसत्तयैवोत्पद्यंत इति ॥ प्रणवरूपपुरुषस्य मूर्तित्रयात्मकत्वेन सर्ववेदगर्भितत्वेन च
सर्वा विभूतयस्तत्परमविभूतित्रयद्वारैव जगत्यवततरंति ॥ ॥ ॥ इत्यद्वैतादित्य उत्तरायणे सप्त
मार्कोपहितराजदीप्तिमत्संवादे श्रीहरिहरस्वरूपनिर्णयमध्ये भगवद्विभूतितात्पर्यनिरूपणं नाम दशमो
रश्मिः ॥१०॥ इति सप्तमार्कः समाप्तः ॥७॥

॥ ॥ ॥ ॥ ॥ ॥ ॥

ॐ श्रीगुरुभ्यो नमः॥ अथाष्टमार्कप्रारंभः॥ पत्निराज उवाच॥ विभूतेः प्रकारद्वयं सगुणविभूतिनिर्गुणवि
भूतिभेदेन॥ तत्र सगुणविभूतयो गुणत्रयव्याकरणेन व्याकृता भवंति तत्पूर्वं यथा बीजे पत्रशाखादिकं तथा
विच्छन्नाव्याकृतास्तिष्ठंति॥ निर्गुणविभूतयस्तु नित्या गुणसंयोगेन व्याकृता इव भांति वस्तुगत्या व्याक
रणाव्याकरणाभ्यामतीताः॥ ताः काः सत्त्वचित्त्वनिर्गुणत्वशुद्धत्वानंदत्वादिस्वरूपलक्षणात्मिकाः॥ यो
ऽयं सगुणनिर्गुणविभूतिमान्सोऽदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमित्यादिश्रुति
प्रतिपाद्यः॥ असदविदशुद्धं वा किं चिदस्ति चेत्तन्नाप्यस्त्यर्थे सच्चिच्छुद्धमित्यादिनिर्देशः वाङ्नेशकोत
अतस्सर्वथाऽनिर्देश्य एवासः॥ जगत्प्रलयकाले अपराप्रकृतिः स्वकार्येण सह विच्छन्नौ लीयते सर्वे
प्राणिनस्तत्तत्संचितैः सह सगुणविभूतौ लीयंते सगुणविभूतयो निर्गुणविभूतिषु लीयंते निर्गुणवि
भूतयः स्वरूपमात्रा एवमेवाद्वितीयमित्यवस्थां प्राप्नुवंति॥ सृष्ट्यारंभकाले तु विच्छक्तिर्व्याकृता
भवति तदा तत्तत्प्राणिकर्मसंस्कारः सगुणविभूतीरुद्बोधयति॥ ततः सगुणविभूतीनां स्वस्वविष
ये च्छा भवति तद्यथा भूतदयादित्येतद्विभूतेर्भूतसृजनापेक्षाभावनइति विभूतेः सर्वप्राणिभवनेच्छा
भर्तृविभूतेः पालनेच्छा रुद्र[illegible]निद्रा पापनाशनइति विभूत्योः पापनाशनेच्छा सुहृद्भक्तवत्सलइ
ति विभूत्योः सौहार्दभक्तरक्षणेच्छा च भवति॥ यदि भरणीयादुष्कर्मिणः पापिनो दीना भक्ताश्च न
स्युस्तर्हि भगवतो भर्त्रादिविभूतीनां तत्तदिच्छा व्यर्थं भवेत॥ एवं तत्तत्प्राणिकर्मसंस्कारानुसारेण

सर्वासां सगुणविभूतीनां स्वस्वविषयप्रवर्तनेच्छा भवंति ॥ तदा गुणमयलोहितशुक्लकृष्णरूपायाः
प्रकृतेर्व्यावरणं भवति ॥ पुरुषो ह्यसंगः प्रकृतेस्संगः पुरुषे यथाभ्रसंयोगो रवौ पुरुषसंगः प्रकृतौ यथा
रवेः संयोगोभ्रेन संभवति तथा ॥ परंतु यथाभ्रं रवेर्भासया भाति तथा प्रकृतिः पुरुषभासया भाति ॥ प्रकृ
तिः पुरुषमोहनार्थं स्वात्मानं लोहितशुक्लकृष्णरूपं इति त्रिधा दर्शयति ॥ लीलया प्रकृतिगुणत्रयादना
त्मकविकारनिवारणार्थं गुणानां विशुद्ध्यर्थं च पुरुषएकोपि प्रकृतिवत्स्वात्मानमपि गुणवाकारे
ण त्रिधा दर्शयति भूतादिव्यावरणानंतरं ब्रह्माहरिहरश्च देवयोनौ पुरुषो यत्स्वात्मानं त्रिधा दर्शया
मास तदंशं गृहीत्वावतरंति ॥ गुणेष्वनात्मकविकारः कोवा सत्वेस्तुत्वं च ज्ञानं च ॥ तस्मादनात्मकवि
षयस्तुत्वविषयज्ञाननिवारणार्थं हरेः प्रवृत्तिः ॥ रजसि प्रवृत्तिनिवृत्तिश्च विकारौ विधौ प्रवृत्तिर्नि
षेधनिवृत्तिर्विरिंचिप्रयोजनं ॥ तमसि हिंसा च विस्मृतिश्च प्रकृतेर्विकारौ ॥ अनात्मनो विस्मृत्यर्थं
कर्माकर्मादिद्वंद्वहिंसार्थं च हरस्य प्रवृत्तिः ॥ भूतादिसर्गादौ पुरुषश्चैकोपि प्रकृतेर्वशाद्धरिहरवि
रिंचियदृति त्रिधा भाति ॥ यथा गुणत्रयमपि प्रकृत्यवस्था प्रकृतेर्भिन्नं न भवति तथा हरिहरविरि
चयोपि पुरुषाद्भिन्ना न भवंति ॥ यथैकस्य सत्वगुणस्य ज्ञाने रजस्तमसोः प्रकृतेश्च ज्ञानं भवति ॥ य
थैवैकस्य मनसो ज्ञाने चित्तादिज्ञानं भवति तथैकस्य हरेरीश्वरस्य वा ज्ञाने परमपुरुषस्य ज्ञानं भ
वति ॥ हरीशो हरिहरौ परस्परमेकस्वरूपौ ॥ परमपुरुषो नेत्रस्थानीयस्तस्योन्मेषनिमेषस्या

श्व:
१०२
102

नीयौ हरिहरौ ॥ तदुभयात्मको विरिंचिः प्रवृत्तिनिवृत्तिरूपसंकोचविकासभूतवामलधर्मवत्त्वेन तत्सक
ललोकोद्भवत्वं वामलासनत्वं च ॥ तस्य हरिहरभावप्राप्तत्वेन हरिहरौ प्रतिष्ठाभूतौ ॥ नेति नेत्यात्मा अगृ
ह्यो न हि गृह्यत इत्यादिश्रुतिप्रतिपाद्यः सर्वनिषेधात्मकः श्रीहरभावो विरिंचिं निवृत्तावावर्षति ॥ स
र्वं खल्विदं ब्रह्मेति श्रुतिप्रतिपाद्यः सर्वात्मकः श्रीहरिभावस्तं प्रवृत्तौ प्रेरयति ॥ वेदात्मना ... विदाह
इति श्रुत्या प्रवृत्ति[illegible]निवृत्त्यात्मकविरिंचेर्विधिनिषेधात्मको वेदः स्वरूपत्वेन वेदस्य ब्रह्मसंततिकात्वेन
च ब्रह्मेति संज्ञा ॥ पुराणादौ श्रीहरिसकाशाद्विरिंचेरुत्पत्तिः श्रीहरसकाशान्नाशश्चोपलभ्यते तदेवं
श्रीहरेः प्रवर्तकत्वेन तदुत्पादकत्वाद्धरिः श्रीहरस्य निवर्तकत्वेन तन्नाशकत्वाद्धरः ॥ विरिंचिः प्रभवात्म
कविभूतिमत्त्वेन सर्वविभूतिमयवेदानुसारेण सर्वजगदुत्पादयामास ॥ प्राणावयवरूपकार
णीभूतविरिंचिः प्रभवात्मकविभूतिप्रभावेण रजोगुणोद्रिक्तः सन्नहंकारत्रयोपाधिको देवरूपे
ण प्रथमजीवो जातः ॥ प्रथमतः परमपदादवतीर्य मूर्तिमान् भवदिति तस्य जीवत्वमिहलोकपरलो
कदेवमनुष्यादीनामुत्पादकत्वेनेश्वरत्वं च ॥ प्रवृत्तिनिवृत्त्यात्मको राजसाहंकारस्य प्रभवात्मविभू
त्यवच्छेदकत्वेन विरिंचिर्विधिदेवो विधीयते तत्र प्रवृत्तिं वेदेन शुद्धिविधिध्यते तत्र निवृत्तिं योगीह्यन्यरा
जसाहंकारस्य[illegible]मकरोत् ॥ विरिंचिविमतानुयायिनो गिरो भृग्वादयो महर्षयः कर्दमादिप्रजापतयो गौ
तमभरद्वाजवसुभयोन्याद्यश्च ॥ यज्ञदानतपःस्वाध्यायजपहोमादिविधिप्राप्तानुष्ठानेनैव कालं या

पर्यंति ॥ ब्रह्मकल्पसमाप्तावेतस्य समष्टिविरिंचेः लयो भवति न तु कारणीभूतस्य ॥ पुनर्द्वितीयकल्पे का
रणीभूताद्विरिंचेः कार्यभूतविरिंचेः प्रादुर्भावो भवति ॥ सोपि शेषः परात्मकाहंकारस्य यथा यथा प्राब
ल्यं न तथा त[illegible]स्वरूपावरणाधिकं भवति यावत्स्थूलस्य ह्यमाहंकारो मनश्यति तावद्विनयत्तत्स्थवस्थान
प्राप्यते ॥ ॥ ॥ इत्यद्वैतादित्यउत्तरायणे छष्टमौर्वपक्षिराजहरीश्रिमत्संवादे श्रीहरिहरस्वरूपनिर्णयमध्ये भ
गवद्विभूतिनान्वयनिरूपणं नाम प्रथमो रश्मिः ॥ १ ॥ पक्षिराज उवाच ॥ ॥ प्रहृत्निनिहत्यान्तकं चतु
राननो हरिहरभावगर्भितत्वेन स विग्रहो भूत्वा तयोर्भावं प्रकाटयति ॥ प्रथमं चतुराननादेकादशरु
द्राव भूतस्तत्र सर्वपूज्यस्त्रिलोचनः शंकरः सर्वनिषेधकविभूतिमवलंब्यावतीर्णः प्रकाशमानस्ता
मसाहंकारं चिच्छेद ॥ दक्षयज्ञध्वंसकामदहनपार्वतीविवाहादिव्यवहारो विग्रहवतानेनैव ॥ ता
मसाहंकारस्य सर्वनिषेधिकाया विभूतेरवच्छेदकत्वेन हरस्य शरीरत्वं ॥ अतस्तच्छुष्कवनविहा
रश्मशाननिवाससर्पकुंडल[illegible]रुंडमालाभूषणभस्मलेपनगजचर्मवसनविषभोजनजटामुकुटधार
णा[illegible]दिसर्वमंगीकृत्य सर्वविकारान्नाशयति ॥ एतच्छुद्धिद्वारा शांतरस प्राधान्येन तस्य प्र[illegible]त्वं ॥ त
स्य चराचरात्मकजगतोः तकत्वेन सर्वं तस्माद्भिन्नत्यतस्तएव स सर्वपूज्यः ॥ सर्वनिषेधिका विभूतिः सर्व
करविभूतीनां मूलं सर्वैः स्वराजात्या करविभूतिजातस्तस्माच्छिरवात्सर्वान्तरान्प्राप्ताः ॥ सनकादयो दूर्वा
सोजडभरतवामदेवाद्यश्चैते सर्वे श्रीहरमतानुसारिणः ॥ विरक्तिमंतः स्वहतदुष्टान्त्यागिनो विष

श्रु०
१०२

103

यातीतैः सांख्यनिष्ठाश्च ॥ तेषां देहभावेनास्ति बहिरंतश्च संसारनिवृत्तिः ॥ दीप्तिमानुवाच ॥ भो गुरो सन
कादयो वैष्णवा इति प्रसिद्धं ॥ भवद्भिरुक्तं शैवा इति तत्कथं ॥ पक्षिराज उवाच ॥ हे शिष्य शोभनिवृत्तौ स्वरू
पस्थितिः किंचित्सुलभा भवति प्रवृत्तौ तु दुर्लभा ॥ तद्यथा वने गिरिगिरौ वा कंदरा कंदरायां विविक्तप्रदेशे
स्तत्र स्वरूपस्थितिः कदाचित्सुलभा भवेत् ॥ नगरे गृहे गृहे सभासभायां व्यवहारस्तत्र स्वरूपस्थिति
र्दुर्लभैव ॥ श्रीहरेः संसारप्रवृत्तावपि नित्यप्रबोधोऽस्ति एतदद्भुतभावे दृष्ट्वा हरोऽपि तद्भक्त्या सदा राम
रामेति जपति ॥ एवं हरेर्विष्णुभक्तत्वेऽस्ति प्रवृत्तत्वे सनकादयो हरिभक्ता इति ॥ स्कंदस्य शैवपुराणत्वे
न सनकादीनां तच्छुद्धान्तत्वेन श्रीहरवत्सांख्यनिष्ठावत्त्वेन च शैवत्वं सिद्धं ॥ हे शिष्य शोभन इदं सृष्टानंतरं विरि
चेर्मरीच्यादिमहर्षयो जाताः ॥ मरीचेः कश्यपः कश्यपाद्द्वादशादित्याः ॥ तत्र सर्वपूज्यः श्रीविष्णुश्चतुर्भुजश्च
क्रायायुधधरस्तामेव सर्वात्मिकां परमविभूतिमवलंब्यावतीर्णः ॥ सात्त्विकाहंकारस्य तस्याः परमवि
भूतेरवच्छेदकत्वेन तच्छुद्ध्यर्थे विषयप्रकाशकसात्त्विकाहंकारस्य विरोधिस्वरूपप्रकाशकाविवे
कधर्मं पालयति तस्मादर्थान्तदहंकारस्य नाशो भवति ॥ स एव लक्ष्मीपतिः स एव गरुडासनः ॥ देवा
ऋषयश्च जात्या सौम्यविभूतिजाः सर्वात्मिका विभूतिस्तु सर्वसौम्यविभूतीनां मूलभूता ॥ अतो दे
वर्ष्यादयो यदा परा शक्तिपालकाः क्रूरविभूतिमद्दैत्यैः पीडिताः संतः श्रीहरिं शरणं प्राप्नुवंति ॥ तदा
श्रीहरिः कदाचित्स एव देवविग्रहेण वा कदाचिन्मत्स्याद्यवताररूपेण स्वरा सुरसंपद्धतश्च संहृ
नः

त्वधर्मरक्षणं देवर्ष्यादिपालनं च करोति ॥ श्रीहरेः संसारे प्रवृत्तिरनन्यभावेन ॥ तस्याः स्वव्यतिरिक्तापदा-
र्थाभावेन न तद्दृष्टौ कस्यापि भानं नास्ति यन्निवारयेत् ॥ तस्मात्स सदाविरोध्येव परं त्वधर्मविरोधिधर्मपाल-
यतीति तं भक्ता भक्तवत्सलं ध्यायंति ॥ दीप्तिमानुवाच ॥ भो गुरो देवादिपालनार्थं धर्मरक्षणे कृते सुरा-
णां नाशे च कृते सति सर्वाविरोधित्वं कथं ॥ पक्षिराज उवाच ॥ यदि स विरोधं पालयेत्तर्हि विरोधी भवेत् ॥ अ-
विरोधपालकत्वात्स सदाविरोध्येव ॥ अविरोधधर्मपालनेन विरोध्यधर्मस्य नाशाद्विरोधिनामसुराणामार्थि-
कनाशो जातः ॥ यथा शुक्तिज्ञानं शुक्तेरविरोधि शुक्तावारोपितरजतज्ञानं तु शुक्तिज्ञानविरोधि शुक्तियथार्थ-
ज्ञानपालनेन तद्विरोधिरजतज्ञाननाशाद्वार्थिकआरोपितरजतस्यापि नाशो भवति न तद्वत् ॥ अत एवासुराणा-
मत्र शस्त्रोद्यपातो द्वंद्वारकाणां स्वमनोवृत्तिपातनमेवासुराणां निंदा सुराणां स्तुतिर्गोपवधूनामुपहा-
स्यवाक्यानि च तस्य समानि भवंति ॥ किंच षोडशसहस्रगोपिकाभिः क्रीडन्नपि सर्वदाऽनादिब्रह्मचारी नि-
र्विकारी च प्रसिद्धः ॥ गंभीरभावत्वेन शृंगाररसप्राधान्येन च तस्य श्यामवर्णत्वं ॥ प्रवृत्तौ सत्यामपि निवृ-
त्तिस्थापकत्वेन समरागमदाद्यंगरागलेपनं वनमालाकौस्तुभकिरीटादिधारणं च करोति ॥ सर्वात्मकत्वे-
न स्वयमेव भूषणं स्वयमेव भूषितः स्वयमेव भोग्यं स्वयमेव भोक्ता च ॥ अहमन्नमहमन्नमहमन्नं अह-
मन्नादोऽहमन्नादोऽहमन्नाद इति श्रुतेः नारदादिदेवर्षिरुद्रादिदेवावसिष्ठपराशरबादरायणादिमह-
र्षयो जनकाजातशत्रुजैवल्यादिराजर्षयश्च श्रीविष्णुमतानुयायिनः ॥ तेषां संसारप्रवृत्तौ निवृत्तिभावाः

ग्रं०
२०४
104

फलाकांक्षाया यत्तु पुरुषादिकर्मप्रवृत्तावपि पुण्यपापसंबंधाभावः प्राज्ञप्राज्ञयोः समविषमत्वं च भवति ॥ एवं नि
ष्ठावं तौ वैसवाद्द्रति तात्तव्याः ॥ इत्यैश्वैतन्नादित्यउत्तरायणोत्पन्नमार्कंडपक्षिराजदीप्तिमत्संवादे श्रीहरिहरस्वरू
पनिर्णयो नाम द्वितीयो रश्मिः ॥ ॥२॥ ॥ दीप्तिमानुवाच ॥ भोगुरो कार्यभूतविरिंचेः प्राकृन्मूर्तिमत्त्वं वास्त्या
पिनास्तीति त्वयोक्तं तत्कथं संगच्छते श्रीहरेर्वटपत्रशायिनो मूर्तिमतः सत्वात् ॥ पक्षिराज उवाच ॥ हे शि
शो श्रीहरेः सकाशाद्विरिंचेरुत्पत्तिरिति पुराणादिषु वर्ण्यते तत्स्यैवं तात्पर्यं प्रवृत्तिधर्मस्य श्रीहरेः स्वाधी
नत्वाद्धरेः सकाशात्तदुत्पत्तिरिति ॥ यद्यपि विरिंचेः प्राकृन्मूर्तिमत्त्वं नास्ति तथापि पुराणादिषु यन्मूर्तिमत्त्वं
प्रतिपादितं तत्तत्पंडितपा[illegible]मरसाधारण्येन सम्यक् बोधनार्थं ॥ एवं वटपत्रशायित्वकथनमपि वटस्य च्छ
य इति व्याकरणप्रामाण्येन वटशब्दस्याच्छयार्थवत्त्वं ॥ पत्रशब्दस्य पदबोधकत्वं शायीति कलारूपेण वि
राजमानत्वबोधकं तथा चाच्छयपदे कलारूपेण विराजमान इति ॥ हे शिशो यदीदं तवाभिमतं तेन भव
ति तदार्थांतरं वक्ष्यामि शृणु ॥ चतुराननादित्यविरूपेत्तया परस्य विष्णोरवस्थाचतुष्टयं तस्य चतु
र्व्यूहसंज्ञा ॥ वासुदेवः संकर्षणः प्रद्युम्नोऽनिरुद्धश्च ॥ निर्गुणशुद्धचैतन्यावस्था वासुदेवः ॥ कारणी
भूतप्रकृत्युपाधिकः संकर्षणः कार्यरूपप्रकृत्युपाधिकः प्रद्युम्नस्तत्कार्यभूतमहत्तत्त्वोपाधिकोऽनि
रुद्धः स एव वटपत्रशायीत्युच्यते ॥ तन्नाभिकमलोद्भवो विरिंचिस्ततो जगदुत्पत्तिः ॥ अनिरुद्धावस्था
याः सगुणत्वेन तस्य मूर्तिमत्वस्वीकारेऽपि बाधकं नास्ति ॥ एतत्पद्येऽस्त्वरपीडितावृक्षादयो देवा एनमे

व विष्णुं शरणं प्रपद्य इति ॥ सर्वात्मिका विभूतिर्यथा जगत्कर्त्री जगति विभूतीनामवतरणे च हेतुस्तथा जगन्ना
शे विभूतीनां लये चापि हेतुः ॥ प्राकृतिकप्रलयानंतरं जगतो ऽवतिष्ठति सर्वात्मिका विभूतिः पुनर्जगदुत्प
त्त्यर्थं तदंतस्यांतकरी भवति ॥ एवं सर्वनिषेधिका विभूतिरपि जगन्नाशे विभूतीनां लये च यथा हेतुस्तथा ज
गदुत्पत्तौ जगति विभूतीनामवतरणे च हेतुः ॥ सकलब्रह्मांडनाशं कृत्वा जगदंतमुत्पादयति नाशार्थं न
त्पत्तियोगिपदार्थापेक्षावत्त्वंतरमिति जगदुत्पत्तिहेतुरपि ॥ जगदुत्पत्तिनाशौ सकलविभूतिप्रादुर्भावलयौ
तदुभयपरमविभूत्यधीनावतस्तयोर्विभोर्विभुत्वं मंतव्यं ॥ यस्य निर्गुणसगुणसौम्यक्रूरविभूतयः सो ऽल
क्षणविलक्षणत्वेन विभोर्विभुरित्यपि निर्दिष्टुमशक्यः ॥ तस्य निर्गुणविभूत्यभिन्नत्वेन यन्निर्गुणविभूते
र्विभोर्विभुत्वमर्थान्नदेवतस्य ॥ न सर्वनिर्देश्यस्य विभोर्विभुत्वं गीकारे ऽनवस्थाप्रसंगः ॥ हे शिशो सर्वा
विभो
त्मिका सर्वनिषेधिका च निर्गुणविभूतिः सौम्यक्रूरादिसर्वविभूतीनां जगत्यवतरणे लये च कारणीभूते
॥ तस्माद्विष्णुसहस्रशिवसहस्रनाम्नां श्रीपतिश्चक्रपाणिरित्यादि पार्वतीपतिस्त्रिलोचन इत्यादि विष्णुशि
वसगुणनामानि विहाय तत्र सौम्यक्रूरविभूत्यात्मकनाम्नामुभयत्र साम्यादभेदः ॥ परंतु सर्वात्मिकाया
विभूतेः सौम्यत्वेन [illegible] विष्णुसहस्रनामसु सौम्यनामाधिक्यं ॥ सर्वनिषेधिकाया विभूतेः क्रूरत्वेन शिव
सहस्रनामसु क्रूरनामाधिक्यं ॥ शिष्य उवाच ॥ ॥ भो गुरो भवद्भिः श्रीहरिहरयोः क्वचिद्विभुत्वेन क्वच
िद्विभोर्विभुत्वेन च वर्णितौ ॥ एतद्विरोधः परिहर्तव्यः ॥ गुरुरुवाच ॥ ॥ हे शिशो ब्रह्मणो यथा

म० १०५ 105

सर्वाविभूतयस्तथासर्वात्मिकासर्वव[...]निषेधिकाचेतिविभूतिविशेषोक्तः॥ एतद्दृष्टान्तयोर्विभुत्वं॥
निर्गुणसगुणसौम्यक्रूरविभूतीनांसर्वासांजगत्यवतरणेलयेचैतेद्वेपरमविभूतीकारणीभूतत्वेनस्वयं
मुख्येनिर्गुणविभूतित्वेनचविभोर्विभुरूपे॥ केवलस्वरूपवस्थामात्रंब्रह्मानिर्देश्यत्वाद्विभोर्विभ्विति
निर्देष्टुंनशक्यते॥ तस्मादेतयोरेवपरमविभूत्योःविभुत्वंविभोर्विभुत्वंच॥॥ ॥ ॥ इत्यद्वैतादित्यत्रनारा
यणेऽष्टमोर्ध्वेपट्टिराजदीप्तिमत्संवादेश्रीहरिहरस्वरूपनिर्णयोनामसप्ततीयोरश्मिः॥२॥ ॥ दीप्तिमा
नुवाच॥ भोगुरोएतदुभयनिर्गुणविभूतीतरनिर्गुणविभूतयोजगत्यवतीर्णानवा॥ पट्टिराजउवा
च॥ ॥ ॥ हेशिशोनतदितरनिर्गुणविभूतयोऽप्यवतीर्णास्तत्प्रकाशस्थलेसनकादयोऽवधूतादयोऽन्ये
चयेयेब्रह्मभूतात्मानोब्रह्मर्षिदेवर्षिराजर्षया[...]दयःसर्वादारभ्याभूवन्भवंतिभविष्यंतिचतेसर्वेनिर्गुणवि
भूतीनांप्रकाशावच्छेदकाः॥ परंत्वेतन्निर्गुणविभूतीनामवतरणमपितदुभयपरमविभूतिद्वारैव
॥ यस्माद्यथासगुणविभूतिषुप्रभवात्मिकाविभूतिर्मुख्यातथानिर्गुणविभूतिषूभेपरमविभूतीमु
ख्ये॥ यदित्वंनिर्गुणविभूतिषुभेदोमुख्यामुख्यविचारश्चकिमर्थइतिपृच्छसितन्नत्वंशृणु॥ निर्गुण
विभूतिषुवस्तुगत्याभेदोबहुत्वंवानास्तिकिंतुगुणेष्ववतीर्णत्वेनोपाधिगतभेदबहुत्वेनतत्रारोप्येते
एतन्निर्गुणविभूतीनांतदुभयपरमविभूतिद्वारावतीर्णत्वेनतयोर्मुख्यत्वं॥ एतद्विभूतीनांतदुभयवि
भूतिद्वाराऽवतरणंकिमर्थमितिचेच्छृणु॥ तत्रनिर्गुणविभूतिप्रतिपादकस्वरूपलाक्षणिकमहावाक्य

रूपोपनिषद्विभूतिप्रकाशांविद्धिभूतीनांसांख्यनिष्ठाप्रतिपादकत्वेनकाशांविद्योगनिष्ठात्वप्रतिपादकत्वे
नचनतयोर्भेदव्यक्तं ॥ देवीत्रिमात्रुवाच ॥ भोगुरोवेदेविभूतयः किमर्थमंगीकर्तव्याअंगीकारेऽपिसांख्यनिष्ठा
योगनिष्ठाभेदोवाकिमर्थमंगीकर्तव्यः ॥ पतिरानंदउवाच ॥ हेप्रियेशोणएतन्निर्णयश्चेत्यंवेदस्त्वितरवाक्या
वत्वोवलजडोनभवतिविंतुसकलविभूतिसमुद्रः ॥ अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदइत्यादि
श्रुतितात्पर्यमनेवैः स्वस्वमतानुसारेणवर्णितंममयज्ञातितन्मयानिरूप्यतेशृणुतनदेहनबद्धसांप्रजा
येयेत्यारभ्यप्राकृतिकप्रलयपर्यंतंविभूतीनामवतरणलयौप्रवर्तनेते ॥ जगत्स्थितिर्विभूत्यधीनावेदोवि
भूतिमयोमहद्भूतस्यनिश्वासरूपत्वंवेदस्यविभूतीनांचतादात्म्येनविभूत्यवतरणस्यापिनिश्वासरू
पत्वं ॥ निश्वासस्योच्छ्वाससापेक्षितत्वेनविभूतिलयस्योच्छ्वासरूपत्वं ॥ तथाचविभूतीनामवतरण
लयौनिश्वासोच्छ्वासरूपौ ॥ प्राणिनांशरीरस्थितिस्तन्निश्वासोच्छ्वासस्वाधीनातथाजगद्रूपविराट्शरी
रस्थितिस्तन्महद्भूतनिश्वासोच्छ्वासस्वाधीना ॥ यदानिश्वासस्तदाजगद्यदोच्छ्वासस्तदातल्लयः ॥ किं
चस्रष्टेः प्राक्तनानांप्राणिकर्मसंस्काराः स्वयमुद्बुद्धाः संतोविभूतीरुद्बोधयंतितदासर्वाविभूतयः
स्वस्वविषयापेक्षयाऽवतरणार्थंनिरुद्धनिश्वासवत्व्याकुलाभवंति ॥ एतत्तात्पर्येणापिविभूत्यात्मक
वेदस्यनिश्वासरूपत्वमिति ॥ विभूत्यात्मकवेदानुसारेणजगदुत्पद्यते ॥ वेदेतुकर्मप्रतिपादकवाक्या
निब्रह्मप्रतिपादकवाक्यानिचसंतितत्रकर्मप्रतिपादकवाक्यानिसगुणविभूतयोब्रह्मप्रतिपादकवा

काॅनिर्गुणविभूतयः॥ कर्मप्रतिपादकवाक्यरूपसगुणविभूतिभिरेव जगदुत्पत्तौ जगतः सर्ववेदान्तमार्गेण
संभवो न प्राप्तः॥ तस्मात्सर्ववेदान्तमार्गेण जगदुत्पत्तिसिद्ध्यर्थं निर्गुणविभूतीनामप्यवतरणमवश्यमंगीक
र्तव्यं॥ परमात्मा स्वनिर्गुणमहिम्नः प्रकटनार्थं स्वीयाः निर्वचनीयलीलया जगदुत्पाद्य तत्र ब्रह्मभूतात्म
नि ब्रह्मप्रतिपादकवाक्यात्मकनिर्गुणविभूतीनामवतरणं कृत्वा ब्रह्मभूतात्मध्यानात्तन्महिमानं प्रकाश
यति॥ हे शिवे त्वया निर्गुणविभूत्यात्मकनिर्गुणप्रतिपादकवाक्येषु सांख्यनिष्ठायोगनिष्ठाभेदः किम
र्थमंगीकर्तव्य इति यदुक्तं तच्छृणु॥ नेदेपुयद्यत्स्वरूपप्रतिपादकवाक्यमखिलं तत्सर्वं सर्वनिषेधात्मकं सवीत्म
वाभावेनैव स्वरूपं प्रतिपादयति॥ नच यावेदिति नेत्यात्मागृह्यो न हि गृह्यत इति अशब्दमस्पर्शमरूपमव्य
यमिति॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रमिति अकायमव्रणमस्नाविरं शुद्धमपाप ॐ
विद्धमित्यादिवाक्यानि निषेधावधित्वेन स्वरूपं प्रतिपादयंति॥ अतस्तेषां सांख्यनिष्ठाप्रतिपादक
त्वं॥ तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति प्राणशरीरो भारूपः सत्यकामः सत्यसंकल्प आ
काशात्मा सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इति दृष्टो द्रष्टा श्रुतः श्रोता मतो मंता विज्ञातो वि
ज्ञाता नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता नान्योतोस्ति मंता नान्योतोस्ति विज्ञातेति सर्वं ह्येतद्ब्रह्मायमा
त्मा ब्रह्मेति॥ सर्वं खल्विदं ब्रह्मेति न हन्यते हन्यमाने शरीर इति॥ एष सर्वभूतांतरात्मेति॥ अंतर्बहि
श्च तत्सर्वं व्याप्य नारायणः स्थित इति स ब्रह्मा स शिवः स हरिः सेंद्रः सोऽक्षरः परमः स्वराडिति॥ इत्या

द्विदाव्यानि सर्वात्मकत्वेन स्वरूपं प्रतिपादयंति ॥ अतस्तेषां योगनिष्ठा परत्वं ॥ तस्मान्निर्गुणविभूती नाम
प्यवतरणं तदुभयपरमविभूतिद्वारैवावश्यमंगीकर्तव्यं ॥ देविनिमानुवाच ॥ भोगुरो पुराणादिषु ब्रह्मकल्प
समाप्तौ विरिंचेर्नाशः स्मर्यते तथा श्रीहरिहरनाशो न क्वापि प्रतिपाद्यते ॥ मूर्तित्रयस्य सर्वात्मकः सर्वनि
षेधकप्रभवात्मकविभूतिरूपत्वात्समानपदव्यपदिष्टानां तत्र श्रीहरिहरयोः समानपदवीं दृष्ट्वाते विरिं
चेः पदवीं तत्र दृष्टेह्यान्यत्राभासते ॥ इदं कथमुपपद्यते तदुपदिश ॥ पतिरानंदवाच ॥ हे शिशो सर्वा
त्मिका सर्वनिषेधिका च निर्गुणविभूती प्रभवात्मिका तु सगुणा ॥ सृष्टिकाले तयोः परमविभूत्योर्गुणो
द्भवतीत्वेन सगुणवद्भानं भवति वस्तुतस्ते निर्गुणे एव ॥ प्रभवात्मिका तु सगुणविभूतिस्तु सृष्ट्यो
तरयात्पत्तिलयौ तदुभयपरमविभूत्यधीनौ ॥ अतस्तदुभयविभूतिरूपश्रीहरिहरौ पदव्यपेक्षया
विरिंचिपदव्यान्यूनता ॥ श्रीहरस्य मृत्युंजयसंज्ञा सर्वस्य जगतो नाशको मृत्युस्तन्नाशकः शिवः ॥ त
था श्रीहरि[illegible]रपि कालस्य प्रवर्तकाव कालत्वस्यापकस्तस्माच्छ्रीहरिरपि कालकालः ॥ ब्रह्मकल्पसमा
प्तौ सर्वे जगता सह विरिंचिः प्रकृतौ लीयते ॥ प्रभवात्मिका विभूतिस्तु सर्वसगुणविभूतिभिः सहतदु
भयपरमविभूत्यो लीयते ॥ ते च परमविभूती तु सर्वनिर्गुणविभूतिभिः साकं स्वरूपमात्रं भूत्वा एकमे
वाद्वितीयमिति श्रुतिप्रतिपाद्य चिन्मात्रावस्थां प्राप्नुतः ॥ तस्माद्धरिहरयोर्नाशः क्वापि न वर्णितः ॥
श्रीहरिहरयोरवतारवपुषोर्लेयोगुणेषु गुणा अपि प्रकृतिस्वरूपाः संतोऽव्याकृतावस्थां प्राप्नु

श्र १०७
107

वति ॥ यदि च तदा विष्णोर्हिरण्यावतारयोर्ब्रह्मशिवयोरपि गुणद्वारा ब्रह्मतौलयोः स्वीक्रियते तेन हा ऽन्यथ
एवस्यान्तयोर्निर्गुणपरमविभूतिस्वरूपत्वेन वपुर्गुणसंबंधाभावात् ॥ श्रीप्रिमानुवाच ॥ भोगुरो प्र
गाणादिषु जगदुत्पत्तिपालनलयानां कर्ता ब्रह्मविष्णुमहेश्वरा देवता इति प्रसिद्धं सर्वत्र किं तत्र हे तत्प
त्रिर्हराद्विना शास्त्र्युक्तं तत्र पालकत्वधर्मस्य कावा देवता ॥ पक्षिराजउवाच ॥ हे शिशो जगदुत्पत्तिर्हि
रिंसकाश्रात्मना दीनां प्रभवात्मकविभूतेरेव परंतु प्रभवात्मकविभूतेर्गिरसगुणविभूतीनां च जग
त्यवतरणे तासां स्वस्वविषयेषु प्रवर्तने च श्रीहरिरेव हेतुः ॥ श्रीहरिः स्वसंकल्पे निरस्त्रिभावस्यापकत्वे
नालेपत्वात् गुणोपहवली ... पि निर्गुणत्वाद्ब्रह्मत्वादिधर्मपालनं करोति हा गुणक्रियादिप्रवृत्तिरूपो निर ः निरूपाम
वति ॥ श्रीहरिर्विष्णुगुणक्रियादिधर्मपालकोऽनन्तो निर्गुणत्वाविमत्वादिधर्मपालकश्च भयप्रकारे
णापि श्रीहरिः पालनधर्मपरायणः ॥ जगदुत्पत्तिस्थितिलयाः ॥ यतो वा इमानि भूतानि जायन्ते ... श्रुत्या
ब्रह्मणस्तटस्थलक्षणमिति वदंति तेन ब्रह्मलक्षणधर्मा अवतारद्वारा प्रकटीभूय जगत्प्रवर्तकाभवंति ॥ प्र
भवात्मिकायाः सकलसगुणविभूतीनां च जगत्यवतरणे श्रीहरिर्हेतुः ॥ यद्यद्यत्र यत्र प्रवर्तयेत् तत्त
त्तत्तत्र तत्पालये च्चेत्तेषां स्थितिः कथं संभवेत् ॥ अतः पालनधर्मः श्रीहरेरेव ॥ ॥ ॥ इत्यद्वैतादि
त्यउत्तरायणे ऽष्टमार्के पक्षिराजदीप्तिमतीसंवादे श्रीहरिस्वरूपनिर्णयो नाम चतुर्थो रश्मिः ॥ ४
पक्षिराज उवाच ॥ ॥ भोशिशो एतत्सर्वं पीठिकानुसारेण मया व्याख्यातमिदानीं सात्विकानां

१०८

चतुष्टयस्य समाधानं शृणु ॥ अथ प्रथमसंशयसमाधानं ॥ असुराः स्वभावेन क्रूरविभूतिज्ञाः सर्वनिषे
धिका विभूतिस्तु सर्वविभूतीनां कारणं ॥ सर्वनिषेधक विभूतेः प्रकाशस्थानं श्रीहरस्तस्मात् असुराणां व
क्रूर
धो विशेषतः श्रीहरात्तद्बभूव ॥ देवताः पुण्योदयः स्वभावतः सौम्यविभूतिज्ञाः सर्वात्मिका विभूतिस्तु सर्व
सौम्यविभूतीनां कारणं ॥ सर्वात्मक विभूतेः प्रकाशस्थानं श्रीहरिस्तस्मात् स्वस्य धर्मपालकत्वाच्च परात्म
का धर्मपालकासुराणां शिशुपालादीनां दुरपकृतीनां च नाशं करोति ॥ दी प्रि मानु वाच ॥ क्रूरवि
भूतिमत्परात्मका धर्मपालकासुराणां वधो यदि श्रीहरेः सकाशाद्भवति तर्हि त्रिपुराद्यसुराणां व
धः श्रीहरात्कथं जातः ॥ पहिराजउवाच ॥ श्रीहरस्तु परापालको न भवति किं तु परानाशकः ॥ अ
सुराणामपरापालकत्वेन वधो यद्यपि तस्य संमतस्तथापि तेषां क्रूरविभूतिमत्वेन वरप्रदानपाल
नार्थं विरिंचि विज्ञापनानुसारेण यदा श्रीविष्णुः शरीरे वृषभस्य जातो विरिंचिर्यन्ता बभूव सौम्यविभू
तिमंतश्चंद्रादयो देवा रथादि सामग्रीरूपा अभवंस्तदा परापालक त्रिपुरादीनां वधः श्रीहराज्जातः
॥ अथ द्वितीयसंशयसमाधानं ॥ पुराणादौ हरस्तुतौ श्रीहरस्यैव सर्वोत्कृष्टत्वं सर्वेश्वरत्वं च वर्णि
तं ॥ एवं हरिस्तुतौ श्रीहरेरेव सर्वोत्कृष्टत्वं सर्वेश्वरत्वं च प्रतिपादितं ॥ एतस्य तात्पर्यमिदं ॥ यो यं
स्तौति स तं स्वेष्टत्वेन सर्वात्परत्वेन स्थापयति ॥ एवं यो हरिं स्तौति स तं विभोर्विभुत्वेन ब्रह्मेशानौ त
न्नद्विभूतिविशिष्टत्वेन तदङ्गत्वाविति जानाति ॥ एवं हरस्तोत्रेऽपि ज्ञातव्यं ॥ हरिसहस्रनामपि वस

हस्रनामच स्तोत्ररूपं तत्रोभयत्रापि विभोर्विभोरेव स्तवनं पदैर्वैकैर्वा विभूतिमत्वेन स्तवनं स्यात् हि
हरिसहस्रनामस्तु भयनाशनः श्रीरुद्र इत्यादि सोऽयं नाम्नां हरसहस्रनामस्तु घोरश्च इत्यादिक्रूर
नाम्नां चैव ग्रहणं स्यात् उभयत्रापि भयहन्ता भयनाशनः ॥ श्रीरौद्रो रुद्र इति घोरो घोरश्च घोरः त्वग्र
इत्यादि सौम्यक्रूरविभूतिनाम [illegible] स्तवनं स्यात् ॥ एवं तु भूपदे [illegible] ये इन्द्रादीनां स्तोत्रमस्ति तत्रापीन्द्रादी
न्स्वेष्टत्वेन परात्परत्वेन स्तुवंति ॥ यथा श्रीमहाभारत आदिपर्वणि उपमन्युः कपोपतितः सन्नश्विनौ स्तु
मारो परात्परत्वेन स्तुतवान् ॥ यथा वा नैव खांडववनं समये खगरूपधिलापलकाग्निं परमात्मत्वे
नास्तुवन् ॥ सर्वत्र स्तोत्ररीतिरेवमेव ॥ देविर्मानुवाच ॥ भो गुरो शैवा वैसनातमप्युशिवं विलक्षणमिष्टत्वेन
विभोर्विभुत्वेन परात्परत्वेन च स्तुवंतीतियद्भवता निरूपितं तस्य पातातं परं तु वेदपुराणादेषु जापितं हि
भोर्विभोऽस्तु शुद्धचिन्मात्रस्य स्तुतिः क्रमेण हाता ॥ पक्षिराजउवाच ॥ भो शिवशो शुद्धचिन्मात्रब्रह्मणो
निर्गुणत्वेनानिर्देश्यत्वेन च साक्षात्स्तोतुमशक्यत्वान्न स्तुतिः क्वचापि न वर्णिता ॥ तत्र वेदपुराण
दौ हरस्तोत्रं हरिस्तोत्रं वा यद्यत्परात्परत्वेन वर्णितमस्ति तत्तत्परब्रह्म [illegible] स्तवनमस्ति परं त्रितस्य
निर्धर्मित्वात्वेन साक्षात्स्तोतुमशक्यत्वात्स्वस्वसंप्रदायानुसारेण स्वस्वेष्टदेवतानाम [illegible] रूपेण पर
ब्रह्मशुद्धचिन्मात्रं स्तुवंति ॥ भो शिवशो विभोर्विश्वप्राज्ञैर्विभूतिद्वारैव भवति विभूतिसेवनं तत्त्व
साक्षाच्च विना न भवति ॥ यो यः प्राण्यादिसर्गादिषु च विभूतिसंसृष्टः सोऽत्र तपर्यंतं तत् [illegible] तिवशगो भव

नितस्य विभूत्यंतरप्राप्तिर्न भवति ॥ तत्र सौम्यविभूतिमान्सौम्यविभूतिवशगः क्रूरविभूतिमान्क्रूरवि
भूतिवशगश्च भवति ॥ दीप्तिमानुवाच ॥ ॥ भो गुरो लोके सर्वे प्राणिनो जन्मादिनिधनपर्यंतमेकाहृत्या
नैव तिष्ठंति ॥ कश्चन बाल्ये क्रूरकठोरहृदयो वा पश्चात्सौम्यहृदयो वैराग्यसंपन्नाः ... नैत
द्विपरीतहृदयः ॥ यथा वाल्मीकिर्ऋषिस्तारुण्ये विरामहृन्तोऽहृदयन ... गाढत्वस्पर्धिर्जातः ॥ पक्षिराज
उवाच ॥ यः प्राणी जन्मकाले यया विभूत्या संसृष्टः सोंऽतपर्यंतं तद्विभूतियुक्त एव भवति ॥ मध्ये प्रति
बंधकीभूतकुलजातिसंसर्गादिवशात्स्वविभूतेरन्यस्य पर्यवसानं जा..मिव भाति परंतु तेन यया विभू
त्या संसृष्टस्तस्यैव विभूतिः प्रकाशते ॥ यथा विश्वामित्रभार्गवौ ॥ तत्र विश्वामित्रो जन्मकाले ब्रा
ह्म्या विभूत्या संसृष्टोऽपि पश्चात्कुलजातिप्रभावेण क्षात्रविभूतिसंसृष्ट इव पुनः ...हितत्वधर्मे प्रवृत्तो
ऽपि परिणामे यया विभूत्या संसृष्टः सैव तस्य प्रतिफलिता ॥ तथैव बधीजामदग्निः यथा वाऽजामिलो
ऽपि पूर्वं साधुहृदनः सन्मध्ये रागद्वेषवशाद्दुराचारी भूत्वाप्यंते पुनः स्वीयां विभूतिं प्राप एवं प्रका
रेण वाल्मीकिरपि प्राग्दीर्घ्रहया ...या संसृष्टः स... ...वशात्किरातहत्तिमवलंब्यापि प
रिणामे स्वीयां विभूतिं प्राप्तवान् ॥ सर्वत्रैव सैव ज्ञातव्यं ॥ हे शिष्य क्रूरविभूतयोऽपि भगवत्प
दादपेवयाधिन्ना न भवंति ॥ क्रूरविभूतिमान् क्रूरविभूतिसेवनया तु सौरव विभोर्विभुं प्राप्नोति
विभूतिसेवनं कथमिति चेदुच्यते ॥ अन्तर्भावणाद्यपटलोधादिकं क्रूरविभूतिमतः स्वभावः

श्र
१०९
109

येऽन्तकापस्मारादिकमनात्मकविषयलाभार्थं कृतवंतस्तद्विभूतिमेवनं न भवति किंतु पापराशेव
नं भवति॥ ये चात्मलाभार्थं धर्मपालनार्थं वा यदन्तकापस्मारादिकमकुर्वंस्तेन तेषां क्रूरविभूतिमेवनं
॥ पूर्वं स्वविषयलाभार्थमकिंचनेषु साधुषु वा क्रोधद्रोहादिकमकुर्वंस्त इदानीं परोपकारार्थं स्वश
रीरदारपुत्रादिषु क्रोधद्रोहादिकं कुर्युस्तदा तेषु विभुप्रसादो भवेत्॥ विभुप्रसादद्वारा तेषां वि
भोर्विभुप्राप्तिर्भवेत्॥ अथ तृतीयप्रश्नसमाधानं॥ यत्र यत्र हरिणा शिवपूजोपासनादिकं यत्कृतं
तत्सर्वं निषेधात्मकविभूतिमात्रोपासनादिकं न भवति किंतु स्मरादीनां संहरणार्थं तद्विभूतिद्वारा
विभोर्विभूपासनादिकं कृतं हंतृत्वस्य तद्विभूतिपरायणत्वात्॥ एवं शिवेन कृतं विष्णुपूजोपास
नादिकमपि सर्वात्मकविभूतिमात्रस्य न भवति किंतु भक्तानुग्रहार्थं तद्विभूतिद्वारा विभोर्विभूपा
सनादिकं कृतं॥ पालनधर्मस्य तद्विभूतिपरायणत्वात्॥ हरिहरयोः परस्परयुद्धादिकविरोधश्चा
त्मीयो न भवति किंतु स्वस्वभक्तवात्सल्यद्योतनार्थो व्यावहारिकः सोऽप्यवतारेषु न तु मूलस्वरू
पे॥ विरोधस्तु सगुणविभूतिषु न तु निर्गुणविभूतौ तद्यथा घोरः॥ अघोरः॥ उग्रः॥ अनुग्रः॥ व्यक्तः॥
अव्यक्तः॥ अतिरागः॥ वीतरागः॥ आदिः॥ अंतः॥ निमिषः॥ अनिमिषः॥ ग्रीष्मवर्द्धकः ग्रीष्मना
शकः भयकृत् भयनाशनः॥ अणुः बृहत् कृशः स्थूलः नयः अनयश्च॥ एवं सगुणविभूतीनामे
व विरोधो विभोर्विभुस्तु सदा सर्वाविरोधी सर्वव्यापकत्वेन एष एकरूपो दृष्टस्त्वदृष्टहेतु १०९

पः॥ अद्वितीयाद्विरूपोऽनेकतनुरूप एवं सर्वत्र॥ हरिहरयोर्भिन्नाभिन्नविभूतिदृष्ट्यागुणेष्ववतरणं चापरस्प
रं व्यावहारिकविरोधः॥ विभोर्विभुदृष्ट्यात्तु परमार्थतः परस्परमितरेतरात्मकत्वं॥ अथ चतुर्थप्रश्नस
माधानं॥ शिवस्य मोऽभिमानीतियेवदंतितेमूर्खास्तत्र प्रमाणाभावात्॥ किंतु श्रीहरस्यामसाभिमान
स्य हंता॥ हननेन सूक्ष्मगत्यातमोऽनुवर्तनेन तस्माच्छ्रीहरस्य तमःप्रकृतिमत्त्वं॥ ॥ इत्यद्वैतादित्य
तत्त्वरायणे श्रीमार्कंडपक्षिराजदीप्तिमत्संवादे सात्विकोत्तरप्रश्नचतुष्टयसमाधानवर्णनंनामपंचमो
रश्मिः॥ ५ ॥दीप्तिमानुवाच॥ ॥भो गुरो श्रीहरस्योमा श्रीहरेरमा विरिंचेः सरस्वती चेत्येतास्ति
स्रो देव्यो मूलप्रकृत्यंशात्ता न्याः वाऽनुग्रहेणेतन्नस्त्वं वद॥ ॥पक्षिराज उवाच॥ प्रणवरूपमूलपुरु
षस्य पराप्रकृतिश्चिच्छक्तिरपरा तु त्रिगुणात्मिका मूलप्रकृतिः प्रभवात्मकविभूतिसंस्पृष्टप्रणवाव
यवरूपकारणीभूतविरिंचेः पराशक्तिरेतस्या सरस्वत्या मूलभूताऽपरा तु रजोगुणरूपा॥ कार्यरू
पचतुराननस्य पराशक्तिः सरस्वत्यपरा तु राजसाहंकाररूपा॥ सा सरस्वती विद्यारूपा संशयनाशि
का तच्चिच्छक्त्यंशभूता यस्याः प्रकाशेन परोक्षवस्त्वप्यपरोक्षं भाति॥ हे शिशो वस्तुगत्याऽयं जीवो ब्र
ह्मांशभूतः परं त्वविद्ययानिश्चयविहीनो जातो विद्याप्राप्तिश्चेद्दत्तरपदं प्राप्नुयात्॥ तस्माद्भक्ता ब्रस
देवमेवं प्रार्थयंति भो विधातः सर्वधातर्वेदमूर्त एतद्विद्यादेहि यया विद्यया विपरीतभावो विनश्यति नि
त्यस्यानित्यत्वमनित्यस्यानित्यत्वं वास्माकं भासते तेति॥ एवं सर्वनिषेधकविभूतिसंस्पृष्टप्रणवावयव

श्री०
११० रूपकारणीभूतशिवस्य पराशक्तिरेतद्रूपा देवी मूलभूता ॥ अपरा तु तमोगुणरूपा ॥ कार्यभूतहरस्य पराश
क्तिरस्मानस्या मूलविच्छक्तेरंशभूता ॥ अपरा तु नाम साहंकाररूपा ॥ हे शिव सोऽयं जीवः शिवांशभूतः प
रं तु पराशक्तिविहीनः पराशक्तिश्चिच्छिवभावं प्राप्नुयात् ॥ तस्माद्भक्ताः श्रीशिवं प्रार्थयंति हे सर्वनाशक
भक्तरक्षक सर्वशक्तिमन्मुक्तिदायक यया शक्त्या वयं देहेंद्रियादिसंघातं संहारं गत्वा द्वंद्वादिबंधनच्छे
दनेन च कारिष्याम स्तां देहीति ॥ एवमेव सर्वात्मकविभूतिसंसृष्टगुणावयवरूपकारणीभूतश्रीविष्णोः
पराशक्तिरस्या रमा या मूलभूताऽपरा तु सत्वगुणरूपा ॥ कार्यभूतहरेः पराशक्तीरमा तन्मूलविच्छ
क्तेरंशभूताऽपरा तु सात्विकाहंकाररूपा ॥ शोभासंपत्त्यैश्वर्यं चैतत्सर्वं श्रीपदवाच्यं ॥ यस्यास्तु भावे
ण सर्वब्रह्मांडोऽपि शोभावांश्चेतनमयश्च भासते ॥ हे शिव सोऽयं जीवो विष्ण्वंशभूतः परं तु श्रीविहीनः
सन्निजमहिमानं विस्मृतवान् ॥ श्रीविष्णुः सर्वत्र व्यापकस्तदीयास्ति भाति प्रियाणि वैषयिकपदार्थसं
बंधित्वेन ज्ञात्वा विष्णुपदमप्राप्य स्थितः ॥ यः पुरुषः सर्वसौंदर्यसीमा प्रियादपि प्रियतमोऽज्ञानत
ण तस्मात्पुरु षाद्विमुखीभूयासारतृणाभंगुरपदार्थेषु ममेदं ममेदमिति प्रीतिं योजयति ॥ तस्माद्भ
क्ताः श्रीविष्णुमेवं प्रार्थयंति भो भक्तवत्सल सर्वव्यापिन्दीनबंधोऽनन्याविनाशिन्निजस्वरूपमहि
मानमस्मान्प्रापय ॥ येन महिम्नेहलोकपरलोकसंबंधिमहत्त्वं निवर्त्यास्मद्धृदयेषु नवमहिमरूप
संपद्यथापूर्वं तत्तथाकुरु ॥ किंच स्वमनोहरशोभां दर्शयययाशोभयाऽस्मल्लोचनेषु धनदारादि ११०

संसारसंबंधिपदार्थलावण्यं मिथ्यात्वेन भासेत तत्तवानौपम्यरूपलावण्यं च यथा व्याख्यातं तथा कुर्वि
ति ॥ दीप्तिमानुवाच ॥ भो गुरो श्रुतिस्मृतिषु परापरयोर्भेदो न प्रतिपादित एवास्या मूलप्रकृतेरवस्था
द्वयं तत्रैका परा ऽन्या चापरेति मन्यंते ॥ भवद्भिस्तु भिन्नत्वेन प्रकृतिद्वयं प्रतिपादितं तत्कथं संभवति
पद्मिराज उवाच ॥ हे शिशो वेदपुराणवाक्यान्यत्यंतगंभीरतया सद्गुरूपदेशं स्वानुभवं च विना
तत्त्वतो ज्ञातुमशक्यानि पुराणादिषु वेदांतमतमात्रेन निरूपितं किंतु बहूनि मतानि निरूपिता
नि ॥ तत्र प्रकृतेर्गुणत्रयसाम्यावस्थाद्यवस्थाचयं यदि यत्र क्वचापि वर्णितं स्यात्तत्सांख्यमतानुसा
रेण तत्कापिलमतं तत्तु श्रुतिप्रमाणासिद्धं न भवति ॥ श्रुतौ तु मूलप्रकृतेः स्वातंत्र्येण कारणत्वं क्वापि
नास्ति ॥ तैत्तिरीयैतरेयछांदोग्यमुंडकाद्युपनिषत्सु सर्वत्रात्मन एव जगत्कारणत्वं प्रतिपादितं न
त्वानुमानिकप्रकृतेः ॥ श्रुतौ यदि तत्त्वरूपं तस्याः स्वातंत्र्येण कारणत्वं वा निरूपितं स्यात्तर्हि तस्या
अपि ब्रह्मवत्सत्यत्वापत्तिः ॥ किंतु वेदांतमतसिद्धप्रकृतिस्तु अजामेकां लोहितशुक्लकृष्णामिति
श्रुतिप्रतिपाद्यस्वरूपं तच्चानतत्त्वज्ञाननिवर्त्या ॥ एतस्या मूलप्रकृतेर्माया चाविद्या चेत्यवस्थाद्व
यं तत्र मायापरा ऽविद्या चापरेति केषांचिन्मतं ॥ परेषां मतं तु माया चाविद्या च स्वयमेव भवतीति श्रु
त्यातेभिन्नेन तत्र मायाज्ञानशक्तिरविद्या ऽज्ञानशक्तिरिति ॥ कैश्चित्तु च्यते मायाया द्वैविध्यं शुद्धस
त्त्वप्रधाना मलिनसत्त्वप्रधाना चेति तत्र शुद्धसत्त्वप्रधाना परा सैव विच्छक्तिर्मलिनसत्त्वप्रधाना

वि

अ० २२२ रूपा सेवा विद्येति ॥ सत्वस्यापि द्वैविध्यं शुद्धसत्वं मलिनसत्वं चेति ॥ तत्र रजस्तमोभ्यामनभिभूतं शुद्धं सत्वं
ताभ्यामभिभूतं मलिनसत्वं परा बद्धं भवनन्तानरूपात दैवार्थान्त्वरूपा व विकाः विद्या भवति परापरयो
र्मेलनानन्तरं शुद्धसत्वमेव गुणानां विहृत्वारणेन मलिनसत्वं भवति ॥ तस्माद्धे शिशोः परायाः सत्वस्य
शुद्धिं कुर्यात ॥ श्रीमद्भगवद्गीतासप्तमाध्यायेऽपरायाः अष्टविधत्वं परायाजीवभूतत्वं वर्णितं तत्रापरायाज
डत्वं परायाश्चेतनत्वं च भासते तस्मात्परापि चिच्छक्तिरपरा तु जडशक्तिः ॥ हे शिशो त्वमपि बुद्धिमानसि
चेतनजडयोरैक्यं कथं स्यात्तत्वमेव विचारय ॥ अतः परापरे भिन्ने ॥ ॥ ॥ ॥ इत्यद्वैतादित्यज्ञानरायणे
ऽष्टमार्कपतिराजदीक्षितमत्संवादे पराप्रकृतिस्वरूपनिरूपणं नाम षष्ठो रश्मिः ॥ ६ ॥ दीक्षित उवाच
भो गुरो धनंजयो नरावतारो यस्मिन्नीश्वरेंद्रयोः प्रसादो जातः ॥ यस्य श्रीहरिः सदा सहायो यस्य ब्रह्मा
स्त्रपाशुपतास्त्रादिमहास्त्राणां प्राप्तिः ॥ एवं सत्यपि धनंजयो यस्मिन्दिवसे कर्णस्य वधो जायते तस्मिन्दि
नेऽसंसप्तकान्विजित्य युद्धभूमिमागत्य धृष्टद्युम्नादिभिः सह युद्ध्यमानं कर्णं दृष्ट्वा भीतवदीनवचनं भ
गवंतमुवाचैतदाश्चर्यकरं ॥ यां विभूतिमवलंब्य धनंजयोऽवतीर्णः सा वैसवी विभूतिः ॥ यामवलं
ब्य कर्णोऽवतीर्णः सा सौरी विभूतिः ॥ तत्र वैसवविभूतिमतोऽर्जुनस्य सौर्यविभूतिमतः कर्णाद्भ
यप्राप्तिः कथमिति ॥ पतिराज उवाच ॥ हे शिशोऽर्जुनस्य भयप्राप्तौ बीजद्वयमेकं लोकरीत्या
ऽपरं च विभूतिरहस्यानुसारेण ॥ तत्र लोकरीत्यनुसारेस्त्वेवं ॥ तस्मिन्दिने कर्णो धृष्टद्युम्नादीन्भा २२२

गवास्त्रप्रयोगं कृतवांस्तच्च तदस्त्रतेजो दृष्ट्वा स्तुतो यद्यप्यस्तो जातस्तन्महास्त्रतेजसः कर्णप्रतापा
द्धानं भवति किंतु धनंजयस्य ब्रह्मास्त्रादिकं कालवेगाद्यस्त्राण्यपि नामनुष्यादिषु न प्रयोक्तव्यमिति
प्रतिज्ञास्थिता ॥ कर्णस्तु ब्रह्मास्त्रभार्गवास्त्रादिप्रयोगं करोति स्वयमप्यत्यंतबलवान्सर्वास्त्रशास्त्रा
दिसंपन्नः शूरश्च ॥ अतो महास्त्रप्रयोगमंतरा तदस्त्रोपसंहारस्तद्वधश्च कथं भवेन्न दंगीकारे च
मिथ्याप्रतिज्ञो भवेयमिति भीतः सन्भगवंतमुवाचेति ॥ द्वितीयः प्रकारस्त्वेवं ॥ सर्वा विभूतयो भग
वत एव सर्वप्राणिनस्त्वेवं विभूतिमवलंब्यावतीर्णाः ॥ यस्यां विभूतौ विभोर्विभोः प्रसाददृष्टिर्भव
ति तस्याः विभूतेस्तेजो बहुगुणं भवति ॥ तत्कालं तत्र विभूतयस्तदभिमुखी भवितुमसमर्थाः किं
तु विभूतिमंतः प्राणिनः ॥ विभूतिमान्प्राणी यदा सर्वतो निराशो भूत्वा सर्वभावेन विभोर्विभुशर
णं गच्छति तदा तस्मिन्विभोर्विभोः प्रसादो भविष्यति ॥ अत्रायं दृष्टांतः ॥ यथैकः प्राणी चित्र
कारत्वगायकत्वलेखकत्वाध्यापकत्वादिबहुकलासंपन्नः ॥ स यदा चित्रकर्म करोति तदा चित्र
कारत्वस्यैव प्राधान्यमितरकलास्तु तस्मिन्नभिभूय तिष्ठंति ॥ एवं यदा गानं करोति तदा गायक
त्वस्यैव प्राधान्यमितरकलास्तस्मिन्नभिभूय तिष्ठंति ॥ तथा यस्यां विभूतौ विभोर्विभोः प्रसाद
दृष्टिस्तस्या एव प्राबल्यमितराश्चाभिभूय तिष्ठंति ॥ श्रीकृष्ण भगवांस्तु सर्वज्ञत्वेन विभूतिमत्प्रा
णिनो निराशभावं तदुपरि विभोर्विभुप्रसादं च जानाति तस्मात्कर्णाय यया विभूत्या संस्पृष्टः सा

अ० विभूतिर्हि विभोर्विभुप्रसादेन सतेजा भवति तदा तु नरस्य परमितरयो ऽधः संमुखं नयति ॥ यदा वा वाण
११२ स्तत्प्रतापस्वीयत्वेन ज्ञातानागर्विष्टः सन्नयेन निराशाभावेन विभोर्विभोः प्रसादेजातस्तं विस्मरति
112 तदा तु नरयं तन्नश्यं संमुखं नयति ॥ हे शिशो यद्येवं वदसि श्रीहंसलाएव स्वयं विभोर्विभुः सकर्णप्रसाद
मर्जुनस्य संरक्षणोपायं चकलिमर्थं करोतीति तर्हि श्रीहंसो विभोर्विभुत्वेपि दृसीनां वा स्तु देवो स्मी
ति प्रमाणेनैव विभूतिविशिष्टोऽपि भवति ॥ संसारव्यवहारेष्वेक विभूतिमवलंब्य व्यवहरति वा
दा विद्रुत्सपारिज्ञातापहारादिरूपाद्यदितिघटनां हातवांस्तदा विभोर्विभुमाहात्म्यमपि दर्शितवा
न ॥ एवंभूतस्य भगवतो धनंजय एक एव न प्रियः किंतु यो यः सर्वनिराशाभावेनानन्यभावेन च श
रणं व्रजति स एव प्रियः ॥ कस्मात्स भगवांल्लोकबंधुर्नैकस्य धनंजयस्य बंधुः ॥ यो यो यां यां तनुं भक्तः
श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ २ ॥ स तया श्रद्धया युक्तस्त
स्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहितान्हि तान् ॥ इति प्रमाणेन सर्वेषां सर्वतपः सा
धनादिफलदाता स एवेति ॥ कर्णो वा तदितरास्तु रो वास्त्वमंत्रसिद्ध्यर्थं तपः साधनादिकं हातवां
स्तत्तत्तपः साधनादीनां वैयर्थ्यं मा भवत्विति स्वमात्मानमर्जुनं च मूर्छितं दर्शयित्वा तांस्तोष
यति ॥ यदा ते भगवत्प्रसादजं प्रतापादिकं सर्वं स्वबलेनैव सिद्धमिति गर्वं कुर्वंति तदा तान्संहर
ति ॥ एवमेवेतरेष्वपि भगवदवतारेषु योजनीयं ॥ ॥ ॥ ॥ ॥ इत्यद्वैतादित्यउन्नरायणेः ष्टमार्ध ११२

पक्षिराजदीप्तिमत्संवादे भगवद्विभूतितात्पर्यनिरूपणंनामसप्तमोरश्मिः ॥ ७ ॥ दीप्तिमानुवाच ॥ भोगु
रो सर्वे प्राणिनो विभूतिमवलंब्योत्पद्यंते इत्युक्तं ॥ तत्र किं सर्वे प्राणिनः सर्वा विभूतीरवलंब्योत्पद्यंते त
उतैकैकां विभूतिं ॥ पक्षिराजउवाच ॥ एकैकः प्राण्येकैकां विभूतिमेवावलंब्योत्पद्यते ॥ आसर्गादंत
पर्यंतमेकस्यैव विभूत्या संस्पृष्टः संस्तदधीनो भवति ॥ तस्मिन्नितरविभूतिधर्मोऽपि तिष्ठति परंतु निज
विभूत्या यथा तादात्म्यं न तथेतरविभूतिभिः सह तादात्म्यं नास्ति किंत्वागंतुकवत् ॥ यथा जले शब्दस्पर्श
रूपरसास्तिष्ठंति तत्र रसो निजधर्मः इतरे त्वागंतुका इतरभूतधर्माः ॥ एकैकस्मिन्प्राणिन्यनेके स्वभावा
स्तिष्ठंति परंतु तस्य निजः स्वभावो विलक्षणः सुस्वभावो दुःस्वभावो वा ॥ तत्र सुस्वभावः सौम्यविभूति
जो दुःस्वभावः क्रूरविभूतिजः ॥ न ज्ञानेकस्मिन्नावाभागवतीकलावर्त्तते ऽतः कस्याप्युपहासाप
मानादिकं न कर्त्तव्यं ॥ दीप्तिमानुवाच ॥ भोगुरो सहस्रनामस्वेकैका विभूत्यात्मकमेकैकं नाम प्रदृष्ट
मित्युक्तं किंतु विभुविभूत्योस्तादात्म्यमप्युक्तं ॥ तत्र सत्त्वावटः सुहृत् लोकबंधुरित्यपि भगवद्विभूत
यः संति तत्र सत्त्वावटविभूत्या सर्वसत्त्वावटत्वं सुहृद्विभूत्या सर्वसुहृत्त्वं लोकबंधुविभूत्या लोकबंधु
त्वं च प्रतिपादितं न तु मुकस्य सत्त्वावटत्वं सुहृत्त्वं बंधुत्वमिति ॥ सर्वलोकांतःपातिनां नारकीयाणां कथं सत्त्वाव
टत्वं सुहृत्त्वं बंधुत्वं च संभवति ॥ पक्षिराजउवाच ॥ हे शिशो सर्वे प्राणिनः सुखं दुःखं संपदं विपदं
नरकं स्वर्गं वा स्वस्वकर्मानुसारेण भुंजते तत्र दंडो दमयिता शास्तेत्यादिपदप्रतिपाद्यविभुसका

श्री० ११३ 113

शादेवदुःखविषयंनरकंवाप्राप्नुवंति॥ तथैवस्वसुखदःकामदइत्यादिपदप्रतिपाद्यविभुसकाशादेवस्व
सुखसंपदंस्वर्गंवाप्राप्नुवंति॥ एवंसर्वविभूतिप्रभावेणसांसारिकव्यवहाराःप्रवर्त्तंते॥ यःप्राणीस्वकर्मा
नुसारेणपापयोनिंप्राप्नोतितत्रचपरदृष्ट्याऽतिदुःखवाप्नवपिस्वदृष्ट्यास्वसुखमेवेतिमन्यतेयथाश्व
स्वकरादेर्मनुष्यदृष्ट्यानारकित्वेभातिपरंतुतत्स्वतदृपिसमीचीनंभवति॥ तत्रयथायःकश्चित्तंताडय
तिचतेनदृष्टुस्वप्राणरक्षणार्थंपलायनंकरोतियदितच्छूकरीयोनिरतिनिष्ठास्यात्तर्हितत्स्वतद्योनिपरि
त्यागएवेष्टःस्यात्॥ विष्टादिभक्षणंमनुष्यदृष्ट्याऽतिदुःखकरंभवतितदपितस्यप्राणरक्षकत्वे
नेष्टतरंभवति॥ एवंविष्ठादिकीटाजलेयथाजलंतंतवस्तद्धनंचस्वसुखेनजीवंतितितदेवभक्षयंतिच
॥ एवंनारकीयाणामप्यनुमेयं॥ तस्माद्धेशिशोयथातिदुःखभोगकालेऽपियःकश्चित्स्वसुखलेशा
नुभवोभवतिवस्तुगत्यादुःखदायकंविषयंस्वसुखदायकत्वेनमत्वायत्तस्मिन्नमतिंतत्स्येदंसर्वंस्व
सुखदःस्वहतलोकवंधुरित्येतद्विभूतिप्रभावेणैवभवति॥ हेदीप्तिमन्द्धेपरमविद्येऽनादिसिद्धे
सांख्यविद्याराजविद्याचेति॥ तत्रसांख्याख्यापिलीनभवतिकिंतुसम्यक्ख्यायतेययेतिसांख्याप
राविद्या॥ राजविद्यापिनराजनीत्यादिः किंतुविद्यानांराजाराजविद्येतिव्युत्पत्त्यापराविद्यातस्या
एवयोगःकर्मयोगोराजगुह्यमित्येवंनामानिभवंति॥ सांख्यविद्यायागुरुरधिदेवश्चश्रीशिवः
॥ राजविद्यायास्तुगुरुरधिदेवश्चश्रीहरिः॥ हेशिशोश्रीभगवद्गीताःपराकाष्ठाःभारतःपं॥

चमोवेदइतिभारतस्यवेदरूपत्वंतत्रवर्णितिहासादिकंपूर्वकांडरूपंसनत्सुजातीयंश्रीमद्गीताउपनी
ता: शांतिपर्वानुशासनिकपर्वचैतत्सर्वमुत्तरकांडात्मकं ॥ तत्रापिश्रीमद्भगवद्गीता: सर्वोपनिषत्सा
रभूता: राजविद्यापूर्णा: ॥ यदायदाखलुकलियुगस्यप्रादुर्भावोजातस्तदारभ्येयंविद्याक्रमेणलुप्ता ॥
ततोजैनबौद्धादीनांप्राबल्यमासीत् ॥ अवतारंविनातन्मतनिराकरणंनभवतीतिसाक्षाच्छिवावता
श्रीमच्छंकराचार्यरूपेणावतीर्यतन्मतनिराकरणंकृतवान् ॥ परंतुसांख्यमार्गानुसारेण ॥ श्री
भगवद्गीताव्याख्यानमपितन्मतानुसारेणकृतवान् ॥ तत्रगीतास्तुसांख्यनिष्ठाराजयोगावुभाव
पिस्त: ॥ स्वामीयोसंन्याससकलामवलंब्यावशीर्णस्तामेवसंन्यासविद्यांप्रकटीचकारराजयोगस्या
पिपर्यवसानंतत्रैवकृतवान् ॥ तदनंतरमेतावत्पर्यंतंयेयेतत्परमग्रंथव्याख्यातारस्तेपितदनु
सारेणैवसांख्यनिष्ठापर्यवसानंचक्रु: ॥ नत्वतेषांमध्येकस्यापिदृष्टीराजयोगपर्यवसानाबभू
व ॥ अत: श्रीगीतादिषुविद्यमानापिराजविद्यातत्संप्रदायविच्छेदेनलुप्ताबभूव ॥ यद्येवं
जगतिराजयोगस्यतिरोधानंजातंतदाप्रभृतिसर्वेक्षत्रियाभ्रष्टराज्याबभूवु: ॥ अतोराजपदवी
नीचै: प्राप्ता ॥ एवंगजतुल्यादिषुराजविद्यालोपेपिमग[redacted]पत्यादिषुपरंपरावर्त्तनतएव ॥ हेदी
न्निमंस्वंशीलवानितित्वदीयभक्तिभावेनप्रसन्न: संस्तत्परमविद्यानुसारेणैतत्सर्वंव्याख्यातवा
नस्मि ॥ ॥इत्यद्वैतादित्यउत्तरायणे:श्रीमार्कंडपत्नियाज्ञदीन्निमन्नवाटेभगवद्विभूतितात्पर्यवर्णन

श्री० नानंतरं सांख्यविद्याराजविद्यामहात्म्यकथनं नामाष्टमोऽध्यायः ॥८॥ पर्वतराजउवाच ॥ ॥ भोशि
११४ शो राजविद्यानुसारेण यथा मन्येतत्सर्वं श्रीहरिहरस्वरूपनिर्णयं सात्विकोऽहं प्रश्नचतुष्टयसमाधा
नं चोक्तवानसि ॥ शैवानां मध्ये ये तत्त्वज्ञानविहीनास्ते शिवं सत्वगुणाभिमानिनं विष्णुं च तमोगुणा तः
114 भिमानिनं वदंति ॥ तत्तत्ववकपोलकल्पितत्वेन सप्रमाणं न भवति ॥ वस्तुगत्या सत्वाभिमानस्त
मोऽभिमानो वा श्रीहरिहरयोर्नास्ति ॥ तमोगुणं निकृष्टं ज्ञात्वा स्वीयोपास्योत्कृष्टतासिद्धये एनं कल्प
यंति ॥ एवं वैष्णवा अपि स्वोपास्योत्कृष्टतासिद्ध्यर्थं शास्त्रविरुद्धानेकयुक्तीः कल्पयंति ॥ कथं च स्व
लभं स्वमतानुसारेणाचरणमतीव दुर्लभं ॥ वैष्णवैरुच्यतेऽस्मन्मतं श्रेष्ठमन्यैरुच्यते अस्मदिष्ट
मधिकं वैष्णवैरुच्यते भस्मादिधारणं श्रेष्ठं वैष्णवैरुच्यते गोपीचंदनादिकं श्रेष्ठमिति ॥ एवं निरर्थ
ककलहेन कालं यापयित्वा तत्त्वाद्विमुखा भवंति ॥ मनुष्यजन्मामूल्यमेतस्य मनुष्यजन्मनः
क्षणकालस्य चतुर्लोकीयसंवत्सरकालोऽपि षोडशीं कलां नार्हति ॥ एतादृशं मनुष्यजन्म मंदा व्य
र्थं गमयंति ॥ भस्मधारणे गोपीचंदनधारणे वा को वा योग्य इति न जानंति ॥ किं त्वयः स्वहाताद्
ष्टं तस्य भास्वभादिद्वंद्वातीतः केवलात्मरतः स भस्मधारणे योग्यः ॥ यो वा कर्मसंगेन षार्म्य व्यव
हारेषु पारमार्थिकत्वं च संस्थाप्य क्षणमप्यात्मानुसंधानं न्यूनं ददाति स गोपीचंदनधारणे योग्यो
भवति ॥ हे शिशो श्रीभगवद्गीतास्वद्वितीयाध्यायमारभ्य दशमाध्यायपर्यंतं राजविद्यारहस्यं ११४

विभूतिविस्तारं च वर्णयित्वा श्रीभगवान्करुणानिधानः पुनरष्टादशाध्यायादौ त्यागविषये मतत्रयं
निरूपितवान् ॥ तत्र काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुरिति काम्यकर्मणां त्यागेन नित्यक
र्मणां ग्रहणेन ग्रहणत्यागात्मकविधिं विमतमिदं ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इति
फलानभिसंधिपूर्वकनित्यनैमित्तिककाम्यकर्मप्रवृत्तौ नैष्कर्म्यस्थापनं वैष्णवमतमिदं ॥ त्याज्यं दोषवदि
त्येके कर्म प्राहुर्मनीषिण इति ॥ यथा दोषोऽस्यास्तीति दोषवदिति व्युत्पत्त्या सदोषं कर्म त्याज्यं तथा
निर्दोषमपि कर्म त्याज्यमेवेति श्रीशिवमतमिदं ॥ एवं मतत्रयं सूचयित्वा मध्यस्थं वैष्णवमतमेव
स्थापयति यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ इत्यादिना यस्य नाहंकृतो भावो बुद्धिर्यस्य न
लिप्यते ॥ हत्वापि स इमांल्लोकान्न हन्ति न निबध्यत इत्यंतेन ॥ हे शिशो विधिं विमते तु षष्ठकर्मत्यागः
स्वकर्माचरणं चेति तत्र इह विहरमतद्वयभावो विद्यते ॥ वैष्णवमते सदोषनिर्दोषोभयकर्मणि प्रवृ
त्तिरंतरुभयकर्मनिवृत्तिः फलेच्छात्यागेन प्रवृत्तिलेपोऽपि नास्ति ॥ शैवमते तु बहिरंतरुभयस्वदृ
ष्टापरदृष्ट्या च कर्म[illegible]प्रवृत्तेस्त्यागः ॥ हे शिशो वैष्णवशैवमतयोः ॥ फलत एकत्वं ॥ शैवस्य विष
याभावाद्विषये निवृत्तिः वैष्णवस्यात्मानन्यभावाद्विषये प्रवृत्तिः ॥ शैवस्य दृश्याभावात्स्वरूपे स्थि
तिः वैष्णवस्य दृश्यस्यैवाभावाद्दृश्येऽपि स्थितिः ॥ शैवः शुभाशुभादिद्वंद्वातीतः वैष्णवश्चात्मतत्त्वस्य स
काशाद्व्यतीतादप्यतीतः ॥ द्वयोरप्यैक्याभावः यथा घटोपरि पाषाणः पतति किं वा पाषाणोपरि

श्रु॰
२२५
115

दृढ॰ एतत्तिद्वाभ्यामपिदृढसंगः सिद्धः ॥ तथाद्वाभ्यांमताभ्यामप्यनात्महानिरुपलभ्यते शुक्तौयद्रूप्य
स्फुरणं तत्तन्मिथ्याशुक्तिरेवसत्या ॥ अथवाशुक्तिःसत्याशुक्तौयद्रजतं तच्चापिशुक्तिसत्तान्यसत्ताशून्य
त्वाच्छुक्तिरेव ॥ ॥ ॥ श्रीरामउवाच ॥ भोगुरो एतद्द्वियोर्द्वयोर्मध्ये श्रेष्ठः नत्रये एतद्वक्तव्यं ॥ वसिष्ठउ
वाच ॥ हेराम अपिविद्वद्वसमानेएतयोर्न्यूनाधिकभावः केनकल्पयितुंशक्यः ॥ यस्ययाविदेष्टास्वसंप्र
दायानुसारेणतस्यसैवश्रेष्ठा ॥ एतयोरेकं भगवतैवप्रतिपादितं ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैर
पिगम्यते ॥ एकं सांख्यं चयोगंचयः पश्यतिसपश्यतीति ॥ हे शिष्य एतस्मिन्कालेकेचनपुरुषादंभा
र्थं बहिर्धीरतपः शीतोष्णादिसहनं चकुर्वंति ततः क्रोधाहंकारादिनापूरिताः ॥ यावदहंकारसमूहो
ननश्यतितावद्योगोनसंभवति ॥ तस्मात्सत्त्वमहाबाहोदुःखमाप्तुमयोगतः इतिप्रमाणं ॥ अंतः
र्वासनयापूरिताः संतो बहिस्तपएवश्रेयइतिवागाडंबरमात्रेणलोकान्प्रतारयंति ॥ यथावल्मीक
भंगमात्रेणसर्पनाशोनभवति तथाशरीरपीडनमात्रेणाहंकारनाशोनभवति ॥ एवंकेचनपुरुषा
धनदारादिविषयासक्ताः संतः स्वदुष्कर्मगोपनार्थंवेषवमतं दर्शयंति ॥ तेषांचित्तमिंद्रियजन्यसु
खासक्तं किंचिद्देहांतश्रवणंकृत्वा अस्मानिर्लिप्ताः विषयभोगास्तु शरीरधर्माः तस्तत्कारणेनात्मनः किं
चिदपिदुष्यतीत्यादिवाग्जालेन स्वयंभ्रष्टाः संतः परान्भ्रंशयंति ॥ नह्यसंन्यस्तसंकल्पो योगीभवति
कश्चनेतिप्रमाणेन यावच्चित्तेविरक्तिः स्थितानभवतितावच्छुष्कसंवादमात्रेणांतर्मोहनिवृत्ति २२५

१४ तथा गुरुसंवादमात्रेण वासनानिवृत्तिर्न भवति ॥

र्न भवति ॥ यथा कस्यापि कण्ठे गन्धोदकगंडूषमात्रेण शोषा निवृत्तिर्न भवति ॥ हे शिशो यावदंतःशुद्धिर्न
भवति तावद्बहुनापि श्रुतेन पदार्थं तं गच्छेत् स्थितानां विषयभोगाश्रितं तद्भयं समानमेव ॥ अंतःशुद्ध्यनंतरं योपि
श्रुत्वा वा किमपि वाक्यार्थान्नस्यतत्सर्वस्य लेपो न भवति स एव ब्रह्मभूतात्मा ॥ आत्माराम उवाच ॥ हे मधुपय
रूप हिंगोजेनैतत्सर्वाद्भुतसंवादो वर्णितस्तदा सत्यसंधः स्वबंधेन सह पक्षिराजाज्ञां गृहीत्वा स्वगुरु
समीपं गतः कृतेऽस्मिन् स्वमत्यादयोऽपि स्वस्वाश्रमान् गताः ॥ मया साकं दीप्तिमांस्तत्रैवातिष्ठत् ॥ ॥ इ
त्यद्वैतादित्यरत्नरायणे श्रीमार्कंडेयपक्षिराजदीप्तिमत्संवादे शैवादिमतत्रयनिरूपणं नाम नवमो रश्मिः
९ ॥ आत्माराम उवाच ॥ हे मधुप तत्सर्वं त्वया श्रुतमनन्तरं पक्षिराजदीप्तिमतोर्यः संवादो जातस्तं वक्ष्या
मि शृणु ॥ दीप्तिमानुवाच ॥ भो गुरो विभूतिनिर्णयं सात्त्विकोक्तप्रश्नचतुष्टयसमाधानं तयोः परमवि
द्ययोर्महात्म्यं च श्रुत्वाहं कृतार्थो जातः ॥ पूर्वं भवद्भिस्तत्त्रयानुसारिणः संक्षेपतो निरूपिताः ॥ इदानीं
विस्तरेण तन्निरूपणं वक्तव्यं ॥ पक्षिराज उवाच ॥ ब्रह्मक्षत्रियाभ्यां जातीया विरिंचिमतानुयायिनः प्रा
यशो बभूवुः ॥ संन्यासनिष्ठा ब्राह्मणजातावेव नेतरजातौ ॥ तत्रापि केचिद्धठयोगराजयोगनिष्ठा
मिश्रितसांख्यनिष्ठावंतो बभूवुः ॥ एवं राजयोगनिष्ठा क्षत्रियजातावेव नेतरजातौ तत्रापि संन्यासनि
ष्ठामिश्रितराजयोगनिष्ठावंतः केचन राजर्षयो बभूवुः ॥ तद्यथा सनकादयो वामदेवजडभरता
दयश्च केवलसांख्यनिष्ठावंतः ॥ वसिष्ठबृहस्पतिभरद्वाजादयः पुरोधसो भगवद्बादरायणवाल्मीकया

११६
116

दृष्टयस्य राजयोगनिष्ठामिश्रितसांख्यनिष्ठावंतः॥ तथाहि वसिष्ठादिपुरोधसो राजानइव युद्धमंत्रादिरा
ज्यकार्येषु प्रवृत्ता अपि स्वरूपस्थितेर्विच्युतेर्हेतुत्वमात्रमपि न प्राप्नुवंति॥ अतो राजयोगनिष्ठामिश्रितसां
ख्यनिष्ठावंत इत्युच्यंते॥ यदि राजकार्येषु तेऽपि राजानइव प्रवर्तंते तर्हि केवलराजयोगनिष्ठावंतः श्रु
तो न भवेयुरिति पृच्छसि चेन्न शृणु॥ राज्ञामिव पुरोधसामपि सबलसंपदः संति तथापि वसिष्ठाद
यः स्वाधिकारानुसारेण मंत्रादिराजकार्याणि कृत्वा पुनः स्वाश्रमेष्वाशमगचर्मादीन्विना रत्नपर्यंकादी
न्नेच्छंत्यतो राजयोगनिष्ठामिश्रितसांख्यनिष्ठावंत इत्युच्यंते॥ श्रीबादरायणवाल्मीक्यादयो ग्रंथ
कर्त्तारः परमदेशिकाश्च॥ यावत्तेषां सर्वविषयज्ञानं यच्च यच्च मुमुक्षूणां संशयस्तन्निवृत्त्युपायज्ञानं च
न भवति तावद्ग्रंथकर्तृत्वं देशिकत्वं च न संभवति॥ ग्रंथनिर्माणसमये उपदेशसमयेऽपि तेषां स्वरू
पाकारवृत्तिः क्षणमपि न विच्छिद्यते॥ अतस्तेऽपि राजयोगमिश्रितसांख्यनिष्ठावंतः॥ क्षत्रियेषु
जनकवैवायादयः केवलराजयोगिनः॥ पांडवा येये पुत्रेषु राज्यभारं संस्थाप्य वनं गत्वा स्वरूपस्थि
तिं प्राप्तास्तेऽपि संन्यासनिष्ठामिश्रितराजयोगिनः॥ तत्र पांडवाः कथं संन्यासमिश्रितराजयोगिन इति
चेदुच्यते॥ ते जनकादिवत्केवलराजयोगिनो न भवंति तेषां जनकादीनामिव राजनीत्यादौ स्वरूपेचे
वादार्ढ्यासंभवात्॥ किंतु यदा राजनीतौ वृत्तिस्तदात्माकारावृत्तिर्न भवति यदात्माकारा भवति न तदा
राजव्यवहारविषयिणी वृत्तिर्न भवतीति स्वं स्वसंसारं च भगवति समर्प्य तत्पराः संतः संसरंति

अतः श्रीभगवानेतेषामनन्यहृत्तिंतात्वात्संसारभारवाहकोऽभवत् ॥ अतएवभगवंतंपांडवानां
संसाररथचालकत्वेनपांडवसारथिरितिवदंति ॥ तस्मात्पांडवाः सन्याससमिश्रितराजयोगिनः ॥ ए
वमन्येऽपिराजानोराज्यस्थाश्चपांडववत्संसारासक्तिरहिताः संतोमिथ्याभूतराज्यादिप्राचुर्यंस्वरूपेल
क्षेहृदि निवारयितुमशक्ताः अनन्याश्चिंतयंतोमांयेजनाः पर्युपासते ॥ नित्याभियुक्तानांयोगक्षे तेषां४
मंवहाम्यहं ॥ तेषामहंसमुद्धर्तामृत्युसंसारसागरादित्यादिभगवत्प्रतिज्ञामाश्रित्यसदास्वा
त्मानंस्वसंसारभारंचभगवतिनिवेश्यराज्यादिसंसारव्यापाराद्दुदासीनाः स्वरूपस्थाभवंतितेते
षांशत्रुवापत्यादिनाराज्यादेर्विघ्नमायातिचेत्तदाभगवानेवतन्निवारयति तेऽपिसन्याससमिश्रि
तराजयोगिनः ॥ दीप्तिमानुवाच ॥ भोगुरोभूमिरापोऽनलोवायुः खंमनोबुद्धिरेवचेत्यादिनापंचभू
तमनोबुद्ध्यादीनामपरप्रकृतित्वमुक्तं ॥ बुद्धिर्बुद्धिमतामस्मींद्रियाणांमनश्चास्मीत्यादिना
बुद्धिमनसोर्विभूतित्वंतर्भावोस्तिविभूतयस्तुसर्वाः परापरप्रकृतिरितिबुद्धिमनसोरुभयभावः क
थंसंभवति ॥ पहिराजउवाच ॥ ॥ एतद्योनीनिभूतानीतिप्रमाणेनपरापरेद्वेप्रकृतीजगत्कार
णभूते अजोमनोबुद्धिप्राणेंद्रियमहाभूतादिसर्वपदार्थेषुअंशद्वयमस्ति ॥ भूमिरापइत्याद्य
परानिरूपणप्रकरणेमनोबुद्ध्यादेरपरांशस्यैवग्रहणं ॥ बुद्धिर्बुद्धिमतामस्मीतिविभूतिप्रकार
णेनयोः परांशस्यैवग्रहणं ॥ दीप्तिमानुवाच ॥ भोगुरोमनसिपरापरोभयांशः केनप्रकारेण

ष्ठा
११७

117

भवतितत्रापरांस्मनिवृत्तिःवेनोपायेनभवेदेतदनुग्रहेणवक्तव्यं ॥ पार्थिवानन्दउवाच ॥ देवसेनेनना

मावराहोद्वसिष्ठोः स्मृत्यरमसावाप्ति ॥ स्ववुद्धिनामास्तृणालस्तसपिशिष्यः सर्वदाचित्तस्मरंत्वति

मनोविषयेप्रसंहृतवान्भोगुरोमनः किंस्वरूपमितिततोदेवसेनेनतत्समाधानंयदुक्तंतच्छ्रवण

तत्संवादश्रवणेनांतेनवापिप्रश्नसमाधानंभवेत् ॥ ॥ इत्यष्टैतादित्यउत्तरायणेऽष्टमार्केपार्थिवा

नन्दीश्रिमत्संवादेराजयोग्यादेरवस्यानिरूपणंनामदशमोरश्मिः ॥ ॥ १० ॥ इत्यष्टमार्कः

समाप्तः ॥ ॥ ॥ ॥ ॥

न० ११८

118

ॐ श्रीगुरुभ्यो नमः ॥ अथ नवमाह्निकप्रारंभः ॥ सुबुद्धिरुवाच ॥ किंरूपं वा प्रभावश्च किं वस्तु मनसः
प्रभो ॥ कास्तद्धर्मा गुणाश्चैव किं तद्वृत्तिलक्षणं ॥ २ ॥ वदंत्यनिंद्रियं केचित्केचिदिंद्रियं तत्परे जगुः ॥ एतन्मे
संशयं सम्यक् छेत्तुमर्हस्यशेषतः ॥ देवसेन उवाच ॥ संकल्पो हि प्रभावश्च विकल्पो रूपमुच्यते ॥ ल
क्षणं चंचलत्वं चाभिमानो धर्म एव च ॥ ३ ॥ वृत्तिस्तु तद्गुणं विद्धि यस्यां प्रोतमिदं जगत् ॥ नेदं वस्त्वपि
नावस्तु तच्चेंद्रियमनिंद्रियं ॥ ४ ॥ अत्र मनो विषये पूर्वाचार्याणां पक्षद्वयं केचिन्मन इंद्रियमिति के
चिदनिंद्रियमिति च वदंति ॥ विचार्यमाणे मतद्वयमप्येकरीत्या सप्रमाणं ॥ तथा हि मनस इंद्रिय
त्ववादिभिरिंद्रियाणां मनश्चास्मि मनः षष्ठानींद्रियाणीति वाक्यद्वयप्रामाण्येन मनस इंद्रियत्वमं
गीक्रियते ॥ मनसोऽनिंद्रियत्ववादिभिस्त्विंद्रियाणां मनश्चास्मीति वाक्यं नक्षत्राणामहं शशीति वाक्यं
यथा चंद्रस्य नक्षत्रत्वस्यापवादो न भवति तथा मनस इंद्रियत्वस्यापवादो न भवति ॥ एवं मनः षष्ठानींद्रि
याणीति वाक्यं तु यजमानपंचमा इडां भक्षयंतीत्यत्र ऋत्विजां यजमानेन ऋत्विग्गतपंचत्वसंख्यापूरण
वदनिंद्रियेणापि मनसेंद्रियगतसंख्यापूरणपरमिति वाक्यद्वयस्यार्थांतरं कल्पयित्वा इंद्रियेभ्यः प
रा ह्यर्था अर्थेभ्यश्च परं मन इति श्रुत्या मनोऽनिंद्रियमिंद्रियसहकारित्वादिति युक्त्या च मनसोऽनिं
द्रियत्वं स्थापितं ॥ अत्र मनस इंद्रियत्ववादिनो वदंति इंद्रियेभ्यः परा ह्यर्था इति वाक्यं मनस इंद्रि
यत्वबाधकं न भवति यथा मनसस्तु परा बुद्धिरिति वाक्यमंतःकरणरूपबुद्धेर्मनसः परत्वेप्य

नःकरणत्वबाधकंनभवतिनह्यत्॥ किंचमनोऽनिंद्रियमिंद्रियसहकारित्वादित्यनुमानमप्यनुकूलतर्क-
शून्यं॥ तथाचमनसइंद्रियत्वेनकाप्यनुपपत्तिरिति॥ हेसबुद्धेमतद्वयाचार्याणांसंवादःसंक्षेपतोव-
र्णितः॥ मतद्वयस्यास्यविचारेमनोऽस्त्वद्वयवदितिज्ञायतेपरंत्विदंरहस्यमतिसूक्ष्मत्वाद्दुर्ज्ञेयं॥
अनंतरंसत्सहवासेनत्वयापिज्ञास्यते॥ सबुद्धिरुवाच॥ भोगुरोत्वयामनसइंद्रियत्वमनिंद्रियत्वंचयद्यं-
ढु५
गीक्रियतेतर्हितार्किकैरपिमनसइंद्रियत्वांगीकारेणतन्मतप्रवेशःस्यात्॥ देवसेनउवाच॥ तार्कि-
कैःस्वीकृतंमनसइंद्रियत्वमन्यत्॥ वेदांतिभिर्वाचस्पतिप्रभृतिभिःस्वीकृतमन्यत्॥ अस्माभिर्य-
दंगीकृतंतत्त्वाचस्पतिमतानुसारेण॥ तथाहितार्किकामनसोबुद्ध्यपेक्षयाविजातीयद्रव्यत्वंस्वी-
कुर्वंत्यस्माभिस्तुबुद्धिसजातीयत्वंस्वीक्रियते॥ पंचभूतदिक्कालादिवदात्मव्यतिरेकेणमनसोज्ञा-
नविषयत्वाभावात्॥ जरायुजादिभूतग्रामसंबंधमंतरेणमनसःस्थित्यसंभवेनबुद्ध्यादीनामि-
वांतःकरणत्वमुचितंनतुबुद्ध्यपेक्षयाभिन्नद्रव्यत्वं॥ नचमनसोबुद्धिसजातीयत्वंनसंभवतिसक्रि-
यत्वात्॥ इतिचेन्न॥ बुद्धेरपिसक्रियत्वात्बुद्धिर्मेचलतीत्यनुभवात्बुद्धिश्चनविचेष्टतीतिश्रुतेश्च॥
नन्वात्ममनःसंयोगाद्बुद्धिर्जायतेनात्ममनःसंयोगंविनातस्माद्गुणइतिचेन्न॥ पदार्थद्वयसंयोगा-
त्ध्वंसोपिजायतेतस्मात्ध्वंसोपिगुणइतिवक्तव्यंस्यात्॥ ननुबुद्धेर्भावरूपत्वाद्गुणत्वंध्वंसस्याभा-
वरूपत्वान्नद्रव्यत्वंनवागुणत्वमितिचेन्नयतोबुद्धिमनःसंयोगजन्यापूर्वंस्वी[illegible]कुरुतसाबुद्धेर्दृष्टि

श्र
२१९
119

मेवतिनत्वबुद्धिरिति ॥ नचबुद्ध्यतिरिक्तहृदयनंगीकारात् बुद्धेर्भिन्नाहृत्तिर्न भवतीति चेन्न ॥ मनस
स्तु परा बुद्धिरिति प्रमाणेन ॥ मनो बुद्धिरहंकारश्चित्तं करणमांतरं ॥ संशयो निश्चयो गर्वः स्मरणं चेति
हृत्तयः इति प्रमाणेन च मनोहृत्तिभिन्ना बुद्धिरंगीकर्तव्येति ॥ तस्मान्न्यायमतसिद्धमनोऽपेक्षयाः
स्मन्मतसिद्धमनसो भिन्नत्वान्न न्यायमतप्रवेशः ॥ ॥ इत्यहं हेनादित्यउत्तरायणेन वमार्कोपहिराट्
दीप्तिमत्संवादांतर्गत देवसेनस्वबुद्धिसंवादे मनोरूपकथनं नाम प्रथमो रश्मिः ॥१॥ देवसेन उ
वाच ॥ यथैक पुरुषस्य बहवः सेवकास्तेषु सेवकेषु कोऽपि भृत्याधिपस्तं तान्याज्ञापयति ॥ इतरे से
वकाः भृत्याधिपस्वाधीनास्तस्मात्स भृत्याधिपस्तान् सेवकानाज्ञापयति तथेदं मनो भृत्याधिपः स
र्वाणीन्द्रियाणि तस्याज्ञाबद्धानि सेवकात्मकानि ॥ अथवा शारीरं तत्र प्रतिरोपमंतस्याः प्रतिमायाश्च
त्वं श्रोत्रादीनीन्द्रियाणि वर्तते यन्त्रसूत्राकर्षणप्रतिमायां च त्वक्श्रोत्रादीनि चेष्टयंतितन्त्रसूत्रं तु मनः
सूत्राकर्षकत्वात्मा ॥ स्वबुद्धिरुवाच ॥ योऽपरो मनस इंद्रियत्वमनिंद्रियत्वं चेति पक्षद्वयमपि संभव
तीत्युक्तं तत्कथं ॥ ॥ देवसेन उवाच ॥ मनसो भागद्वयं तस्यार्धभागइंद्रियेर्धभागोंऽतःकरणमपि ॥ इंद्रि
येयो भागस्स इंद्रियाणामुत्कृष्टः ॥ योंऽतःकरणंभागस्तस्माद्बुद्धिरुत्कृष्टेति ॥ मनसस्तु परा बुद्धिरि
ति प्रमाणं यजमानपंचमाः षडृत्विजइत्यत्र चत्वार ऋत्विजः पंचमो यजमानो यजमाने यद्यप्यृत्विक्त्वं
नास्ति तथापि यज्ञसापेक्षितत्वेन ऋत्विक्स्वाधीनत्वेन चेष्टिसमाप्तिपर्यंतं स्वल्पमगत्या यजमाने ऋत्विक्त्वं

संभवति॥ यजमानस्य प्रेरणानुसारेणर्त्विजः कर्म कुर्वंति॥ विधिप्रेरणानुसारेण यजमान ऋत्विगा
धीनः॥ तथा मनो यजमानस्थानीयमिंद्रियाण्यृत्विक्स्थानीयानि॥ मनसः स्वाधीनानींद्रियाणि
स्वकीयार्थेषु प्रवर्त्तितानि मनस्त्विंद्रियार्थेष्वासक्तं सदिंद्रियाणामाधीनवद्भवति॥ तस्माद्यावदिं
द्रियार्थेष्वासक्तमिंद्रियाधीनं तावन्मानसींद्रियत्वं वर्त्तते यदेंद्रियेभ्य इंद्रियार्थेभ्यश्चोदासीनं भवति
तदा मनस्यनिंद्रियत्वं भवति॥ न तु चाणिमहं स्पृशामीति यद्यपि चैंद्रेन स्तुत्वं नास्ति तथापि नन्वव
सहचारित्वेनौपचारिकं नस्तु तत्वं॥ तथा यद्यपि मनसींद्रियत्वं नास्ति तथापींद्रियसहचारित्वेनौ
पचारिकमिंद्रियत्वं॥ तथा च भूतानामस्मिं चेतनेति॥ चेतना भूतेभ्यो नेतरानितरापि तथेदं मनो
पींद्रियं चानिंद्रियं च॥ पंचमहाभूतान्येव पंचेंद्रियाणि मनस्तु चेतनाभूतं॥ तथा चोक्तमानं
दलहर्यां॥ मही मूलाधारे कमपि मणिपूरे हुतवहं॥ स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुप
६५ रि मनोपि भ्रूमध्ये तिपंचभूतानि पंचचक्रेषु चेतनाभूतस्थाने मनो वर्णितमिति॥ ननु चेतनात्
परा भवति मनोऽपरास्वरूपं तस्माच्चेतना न भवतीति चेन्न॥ मनसि परात्वमपरात्वं चेत्यंशद्वयमस्ति
तस्मान्मनः परापरग्रंथ्यात्मकं तस्मान्मनसोऽपरांशस्पृष्टोऽिंद्रियत्वं॥ परांशस्पृष्टोऽनिंद्रियत्वं च
मनसोऽपरात्वमोधनानंतरमिंद्रियत्वं नास्ति॥ भोपि शोमनसोदशविधत्वं कामः संकल्पो विचि
कित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्भीर्धीरित्येतत्सर्वं मन एवेति श्रुते॥ तत्र कामो विविधविकित्साऽ

न० १२० 120

श्रद्धाः धृतिर्भीश्चेति पंचापराधर्माः ॥ सैवाल्पः श्रद्धाधृतिर्ह्रीधीश्चेति पंचपराधर्माः ॥ हे शिशोऽ
स्मात्पिन्त्संवादेन विहंगमवाजेन यन्नात्मैवात्मना जितः इति स्मृतितात्पर्यनिर्णयबोधः ॥ श्लोकोनि
मितस्तेवक्ष्यामि शृणु ॥ तेन सर्वं जितं येन मनः सैवमनोजितं ॥ हताः सर्वेऽरयो येन मनः सैवमनोहृ
तं ॥ २ ॥ एतदभिप्रायस्त्वेवं मनः परांश्चेरपरांशायेन जितं स्यात्तेन सर्वं जितं सर्वारयो हताश्चेति स
हता
त्वंपरारूपं तमश्चापरारूपं तदुभयमात्मस्वं रजः ॥ कामलोभक्रोधलोभरजोगुणसमुद्भव इति प्रमाणे
न रजोगुणात्मकं मनः ॥ यदा मनसः परांशैरपरांशाः साधिता भवेयुस्तदा तमोनिवृत्त्याऽर्थाद्दुभ
यात्मकरजसोऽपि निवृत्तिर्भवेत ॥ ततो मनसः सत्त्वमात्रमवशिष्यते ॥ ततश्च ज्ञानिनो मनसः
प्रतिष्ठा यावत्प्रारब्धं तावत्सत्त्वगुणमात्रे भवति ॥ तत्र सा विचारो जीवचैतन्यस्याविच्छेदक
स्तन्नाशे तत्कार्यभूत जीवत्वस्यापि निवृत्त्या ब्रह्मकैवल्यं प्राप्नोति ॥ ॥ इत्यद्वैतादित्यब्रह्मरायणे
नवमोऽर्कपक्षिराजदीप्तिमत्संवादान्तर्गतदेवसेनसुबुद्धिसंवादे मनःस्वरूपकथनं नाम द्विती
योरश्मिः ॥ २ ॥ ॥ दीप्तिमानुवाच ॥ भो गुरो त्वया पूर्वमुक्तं ज्ञानिमनसः प्रतिष्ठा सत्त्वगुणे इति प
श्चाच्चोक्तं ज्ञानी ब्रह्मकैवल्यमाप्नोतीति ॥ सत्त्वगुणवतो निर्गुणब्रह्मकैवल्यं कथं संगच्छते ॥
पक्षिराज उवाच ॥ हे शिशो जीवस्तत्त्वतो ब्रह्मैव सन्नज्ञानतो जीवत्वं प्राप्तः ॥ गुणाश्चानात्मभूता
मनोऽप्यनात्मरूपं तच्च सत्त्वं ज्ञानरूपं रजस्तमोभयस्वरूपं ॥ अज्ञानदशायां देहिनो मनसः प्र
तमोऽज्ञानरूपं

तिष्ठातमसिरजसिवा ॥ ज्ञानदृशायोन्तत्तमोरजसोर्निहृतत्वेनसत्वमात्रेप्रतिष्ठाभवतियदिसत्वेऽपि
स्थितिर्नांगीक्रियतेतर्ह्यात्मनोऽनात्मनाशकत्वेनतत्रस्थितिरसंभवान्मनसःस्थितिरेवनस्यात्तस्मा
द्गत्यायावत्प्रारब्धंयावच्चास्यमायाजालस्यविच्छेदपत्तावज्ज्ञानिमनसःसत्वेस्थितिरंगीकर्तव्या ॥ दे
शिशोयावन्मनोरूपदर्पणंतावज्जीवरूपप्रतिबिंबोप्यंगीकर्तव्यः ॥ अज्ञानीदर्पणप्रतिबिंबबिं
बाभिन्नत्वेनज्ञातासंसरति ॥ ज्ञानीतुदर्पणंव्याजंप्रतिबिंबंवागालेवनमात्रंज्ञात्वाकेवलबिंब
भूतःसन्नस्मिन्नेवस्वविनोदंपश्यति ॥ अज्ञानिनोविनोदस्तमःस्वरूपोमध्यस्थानांविनोदोराजस
रूपोज्ञानिनोविनोदस्तुसत्वात्मकः ॥ यदिसत्वात्मकदर्पणंस्यात्तर्हिस्वस्मिन्नेवविनोदमपिपश्येत्
॥ तदभावेतुकेवलेनिर्गुणेकःकस्यविनोदंपश्येत्कःकस्यवाबिंबोभवेत् ॥ येनज्ञानेनज्ञान्यनात्म
रूपदर्पणंप्रतिबिंबभूतचिच्छायांबिंबभूतात्मानंचविविच्यतितज्ज्ञानंसत्वात्मकमेवज्ञानंय
दातदाविद्याद्विवृद्धंसत्वमित्युतेतिश्रीभगवद्गीताप्रमाणात् ॥ हेशिशोरजस्तमःसत्वात्मकंहि
तमत्यज्ञंतंयदिदंरहस्यंजानंतितेषामेवैतत्त्वारस्याच्छुभवोभवति ॥ यदाप्रारब्धस्यावसानंभ
वतितदायेज्ञानिनोऽस्मिन्देहेलिंगदेहंभंमापयन्तेतियेचस्थूलमास्थूलभादिदेहंद्वातीतालोकलेवरंत
ज्ञाविदेहकैवल्यंप्राप्नुवंति ॥ तदासत्वात्मकंस्वरूपमद्वैतकपाटंनिर्भिद्यनिर्गुणात्मारामेविरमंति ॥
यत्रनभाःनभासकोनभास्यंयत्रवानदर्पणोनप्रतिबिंबोनबिंबोनविनोदस्तस्मिन्सर्वावपिश्ले

न० २२१ निर्गुणे केवले ब्रह्मणि लीयंते ॥ यदि कदाचित्कलेवरत्यागकाले सुषुप्तो बुद्धिः सत्वात्मकसत्वव
लेशलिप्ता भवति यदि वाऽहं ब्रह्मास्मीति वृत्तिः सत्वात्मवतः [illegible] सत्ता भवति तदा सुभोत्तमस
121 त्यादिलोकान्संप्राप्नोति न तु पुनर्लिंगभंगाभावात् ॥ यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥
तदोत्तमविदां लोकानमलान्प्रतिपद्यत इति स्मृतेः ॥ दीप्तिमानुवाच ॥ भो गुरो यदि सत्वगुणनिवृत्ति
र्न स्यात्तर्हि लोके कोपि गुणातीतो न स्यात् ॥ पद्मिराजउवाच ॥ हे शिष्य गुणातीतस्तु सर्व एव व्याप
[illegible]वस्तु[illegible]द्विना गुणानां स्थितिर्न संभवति ॥ परंतु सर्वेषां प्राणिषु जनन दृष्टि पृथिव्यां वा दिवि देवेषु वा
पुनः ॥ सत्वं प्रकृतिर्दिशेषुतं यदेभिः स्याद्विनिर्गुणो इति स्मृत्याज्ञवे[illegible]पि प्राणी सत्वातीतः ॥ यद्गुणा
तीतं सर्वविधिधावधिभूतं वस्तु प्रवाटं स्यात्तर्हि महद्दुःखं वस्तु सुखमिति[illegible]तो न सर्वमिह लोक
परलोकादिकं दृश्यं स्यात् ॥ केचित्तिनो ब्रह्मसामीप्यावस्थां प्राप्ताः स्वमनोबुद्धी प्रयत्नेन समाधौ
योजयंति ॥ यदा ते समाधौ चिरकालस्थित्या व्यग्रमनस्कास्ते पुरुषाः समाधिं विहाय मनोबुद्धी
जपस्वाध्याययज्ञादिकत्कर्मसु योषयित्वा पुनः समाधौ योजयंति ॥ यदि कदाचिन्मनोबुद्धी निर्गुण
[illegible]ते न सोढ्यगुणा प्राप्नुवंतं तर्हि सत्कर्मसु न योजयंति तर्हि मनोबुद्धी विहिषे न स्यातां ॥ तस्मान्नित्यशः
केवलसमाधिपरायणो भवति ॥ योऽनामयोगस्य सर्वांगेषु ब्रह्मतेजः प्रकाशते यस्य हृदयं सत्व
पुंजेन पूरितं यः सर्वेषु भूतेष्वेकमव्ययभावं पश्यति स एव ज्ञानी ॥ एतानि सर्वाणि ज्ञानिलक्ष

णानि सत्त्वविकाररूपाणि ॥ तच्च सत्त्वं निर्मलत्वात्प्रकाशकमनामयं ॥ सुखसंगेन बध्नाति ज्ञानसं
गेन चानघेति ॥ सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युतेति
॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमिति च प्रमाणं
॥ हे शिशो हे वत्सास्मीति ज्ञानमपि सत्त्वात्मकं बोधितस्वबद्धव्यंतदर्वाचीनं तत्त्वतः सत्त्वात्मिकमिति ॥
तस्मात्त्वं गतिसत्त्वातीतत्वं सर्वस्यापि दुर्घटं ॥ सगुणः प्रकर्षोऽभिगुणो गुरुस्तु नमः ॥ यदि गुरुः स्व
वटः स्यात्तर्हि जगतः स्थितिरपि न स्यात् ॥ यथा सुषुप्तौ मनः शरीरे लीनं भवति तथा ज्ञानिनो
मनः समाधौ मग्नं भवति नष्टं तु न भवति ॥ यदि ज्ञानिनो मनोबुद्धी नष्टे भवेतां प्रारब्धानुसारेण श
रीरमपि तिष्ठेत्तदा सज्ज्ञानी विदेहो भवेत्परं तु गुणातीतो न भवेत्तस्माज्ज्ञानिनो मनसः सत्त्वे प्रति
ष्ठा गीर्वाणव्या ॥ इत्यद्वैतादित्ये तत्त्वनारायणे नवमार्गे पहिराजदीप्तिमत्संवादे ज्ञानिनो मनसः
सत्त्वप्रतिष्ठापनं नाम तृतीयो रश्मिः ॥ ३ ॥ दीप्तिमानुवाच ॥ भो गुरो गुणातीतं वस्तु सर्वत्र
व्यापकमिति पुनस्तत्त्वावाप्तं चेदिह परलोकादिवं न स्यादित्यपि यदुक्तं तद्विरुद्धं भाति ॥
पहिराज उवाच ॥ सर्वातीतं वस्तु सर्वव्यापकत्वेन सर्वप्राणिनां समीपस्थं भवति सर्वे प्राणि
नस्तु न तत्समीपस्था न भवंति यदि श्रवणमननादिसाधनसंपन्नं विना तत्समीपस्था भवेयु
स्तर्हि तत्काले देहेषु लग्नं पदार्थशोधनानंतरं श्रवणादिद्वारा शनैः शनैर्वस्तुसामीप्याव

नं० १२२
122

स्तत्प्राप्तिर्भवेत ॥ नान्यः पंथा अयनाय विद्यत इति श्रुत्या श्रवणादिकं विना तत्प्राप्तिर्न भवति ॥
तच्छ्रवणादिकं ज्ञानं सत्वात्मकं ॥ तस्मात्सत्वस्थितिमंतरा ब्रह्मसाक्षात्कारावस्थाप्राप्तिर्दुर्लभा
॥ दीप्तिमानुवाच ॥ भो गुरो यदि जंतुः कोपि गुणातीतो न भवति तर्हि त्रैगुण्यविषया वेदा निस्त्रैगु
ण्यो भवार्जुनेति वाक्येन भगवता गुणातीतो भवेति विधानं किमर्थं कृतं ॥ पतिराज उवाच ॥ हे शि
शो विपरीतत्वदृश्यदर्शनदृष्ट्या भेदेन विनयात्मिकात्तैव तस्य द्वयोर्वा भाषो विशुद्धीन पश्यति तथा गु
णत्रयात्मकं मध्ये तमोरजसोर्नाशेन गुणातीतं चित्तं न पश्यति ॥ परं तु मायायाः सत्वात्मकात्वेन यावद
स्य मायाजालसत्विक्षेपस्तावत्कोपि सत्वातीतो न भवति ॥ हे शिशो ऽयं दृष्टिरहस्यं दत्त्वा मिश्र
ण उर्ध्वममार्गवतः स्वर्गपर्यंतं पितृरर्चिरादिमार्गवतस्तु ब्रह्मलोकपर्यंतं ॥ ब्रह्मलोकात्परम
निरुद्धपदप्राप्त्यर्थं कर्षणवान्देवावायो श्रुता लोके स्मृताः ॥ ब्रह्मलोकप्राप्तानां पुनरावृत्तिर्नास्ति
परं तु तेषां ब्रह्मसदाल्पसमाप्तिपर्यंतं मुक्तिरपि नास्ति ॥ ... मार्गगं चेपेत्तयो ये धिवा
त्तानि तेषाम निरुद्धपदं प्राप्यं ॥ अनिरुद्धात्परसगाम... मत्मनुन्हदृष्टानि नामपि निरुद्धपदप्रा
प्तिरेव दुर्लभा किमु वक्तव्यं तत्परपदप्राप्तिर्दुर्लभेति ॥ यः सर्वदा निर्विकल्पकसमाधिस्थो भव
ति यः शरीरे विद्यमाने शरीराभिमानं त्यजति स प्रारब्धसमाप्तिसमये विदेहकैवल्यं प्राप्नो
ति ॥ नास्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते इति श्रुतेः ॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सो ऽ १२२

र्जैनेतिस्मृतेश्च॥ निस्त्रैगुण्ये पथि विचरतां मिविदे निर्गुणमार्गे नित्यशो मनो योजयंति बुद्धिमभ्यसंते
ते प्रारब्धसमाप्तौ व्याजरूपं शरीरं विहाय कैवल्ये निर्गुणे विलीयंते॥ श्रीभगवानुवाच॥ ब्रह्मवेद ब्रह्मैव भ
वतीति श्रुतेर्यदि त्वानी ब्रह्मभूतो भवति तर्हि तस्य सत्वे स्थितिः कथं भवति॥ पद्दिराज उवाच॥ हे शिशो
ब्रह्मभूतात्वात्तानीत्व तिदुर्लभः॥ नमः प्रधानवंतः सर्वे प्राणिनस्तेषु रजः प्रधानवंतो दुर्लभास्तेषु स
त्वप्रधाना दुर्लभास्तेषु निरभिमानिनो ऽतिदुर्लभा मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये॥ यतता
मपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः इति स्मृतेः॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव॥ न द्वेष्टि संप्रवृ
त्तानि न निवृत्तानि कांक्षति॥ २२॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते॥ गुणा वर्तंत इत्येव योऽवति
ष्ठति नेंगते॥ २३॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिं
दात्मसंस्तुतिः॥ २४॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः॥ सर्वारंभपरित्यागी गुणातीतः स
उच्यते॥ इति श्रीभगवद्गीतावाक्यैर्गुणातीतस्य त्वानि चोलक्षणं यत्प्रतिपादितं मे तल्लक्षणलक्षि
तो दुर्लभः॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति प्रमाणात्॥ स्तु वासनकाद्यवधूतवैदेहप्र
ह्लादादिवद्गुणा गुणेषु वर्तंत इति मत्वा गुणाच्च संगभावाः प्रकाशंते॥ हे शिशो केनाप्युपायेनाऽ
त्मरतात्त्वानिनः भवंतु नित्यं नैमित्तिकादिकर्माणि विस्मरंतु तत्त्व यापितेवा मशनपानशयनमलमू
त्रादिविसर्जनकर्माणि तु कुर्वंत्याकुर्वंत्यानि॥ यदि कदाचित्स्वदेहस्येनाशनपानादिकं न करोति परं त्व

न० परहस्तेन प्रक्षिप्तान्नादिकं स्वप्रयत्नेन चर्वणं कृत्वा गिलत्येव ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्य
१२३ कर्मकृत् ॥ कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरिति स्मृतेः ॥ अनेन प्रकारेण सर्वेऽपि सत्त्वसंबंधि
व३ चेष्टायां प्रवर्तंते समाधिकाले निर्गुणे विलीयंते पुनस्तेषां मनोबुद्ध्यादीनां सत्वे जागरजः सोऽपि सर्वदा समाधौ न
123 विलीयंते ॥ साधुसाधु सन् कोऽद्वयोऽनन्यकादयश्च परमभागवतास्तेषां दृष्टांतः ॥ पश्यन् शृण्वन् स्पृशन् जिघ्र
न्नश्नन् गच्छन् स्वपन् श्वसन् ॥ प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषु वर्तं
त इति धारयन्निति कर्मणि तेषां मपि गुणेषु निर्गुणभावं निधाय सर्वदाऽखंडसमाधौ तिष्ठंति ॥ ते लोक
संग्रहार्थं विधिपालनार्थं च जपस्वाध्यायसत्वादिकर्मसु प्रवर्तमाना अपि तत्रालिप्ताः संतः सर्वदा
समाधिस्थिता एव भवंति ॥ तेषां हि निर्व्यवहारे प्रवृत्तेऽन्त्यामपि सदात्मन्युपरमति कदाप्यात्मनन्दहासी
नान भवति ॥ तेषामेव हंतेरीदृशी प्राप्तिर्नित्यैषां न भवति ॥ ते देहे विद्यमाना अपि देहा एव भोगान्नु
ज्ञाना अपि भोक्तृत्वादतीताः [illegible] भगवन्मायायाः प्राबल्येन न तन्नियंतृभगवच्छरणमनन्य
भावेन प्राप्य गुणेभ्यो विमुक्ता बभूवुः ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यं
ते मायामेतां तरंति तइति स्मृतेः ॥ ॥ ॥ इत्यद्वैतादित्य उन्नरायणेन वमार्कोपाहिराज दीक्षितसंवा
देऽस्तानिनां मनसः सत्वगुणवत्वेपि निर्गुणभावस्थापनं नाम चतुर्थो रश्मिः ॥ ४ ॥ ॥ ॥ दीक्षि
मातुवाच ॥ भोगुरो प्रावरणस्य द्वैतसापेक्षितत्वेन तेषां मायाविषयकदृष्टिमत्वेन च निर्गुणभावः १२३

कथं संभवति ॥ पक्षिराज उवाच ॥ ॥ हे शिष्य यः सर्वधर्मेभ्यो निराशः सन्निर्गुणब्रह्मशरणं व्रजति
स एव समाधिस्थो भवति ॥ हे शिष्य त्वं वृत्तिनाशं समाधिं जानासि तन्न संगच्छते ॥ अंतःकरणवृत्त्य
भावेः दिद्यावृत्तिस्तिष्ठति ॥ यथा विद्यावृत्तिः सा स्वसुखावस्थानतुर्यावस्था ॥ यदा स्वरूपस्य वृत्ति
व्याप्तिर्भवति सा तुर्यावस्था ॥ निर्विकल्पकसमाधिर्द्विविधोंऽतर्बाह्यभेदेन ॥ तत्र सर्वविधिवेधा
वधिभूतस्वरूपे वृत्तिव्याप्तिरंतःसमाधिः ॥ सर्वविधिबाधावधिभूतं स्वरूपं सर्वचराचरब्रह्मांडव्याप
कत्वेन प्रत्येकं तत्तदुपलक्षत्वेन चानुभवो बहिःसमाधिः ॥ एवंप्रकारेण यद्वस्ति तत्सर्वं ब्र
ह्मैव नेह नानास्ति किंचिदपि नास्ति ॥ एते परिदृश्यमानानां नामरूपात्मकाः पदार्था ब्रह्मणः पारावारे
तरंगबुद्बुदादिवदुत्पद्यंते विलीयंते च ते सर्वे ब्रह्मैव एवं स्वविनोदानुभवो बहिःसमाधिः
॥ हे शिष्य यस्मिन्निर्गुणे ब्रह्मणि परमभागवताः सत्वगुणाः समाधिस्थाः संति ॥ तस्य मा
यास्वविनोदार्थाय वर्तंते ॥ तस्मात्तेनानव्यग्राः एवित्यंतासर्वारंभाः समशत्रुमित्रपक्षाः माना
पमानयोस्तुल्याः सुखदुःखादिद्वंद्वरहिताः ॥ निंदास्तुत्योः समचित्ताः समहेमाश्मभावाः
निरस्तममताहंकाराः सोहंप्रवृत्तिप्रकाशानां प्रवृत्तिनिवृत्त्योर्गतरागद्वेषाः ॥ निर्गुणस
क्तास्ते परमभागवताः सत्वगुणप्रधानमायाविनोदजन्यसुखाद्विमोहनार्थं केवलमात्मानं
विनान सत्वं नैव मायेतीत्थं मत्वा गुणागुणेषु वर्तंत इति भावेन साक्षिरूपेण तिष्ठंति ॥ टीप्पि

नै १२८ 124 मानुवाच॥ हे गुरो श्रीमद्भगवद्गीतायां मायोक्तं त्वदुक्तवीत्याच ज्ञानं सत्यात्मकमिति चेद्येन ज्ञानेन
ज्ञानी गुणागुणेषु वर्त्तंत इति ज्ञात्वाऽलेपः संतिष्ठति तज्ज्ञानमपि सत्यात्मकं स्या[illegible]ज्ज्ञानी गुण
तीतः कथं भवति॥ पत्निराद्युवाच॥ हे शिष्य तज्ज्ञानमपि सत्यात्मकं केवलं परं तु ये परमभागवता
एतस्मादभिमानादतीताः वयं ज्ञानिन इत्येतरे ज्ञानिन एतदभिमानरहिताः केवलमात्मरताः
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिन इति स्मृ
तेः॥ तस्मात्ते निर्गुणाः शुद्धभूतात्मान एव॥ यथाऽसिना शत्रुहननानंतरं तस्य प्रयोजनं नास्ति
तथा सत्यात्मकज्ञानेन तमस आत्मज्ञाननाशानंतरं तस्य प्रयोजनं नास्ति॥ यथा वा कंटके
न कंटकोद्धारानंतरं कंटकद्वयमपि त्यज्यते तथा ज्ञानेनाज्ञानं नाशयित्वा ज्ञानमपि त्यजति
॥दीप्तिमानुवाच॥ हे गुरो ते भागवता ईदृशा निर्गुणाः संतश्चेद्देहात्मकं शरीरं कस्माद्भजंति
॥पत्निराद्युवाच॥ हे शिष्य अन्यभावो नास्ति॥ अनात्मकगुणसंगदोषेण यदि भावः स्वात्म
निमग्नजलवद्भुस्थितस्तस्मादिति चामार्थं निजस्वरूपमसंगोऽहमयमिति मत्वा स्वयमेव स्वास्मि
न्स्वस्वरूपपरायणो भजंति॥ परं तु यावद्देहसंबंधलक्षणा याज्ञाल विक्षेपो वर्तते तावद्भ्रोक्ता स
र्वदा तद्दर्शनपरमदत्तस्वस्वरूपसंज्ञा॥ तेषां परमभागवतानां मध्ये भजनादिति संज्ञा वर्तते॥ ईदृशाणां पदा
र्थश्रेष्ठहि स्वस्वरूपस्य साक्षित्वं स्यात्तस्मात्साक्ष्यपि देहेंद्रियसापेक्षितः॥ भगवत्स्वरूपं त्वेतादृशं

द्वादश्यतीतं सदा ॥ निर्दिश्यं परात्परं नामरूपदेशकालाद्यतीतं परिणामपरिमाणादिरहितं वृद्धि
ह्रासरहितं सदसद्विलक्षणं भवति । ईदृशं भगवत्स्वरूपं तेषां परमभागवतानामनन्यभावेन स्वात्मत्वे
नानुभवंति । मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥
ति प्रमाणं ॥ ॥ इत्यद्वैतादित्ये नरायणेन व मार्के पक्षिराजदीप्तिमन्संवादे ज्ञानिनां मनसः सत्व
प्रतिष्ठावत्वे पि तेषां निर्गुणभावस्यापन्नं नाम पंचमो रश्मिः ॥ ॥ ५ ॥ ॥ दीप्तिमानुवाच ॥
भो गुरो श्रीभगवतो भक्तानां चात्मज्ञानभेदः शरीरज्ञानभेदो वा नास्तीति तेषां भगवान् भक्ताश्चेति
भिन्नसंज्ञा विमर्शः ॥ ॥ पक्षिराज उवाच ॥ भगवतो भक्तानां वा न शरीरविकारोस्ति नात्मज्ञान
भेदो वा भगवान्भक्तानामात्मा भक्ताश्च भगवद्गुह्यभूतास्तेषां नामतो भेदो वस्तुतोऽभेदः ॥ अ
ज्ञानाच्छरीरं दृश्यते शरीरभेदाद्भेदः कल्पितो भवति ॥ भक्ताश्च ज्ञानाज्ञानभेदाद्व्यतीताः सं
तः स्वरूपे निमग्ना भवंतीति तेषां भक्तसंज्ञा ॥ स्वतः प्रकाशरूपत्वेन भक्तानां निजस्वरूपबोध
कत्वेन च तस्य परमगुरोर्भगवानिति संज्ञा ॥ न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीन
वदासीनमसक्तं तेषु कर्मसु ॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितं ॥ परं भावमजानंतो मम
भूतमहेश्वरमिति प्रमाणेन स पुरुषोत्तमः सदाऽयोनिर्व्यापोऽव्ययश्च ॥ तथापि धर्मसंरक्ष
णार्थं साधूनामुद्धारार्थं लोकसंग्रहार्थं च भक्तवत्सलत्वेन लीलया परां प्रकृतिं दिव्यवपुः कृत्वा

न० १२५ 125 वतरति॥ योगमायायाःस्वाधीनत्वेनतत्कार्यभूतसत्वगुणस्तस्यकार्यंविकारःस्यात्॥ किंतज्जगद्व्य
वहारेषुसत्वगुणमात्राकारिणंज्ञात्वातद्द्वारासाधून्संप्रतिपालयति॥ अजोपिसन्नव्ययात्माभूतानां
मीश्वरोपिसन्॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया॥ परित्राणायसाधूनांविनाशायचदु
ष्कृतां॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगे इतिप्रमाणं॥ यद्यपिव्यवहारदृष्ट्याजन्मांगीकृतं
प्रतिपालनादिकर्मापिकृतंतथापिसर्वस्वतंत्रत्वाज्जन्मकर्मादिरहितः॥ नमांकर्माणिलिंपंतिन
मेकर्मफलेस्पृहा॥ इतिमांयोभिजानातिकर्मभिर्नसबध्यते इतिप्रमाणं॥ प्रकटीभूतनिर्गुण
तेजः सोऽहमस्मिंल्लोकेलोकांतरेवाक्वापिदेहोदेहीवानसमर्थः॥ एतद्देवाद्भुतचरित्रमनिर्वच
नीयलीलाचयत्नादृष्टातेजस्तन्मनुष्यलोकेलीलामात्रपविग्रहेप्रकटीबभूव॥ अनिर्वचनी
यमाययाःस्वाधीनत्वेनाघटितघटनात्समाज्ञाता॥ एतस्मिन्नपारचरित्रेवक्ष्येशेषेंद्रसनका
द्योविस्मिताजाताः॥ धन्याधन्यागावोगोपागोप्यस्तेसर्वेयत्तोनिर्गुणपारावारमीनाबभू
वुः॥ साधुसाधुहेवृंदावनेगोकुलंचयदीयरजसिलुठितंब्रह्मादयोयाचीच्छंति॥ हेशिशो
सप्तुरपोन्नमःस्वीयनिर्गुणस्वरूपंस्वयमेवोपदिदेशानोभक्ताःसर्वेनिर्गुणस्वरूपेमग्नाबभू
वुः॥ यदिकदाचिदेवंसनोपदिशेत्तन्मार्गमपिनदर्शयेत्तर्हिनिर्गुणपर्यंकोवाचरेत्तत्स्वरूपं
वाकथंप्राप्नुयात्॥ सपरपुरुषःस्वस्तोत्ररूपमुक्ताफलानिस्वनिर्गुणात्मकगुणेस्वयमेव १२५
म१

ग्रथितवान्॥ तदापरं भागवताः स्वस्वमनोबुद्धिरूपां गुलीभिस्तन्मालां मालाभ्यासमवर्द्धन्॥ सर्वध
र्मान्परित्यज्य मामेकं शरणं व्रजेति प्रमाणेन स भक्तवत्सलः स्वशरणप्राप्त्यर्थं साध्योपायमासनत्तदा स
र्वे परमभागवताः सांख्ययोगपायोपासनादिर्निखिलाशाः संत्यज्य शरणं गत्वा तं प्राप्नुवंतः॥ यद्वितेनदृ
ष्टीहृताः स्वपूर्तार्हितेवो नोपायेन वा योगांतरेण ज्ञानेन ध्यानेन वा तं प्राप्नुयुः॥ सपुरुषोत्तमः स्वपरम
याकेन
शोभां स्वयमेव वर्णितवान् यद्वितेन न वर्णिता स्यात्तर्हि सा सर्वैरप्यगम्या स्यात्॥ यमेवैष वृणुते तेन
न लभ्य इति श्रुत्या भक्तानां मनोबुद्ध्योः सामर्थ्यं कृत्वा साक्षाद्भवति॥ यद्येवं न स्यात्तर्हि वा स्वबानंद
परोहं भवेत्॥ स भक्तानां श्रोत्रभूतः सन्नव निर्गुणत्वेनैव प्राप्यते॥ स्वभक्तानां चक्षुर्भूत्वा स्वस्वरू
पं साक्षाद्भासयति॥ स्वभक्तानां हस्तं गृहीत्वा तान्निर्गुणपथे विहारयति॥॥ आत्मारामउवाच॥ ॥
हे मधुपदीप्तिमानेतत्सर्वं श्रुत्वा पक्षिराजचरणौ भक्त्या वंदित्वैवमुवाच भो गुरो भ वन्माहात्म्यं वे
न गुरुविन वा यानि द्भू यावद्वर्णयिष्यामि त्वं साक्षाच्चिद्घनस्वरूपः भवन्माया वारविंदनिस्तैतत्प
रमरहस्यमकरंदं मम हृदयरूपभ्रमरेण प्राप्नत्वत्वा रस्यैर्विमग्नो जातः॥ पक्षिराजो दीप्तिमन्त
एतद्भक्तिभूर्हृष्टः प्रसन्नः सन्नुवाच॥ भोः शिष्य एतावत्पर्यंतं मया यन्निरूपितं तत्सारभूतं वक्ष्यामि
शृणु॥ अजामेकां लोहितशुक्लकृष्णामिति श्रुत्या गुणत्रयं प्रकृतेरूपं॥ गुणत्रयमेवावस्थात्रयं
भवति॥ तत्रात्मनोऽविद्याहृत्तिना दात्म्यापत्तिः स्वप्नावस्था॥ अविद्यायास्तमोरूपत्वेन सात

नं॰
१२६
126

मोगुणात्मिका ॥ आत्मनोऽन्तःकरणवृत्तिसाक्षात्व्यापन्निर्मग्नत्वस्यान्तःकरणवृत्तीनां ज्ञानरूपत्वे
न ज्ञानस्य सत्त्वरूपत्वात्सा सत्त्वगुणात्मिका ॥ स्वप्नावस्था यात्र भयोरूपत्वेन रजोगुणस्याप्युभयरू-
पत्वेन सा रजोगुणात्मिका ॥ एवमवस्थात्रयं गुणत्रयात्मकं तुर्यावस्था तु गुणातीता प्रत्यक्तेः परा ॥ दे-
वमनुष्यादीनां मध्ये कस्यापि सर्वदाखंडतुर्यावस्थायां स्थितिर्न संभवति ॥ देहे विद्यमाने सति सर्वदा वि-
देहभावो दुर्लभः ॥ तथापि यस्य सर्वदेव प्रयत्नं तेन कामाद्यनासक्तवृत्तिर्जिता ॥ अथ यस्य सर्वोपमनो भवत्यचञ्च-
लसमसुखं दृष्टिस्तु न्या ॥ मुक्ता सर्वकामत्वेनभिन्नसर्वसंशयग्रंथित्वेन सनकादीनां जनकादीनामपि × वैदेहे
विदेहभावस्तुर्यावस्था प्राप्तिश्च सर्वदा भवति तानि विनाभेतरेषां योगयुक्तानां नास्ति ॥ ॥ ॥ इत्यद्वैतादि-
त्यत्र तारायणे नवमार्कपद्धतिराजदीप्तिमत्संवादे तानि नाममनसः सत्त्वप्रतिष्ठावत्त्वेऽपि तेषां निर्गु-
णभावस्थापनं नाम षष्ठोऽरश्मिः ॥ ६ ॥ ॥ दीप्तिमानुवाच ॥ भो गुरो भवद्भिः पूर्वं यन्मनसः परा-
परो भयो भवत्वे निरूपितं तत्स्वसंवेद्यरूपत्वान्मया सम्यङ्न ज्ञातं तद्विस्तरेण वक्तव्यं ॥ पद्धतिराज उ-
वाच ॥ कामक्रोधाद्यासुरी संपद्यावत्तावत् परां प्रकृति कार्यभूता ॥ शीलसंतोषादिदैवी संपद्याव-
त्तावत्परा प्रकृतिकार्यभूता ॥ किं यत्पूर्वकाले विचित्रबाहुर्नामादिचः स्वगुरुं सत्त्वसंरोहिता-
श्वं स्वसंशयनिवृत्त्यर्थं कोऽहमिति पृष्टवान् ॥ रोहिताश्वोऽपि तत्समाधानं ज्ञातवांस्तद्वृत्त्या मिश्र-
णं तत्प्रत्युत्तरमतेन विस्तरेणैतत्परापरांशानिर्णयस्तत्त्वबोधोऽपि भविष्यति ॥ अथ तयोः संवादः

१२६

तिविचित्रबाहुरुवाच ॥ भो गुरो इदं जगत् किं रूपम् अहम् अपि को वा ॥ रोहिताश्व उवाच ॥ इदं सर्वं जगद्ब्र
ह्मैतद्व्यतिरिक्तं न किमपि यदा सर्वं जगद्ब्रह्मैव तदा त्वं वा कथं तद्व्यतिरिक्तोसि तस्मात्त्वमपि ब्रह्मासि
सर्वं ह्ये तद्ब्रह्मायमात्मा ब्रह्मेति श्रुतेः ॥ विचित्रबाहुरुवाच ॥ भो गुरो सर्वं यदि ब्रह्म स्यात्तर्हि इदं प
शुपक्षिकीटपतंगद्रुमपाषाणादीनां मध्ये वंवं ब्रह्मेति नमामि ॥ मातृपितृपुत्रदारादिव्यवस्था
का कथं सिद्ध्येत् ॥ रोहिताश्व उवाच ॥ हे शिष्य यदि इदं त्वया भिन्नत्वेन निर्दिष्टं जगत्तज्जगन्न भवति
॥ त्वयाहं त्वेन स्थापितो यस्त्वं सोपि त्वं पदार्थो न भवति ॥ जगतस्तत्त्वं च यत्तत्त्वं तत्त्वदृष्ट्या विपरीत
ज्ञानविषयाद्व्यतिरिक्तं ॥ यदि त्वं तत्त्विज्ञ तत्त्वं जानासि तदा जगत्तत्त्वमपि जानासि ॥ स्वस्वरूपम
ज्ञात्वा जगत्तत्त्वं ज्ञातुं प्रवर्त्तसे चेत् [illegible] नीयाः ॥ हे शिष्य त्वमहं विचित्रबाहु
श्चित्रज्ञानी [illegible] मदेहे [illegible] वासीति [illegible] भंगुरत्वेन [illegible] कालेन [illegible] तत्त्व
प्रपंचे लीयेत ॥ [illegible] ॥ [illegible]
[illegible] सेत ॥ विचित्रबाहुरुवाच ॥ भो गुरो यदि इदं जगत् [illegible] तर्हि [illegible] जगत् किं स्या
त् ॥ यद्यपमहं न [illegible] कोवा ॥ रोहिताश्व उवाच ॥ हे शिष्य शोऽहं इदं जगत् [illegible] लिन सत्त्व
प्रधाना [illegible] ॥ अंतो यः प्राणी सो [illegible] पदार्थान् [illegible] त्वात्
दीय मिथ्यालावण्येन मोहितः संसारान्न्नीत्वातेः सहचरोडति ॥ दृश्यमाननाम रूपाधिष्ठानं ब्र

न·
१२७
127

स्वकोऽपि नालोचयति ॥ यथा स्वप्ने एक एवात्मा स्तितत्राविद्यमाना अपि रथपथादिपदार्था भासं-
ते ॥ तथैकस्मिन्नद्वस्तुनि नानाविधानामरूपात्मका मायापदार्थाः पृथक् पृथक् भासंते ॥ यद्यप्य-
ति तत्स्वेद्वेदं नामरूपं च तद्भासैव भाति ॥ एवं त्वमपि नामरूपात्मकाद्देहेंद्रियस्वरूपो नासि किं-
तु तद्विलक्षणशुद्धचैतन्यस्वरूपोऽसि ॥ तवैतच्छरीरसर्गकाले इयं पिशाचरूपा एषा माया
त्वां हेत्वमहंकारस्तं प्रेरयामास ॥ तदाऽहंकारो मोहनास्त्रं त्वदुपरि प्रयोजयामास ॥ अविनाशि-
त्वेन तव नाशो न जातः परं तु तदस्त्रप्रभावेण मोहनिद्रायां मूर्छितोऽसि ॥ तदा सोऽहंकारस्तव
सत्तारूपसंपत्तिमपहृत्य त्वत्स्थाने स्वयं स्थितः ॥ पूर्वं तव चक्षुः श्रोत्रादीनींद्रियाणि शिरःपा-
णिपादादीन्यंगानि चान्यविधानि स्थितानि ॥ तत्स्थानेऽधुनाऽहंकारस्य चक्षुः श्रोत्रादीनि
प्रविष्टानि ॥ यथा लोके कश्चित्पुरुषः पिशाचग्रस्तो मूर्छितो जायते तस्य शरीरे पिशाचः प्रवि-
श्य तदिंद्रियद्वारा पश्यति शृणोति हसति भाषते च तद्वत् ॥ विचित्रबाहुरुवाच ॥ भो गुरोऽ-
हंकारस्येंद्रियाण्यंगानि च कानि कीदृशानि मे इंद्रियाण्यंगानि च ॥ ॥ रोहिताश्व उवाच ॥
अथाहंकारपुरुषस्यावयववर्णनं ॥ तस्याज्ञानमेव शरीरं ॥ तम एव रूपं ॥ अविद्यैव पाणि-
र्वा ॥ दंभ एव शिरः ॥ अश्रद्धाप्रतीती श्रोत्रे ॥ प्रमादसोहौ नेत्रे ॥ मद एव पक्ष्मभ्रूकुटिलतैव भ्रु-
कुटी ॥ वासनैव नासिका ॥ लोभाशापावेव कपोलौ ॥ दुःखमेव श्वासः ॥ विपर्यय एव बुद्धिः ॥ १२७

ममतैव मनः ॥ वेदनैव हृदयं ॥ द्वेष एव श्मश्रु ॥ आशैव मुखं ॥ निंदैव जिह्वा ॥ अनृतमेव वाक्
॥ विकल्प एव तालु ॥ द्वैतमेवाधरपल्लवः ॥ ईर्षाऽसूये दंतपंक्ती ॥ चिंतैव चुबुकं ॥ तृष्णैव कं
ठः ॥ लोभ एवोदरः ॥ तापत्रयमेव त्रिवली ॥ भ्रम एव नाभिः ॥ भयमेव पृष्ठं ॥ कपट एव कटिः
॥ क्रोधदर्पावेव भुजौ ॥ इच्छावंचने एव करौ ॥ आलस्यमेव बाहुः ॥ काम एव शिश्नः ॥ अशु
चिरेव पायुः ॥ असंभावनाविपरीतभावने एव नितंबौ ॥ संकोचप्रसारणावेव करतले ॥ हठ
एव जानु ॥ अनुरागाभिलाषौ चरणौ ॥ आसक्तिविस्मृतिभ्रमतिनिर्दयाहिंसा एव[illegible]ता अंगुलयः
पैशुन्यवैरविरोधद्रोहणा तृष्णा एव नखाः ॥ अथ प्रबुद्धपुरुषस्यावयववर्णनं ॥ तत्त्वज्ञानमे
व शरीरं ॥ प्रकाश एव रूपं ॥ विद्यैव शिखा ॥ शीलमेव शिरः ॥ अहंप्रतीती श्रोत्रे ॥ विवेकविचारा
वेव नेत्रे ॥ चेतनैव पक्ष्म ॥ लज्जैव भ्रुकुटी ॥ उपासनैव नासिका ॥ सोहमेव श्वासः ॥ ह्मानस्व
य एव कपोलौ ॥ प्रसन्नैव बुद्धिः ॥ अमानित्वमेव मनः ॥ शांतिरेव हृदयं ॥ निर्द्वेष एव श्मश्रु ॥
निराशैव मुखं ॥ भावनैव जिह्वा ॥ सत्यमेव वाक् ॥ निश्चय एव तालु ॥ योग एवाध[र]पल्ल
वः ॥ तितिक्षातपसी दंतपंक्ती ॥ नैश्चिंत्यमेव चुबुकं ॥ तृप्तिरेव कंठः ॥ संतोष एवोदरः ॥ त्रि
कालज्ञानमेव त्रिवली ॥ गंभीरभाव एव नाभिः ॥ अभयमेव पृष्ठं ॥ निष्कपटमेव कटिः ॥
दार्ढ्यप्रतिष्ठे एव नितंबौ ॥ धैर्यस्थैर्ये भुजौ ॥ कृपैव बाहुः ॥ वीर्यमेव शिश्नः ॥ संशुद्धिरेव पायुः

श्रोदार्यप्रसादावेवकरौ ॥ साधनेवज्ञातुः त्यागवैराग्येणएवचरणौ ॥ भक्तिविरक्तासक्तिर्यास्तु
चयणितांश्रेणुलयः ॥ शमदममार्दवोदासीनत्वापैशुन्यान्यंगानिनखाः ॥ द्वेषिशोयदात्वंस्वस्व
रूपस्वविस्मृतिंप्राप्नोषितत्वेंद्रियाणिमनोंगानिचमूर्छितान्यभवन् ॥ तदातत्तस्थानेघटंहंका
रस्यैतानींद्रियाणिमनोंगानिचप्रविश्यतत्तद्व्यापारेषुतत्परान्यभवन् ॥ यथारज्जुसर्पाध्यास
स्थलेरज्जोःसत्यत्वेपितद्भानंसचेष्टसर्पस्यैवभानंतथातत्वसत्यस्वरूपत्वेपित्वत्स्वरूपस्या
भानंत्वत्स्थानेमिथ्यासविलासाहंकारस्यैवभानं ॥ यदाविवेकेनतत्त्वश्रेयस्तदातन्नित्यस्वरूप
प्रबोधोजायेत ॥ ॥ ॥ इत्यद्वैतादित्यनारायणेनवमार्कपरिहाज्ञदीप्तिमत्संवादांतर्गतरोहिता
हविचित्रबाहुसंवादेपरापरकार्यनिरूपणंनामसप्तमोरश्मिः ॥ ॥७॥ ॥ ॥ विचित्रबा
हुरुवाच ॥ भोपरापरापरभेदेनजीवद्वैविध्यंयत्त्वयानिरूपितंतत्किंदृष्टंचपरेणज्ञातं ॥ पू
र्वंत्वयोक्तंब्रह्मैवासेवेतितस्मैकथंमिथ्याभूतजीवःकस्मादागतः ॥ रोहिताश्वउवाच ॥ मिथ्या
पदार्थःकश्चिदस्तिचेत्तत्तत्नागमनेऽपिज्ञातो ॥ शब्दिताभिमिथ्यापदार्थस्याभानेनास्तिसततएवो
त्पद्यतेसत्येवलीयते ॥ सत्त्वकदापिमिथ्याभूतंनभवति किंत्वसर्वाधिष्ठानंसर्वावभासकंसर्व
व्यापकंकूटस्थंनित्यमविनाशिच ॥ सन्मिथ्यानभवतिचेत्तर्हिमिथ्याभूतमिदंकुतआगत
मितियदित्वंपृच्छसितदामिथ्यापदार्थस्यावास्तवत्वेनभ्रांतिमात्रमेव ॥ त्वंस्वस्मिन्नेवप

प्यत्वमिति विचित्रबाहुस्तेन ब्राह्मणेनागतं ॥ एतच्छ्रामेतरैः ख्यापितमिति वदसि चेत्तर्हि तदभिमान इत
रेषामेव स्यान्न तु तव ॥ संगदोषादेवं प्राप्तमिति चेत्तर्हि त्वन्मते शास्त्रमिथ्याभूतं संगदोषं त्यक्त्वा त्वं याद
शोऽसि तादृशो भूत्वाऽसंगो भव ॥ ॥ विचित्रबाहुरुवाच ॥ भो गुरो मे पूर्वं त्वयोक्तं कस्यचित्प्राणि
नः शरीरे पिशाचस्यावेशो भवति स पिशाचस्तस्मिन् शरीरे व्याप्नोति मद्देहे त्वहंकारस्यावेशो
जात इत्यधुना तु मिथ्याभूताहंकारो भ्रान्तिमात्र इत्युक्तं ॥ भूतस्य योनिविशेषत्वात्कथं भ्रान्तिमात्र
त्वं संभवति ॥ रोहिताश्व उवाच ॥ देशविशेषेऽस्मिन्विषये मनुष्यजातानामेतादृशः समाचारो यथा जा
नस्तथा तं वक्ष्यामि शृणु ॥ ततस्तव संशयनिवृत्तिर्भविष्यति ॥ तत्समाचारस्त्वेवं ॥ कस्यांचिद्
दक्षिणतीरे पल्लिनाटसंज्ञके देशे वासस्य विद्यासहायस्य पत्नी भर्त्रा सह कलहं कृत्वा ग्रामाद्बहिर्नि
र्गत्य कूपे पतिष्यामीति निश्चित्य कूपसमीपे स्थिता ॥ एतस्मिन्नंतरे कश्चन द्रविडदेशीय शूद्रो
धनवान् कश्चिद्विवाहार्थमागच्छन्मार्गे तां दृष्ट्वा पृष्टवान् ॥ त्वं कासि किमर्थं रोदिषीति सापि
यद्गृहे जातं तत्सर्वं निवेद्य कूपे पतिष्यामीत्युक्तवत ॥ पुनस्तेनोक्तं किमर्थं प्राणांस्त्यजसि मया
सहागत्य मत्समीपे तिष्ठसि चेन्मदीयं सर्वस्वं त्वदधीनं करिष्यामीति ॥ सापि तदंगीकृत्य स्वगृह
स्थितं तत्पात्रं कूपसमीपे संस्थाप्य तच्छिरविवाहार्थं तेन सार्धं गतवती ॥ सोऽपि तां स्वदेश
नगर्यां स्वनगरे स्वगृहे नीत्वा सर्वस्वं दत्तवान् ॥ अनंतरं सवासा तस्याः सर्वत्रान्वेषयन् कूपसमीपमा

न॰
१२५
129

गत्यतया स्याः पितृपात्रं दृष्ट्वा कूपे पतितेति निश्चित्य तत्कूपजलस्यातिगाहनत्वात्कर्द्दमाधिक्याच्च
तच्छरीरं कर्द्दमे मग्नमसाध्यमिति निश्चित्य शास्त्रोक्तविधिना तस्याः पारलौकिकं कर्म कृत्वा पुनः
कांचिद्द्विपवाल्यामुद्वाह्य गृहे ऽतिष्ठत॥ तदनंतरं तस्य द्वितीयपत्न्याः पिशाचावेशो जातः॥ तत्स
मये सोक्तवत्यहं तव पूर्वपत्नी कूपमरणात्पिशाचत्वं प्राप्ता नाम पिहनिष्याम्यनया सह तव सं
सारसुखं न भवित्रीति॥ पुनस्तेन बहुप्रकारं प्रार्थिता सती रामेश्वरं गत्वा तत्र मामुद्दिश्य यथा
विधि कर्म करिष्यसि चेदेनां त्यक्ष्यामि॥ इति श्रुत्वा स ब्राह्मणोपि तां गृहीत्वा सेतुस्नानार्थं गच्छ
न्मार्गे मंडराजनगरे तत्कूटग्रहनिवाटे निवासं कृतवान्॥ तद्रात्रौ तस्याः पुनर्भूतावेशो जातः
तत्समये ऽहममुकनाम्नी तव पूर्वपत्नी त्वत्ताडनदुर्वचनभाषणवशात्कूपे पतित्वा मृतास्म्य
तस्त्वां हनिष्यामि॥ इदं सर्वं तद्ग्रामस्थितकोलाहलं च तत्पूर्वभार्या हर्म्यगवाक्षमार्गेण श्रुत्वा स्व
पतिं तां च दृष्ट्वा स्वनामग्रहणादिना च विनीता सती तं ब्राह्मणं स्वनिकटमाहूयैकांते स्ववृत्तांतं स
र्वं निवेद्याहं न मृतास्म्यां पिशाचबाधोपि नास्तीत्युक्त्वा तस्मै किंचिद्धनादिकं दत्वा स्वगृहं तं प्रेषया
मास॥ तावन्मात्रेण तस्याः पिशाचबाधो निवृत्तस्ततो दंपती सुखेन स्वगृहं गतौ॥ हे शिष्योत द्वा
ह्मणस्य पूर्वपत्न्यां जीवंत्यां को वा तन्नाम वा भूतविशेषः कस्माद्योनिविशेषादागतः॥ इदं सर्वं
त्वमेव स्वमनस्यालोचय॥ तस्मादियं भ्रांतिरेव प्रबला भूतविशेषः यः पुरुषो भ्रांतिरहितः स ए

वस्तुतः सं॥ ॥इत्यद्वैतादित्ये वज्रनारायणेन वमार्कंडेयपक्षिराजदीप्तिमत्संवादांतर्गतरोहिताश्व-
विचित्रबाहुसंवादे श्रोत्रादिरूपत्वनिरूपणं?

भो गुरो परमात्मा ज्ञानिनश्चक्षुःश्रोत्रादींद्रियस्वरूपो भूत्वा तत्तदिंद्रियद्वारा स्वसाक्षात्कारं ज-
नयतीत्युक्तं॥ तत्र परमात्मनः शुद्धचैतन्यरूपत्वेन चक्षुःश्रोत्रादीनां जडत्वेन च चैतन्यस्य च-
क्षुरादिजडरूपत्वं कथं संभवति॥ पक्षिराज उवाच॥ ज्ञानिनां ब्रह्मसाक्षाद्भवतीति सिद्धांत-
स्थितिः॥ तत्र चक्षुरादीनां जडानां तत्साक्षात्कारेण संभवतीति विलक्षणचक्षुरादिक-
मंगीकर्तव्यं॥ तथा हि ज्ञानिनां चक्षुरादीनि लौकिकचक्षुराद्यपेक्षया विलक्षणानि॥ य-
द्यात्मनो विलक्षणचक्षुरादिरूपत्वमपि कथं संभवतीति पृच्छसि तदा चक्षुषश्चक्षुः
श्रोत्रस्य श्रोत्रमित्यादिश्रुत्या तत्संभवात्॥ परंतु चक्षुरादिपदेन वृत्तिर्ग्राह्या या वृत्तिः
स्वरूपाकारा न भवति तावद्ब्रह्मप्रत्यक्षं न भवति॥ यदा मुमुक्षुः श्रवणमननद्वारा
स्वरूपसाक्षात्कारप्रयत्नं करोति तदा द्रष्टा दर्शनं चैतदुभयमुपाधिरिति तत्त्वेन ज्ञात्वा प-
रित्यज्य स्वात्मानमिव दर्शनमपि स्वरूपं मत्वा स्वस्माद्द्रष्टृत्वसंबंधं विहायाखंडभावनि-
दिध्यासनेन स्वरूपमनुभवति॥ परंतु द्रष्टृदर्शनस्य च ब्रह्मभावापत्तिर्नैतान्यधीना
किंतु यमेवैष वृणुते तेन लभ्य इति श्रुत्या परमात्माधीनैव ज्ञानिनस्तु प्रयत्नमात्रं॥

नं
१३०
130

तस्माद्यावत्परमात्मातत्त्वानिनोचक्रत्वरादिरूपोनभवतितावत्स्वरूपसाक्षात्कारो न भवति ॥ **श्री**
श्रिमानुवाच ॥ भोगुरोसहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः ॥ रात्रिंयुगसहस्रांतांतेहोरा
त्रविदोजनाइतिप्रमाणेनब्रह्मणोपिरात्रिदिवसव्यवहारोस्ति ॥ सूर्योदयेनदिनमितितदस्त
मयेनरात्रिरितिव्यवहारोलोकप्रसिद्धः ॥ ब्रह्मलोकस्यतत्सूर्यलोकापेक्षयापरत्वेनाधिकाने
ज्ञोमयत्वेनचैतत्सूर्यस्यतत्रगतेरसंभवात्तस्यसूर्यस्योदयास्तमयाभ्यांतत्राहोरात्रव्यवहारः
॥ **पर्वतराजउवाच** ॥ हेशिशोतस्मिंल्लोकेसूर्योदयास्तमयाभ्यामहोरात्रव्यवहारोनास्ति ॥ किं
तत्रसहस्रयुगावधिकसृष्टिप्रवर्त्तनकालस्याहरितिसंज्ञा ॥ एवंसहस्रावधिकसृष्टिप्रवर्त्ते
नाभावकालस्यरात्रिसंज्ञा ॥ लोकेव्यवहारोदिवसेभवतितदभावस्तुरात्रौतस्माल्लोकव्यवह
त्र्बोधनसृष्टिप्रवर्त्तनतदभावाभ्यामहोरात्रकथनं ॥ एतद्दिनान्तल्लोकस्यतेजोमयत्वान्नप्र
सिद्धाहोरात्रव्यवहारोनसंभवति ॥ ॥ **श्रीश्रीमानुवाच** ॥ भोगुरोसहस्रयुगपर्यंतंसृष्टिका
लस्तावानेवसृष्ट्यभावकालइत्यत्र्युक्ताऽहोरात्रसंज्ञाकरणंकिमर्थं ॥ **पर्वतराजउवाच** ॥
हेशिशोइदानींमयैतस्मिन्विषयेयन्निरूपितंतत्पूर्वाचार्याणांमतानुसारेण वेदपुराणा
नांरहस्यगोपनमिष्टमतआचार्याःकथंपरमरहस्यंप्रकटीकुर्युः यद्रहस्यंवेदपुराणैर्हि
नस्पष्टंवर्णितंतन्मयावाकथंस्पष्टतयावक्तुंशक्यते प्रमाणाभावेनतत्स्वरूपमवस्तुलोक

बुद्धिः कार्येण ज्ञायते ॥ तथापि तत्र भगवता सद्भावनया च तद्दृष्टसंशयं यथा बुद्धिपत्तिं विदधत्यामि स्पष्टम्
॥ विराट्पुरुषस्यायं सूर्योऽनेन स्थानीयो ब्रह्माण्डः शरीरस्थानीयाः ॥ यां विभूतिमवलंब्यायं सूर्यो
ऽवतीर्णः सा विभूतिः परमपुरुषस्थानेन स्थानीया ॥ यां यां विभूतिमवलंब्य सर्वं जगदुत्पन्नं ताः
सर्वा विभूतयस्तस्य प्राणस्थानीयाः ॥ शशिसूर्यादीनां तत्तद्विभूतिमवलंब्यावतरणानंतरमपि
ताः सर्वा विभूतयः परमपदे तथैव देदीप्यमानाः संति ॥ भूर्लोकादारभ्य स्वर्लोकपर्यंतमेतत्सू
र्यसकाशादहोरात्रव्यवहारः ॥ ततः सत्यलोकपर्यंतं सूर्यकारणीभूतविभूतेः सकाशादहोरा
त्रव्यवहारः ॥ एतत्सूर्यकारणीभूतपरमपुरुषनेत्रस्थानीयविभूतेरुन्मेषाद्विरिंचेरहरिति
व्यवहारः ॥ तन्निमेषाद्रात्रिरिति व्यवहारः ॥ उन्मेषनिमेषपदयोस्तात्पर्यमेवं ॥ सहस्रयुगप्र
रणे सति सर्वप्राणिभोगप्रदकर्मणां क्षयो भवति तदा सूर्यजनकीभूतविभूतेश्चक्षुरंतौ लयः
ततः सत्यलोकादिचतुर्दशलोकान्पंचभूतानि च विना सर्वं जगत्तत्रैव लयं याति तदा विरिंचि
र्निद्रितवत्सकारणीभूतप्रभवात्मकविभूतिमप्येति ॥ यदा रात्रिसंज्ञकसहस्रयुगप्ररणं भव
ति तदा सर्वप्राणिकर्मसंस्काराः प्रभवात्मकविभूतिमुद्बोधयंति ॥ ततः सूर्यकारणीभूतपरम
पुरुषनेत्रस्थानीयविभूतेरुन्मेषो भवति ॥ पुनः सत्यलोकादावहरिति व्यवहारः ॥ एवंरीत्या वि
रिंचेः शतसंवत्सरप्ररणे ब्रह्मप्रलयो भवति ॥ दैनंदिनप्रलय[illegible] ब्रह्मप्रलययोरेतावान्विशेषः

नं २६१ 131

दैनंदिनप्रलयेचचतुर्दशलोकाः पंचीकृतपंचमहाभूतानितदधिदेवामूलप्रकृतिश्चननश्यंति किं
तुविरिंचिवन्निद्रितोभवंति॥ यदितुमूलप्रकृतेर्लयःस्यात्तर्हि विरिंचिर्नकथंनिद्रितोभवेत्कस्मा
त्पुनरुत्थितोभवेत्॥ भूतानांपंचीकरणंवाकथंविद्यमानंस्यात्॥ तस्मान्मूलप्रकृतेरपिस्थितिरं
गीकर्तव्या॥ ब्रह्मप्रलयेतुचतुर्दशलोकाः पंचमहाभूतेषुतानितन्मात्रास्तुमात्रास्वगुणेः सहमू
लप्रकृतौ॥ विरिंचिः सर्वैर्देवादिप्राणिभिः सहतत्तद्विभूतिषुविभूतयश्चचिच्छक्तौचिच्छक्ति
रत्नामूलप्रकृतिश्चपरब्रह्मणिलीयते॥ अयमेवप्राकृतप्रलयसंज्ञः॥ इत्यद्वैतादित्यउत्तरायणेन
वमार्कंपतिराजदीप्तिमत्संवादेदैनंदिनप्रलयप्राकृतप्रलयव्यवस्थानिरूपणंनामनवमो
रश्मिः॥९॥ दीप्तिमानुवाच॥ ॥भोगुरोगणतद्भवद्भिरुक्तंश्रीहरिहरस्वरूपनिर्णयंभगवद्विभूति
तत्वनिर्णयंचश्रुत्वाकृतार्थोस्मि॥ परंतुवेदांतादिशास्त्रेषुयत्रयत्रविषयेममसंशयोस्तितन्मे
च्छाम्यनुग्रहेणतत्समाधानंवक्तव्यं॥ अथप्रश्नाः भोगुरोसांख्योदयोद्वैतवादिनश्चास्तिकाउ
तनास्तिकाइतिनिर्णयोनुग्रहेणवक्तव्यः॥ पतिराजउवाच॥ हेशिष्यसांख्योगौतमकाणा
दाणतेःप्यास्तिकानतुनास्तिकाः॥ नचसांख्योःप्रधानंजगत्कारणंमन्यंतेप्रधानंप्रकृतिःप्रकृ
तिर्नामपराचिच्छक्तिःसातुभगवद्विभूतिसमुदायरूपा॥ भगवद्विभूतयोभगवदभिन्नास्त
याचभगवदभिन्नविभूतिसमुदायरूपप्रधानस्यजगत्कारणत्वमंगीकुर्वंतीतितेषामास्तिक २६१

त्वं ॥ परत्वेनेति विभूतिरूपविभुमेव स्थापयंति विभोर्विभुं नाम परात्परं प्रचक्षते: परं न ज्ञानेति ॥ अत
स्तेषां द्वैतवादित्वं ॥ एवं गौतमादयः पृथिव्यादीनां नवानां द्रव्यत्वमंगीकुर्वंति तत्र केचन दिक्का-
लाकाशानामीश्वरे ऽन्तर्भावं मन्यंते ॥ एते पृथिव्यादिचतुष्टयपरमाणूनामाकाशादिपंचकस्य च
जगदुपादानकारणत्वमंगीकुर्वंति ॥ पृथिव्यादीनि नवद्रव्याणि परमात्मनो विभूतिरूपाण्येव
वनतु नद्व्यतिरिक्तानि ॥ अत एव तेषां जगत्कारणत्वसंभवादेतेमास्तिकत्वं ॥ परत्वेनैषामपि ब्रह्मे:
पर्यवसानं विभूतिरूपविभुपर्यंतमेव न तु परात्पररूपविभोर्विभुपर्यंतमतस्तेषामपि द्वैतवादि-
त्वं ॥ अत एव बृहदारण्यषष्ठाध्यायादौ शौलिन्या ऋषयो वागादीनां ब्रह्मत्वेनोपासनोपदेशं ज-
नकस्य चक्रुः ॥ शौलिन्यादृषीणां भगवद्विभूतिरूपवागादिष्वेव ब्रह्मेदं सर्वपरत्वपर्यवसानं न तु प-
रात्परे विभोर्विभौ ॥ दीप्तिमानुवाच ॥ भो गुरो ब्रह्मजीवयोरभिन्नत्वे जीवस्य ब्रह्मांशत्वं कथं संभव-
ति ॥ अथ वेदस्य ब्रह्मणो वा ऽंशित्वं कथं संभवति ॥ यदि जीवो ब्रह्माभिन्नः स्यात्तर्हि जगज्जन्मादिका-
रणत्वं जीवस्य कुतो न संभवति ॥ नेह नानास्ति किंचनेति श्रुत्या ब्रह्मातिरिक्तं नास्ति चेत्तर्हि ब्र-
ह्मजगतोः कारणकार्यभावकथनं ब्रह्मणः स्रष्टृत्वकथनं जगतो ऽनिष्टत्वकथनं च कथं संभव-
ति ॥ ब्रह्मणि प्रकृतौ च परत्वस्वीकारे परप्रकृतिवद्ब्रह्मणोपि जडत्वापत्तिरिति ॥ पहिराज उवा-
च ॥ हे शिशो ब्रह्मत्वांशत्वं स्वरूपं सदांशांशीभावादतीतं ॥ यथा घटाद्युपाधिना निरंशाकाशो ऽ

ने॰
१३२
132

वच्छिन्नत्वेनांशांशिभावेन न तु मह[illegible]काशवत्त्वं घटितोंऽशोऽस्ति ॥ किंतु घटाकाश एवोपाधिवशमंशत्वक
ल्पितं भवति ॥ तथा ब्रह्मणि वस्तुतोंऽशांशीभावाभावेऽपि मायया ब्रह्मणोंऽशत्वमाहत्यांशांशीभावं वि
क्षिपति ॥ जीवे शब्दद्वयं चैतन्यं जीवत्वं च ॥ जीवत्वादतीतस्य चैतन्यस्य न जीवसंज्ञा किंतु जीवत्ववि
शिष्टस्यैव जीवसंज्ञा ॥ जीवचैतन्यं ब्रह्मरूपं जीवत्वं तु जगदंतःपाति मिथ्यारूपं यथा जीवस्य
तथा जगतो जगदंतःपातिपदार्थानां चांशद्वयं चिदंशो जडांशश्च ॥ जीवो जगच्च यद्यपि ब्रह्मैव
तथापि जीवस्य जगदंतःपातिपदार्थानां च ब्रह्मणो वस्तुत्रयमपेक्षितं ॥ सत्ता भानमाधारश्च ॥
तत्र जीवादिपदार्थानां ब्रह्मसत्तातिरिक्तसत्ताशून्यत्वेन सर्वदा ब्रह्मसत्तैवापेक्षिता ॥ ब्रह्मभासा
सर्वमिदं विभातीति सर्वदा ब्रह्मभानमपेक्षितं ॥ तस्य सर्वाधारत्वेन ब्रह्माधारत्वमपेक्षितं ॥ ब्र
ह्मणस्तु कस्मादपि कस्यचिदपेक्षा नास्ति तस्माद्ब्रह्म नित्यतृप्तस्वरूपं सर्वेषां प्रियं सर्वस्मात्परं च
जीवो जगदंतःपातिपदार्थाश्च नित्यतृप्ता न भवंति ॥ प्रकृतेः परत्वमपरापेक्षितं न तु सर्वपरत्वं
ब्रह्मपरत्वं तु सर्वापेक्षया ब्रह्मनिष्ठपरत्वमेव परप्रकृतावारोपितं भवति न तु वास्तवमेवं प्रि
यत्वमपि ॥ तस्माद्ब्रह्मसंबंधि परत्वप्रियत्वयोरितरपदार्थेष्वारोपो ब्रह्मणि तु ते वास्तवे ॥ यथा
राज्यादिपश्वादिद्रव्यादिषु प्राणिनामपेक्षितत्वात्प्रियत्वं परत्वं चारोपितं भवति ॥ चक्षुः श्रोत्र
त्वग्रसनानासिकोदरादिसमीपे सुंदररूपनानालंकारमिष्टान्नसुगंधभोजनादिभ्यः स्वस्वेष्ट

त्वात्सोऽपि प्रियः परश्च न भवति ॥ तत्प्रियत्वं परत्वं च ब्रह्मण एव तत्र तत्रारोपितं भवति तेषां स्वतः प्रियत्वं
परत्वं च नास्ति यो यत्रासक्तः स तत्समीपे प्रियतमः परतरश्च स तदितरसमीपे प्रियः परश्च न भवति परमा
त्मा तु सर्वस्य जीवनमूलत्वात्सर्वस्य सर्वदा प्रियतमः परतरश्च वास्याप्यप्रियोऽपरश्च न भवति ए
वंरीत्या सर्वेषु प्रपंचेष्वपि ज्ञातव्यः ॥ भो शिष्य यद्यपि तरंगाः समुद्राद्भिन्ना एव तथापि समुद्र
कार्यभूतास्तरंगाः कार्यभूतः समुद्रः कदापि न भवति ॥ तथा जगज्जीवाश्च ब्रह्मणो व्यतिरेकाभावेपि
तत्कार्यभूता एव तस्मादारोपितजीवत्वजगतोरधिष्ठानत्वेन जडत्वापत्तिर्नास्ति ॥ शेक्षिमानुवाच
॥ भो गुरो यस्मात्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्या ब्रह्मणोऽपरोक्षत्वं सिद्धं ॥ ओं तत्सदिति निर्देशो ब्रह्मण
स्त्रिविधः स्मृत इति स्मृत्या यथा सदिति ब्रह्मसंज्ञा तथा तदित्यपि ब्रह्मसंज्ञा ह्युक्ता ॥ लोके तच्छब्द
स्य परोक्षवस्तुप्रतिपादकत्वेन कथमपरोक्षस्य ब्रह्मणस्तच्छब्देन निर्देशः संभवति ॥ ॥ पहिरा
ज उवाच ॥ हे शिष्य अपरोक्षशब्दस्येंद्रियगोचरार्थप्रतिपादकत्वं नास्ति ॥ अत एव यत्साक्षा
दपरोक्षाद्ब्रह्मेति श्रुतावपरोक्षशब्दस्येंद्रियकपदार्थप्रतिपादकत्वेन ब्रह्मणोऽप्यैंद्रियकत्वप्रा
प्तिः स्यादिति साक्षादित्युक्तं ॥ तथा च चक्षुरादिद्वारमनपेक्ष्यापरोक्षं भवतीत्यर्थः ॥ त्वयेदं ब्र
ह्मेति प्रयोगः स्यादिति यदाशंकितं तन्न संभवत्यैंद्रियकवस्तुन्येवेदंशब्दप्रयोगदर्शनात् ॥ त
स्मादिंद्रियाद्यगोचरत्वेनाहं ब्रह्मास्मीति ब्रह्माकारवृत्तिविषयत्वमेवापरोक्षत्वं ब्रह्मणः ॥ अ

न
१३३
133

यमनुभवस्तुब्रह्मभूतात्मनएवनेतरेषां ॥ ब्रह्मातिरिक्ताःसर्वपदार्थाइंद्रियमनोवेद्याःतथाहिं
नःवाह्येंद्रियाणिवेद्यानिवेत्तृणिचभवंति ॥ रूपादिविषयवेत्तृत्वंचचक्षुरादींद्रियाणांमनोवेद्य
त्वंचमनसस्त्विंद्रियवेत्तृत्वंसाक्षिवेद्यत्वंचसाक्षिणस्तुवेत्तृत्वमेवनवेद्यत्वं ॥ अतश्चैतन्यस्यसा
क्षिप्रत्यक्षविषयत्वेपींद्रियाद्यगोचरत्वेननत्पदप्रतिपाद्यत्वमेव ॥ अतएवनदृष्टेर्द्रष्टारंपश्येर्न
श्रुतेःश्रोतार०ं०शृणुयानमतेर्मंतारंमन्वीथानविज्ञातेर्विज्ञातारंविजानीयाइतिश्रुत्यास्वरूपमिं
द्रियाद्यगोचरत्वेनप्रतिपादितं ॥ ॥ ॥ इत्यद्वैतादित्यउत्तरार्येणनवमार्केपहिराजदीक्षम

त्वंवादेब्रह्मणःशांशित्वादिधर्मनिराकरणपूर्वकसर्वविषय

त्वपरत्वस्थापनंनामदशमोवरश्मिः ॥ ॥ २० ॥ ॥

इतिनवमार्कःसमाप्तः॥९॥ ॥

॥ ॥ ॥ ॥

१३३

२
१३४
134

ॐ श्रीगुरुभ्यो नमः ॥ श्रीशिष्य उवाच ॥ ॥ ॥ भो गुरो श्रीभगवद्गीतास्तु सांख्यराजयोगादुभाव
प्रतिपादितौ तत्र सांख्यानुसारेण पूर्वाचार्यैर्व्याख्यानमिति पूर्वं भवद्भिरुक्तं ॥ इदानीं राजविद्यानु
सारेण तद्व्याख्यानं श्रोतुमिच्छामि ॥ पण्डितराज उवाच ॥ हे शिष्य श्रीभगवद्गीतास्तु परा वरिष्ठाः
परमरहस्यमय्यः ॥ अस्मिन्कलियुगे राजयोगानुसारेण श्रीगीताव्याख्यानं कोऽपि न समर्थः ॥
श्रीमच्छंकराचार्यभगवता श्रीभगवद्गीताप्रतिश्लोकव्याख्यानरूपभाष्यं यत्कृतं तत्सर्वं सम्मतं सर्वपू
ज्यं च ॥ परं तु तत्सांख्यमतानुसारेण तेषां सांख्यबलमवलंब्यावतीर्णत्वात् ॥ तत्सदृशः को
ऽपि राजर्षियोगबलमवलंब्यावतीर्णः स्यात्तदा तत्कालानुसारेण प्रतिश्लोकव्याख्यानमपि क
र्तुं शक्नुयात् ॥ अस्मिन्कारणयुगे तादृशः कोऽपि नावतीर्णः ॥ हे शिष्य श्रीमद्भगवद्गीताप्रतिप
द प्रतिश्लोकप्रत्यध्याये घनेकतात्पर्याणेकसंदर्भा गुप्ताः ॥ यस्य यस्य व्याख्यातुर्यादृशी यादृशी
बुद्धिर्विद्या च भवति तस्मात्तस्मात्तत्तात्पर्यं संदर्भं च निष्कास्य व्याख्यानं करोति ॥ यस्य यत्तात्पर्यं न
स्फुरति तत्तथैव गुप्तं सन्तिष्ठति ॥ तासां प्रतिश्लोके साधारणार्थोऽन्यो भासते ॥ यश्चात्यन्तसूक्ष्म
बुद्धिमान्महात्मा सूक्ष्मदृष्ट्यालोचयति तदा तस्य साधारणार्थे विशेषचमत्कारो भासते ॥
त्वं सकलशास्त्राध्ययनं कृतवानसि वेदपुराणेष्वपि निपुणः ॥ अतोऽहं त्वां श्रीभगवद्गीतेकश्लो
कार्थं वक्तुमिच्छामि तं वर्णयतो मे त्वं तु तार्थमाक्षिप्य यदा विलक्षणतात्पर्यं वर्णयेयं तदा त्वं

द्योन्मीलनं भवेत् तद्यथा यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो
यः स च मे प्रिय इति द्वेषिषोऽनेकाचार्यैरन्यपूर्वैवोऽस्यार्थो वर्णितः परं तु येनाचरणेन मुमुक्षोः
सकाशाल्लोको नोद्विजते मुमुक्षुरपि लोकसकाशान्नोद्विजते च तदाचरणं वर्ण्यं नैवोरपि न हन्तं तद्धि
द्वौ न तदाचरणमेतादृशमिति यज्जानाति तद्दर्शयन् ॥ श्रीभगवानुवाच ॥ यः पुरुषो लोके मनसा वाचा वा कर्म
णा सह व्यवहारे वर्त्तते मनसि दृष्ट्यादध्याति वाचा मधुरं वदति शरीरं परोपकारे योजयति स प्रमान्नवास्मा
दपि दुःखं प्राप्नोति न तस्मात्कोऽपि संतपति ॥ पक्षिराज उवाच ॥ यदा मुमुक्षुरन्यदुःखकारी त्या सर्वजनद्वि
तकारी भवति तदा सर्वजना अयमस्मद्दुःखकारीति ज्ञात्वा तं न त्यजंति यथा तृषार्तो मधुरोदकरूपं पि
पीलिकामक्षिकाश्च मधुरान्नं न त्यजंतीति तद्वत् ततो मुमुक्षोः समीपे जनसमुदायो भवति तं जनसमु
दायं मुमुक्षुरंगीकरोति न वा तत्पक्षद्वयमपि सदोषं तत्रांगीकारपक्षेऽयं दोषः यदि जनाः स्वस्वे
च्छानुसारेण मुमुक्षोः प्रियं ब्रुवंति मुमुक्षुरपि तत्तत्प्रसन्नतासिद्ध्यर्थं स्वयमपि प्रीतिं कुर्यात्तदा तस्य
प्रतिष्ठा वर्द्धते ततोऽस्य मनः स्वरूपानुसंधानाद्भ्रंशति यदि मुमुक्षोर्मनस्यात्मानुसंधानाद्विच्छिद्य
स्वकीर्त्या प्रसन्नं भवतीं न स्यात्तानं स्वान्तरं न पश्यति ततो मुमुक्षोरवसानसमये ये ये मुमुक्षुणोपकृता
तद्
स्ते सर्वे तद्वियोगात्संतपंति मुमुक्षोरपि स्तोपकारपात्रवियोगेन दुःखं भवतीति अनंगीकारपक्षे
त्वयं दोषः यदि कदाचिन्मुमुक्षुर्निजप्रतिष्ठानिवृत्त्यर्थमात्मानुसंधानाच्यवनार्थं च तद्विपरीतमाच

१० १३५ 135 रेणदायेयेजनास्सुमुक्षवः दयोपकारादौ विश्वासमकुर्वंस्तद्धिजनसंधिकं संतपेत॥ आत्मासंज्ञासुमुक्षोश्चि
त्तेत्तत्समपिस्वरूपदियोगंनसहते नदातस्यापिचित्तं संतपेत॥ पुनःवेनाचरणेनसुमुक्षोर्लोकोलोका
न्तसुखदुःखनसंतपेत॥ दीप्तिमानुवाच॥ भोगुरोयेनाचरणेनतयोश्चित्तंनसंतपेत्तदाचरणं त्वमेवव
द॥॥पतिराजउवाच॥ यस्यामवस्थायांसर्वेषांजनानां त्वदुपरिदयाभवेत्तामवस्थां विमर्शयन्नांगी
करोषि॥ सर्वेषांजनानां तवस्थित्यस्थितौसमानेभवेतां त्वंतु सर्वदास्वरूपास्तित्वेमग्नोभव॥ यदि
सर्वेजनास्त्वांहसेयुस्तदात्वमपिस्वरूपस्थितःस्तन्मिथ्याचारेणानुपहस॥ यदित्वमहंममेते
परित्यजेस्तर्हिवापितेनानुदुःखीभवेत्त्वमपिवास्मान्नदुःखीभवेत्॥॥ इत्यद्वैतादित्यजन्नारायणे
दृशामार्गेपतिराजदीप्तिमत्संवादे श्रीभगवद्गीताद्वादशाध्यायस्य श्लोकाभिप्रायवर्णनंनामप्रथ
मोरश्मिः॥२॥ दीप्तिमानुवाच॥ भोगुरोदयोपकारयोर्द्वैवसंपत्त्वेन त्यागार्हत्वं कथं॥॥पतिराज
उवाच॥ भोतातजडभरतोपिपूर्वस्मिन्जन्मनिमृगशावकेदयोपकारौकृतवान्॥ तत्फलंद्वितीयज
न्मनितेनयत्प्राप्तंतत्त्वमेवविचारय॥ एवंधनंजयोपिविधुजनादीन्ताथंहनिष्यामीतितेषुदयांकृतवां
स्तद्भगवतोःधिमतंवानवेतित्वमेवविचारय॥ इमेसर्वेजनाः[illegible]पुत्रमित्रादिषुदययाबद्धास्त
द्वोचनज्ञायायांकेचित्पुत्रेषुपरेमातादिषु[illegible]दयांकृत्वाभगवंतंपार्थयंतिमोदीनबंधोमांविनै
तस्यबालायास्तवःकौंतस्याविंचनबालकस्यकोवापालदातस्याहृद्धायाअशक्तायाःको १३५

वासेवचारणेन स्याज्जीवनं वा यं भवेद्दिद्धं वंचकोरणे सर्वैपि द्रयाबद्धाः कोपि स्वाधीनार्थं ब्रह्मांडपोषकं
भगवंतं विश्वासेन न भजति ॥ बालेष्वप्येवं सर्वे सर्वांबंधजं नतिनस्यादृत्तान त्याग बालानर्थं वै मेव सर्वं त्यज ॥ स्वो
यज्ञविघ्नतिनदृष्ट्वैव जातमिति निश्चिनु ॥ यस्य विषयस्य निकृष्टता स्वोभासेन तस्य निकृष्टतामद्यैव व
त्ता. त्वा सुप्रसन्नो भव ॥ यथा बालश्चित्रेषु रूपैः स्वप्ने स्वाप्निकपदार्थैः क्रीडितः सन्प्रबोधानंतरं स्वचेष्टा
मुपहसति तथा त्वं मिथ्याभूतलक्षणभंगुरपदार्थैः सह क्रीडसि परिणामेन क्रीडायां पश्चात्तापेन
सिद्धृष्यसि ॥ तदृष्ट्वैव तस्य मिथ्यात्वं ज्ञात्वा पश्चात्तापरहितः संस्तान्हर्षी क्रीडां हसित्वा तदसंगो भ
व ॥ अत्यमूल्यं रत्नं परित्यज्य रत्नाभासरूपपाषाणे रत्नत्वेन त्वया गृहीतः परिणामे पाषाणमे
व प्राप्स्यसि ॥ यः सद्गुरुः कारुणालयः स्वतवचयः समाप्नेः प्राप्तवत्वां नित्यानित्यदर्शिनं वास्तवं स्वव
रागुणत्तु बाद्दृयोरम्यासंस्त्राक ॥ येनाशाश्वतेन साबांत्वं प्रीतिं कृतवान सितत्वम ययद्दितं नन्यजे
स्तर्हि समस्तं त्यक्त्वा त्वलत्येव ॥ तस्माद्दृष्टत्वं तन्त्याग विमुखो मा भव ॥ प्रसन्नतया तेन त्वज्ञाय च्छरामश्व
तेव स्तुतेन साबां प्रीतिं योजय ॥ अशाश्वतमित्रस्य संबंधस्तव मरणकाले विनंक्ष्यति ॥ शाश्व
तमित्रस्य संबंधस्तु तत्काले दृढीभूय त्वां निजधाम नेष्यति ॥ तस्मादशाश्वतमित्रस्य त्वच्छरतां
शाश्वतमित्रस्य महिमानं च तत्त्वमद्यैव विचार्य प्रसन्नो भव ॥ लाभालाभौ स्तुतिनिंदे मानापमानौ
च समत्वेनावधारय ॥ एवं शीतोष्णशत्रुमित्रादिष्वपि समो भव ॥ यदा बालपित्वां संसारप्रयोजने

दे॰
१३६
136

योजयेत् तदा त्वं स्वस्य मौर्ख्यं दर्शय ॥ यदा वा कोपि त्वां ज्ञानीति जानाति तदा त्वं स्वस्य विद्वत्त्वं दर्शय
॥ यदि लोको हसति तदा त्वं रोदनं कुरु यदा वा लोको रोदिति तदा त्वं हास्यं कुरु ॥ एवं लोकवैपरीत्यं
चरित्वा लोको यदा मिथ्यापदार्थे संलग्नो भवति तदा त्वं शाश्वते वस्तुनि मग्नो भव ॥ दी॰ प्रि मात्र वाच
भोगुरो नास्त्वेव भगवद्गीतास्तु भक्तियोगे द्वादशाध्याये अद्वेष्टा सर्वभूतानां मैत्रः करुण एव चेति
स्थवर्णितं ततो ऽहं करुणां मैत्रीं च कथं विसृजे ॥ पत्रिराजउवाच ॥ हे तात त्वया ऽर्धश्लोकः
पठितः पूर्वार्धतात्पर्यं तु न तरां स्पष्टं भवति ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमीति ॥
यो करुणां त्वं जानासि सा करुणा सत्पुरुषाणां करुणया भिन्नास्ति ॥ न वक्तुं करुणा प्रत्युपकारा
र्थी सत्पुरुषाणां करुणा तु भगवत्प्रीत्यर्था ॥ न वै मैत्र्यं स्वकीयार्थं तेषां मैत्र्यं तु केवलपरोपका
रार्थं ॥ यस्य प्राणिनः सांसारिकपदार्थहानिर्भवति तदा संसारिणस्तदुपरि करुणां कुर्वंति ॥
ज्ञानिनस्तु संसारिणां पारमार्थिकपदार्थहानौ दयां कुर्वंति ॥ ज्ञानिनः संसारे निर्लिप्ता निष्प्र
योजनाश्च व्यवहरंति ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् इति प्रमाणेन संसारासक्तप्रा
णिभ्यो निजरहस्यं गोपयंति ॥ कस्यापि बुद्धिरतिगंभीरार्थं न प्रविशति चेत्तद्बुद्ध्यनुसारेण सं
वादं कुर्वंति ॥ कोपि तान्मूर्खा इति ज्ञात्वा तेषामपमानं करोति तदा सो ऽज्ञानादपमानं करोति वा
नितिमत्वा संतप्ता न भवंति किंतु तस्याज्ञाननिवृत्तये भगवंतं प्रार्थयंति परंतु कोपेन शापादि
१३६

वंनदृदृति ॥ ज्ञानिनां सामर्थ्यस्य पारं नास्ति यदि वा दावाग्निर्दहेयुः दंविशालपर्वतो भग्नो भवेदिति तदासत
त्त्वगुणं बहुधा शकली भवेत् ॥ एवं पराक्रमसत्वेपि यः कश्चिदुपहासमिषेण तेषां ग्रीवायां तंतुबंधाऽकर्ष
ति तदा तेषां कोपशांतये मानापमानयोस्तुल्यतासंरक्षणाय चाविंचनाद्रूप्रसन्नाः संतस्तत्त्वाधीना
भवंति ॥ भोलानाथरूपमेवमैत्रीकारणं चोच्यते ॥ त्वंतु वियत्पर्यंतं मिथ्यापदार्थमेत्यालिप्तो भवेः ॥ विय
त्पर्यंतं जगद्रचनं लोकं चर्यावधूर्याः ॥ देतानसहस्रोपचारेण सहस्रमित्राणि त्वया न्यादितानि पुनस्तानि त्व
यैव त्यक्तानि ॥ यथा मृगग्रहणे जालस्य कोपि लाभो नास्ति तथैव मैत्रीरूपजाले जनानां मनोमृगग्रहणे
जालवत्स्यापि लाभो नास्ति परंतु व्यावहारिकलाभं पारमार्थिकत्वेनात्मन्यारोपयति ॥ मैत्रीरूपजाले
प्राणिनां मृगयां वा तंतुसर्गाहारभ्यतवेदमेव प्रयोजनं ॥ नववयोरूपदिवसो बहुशो व्यतीतः स्वल्पो
स्तितत्रत्व श्रद्धालोकानां वशीकरणे कथमिदानीमप्युदासीनो न भवति ॥ अप्रभातकालमेवं ग
हाणे स्वं त्यक्त्वा स्ववासस्य प्रयत्नं करोषि पुनरप्यन्यमालोचयसि यदि रात्रिर्भवति तदैकोमृगोपि तव जा
ले विद्यमानो न भविष्यति ॥ या मृगया वा तंतुयोग्यासानन्याभक्तिरेव परंतु कस्यापि जाले सहस्रोपा
येन सा गृहीता न भवति ॥ तस्याः वशीकरणे वैकोपायो वर्तते त्वं व्याधत्वं त्यक्त्वा मृगो भव मृगो भूत्वामि
षं त्यज ॥ आमिषं विहाय तस्याः जाले प्रसन्नतः पतनमंगीकुरु स्वतदा तद्बंधनमोचनं तत्पतने ऊर्ध्व
गतिं च द्रक्ष्यसीति ॥ ॥ ॥ इत्यद्वैतादित्यरत्नरायणे दशमार्कपद्धति राजहीनिमत्संवादे श्रीभग

२० वद्गीताद्वादशाध्यायस्यश्लोकाभिप्रायवर्णनंनामद्वितीयोरश्मिः॥२॥दीप्तिमानुवाच॥योगुरोय
१२८ दिदंविलक्षणत्वंसर्वत्वयावर्णितंतदद्भुतंपरंतुसंन्यासनिष्ठानुसारेणनतुराजयोगानुसारेण॥॥
137 पद्मिराजउवाच॥श्रीभगवद्गीताद्वादशाध्यायस्यभक्तियोगत्वेनसांख्यसैवाधिकं॥नह्यसंन्यस्तसंक
ल्पोयोगीभवतिकश्चनेतिप्रमाणेनसंन्यासंविनायोगोनसंभवति॥संन्यासयोगयोरत्वांतरभेदस्तत्वेपि
फलतोभेदोनास्ति॥एकंसांख्यंचयोगंचयःपश्यतिसपश्यति॥सांख्यनिष्ठायामंतर्बहिश्चसर्वत्यागो
विहितः॥तत्रफलंतेनस्वरूपस्थितिः॥योगेतंतःसर्वत्यागःस्वरूपस्थितिश्चबहिर्व्यवहारेप्रवृत्ति
श्चलेनस्वरूपस्थितेर्गोपनं॥अनयोरेतावान्विशेषः॥दीप्तिमानुवाच॥॥तयोरंततस्तुस्वरूपस्थि
तेरेवगार्हस्थ्यंव्यवहारप्रवृत्तेःशास्त्रविसमर्थमंगीक्रियेत॥स्वरूपस्थितिप्रापकत्वाद्बाह्यनिर्वृत्तिरन्यथे
स्वरूपस्थितिगोपनार्थंफलाःक्रियते॥पद्मिराजउवाच॥गार्हस्थ्येलाभश्चतन्त्रहृदयमस्ति॥तत्रफ
लाभिसंधिराहित्येनयत्नादिस्वाराविधिसंरक्षणं॥यत्नार्थंद्रव्यमपेक्षितंव्यवहारंविनातन्नास्ति॥नि
संभवतितस्माद्धार्मिकव्यवहारप्रवृत्तिस्वचित्तेनैवालाभः॥यदिधर्मशीलोगृहस्थोनस्यात्तर्हिवृ
त्तसंन्यासिनंवाःपालयेत॥वृसिष्ठसंन्यासिनांमाहात्म्यंधर्मतत्त्वगृहस्थंविनाकोनापितत्त्वंनशक्
नेतस्मात्गृहस्थाभावेसंन्यासिभिर्भिक्षादिकंकथंप्राप्यतइतिगृहस्थाश्रमो॰वश्यमंगीकर्तव्यः॥यदिवं
दमूलादिनासंन्यासिनांकालदेशाभावेविप्लुतीत्युच्यतेतत्तन्नसंभवतिकंदमूलादीनांसर्वदास्थित्यसं १२८

भवान् ॥ यदि कोपि संरक्षको न स्यात्तर्हि संसारे संन्यासधर्मस्यापि लोपः स्यादिति द्वितीयो लाभः ॥ यद्य
दाचरति श्रेष्ठस्तत्तदेवेतरो जन इति स्मृत्या हि श्रेष्ठजनो यत्तादृशं पवित्र्यं संन्यासमेव स्वीकुर्यात्तर्हि
तान्दृष्ट्वा नधिकारिणोपि यत्तादृशं पवित्र्यं संन्यासे प्रवर्तेरन् ॥ तदा प्रजानां तद्विच्छेदः स्यात् ॥ ॥
प्रजानां तन्मात्रव्यवच्छेत्सीरिति श्रुतेः स्वतंत्रस्तत्त्ववर्द्धनमिति स्मृतेश्च व्याकोपः स्यात् ॥ प्रजानां तनोर्भग
वद्विभूतित्वेन तदैरसुत्ये विश्रुद्धेर्येनेच्छतां कल्याणीगमाद्धितित्वतृतीयो लाभः ॥ यस्मिन्देशे धर्मकोरा
जानां तद्देशा वृद्धस्थाश्रमवर्तितेन तत्र धर्मस्य वृद्धिरधर्मदुष्टचोरादीनां हानिर्ग्रहदेवाचर्चनेन यज्ञादिक्रियास्तु
प्ररोहेदेशस्त्वास्मत्प्रभासंपराणाधिकं सर्वार्थिष्टशस्याद्विनाशश्चैतानि भवंति ॥ यस्मिन्देशे नाशः धर्म
ज्ञोगज्ञानां तद्देशा गाहस्थ्याश्रमवर्तिते ॥ तत्राधर्मस्य वृद्धिर्दुष्टचोरादीनामाधिक्यं सज्जनानां धर्मस्य
च हानिः स्वल्पवृष्टिर्दुर्भिक्षं तेन जनः स्वस्वसंपदादीनां लोपश्चैतानि भवंतीति चतुर्थो लाभः ॥ तस्माद्गृह
स्थाश्रमः सर्वाश्रमाणां श्रेष्ठः ॥ धर्मज्ञस्य गार्हस्थ्यो सत्यपि वृद्धिश्रेष्ठत्वं व्यवहारे प्रापि स्वरूपनिदि
ध्यासनादविच्छेदोयस्य भवति तस्य महिम्नः पारो नास्ति ॥ यो वा राजर्षी राजे सर्वैश्वर्यं प्राप्नावपी
न्द्रियजन्यसुखो द्विभुक्तीभूय यन्नायत्नाराज्यव्यवहारे प्रवर्तमानः स्वस्वरूपोपस्थितो भवति तस्य पर
मोक्षसहस्रीपदवीलोकत्रयेपि नास्ति ॥ परं तु व्यवहारे स्वरूपास्थितिस्तु दुर्घटा ॥ योऽसंभाविता
मवस्थामपि संपादयति तस्य माहात्म्यं केन वर्णितुं शक्यं ॥ स्वरूपस्थितिगोपनेयच्छब्दलं चि यते

तस्याविलाभद्वयं ॥ तत्र च बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनामिति प्रमाणेन योगसांख्यनिष्ठा हृदय-
साधारणेन निजरहस्यगोपनमप्येतत्तमित्येको लाभः ॥ यावद्रहस्यगोपनाधिकं तावत्तत्स्वरूपानु-
भवस्वारस्याधिक्यमिति द्वितीयो लाभः ॥ यदि रहस्यो बुद्धिष्ठलेन प्रकटो भवति तदा तस्य संसार-
व्यवहारेषु वैक्षोभ्यं भवेत ॥ अनेके जनास्तं साधुत्वेन ज्ञात्वा छलेनोपद्रवंति च ॥ वेचनतस्योपका-
रं वा तेमिच्छंत्यत एतन्निवृत्त्यर्थं गोपनीयमिति तृतीयो लाभः ॥ तस्मादेतल्लाभत्रयमुद्दिश्य छले-
न स्वरहस्यं गोप्त्वा ततः स्वस्वरूपे मग्ना तिष्ठंति ॥ सांख्यस्थितिमतां सार्वं कोपि दुष्टो वैरं वा रोति च तस्
तेन सार्धं मैत्रीं करोति यद्वा दुर्वचनं तच्छ्रत्वा प्रियवचनेन तमुपशामयति ॥ तस्योपाय भेदा भा-
वेन सर्वं प्रसन्नतैव दृष्टा ॥ योगस्थितिमतां त्वेतत्क्रीतिर्विरुद्धा मन्यते ॥ किंतु वैरिणा सह वैरं दुष्टेन
दौष्ट्यं कापट्येन कापट्यं सज्जनेन सद्भावो लिरिणा मैत्र्यं च समभाव इति मन्यते ॥ स लोकमर्यादां नो-
ल्लंघयति दुष्टान्दंडयित्वा साधून्पालयति ॥ ऐहिकामुष्मिकलाभेच्छां स्वकीर्तिहृद्धीच्छां च न क-
रोति ॥ धर्ममाचरयसंरक्षको भूत्वा विध्यनुसारेण संसारे प्रवर्तते ॥ दुष्टस्ले यदि नांताडने हिंसका-
स्य प्रति हिंसने च न बिभेति ॥ न हि दुष्टावुत्पालं कर्मद्वा पालेनानुषज्जनाइति स्मृते ॥ यत्ता दिवा-
र्मतिविधिपालनार्थमेव प्रवर्त्ततेपरंतु स तत्कर्मणां स्यां मनसि धृत्वा प्रसन्नो न भवति ॥ एवं राज-
नीत्यनुसारेणाडुष्टाहिंसाडनाच्छद्मकापट्यस्य प्रति कापट्यकरणाच्च न चित्ते ग्लानिर्नोत्पद्यते ।

दंडो दमयितामस्मि दंडो दमयितादमन इति स्मृतिस्मांदंडस्यापि भगवद्विभूतिविशेषत्वेन दंडवर्त्तणेऽप्र
न्यायं न मन्यते ॥ अनेन गुणद्वेषौ राजनीतिविधौ संस्थाप्य प्रथमं पापात्मासत्विन्नागवति यो पितेन
सार्वं हे षं करोति चेन्नन्द्रांदैषं व्यवहारनिमित्तं वा सत्वा विषादं न प्राप्नोति ॥ यदि हि सज्जीन्यत्तुसारेण यस्य क
स्य चिद्दंडं करोति सोऽपि व्यवहारस्यैव रीतिरितिमत्वा ऽरिदुःखी न भवति ॥ यदि हि वाऽन्य चित्स्वलाभार्थ
मन्यायेन यस्य कस्य चिद्दंडं करोति स्वर्त्तवा ऽपाहरति लन्नासो ऽत्यंतदुःखी भवति ॥ यदि न्यायेन त
दीयापराधहराणां चिद्दंडं पतितत्वार्य ऽदंडिलः स्वन्यायमूलमिदमिति मत्वा स्वापराध दोषमारोपय
ति न तु दंडवर्त्तिनि ॥ यदि वा दाचित्स्वापराधमविचार्य दंडवार्त्तयैव दोषारोपणं हृत्वा दुःखी भवेन्नद
न्यदुःखवदेषाव न्यायेन स्यान्तां न न तु नश्यंत ॥ तस्माद्धे शिष्योऽर्थसंजातनत्तत्तग हस्य सकाशात्प्रि
योऽपि वत्तु गत्याऽदुःखी न भवति तस्माच्चिद्दहृषिसदुःखं न प्राप्नोति ॥ ॥ इत्यद्वैतादित्य उन्नरायणोद
शमार्के पत्निराजदोन्निमन्संवादे श्रीभगवद्गीताद्वादशाध्यायस्य श्लोकतात्पर्यनिरूपणे राजयोग
स्थापनं नाम तृतीयो रश्मिः ॥३॥ दोन्निमानुवाच ॥ भो गुरो पूर्वोक्तश्लोकस्य यद्विलक्षणतात्पर्यं वैफिलं
न चक्रुत्वा हृत्तार्थोऽस्मि ॥ एवं पुनः श्रीगीतास्तवकस्य चिद्विषयस्य रहस्यं श्रोतुमिच्छामि ॥ पत्निरा
जउवाच ॥ हे शिष्य ॥ स्मिन्नद्वैतादित्यग्रंथे यत्र यत्र श्रीभगवद्गीताश्लोकाः प्रमाणत्वेनोदाहृतास्त
व्या० ४ त्र तत्र छाया व्याख्यानरूपेण तेषामर्थस्यैव विवेचनमस्ति ॥ यो विवेकी मयैवं तद्रहस्यं जानीयान्

द॰
१३५
139

इदानीं नवमभक्तिभावेन श्रीभगवद्गीतास्वर्थवादरीत्या योविलक्षणतात्पर्यार्थो मम भासते तं वर्णयिष्या
मि स्फुटं ॥ एतद्भिन्नतात्पर्यस्तु यत्र यत्र तत्र वः संशयो न गतः स पृष्टव्यः ॥ अहं यथामति तत्तात्पर्यमपि वक्ष्यामि
पांडवाः पंचाप्येकविभूतिज्ञास्तत्र धनंजयो मुख्योऽतएव श्रीभगवतोक्तं पांडवानां धनंजय इति ॥ श्रीभ
गवद्गीतास्तु तौ श्रीवादरायणेन पार्थो वत्सः सुधीर्भोक्तेत्युक्तं तस्मात्तामात्मनः सुधियो भोक्तृत्वमपे
क्षितं न तत्त्वज्ञनमात्रस्य परं तु सुधियो भोक्तृत्वस्य सर्वत्र संभवेपि प्रथमाध्याय एकादशाध्याये चैव न स्फु
टं भाति ॥ तत्र प्रथमाध्यायस्याधारणतया पालितार्थ एवं ॥ मुमुक्षुर्बंधुभ्रातृपुत्रादिसंबंधिस्नेहं परित्य
ज्य भगवति प्रीतिं कुर्यादिति ॥ प्रथमाध्यायस्य विशेषतयाऽर्थवादरीत्याऽभिप्रायांतरमेवं ॥ प्रथमा
ध्यायस्तु कथाविशेषः तथा तात्पर्यमेवं ॥ दुर्योधनादिकुरुसैनिका मोहाद्यासुरसंपत्स्थानीयाः पां
डवसैनिकास्तु विवेकादिदैवसंपत्स्थानीयाः ॥ पांडवानामेकविभूतिमत्त्वेन तत्र धनंजयस्य मुख्यत्वे
न च धनंजयो जीवस्थानीयः ॥ दुर्योधनादिकुरुसैन्यं तस्यासुरसंपत्स्थानीयं धृष्टद्युम्नादिपांडवसै
न्यं दैवसंपत्स्थानीयं ॥ परं तु धनंजयोऽज्ञानदशायां स्वात्मनो दैवादिसंपन्नाद्यात्म्यापन्नत्वेन तदभेदं न
मन्यते ॥ विवेकादिदैवी संपन्मोहाद्यासुरी संपच्चेत्यनयोर्भयं प्रकृतिजन्यमतः पांडवाः कौरवाश्च
परस्परं बांधवाः ॥ अज्ञानदशायां दैवी संपच्च मिश्रिते तिष्ठतोऽतस्तयोर्विवेको न ज्ञायते ॥ यदा स
द्गुरुस्तन्निर्णयं दर्शयति तदा शिष्यः पृथक् दासुरीसंप पृथक् जानाति ॥ अतएव धनंजयेन भगवंतं प्रति सेन

योरुभयोर्मध्ये रथं स्थापय मेऽच्युतेत्युक्तं ॥ एतत्तात्पर्यमेव मुभयोर्निर्णयं मां दर्शय ॥ अज्ञानदशायां मो
हादीनां संबंधित्वेन बलवत्त्वं वैरिण इति तत्त्वायंते ॥ अतोऽधनंजयेनोक्तं योत्स्यमानानवेक्षेहं य एतेत्र स
मागता इति ॥ ततः श्रीभगवान्रथं सेनयोर्मध्ये स्थापयित्वा उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥
एतत्तात्पर्यमेवं श्रीभगवानुभयनिर्णयं दर्शयित्वा वाचे मे कौरवास्तव वैरिण इति ॥ यदाऽर्जुनः सम्य
ग्विचार्य मे मत्संबंधिन इति दृष्टवांस्तदा संबंधिनः कथं हन्यामिति कारुण्यात्शुशोच ॥ मोहाद्यपरा
संपद्विवेकादि परा संपच्चेत्येतदुभयमनात्मत्वेन त्याज्यं परं तु सद्गुरुः प्रथमतः परसंपदो मोहा
त्म्यं शिष्यं दर्शयित्वा तस्यां स्थिरीभावयति तद्द्वाराऽपरां संपदं नाशयित्वा पुनः परां संपदप्यनात्मेति तं
बोधयित्वा परसंपदभिमानबंधनादपि मोचयति ॥ अतः श्रीभगवान्प्रथममर्जुनं मोहाद्यपरां
संपदं विवेकादि परां संपदं च विविच्य बोधयित्वा परसंपदि स्थापयति ॥ परा संपदप्येतत्तः कान
वारेण वचनं श्रयतीत्यनुज्ञाऽर्जुनेन परां संपदं पालयति ॥ पुनरेकादशाध्याये परसंपदो नाशं द
र्शयति ॥ हव्यकव्ये वैदिके कर्मणी इति परारूपे वक्ताव्येन यापितयोः कल्पितलोकभोगसंपादकत्वे
नापरारूपत्वं परं त्वपरसंपद्येतेत्युक्ते ॥ टीश्रिमानुवाच ॥ भो गुरो एतदुभयं वैदिकं कर्मेति कथ
मपरात्मकं स्यात् ॥ पहिराजउवाच ॥ हे शिष्य ब्रह्मैव वर्त्तं पुराणास्वाहास्वधयोरपरात्वमुक्तं ।
किं च त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति तत्रापराक्तरूवेदोपर्वेद इति स्ववाक्येनस्पष्टता

२ १४०

यत्तरूपाइत्यादिश्रुतिस्मृतिप्रमाणेनवेदयज्ञादिकंसर्वमपरैव ॥ तस्माद्धव्यवाच्यमपराख्ये तत्र
द्रोणाचार्यस्यकुलगुरुत्वेनद्रोणपदंहव्यतात्पर्यकं ॥ भीष्मस्यपितामहत्वेनभीष्मपदंकव्यतात्पर्य
कं ॥ भीष्मद्रोणप्रमुखतइत्यारभ्यलुप्तपिंडोदकक्रियाइत्यंतंधनंजयःकुरुसैन्यरूपापरसंपदिभी
ष्मद्रोणरूपकव्यहव्येवास्थित्यजेयमितिभावंचित्तेधृत्वाभगवंतंप्रार्थितवान् ॥ लोकप्रसिद्धार्थस्त
थियोभोक्तृत्वासंभवेपिमन्निरूपिततात्पर्यार्थेसंभवति ॥ इत्यद्वैतादित्यजनार्दनशर्मार्यपति
राजदीक्षितमत्संवादेऽर्थवाद्रीत्याश्रीभगवद्गीतातात्पर्यवर्णनेनामचतुर्थोरश्मिः ॥ ४ ॥ पति
राजउवाच ॥ हेशिष्योत्तमननुद्वितीयाध्यायेश्रीभगवानर्जुनमनोगताभिप्रायंज्ञात्वालोकप्रसिद्धार्थ
स्यार्थवाद्रीत्याविवक्षितार्थस्यचयथार्थोविनिहामवेत्तादृशावाक्यंकुतस्त्वाकश्मलमिदमित्याद्युक्तवा
न् ॥ एतावत्पर्यंतमर्जुनस्यसंग्रामतात्पर्यात्प्रपन्नत्वेनस्पष्टतयास्वरूपज्ञानंनास्त्यतोभगवंतंप्रति
स्पष्टतयातेनप्रश्नोनकृतःश्रीभगवानपिस्पष्टतयातंनबोधयतिकिंतुछलेनैव ॥ परमार्थतस्त्रि
त्वरूपंव्यवहारदृष्ट्याशूरत्वंलोकेद्भवंशौर्यादिगुणसंपन्नंत्वांमोहात्मकमिदंकश्मलंकुतआग
तं ॥ परमशूरस्यदृष्ट्याविसे[illegible]मदीयाइमेपरकीयाएतेदुर्बलाएतेबलवन्तराइमेसमीचीनाइमेऽ
समीचीनाइत्येतादृशोभेदोनवर्त्तते ॥ किंतुशूरस्यशत्रुनाशएवदृष्टिस्तिष्ठति ॥ यस्यशौर्येकिंचि
न्न्यूनत्वंभवतितस्यैवानेकसंकल्पाउत्पद्यंते ॥ एतेमदीयाःपूज्याःसंबंधिनश्चैतेषांहननंवायंक १४०

तेव्यं ॥ एवं हव्यकव्यादिवैदिककर्मणस्त्यागो वा कथं वा न कर्तव्य इति ॥ तस्मान्नवातिशयरसेनाह शार्ङ्गी क्लैव्यं नोचि
तमिति हृदयस्थदौर्बल्यरूपं क्लैव्यं त्यक्त्वा शत्रुनाशे तत्परो भव ॥ एतद्भगवद्वाक्यं श्रुत्वार्जुनो हव्यकव्यं कथं
त्याज्यमिति स्वमनोगतभावं प्रकटयति कथं भीष्ममहं संख्ये द्रोणं च मधुसूदनेत्यादिना ॥ ततः श्रीभगवा
न्हव्यकव्यविषयकप्रश्नोत्तरं राजयोगरीत्या सर्वत्र श्रीगीताग्रंथे दत्तवान् ॥ यः कश्चित्तु मान्त्वविहितं कर्म
त्यजेत्स भ्रष्टो भवति तस्माद्योगविज्ञाने नैष्कर्म्यपदप्राप्तिर्न भवत्यतः श्रीभगवान्कारणानिधिर्विधिपालनार्थं
लोकसंग्रहार्थं मतसंरक्षणार्थं शरीरशुद्ध्यर्थं च कर्म कृत्वापि फलत्यागेन कर्मत्यागः संभवतीति फल
त्यागपूर्वकसत्कर्मकारणे प्रत्यवायो नास्ति कर्मबंधनान्मुक्तिरपि भवतीत्येतद्विषयमनेकाध्यायेष्व
नेकरीत्याऽत्र [illegible]पमपुनराचोक्तवान् ॥ धनंजयस्य सामान्यतो वेदस्योत्कृष्टताज्ञानमस्त्यतो हव्यकव्य
रूपवैदिकं कर्म कथं त्याज्यं भवेदिति संशयस्थितः ॥ वेदेनतु विद्याद्वयं परा चापरा चेति ॥ तस्माद्धनं
जयस्य वेदसामान्यस्य परत्वनिराकरणार्थं श्रीभगवानाह त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति
कामनापूर्त्यर्थं स्वप्रतिष्ठारक्षार्थं च यो वेदार्थोपयोगं करोति तमाह शास्त्ररूपसंबंधिदृष्ट्या वेदस्य परा
त्वमेतत्तात्पर्येणैव भगवता वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ कामात्मानः स्वर्गपरा जन्म
कर्मफलप्रदां ॥ क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रतीत्युक्तं ॥ स्तुवसाक्षात्काररूपभोगस्य प्रभु
त्वाद्यैश्वर्यस्य च प्रकर्षेण सक्तानामहं ब्रह्मास्मीत्यादिव्यवसायात्मिका बुद्धिर्न भवतीति श्रीभगवताभि

दे॰
२५१
(151)

गैश्वर्यश्च सत्त्वानामित्याद्युक्तं॥ एवं वेदगतामपरां निष्ठां विहाय निस्त्रैगुण्यात्मकपरां निष्ठापरो भवेत्युक्तं
निस्त्रैगुण्यो भवार्जुनेति॥ निस्त्रैगुण्यनिष्ठा कीदृशीत्याकांक्षायामाह निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षे
म आत्मवानिति॥ वेदे सर्वेपि विषया वर्तंते तेन तस्यापि तत्त्वं न्यूनता॥ अपराकृष्टकामनाख्याकामनावि
षयसिद्ध्यर्थं तत्साधनोपासनादिकं करोतीति तस्य तत्कामनादिविषयमात्रसिद्धिर्भवतीतरे विषया स्वप्रा
प्या एव भवंतीति॥ ब्रह्मविज्ञानतो ब्राह्मणस्य पूर्वोक्तसर्वकर्मफलं ब्रह्म च प्राप्नोतीत्येतदभिप्रायेणाह
यावानर्थ उदपाने सर्वतः संप्लुतोदके॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ अर्जुनस्य सा
मान्यतो वेदनिष्ठोत्कृष्टतामेवं निवार्य हव्यकव्यकर्मविषयस्य राजविद्यारीत्या समाधानं कार्त्स्न्ये कर्म
ण्येवाधिकारस्ते मा फलेषु कदाचनेत्यादिनाऽऽरंभं कृतवान्॥ राजयोगार्थमेव स्पष्टयति योगस्थः
कुरु कर्माणि संगं त्यक्त्वा धनंजयेत्यादिना॥ ततो बुद्धियोगनिर्णयं समाधौ बुद्धिस्थैर्यनिर्णयं च द्विती
याध्यायसमाप्तिपर्यंतं निरूपयामास॥ इत्यद्वैतादित्यउत्तरायणोदशमार्कोपदिष्टराजदीप्तिमत्संवादे
श्रीभगवद्गीतानामर्थवादरीत्या तात्पर्यनिरूपणं नाम पंचमो रश्मिः॥५॥ पद्मिराज उवाच॥ ॥
हे प्रिशोणितश्चैव द्वितीयाध्याये स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसीत्यारभ्य तस्मादुत्तिष्ठ कौंतेय युद्धा
य कृतनिश्चय इत्यंतेषु श्लोकेषु मया योऽयमर्थवादरीत्यार्थो निरूपितः सोऽर्थो गाभिनोस्ति॥ स्वधर्म
शब्देन साधारणार्थे ह्यत्र धर्मो न गृह्यते विप्राद्यर्थे त्वात्मधर्मः॥ आत्मधर्मस्त्वात्मतत्त्वशुद्धत्वकेवलत्वा

त्रिः स्वधर्ममेव हत्वाहं विनाशः केवलः संन्यासमात्रं द्रव्यस्मिन्नर्थे दृष्टिं हत्वा कंपितुं चलितुं नार्हसि ॥ ध-
र्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ क्षत्रियस्य स्वधर्माद्धर्मसंबंधिनः ॥ धर्माः कामक्रोधा-
दयः शीलसंतोषादयश्च ॥ एतेषां परस्परयुद्धादन्यच्छ्रेयो नास्ति ॥ तथा च सत्त्वबुद्धिः स्वाद्यंतः नावरण-
धर्मानात्मन्यनारोप्य स्वात्मानं संन्यासमात्रं ज्ञात्वा परधर्मरूपशीलसंतोषादिद्वारा परधर्मरूपका-
मक्रोधादिभिः सार्धं युद्धादन्यच्छ्रेयो मोक्षदायकं न विद्यते ॥ युद्धे जयः पराजयो वा भवति ॥ हतो वा
प्राप्स्यसि स्वर्गमिति ॥ यदि कामक्रोधादयः प्रबला भवेयुः स्वचित्तं वा वासिंश्चिद्विषयविशेषे लग्नं
स्यात्तदा स्वप्रयत्नं विना प्राप्यपुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योग-
भ्रष्टोऽभिजायते ॥ अथवा योगिनामेव कुले भवति धीमतामिति प्रमाणेन स्वप्रवृत्तः स्वरूपनिष्ठा-
नच्युतः सन् स्वर्गादिकं भुक्त्वा वा स्वचित्तशुद्धिमतो योगिनो वा गेहेऽवतीर्य पुनः स्वरूपप्राप्तियोग्यो
भवति ॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति प्रमाणेन योगभ्रष्टस्य दुर्गतिर्नास्ति ॥ जि-
त्वा वा भोक्ष्यसे महीमिति ॥ यदि वा कामक्रोधादीन् जयसि तदा महीं भोक्ष्यसे ॥ महीं भूमिं ॥ सर्वज्ञात्म म४
न भूमिकां संन्यासमात्रस्वाधिष्ठानं वा प्राप्नोति ॥ तदनंतरमर्जुनस्तृतीयाध्यायचरमसमये श्रीभगव-
त्सकाशात्सांख्ययोगकर्मयोगौ श्रुत्वा स्वात्मा मम नाधारमतिच्छंदं चत्तातवान् ॥ ततस्तत्स्पर्शं वा ज्ञा-
ता ॥ श्रीमान् निच्छः सततं च श्रुत्वा सत्यं रतं च वक्तुं चकः पदार्थं पृच्छां यथावतीति भगवंतं पृच्छति ॥

६० १५२ 152

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजित इति॥ श्रीभगवाने

नावत्पर्यं [illegible]त्वा कथितमेवार्थं स्पष्टतया कथयति॥ काम एष क्रोध एष रजोगु[illegible]णसमुद्भवः॥ महा

शनो म[illegible]विध्येनमिह वैरिणमित्यादिना॥ तत्र महाशनः दुष्पूरेणानलेन चेत्यादि विशेषणैः

कामस्य महाशनत्वमतृप्तत्वं च संभवति॥ अयं कामाग्निः सप्तद्वीपां सपत्तनां ससमुद्रां भुवं भ हत्वापि धि

न तृप्यति॥ विशेषकाम आत्मनाद्रुतया पन्नः सन्नात्मज्ञानमावृणोति तस्मा ज्ञानिनो वैरी॥ यदात्मा

त्मज्ञानमावृतं भवति तदाऽत्मस्वरूपं तिरोधायान्यथाभावः कल्प्यते॥ यथाशुक्त्यज्ञानमलेन रज

तार्थिनं पुरुषं प्रति शुक्तिस्वरूपमावृत्य रजतं विक्षिपति॥ तथैष कामोऽहं ब्रह्मास्मीत्यत्रभवसिद्धा

त्माऽभेदमावृत्य नाहं ब्रह्मास्मीत्यविद्यासिद्धभेदं विक्षिपति॥ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं

मनः॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ अस्यैवं तात्पर्यमिन्द्रियाणि मनोवशगानि मनोबु

द्धिवशगं बुद्धिस्त्वात्मवशगेत्येवमपेक्षितं॥ परं तु यदा नाहं ब्रह्मास्मीति भाव आरोपितो भवति तदा

यानि मनोबुद्धिचक्षुरादीन्द्रियाण्यात्मवशगाण्यासंस्तानि कामक्रोधवशगानि भवंति॥ यद्येवं त

दा कामो मनोबुद्ध्यादिद्वारा देहिनं मोहयति॥ तस्मात्त्वमादौ मन इन्द्रियाणि च नियम्य तत्तद्विषयाद्वि

मुखीकृत्य कामक्रोधादिशत्रुं जहि॥ कामक्रोधयोरधिष्ठानं मनोबुद्धीन्द्रियाणि तद्विना नयोर्वास्तव

धारो नास्ति॥ यदा मनोबुद्ध्यादीन्यात्मवशगानि भवंति तदा कामक्रोधावाश्रयाभावेन नाशं हि तु

१५२

वैलो भूत्वाऽस्मत्तात्पर्य भावेनावस्थितः कामक्रोधादीनसत्तान्तर्स्य तिरोधापकत्वेन तत्तानिनो विरोधिनौ त
स्मात्तौ जहीत्युक्तं भगवता ॥ ॥ ॥ ॥ इत्यद्वैतादित्यरचनायां दशमार्कोपहितराजदीक्षितमतं वादेऽर्थ
वादरीत्या श्रीभगवद्गीतातात्पर्यनिरूपणं नाम षष्ठोरश्मिः ॥ ६ ॥ ॥ ॥ ॥ पहितराजउवाच ॥
हे दीक्षित एतदनन्तरं श्रीभगवान्त्राजविद्याद्यनेकविषयान्तुपदिश्य पुनरेकादशाध्यायेऽर्थवादरीत्या ता
त्पर्यं निरूपितवान् ॥ यद्वाऽर्जुनस्य विभूतिमुपदिश्य दिव्यचक्षुर्दत्त्वा स्वदानस्य संपद्रूपस्यापित्वात्त
त्त्वानं जातं तस्मादेवमुक्तं ॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ वक्त्राणि ते
त्वरमाणा विशन्तीति ॥ भीष्मादिद्वारा सैन्यरूपापरासंपदोऽस्मदीयसैन्यरूपपरासंपदा सह त्वयि
नाशो नयत्स्व स्वयत इत्यर्थः ॥ दीक्षित उवाच ॥ भो गुरो दशमाध्याये विभूतितात्पर्यमेकादशाध्यायस्य
तात्पर्यं च मया समाकर्णितं ॥ यद्विकदाचिदेकादशाध्यायस्य भीष्मद्रोणेति श्लोकस्य तात्पर्यं मया
श्रोतुमिच्छत्येतदर्थे वादे तात्पर्यनिरूपणेन सर्वाध्यायस्य तात्पर्यनिर्णयः कथं ॥ पहितराजउवाच
॥ हे दीक्षित ... श्रीभगवानर्जुनः पवनरंगात्यत्किंचित्स्मीयेन स्वस्वरूपात्परकरुणं भवेत् ... दीयिता
रसोह ... ध्या ... याद्विनायक ... त्वावान्तस्य तात्पर्यं हृदयं ॥ तदैवमेवं स्वस्वेच्छमणिगणारूपे त्येते न यथैक
स्मिन् ... णाय ... तानवेनैकस्मिन्सूत्रे मणिसंदर्भं जंतूनां ॥ दृष्टांतेन ... याणीनां
भेदस्य ... त्वासिद्धत्वाद्दृष्टीतिविभ्रमाय ... जगद्धितं स्यादित्याशंकापरिहारार्थं रसोह ... मपत्रवीं

२:
१४३ 143

तेयेत्यारभ्यबलंबलवतांचाहमित्यंतमुक्तवान् ॥ अबादिषुरसादयः सर्वत्रव्याप्यतदभिन्नत्वेनस्थिताः
यथामणिसूत्रयोर्भेदोभातितथानतुब्रह्मणोरिति ॥ द्वितीयतात्पर्यमेवं ॥ सूत्रेमणिगणाइवेत्यनेनसूत्रे
मणिवद्ब्रह्मणिसर्वंजगत्प्रोतमित्युक्तंतत्रकिंरूपब्रह्मणिकेनरूपेणजगत्प्रोतंभवतीत्याशंकापरिहा
रार्थंरसोहमप्स्वित्याद्युक्तं ॥ अस्यैवंभावः ॥ अप्सुरसरूपाविभूतिश्चंद्रसूर्ययोःप्रभारूपासर्ववे
देषुप्रणवरूपाआकाशेशब्दरूपानृषुपौरुषरूपापृथिव्यांसुगंधरूपावह्नौतेजोरूपासर्वप्राणिषुजीवनरू
पातपस्विषुतपोरूपासर्वभूतेषुबीजरूपाबुद्धिमत्सुबुद्धिरूपातेजस्विषुतेजोरूपाबलवत्सुबल
रूपाचेत्येतामदीयाविभूतयः ॥ अबादिषूक्ताविभूतिरूपेणसर्वंजगद्व्याप्यस्थितवानस्मीति ॥ एतैः
श्लोकैःसहदशमाध्यायस्यसंगतिर्बोध्या ॥ दशमाध्यायेतु ॥ बुद्धिर्ज्ञानमसंमोहइतिश्लोकद्वयोक्ता
भावामद्विभूतयस्तत्रबुद्धिज्ञानादयःवाश्वनविभूतयःसौम्यादुःखादयःवाश्वनविभूतयः क्रूरा
एतामत्तएवप्राणिनांभवंति ॥ सर्वेपिप्राणिनोमद्विभूतीरवलंब्यतिष्ठंति ॥ अनंतरंमहर्षयः सप्त
पूर्वेचत्वारोमनवस्तथा ॥ मद्भावाइत्यनेनैतेमद्विभूतिसकाशादुत्पन्नाइत्युक्तं ॥ अर्जुनेनपरंब्र
ह्मपरंधामेत्यारभ्यभूयः कथयेत्यंतेनहेभगवंस्त्वंपरात्परत्वादिधर्मवानितिनारदादिदेवर्षि
भिरुक्तमेतत्त्वयाप्युक्तंतवस्वरूपंदेवादयोनजानंतिस्वयमेवात्मनात्मानंजानास्यतःस्वविभूत
योवक्तव्याइतिपृष्टः सन्भगवानाह ॥ हंततेकथयिष्यामिदिव्याह्यात्मविभूतयः ॥ प्राधान्यतःकु

१४३

रश्रेष्ठ नास्त्यंतो विस्तरस्य मद्रूत्यादि प्राधान्यतो मुख्या विभूतीः कथयिष्यामीति प्रतिज्ञाय मुख्या विभू-
तीर्दर्शयित्वा ततो ॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थि-
तो जगदित्यनेनैकपादेन कृत्स्नं जगद्वष्टभ्य स्थितोस्मीत्युक्तवान् ॥ तच्छ्रुत्वार्जुनो येन रूपेण
सर्वं जगद्वष्टभ्य स्थितोसि तद्रूपं दर्शयेत्याह ॥ मदनुग्रहाय परममित्यादि ॥ श्रीभगवान्दशमा-
ध्यायपर्यंतं राजविद्यां विभूत्यादिविषयं चार्जुनमुपदिष्टवान् ॥ तदार्जुनो भगवंतं विभूतिरूपे-
ण सर्वत्र व्यापकं दृष्टवान् ॥ परंतु भगवति सर्वं जगदाधिकारिकादेवाश्रयथास्थितास्तत्त्वतान
वानतद्रूपं दृष्टवान् ॥ सर्वमेतद्यथात्थत्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषो-
त्तमेति ॥ विभूतिरूपेण भगवतो जगद्व्यापकत्वं सौम्यभावेनार्जुनो भगवन्निरूपितविभूतिरहस्य-
मर्जुनेन सम्यग्ज्ञातं ॥ विभूतेर्जगतस्थलयो भगवति क्रूरभावेन दुर्निरीक्ष्यं मत्वा श्रीभगवानर्जु-
नाय दिव्यचक्षुर्दत्तवान् ॥ तेन च चक्षुषा धनंजयो विचित्रभगवद्रूपं दिवि सूर्यसहस्रस्य भवेद्यु-
गपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मन इत्यादि दृष्ट्वा ज्ञातवान् ॥ पश्यामि देवां-
स्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ॥ ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगां-
श्च दिव्यानित्यादि ॥ दिवि सूर्यसहस्रस्य ॥ दिव्यसूर्यसहस्रस्य ॥ अत्र सूर्योदयस्य द्युलोक एव
संभवाद्दिवीति पदं व्यर्थं सत् तां चिदर्थं ज्ञापयति ॥ एवं च यदि कदाचित्तत्स्वरूपे दृश्या दिव्यस्य

६०
२५५
144

सूर्यसहस्रस्य भा युगपत्समकालमुत्थितोत्पन्ना स्यात्तदापि सा भास्तस्य महात्मनो भासः किं सदृशी
स्यान्न स्यादेवेति काकुरत्रानुसंधेया॥ हे दीप्तिमन्नं मार्कदेयदर्द्धेनादित्यस्वरूपमुत्तमं तादृशं विभोर्वि
भुस्वरूपमवगंतव्यं॥ पश्यामीति॥ हे देव तव देहे देवानिंद्रादीन्भूतविशेषसंघान्॥ विद्याधरगं
धर्वादिभूतगणान्॥ तथा मनुष्यपशुपक्ष्यादिप्राणिसंघान् ब्रह्माणं विरिंचिमीशं शिवं वा कमलास
नस्थं कमलासनो विरिंचिस्तिष्ठत्यस्मिन्निति कमलासनस्थो विष्णुस्तं सर्वान् ऋषीन्सनकादीन् दिव्यान्
उरगांश्च शेषवासुकिप्रभृतींश्च पश्यामीत्यन्वयः॥ अस्याभिप्रायस्त्वेवं॥ अस्य परमपुरुषस्य देहा
भावेपि लोकबोधनार्थं कलारूपविभूतिप्रकाशस्य देहसंज्ञा कृतेति॥ देवादीन्पश्यामीत्यस्यैवं ता
त्पर्यं यां यां विभूतिमवलंब्य देवादयोऽवतीर्णास्तास्ता विभूतीः पश्यामीति॥ ओदीप्तिमन्त्रेति श्लोक
व्याख्यानं बहुभिः कृतमित्यस्माभिस्तद्व्याख्यानं क्रियते॥ किं तु यत्र यत्र श्लोके विलक्षणरहस्यं भासते तत्र
तन्निर्वचनं क्रियते॥ यदाऽर्जुनो भगवतोऽद्भुतस्वरूपं दृष्ट्वा चकितः सन् आख्याहि मे को भवानुग्र
रूपो नमोऽस्तु ते देववर प्रसीदेति भगवंतं पृष्टवान्॥ तदा श्रीभगवता कालोऽस्मीत्यादि॥ तत्र का
लपदं कालतात्पर्यकं न भवति किं तु तस्मिन्परमपुरुषे सर्वलयावर्त्तनत्वमिति कालस्य सर्वनाशक
त्वेन तत्समानधर्मवत्त्वेन कालव्याजेन सर्वनिषेधकं यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः॥ मृत्यु
र्यस्योपसेचनमिति श्रुतिप्रतिपाद्यवस्तु प्रतिपाद्यते॥ यद्विकादाचित्कालपदं प्रसिद्धकालता

५५

त्पर्यकमित्युच्यते तन्नह्येग्निमात्रेनवाक्यं अनंतदेवेशजगन्निवासत्वमक्षरंसदसत्तत्परंयदिति विर
ध्येत॥ अनंतमक्षरंसदसत्परंवस्तुवाच्यंकालइतिनिर्देष्टुमर्हति॥ तस्मात्कालपदंसर्वनिषेधकावं
स्तुतात्पर्यकं॥ इत्यद्वैतादित्यतत्त्ववाचारणादर्शमार्केपक्षिराजदीप्तिमत्संवादे श्रीभगवद्गीतास्वेकाद
शाध्यायस्यार्थवादरीत्या भावार्थवर्णनंनामसप्तमोरश्मिः॥ ७॥ ॥ ॥ ॥ दीप्तिमानुवाच॥ भो
गुरोपूर्वंसर्वनिषेधकत्वं श्रीहरस्यप्रतिपादितमिदानींश्री॥ पक्षिराजउवाच॥ हेशिशोश्री गीताप्रतिपाद्यपुरु
^विस्तारित्युक्तंतत्कथं॥
षः श्रीहरिः श्रीहरोवेतिनिर्देष्टुंनैवशक्यते॥ किंतु सब्रह्मसशिवः सहरिः सेंद्रः सोऽक्षरः पर
मस्वराडितिश्रुत्यापरमात्मैव॥ किंचआदित्यानामहंविष्णुः रुद्राणांशंकरश्चास्मीत्यादिप्रमाणात् स्यपरमपुरु
षस्यविभूतयायद्देवतारूपेणावतीर्णास्तत्तद्देवताआदित्यआरभ्यांतपर्यंतंतत्तन्नामरूपैरेव
प्रकाशमानाभवंतिनात्वितरदेवतानामरूपैः॥ यथाहरेस्त्रिलोचनत्वपार्वतीपतित्वदिगंबर
त्वशूलपाणित्वादिरूपैस्तन्नामभिर्वाप्रकाशोनसंभवति॥ तथाहरस्यश्रीवत्सलांछनत्वरमा
पतित्वपीतांबरत्वचक्रपाणित्वादिरूपैस्तन्नामभिर्वाप्रकाशोनसंभवति॥ एवमिंद्रादीनामप
पिद्रष्टव्यं॥ परमात्मातुसर्वविभूत्यधिष्ठानत्वेनविरिंचिविष्णुस्वराडादिसर्वदेवतानामरूपैःप्र
काशमानः सर्वनामरूपैरतीतश्च॥ भोदीप्तिमन्कालोस्मीतिवाक्येनश्रीभगवान्निजस्वरूपतत्त्वंध
नंजयंबोधयित्वाऋतेपित्वांनभविष्यंतिसर्वेयेऽवस्थिताःप्रत्यनीकेषुयोधाइत्याद्युपदिष्ट

९० वान॥ एतस्यायमभिप्रायः॥ चैतन्यांशो विनापरासंपद्यपरासंपद्येत्येतदुभयं नश्वरमेव॥ एतदुभयसंप
२८५ न्नाशोमयिपरमात्मनि सिद्ध एवास्त्यवाचायासेनापेक्षितः॥ तवाभिमानमात्रेण एतयोर्दुर्जयत्वं नतु
145 वस्तुगत्या॥ तस्मात्त्वमुत्तिष्ठत्यस्यैवं तात्पर्यं तस्मादुभयसंपादे दुर्जयत्वाद्यभिमानात्त्वमुत्तिष्ठ॥ स्वात्मा
नमपि संसर्गे लोकेष्वंमहात्मरूपः पवसरिद्धो ब्रह्मभूतात्मेतिय शीलमस्व॥ एतदुभयसंपद्रूपश
त्रून्जित्वा समस्तं स्वाराज्यं भुंक्ष्वात्मभवेति॥ धीविमानुवाच॥ एवं पुरोगत्वादशाध्याय प्रतिपाद्य प्र
रुद्धस्य परात्परत्वं तत्पत्तिपादितं॥ द्वादशाध्याये तु एवं समस्ततत्पुत्रास्वत्यनेनैवं पदेन सगुणप्र
हणं कर्तव्यमग्रेचाप्यक्षरमव्यक्तमित्यनेन निर्गुणस्य प्रतिपादनात॥ तथाच विरोधः॥ प
द्विराजउवाच॥ द्वेशिष्टेण एवं पदस्य न पूर्वोक्तसंपूर्णाध्यायेन संबंधः॥ किंतु तेनैव रूपेण चतुर्भु
जेन सहस्रबाहो भव विश्वमूर्ते॥ तदेव मे रूपमिदं प्रपश्य॥ इत्यर्जुनेन वाक्यद्वयं स्तयोक्तास्ववं
रूपं दर्शयामास भूय इति संनिहितवाक्यद्वयेन संबंधः॥ पूर्वमर्जुनेन प्रार्थितो भगवांस्तस्मै दि
व्यं चक्षुर्दत्वा दुर्निरीक्ष्यं देवादीनामपि दुर्लभं प्रणामं रूपं दर्शितवान॥ तस्य सर्वनिषेधकत्वेन
तद्दर्शनेन धनंजयस्य सहस्राभावेन भगवंतं तेनैव रूपेणान्येन प्रार्थितवान॥ श्रीकृष्णस्य द्वि
भुजत्वेन च चतुर्भुजेन भाव्यमित्यनेन सगुणरूपं दर्शयेति प्रार्थनं कृतवानिति भाति॥ श्रीभगवां
स्तद्दर्शनं विश्वरूपं मयाप्रसन्नेनेत्यादिना स्तुत्वा तत्संहृत्य तदेव मे रूपमिदं प्रपश्येत्यनेन

सगुणरूपं दर्शितवान् इदृष्ट्वेदं मानुषं रूपमित्यनेन पुनर्मनुष्यरूपं दर्शितवानिति भाति चतुर्भु
जरूपमनुष्यरूपाभ्यां सगुणत्वं सूच्यते तस्मादेवं पदस्य सगुणरूपप्रतिपादकग्रंथेन सह संबंध
इति न विरोधः यद्यप्येकादशाध्याये पूर्वं निर्गुणरूपं प्रतिपाद्य पश्चात्सगुणरूपं प्रतिपादितं तथा
पि सामीप्यादेवं पदेन सगुणरूपपरामर्शः सगुणस्यैवं संकीर्त्यायेचाप्यक्षरमव्यक्तमित्यनेन निर्गुण
प्रश्नं कृतवानिति न पौर्वापर्यविरोधोपि ॥ दीप्तिमानुवाच ॥ भगवानस्य प्रतिज्ञानुसारेण यदर्थं बाद
रीत्या प्रथमाध्याये कादशाध्याययोः स्वधियो भक्तत्वतात्पर्यं भवद्भिर्निरूपितं तदतिपवित्रं ॥ परं
त्वेकादशाध्याये सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ॥ अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥२॥ यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु ॥ एकोथ
वाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयमित्यादि प्रार्थनया प्रार्थनावाक्यस्य धीभक्तत्वेक
यं संभवति ॥ ॥ पक्षिराजउवाच ॥ हे शिष्य यदा मुमुक्षुः सद्गुरूपदेशान्निवृत्तभ्रांतिः सन्नात्मज्ञान
रहस्यमहात्म्यं पश्यति तदा स्वस्मात्तानहंकारादीन्यायायाश्चेष्टाः संभवंत्यस्ताः स्वचेष्टानिंदति यथा प्राणि
शि२ डुः स्वप्नं दृष्ट्वा जागरितः सन्स्वकीयस्वप्नचेष्टानिंदति तद्वदेतन्निमित्तेन मुमुक्षोः पूर्वचेष्टानिंदा प्र
र्वकं परमात्मनः क्षमापणपरमिदं किंच द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति श्रुत्या शरीरे वै तन्यस्य द्वैविध्यं श्रुतं चैत

६० न्यबुद्धिविशिष्टचैतन्यभेदेन ॥ अत्र समावायेति समावायो यो समानधर्मत्वं तावता ः ज्ञानदशायांभेदज्ञा-
१५६ नं जीवस्य न भवति ॥ यदा सद्गुरुप्रसादान्मुमुक्षोर्ज्ञानं निवर्त्तते तदा समलीनात्वाज्ञानदृशाभावंप-
146 श्चात्तापेन सन्निदंति ॥ यदहमानंदराशिं विस्मृत्य दुःखोन्मत्तमिथ्यापदार्थेषु दृष्ट्याकालमगमय-
मिति। एवं धनंजयव्याजेन परमात्मानं प्रतिमुमुक्षोर्विज्ञापनं वर्णितं ॥ अस्यैवं तात्पर्यं परमात्मनो
माहात्म्यमज्ञानन्स्वरूपं संबोधयं मत्वा स्वस्य सदस्वरूपं नाम ज्ञात्यादिविशिष्टं मत्वाथ च त्वत्रापि स्व-
रूपमाहात्म्यमज्ञात्वा हे हास हे यादव हे सखेति नाम ग्रहणं द्वात्वाः शनपानशयनहास्यविलासा-
दिव्यवहारेषु लिप्तः संल्लोकसाधारणेन स्वरूपासत्वा स्वस्वरूपविस्मरणं हतवानस्मि ॥ तादृश-
स्वरूपविस्मरणापराधं त्वं क्षमस्वेति ॥ तस्मादेवं वीत्वा शुद्धधियो भेोज्ञत्वं संभवति ॥ ॥ ॥ ॥ इत्यद्वै-
तादित्यउत्तरायणोदशमार्के पक्षिराजदीप्तिमत्संवादे श्रीभगवद्गीतानामर्थवादवीत्याभावार्थ-
वर्णनं नामाष्टमोरश्मिः ॥८॥ दीप्तिमानुवाच ॥ भो गुरो द्वादशाध्यायसंगतिर्भवद्भिः तदेवमेरू-
पमिदं प्रपश्येत्यादिना योजिता ॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु
यः समामेति पांडवेत्येकादशाध्यायांतिमश्लोकेन सह कस्य संगतिर्योजनीया ॥ ॥ पक्षिराज उ-
वाच ॥ हे शिष्योत्तम तदेवमेरूपमिदं प्रपश्येत्यादिना एवं सततयुक्ता इति द्वादशाध्यायादिमश्लोका-
स्यैव संगतिरुक्ता न तु संपूर्णो द्वादशाध्यायस्य ॥ मत्कर्मकृदितिचरमश्लोके न तु सर्वस्य द्वाद-

शाध्यायस्य संगतिरस्ति न चापि प्राधान्येन ॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां
ध्यायंत उपासते ॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ भवामि न चिरात्पार्थ मय्यावेशितचेत
सामिति श्लोकद्वयस्य संगतिर्वर्त्तते ॥ राजविद्यायां हि विविधं भक्तियोगकर्मयोगभेदेन ॥ तत्र सर्वक
र्म भगवत्प्रीत्यर्थं कृत्वापि कर्मतत्फलानि च भगवदर्पणं कृत्वा कर्मतत्फलानि च भगवानेवेति ज्ञात्वा
स्वात्मानं तद्रूपेण ह्यभिन्नमिति यन्मन्यते स भक्तियोगः ॥ एतन्मतानुसारेण पांडवाः प्रवृत्ताः ॥ किं
चैतन्मतं चतुर्थाधैकादेव सेनोपाख्यानेन तत्संप्रदायरीतिवर्णने किंचिद्विस्तरेण वर्णितं ॥ श्रीभगवद्गी
तास्वेतन्मतानुसारेण तत्र तत्र लक्षः श्लोकाः वर्त्तंते ॥ तद्यथा तृतीयाध्याये ॥ मयि सर्वाणि कर्माणि
संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ २ ॥ षष्ठाध्याये ॥ यो मां पश्य
ति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ नवमाध्याये ॥ यत्करो
षि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं ॥ एकादशाध्याये ॥ म
त्कर्मकृदित्यादि ॥ द्वादशाध्याये ये तु सर्वाणि कर्माणीत्यादि श्लोकद्वयमष्टादशाध्याये त्वेतन्म
तस्योपसंहारे ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियो
सि मे ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ इ
ति श्लोकद्वयं च वर्त्तते द्वितीयस्तु कर्मयोगः ॥ यज्ञादिविहितकर्मणोनुष्ठानिग्रहादिक्रूरकर्म

२:
१४७
147

णाश्च फलत्यागः कर्मयोग इत्युच्यते ॥ अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः ॥ सर्वकर्मफलत्यागं
ततः कुरु यतात्मवानिति प्रमाणेनैव न्यस्तं साक्षाच्छ्रीभगवत्संबंधीति भाति ॥ एतन्मतानुसारेणैव
जनकादिराजर्षयोऽपि प्रवृत्ताः ॥ विधिपालनार्थं लोकसंग्रहार्थं च सौम्यकर्माचरणं धर्मपालनार्थं
राज्यादिसंरक्षणार्थं च क्रूरकर्माचरणं च कृतवान्तत्फले सक्ता न बभूवुः ॥ अतो नाहं कर्तेति कस्यचित्पापं
नैव स्पृशति विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति प्रमाणेन पुण्यपापाभ्यामतीताः ॥ ए
तत्प्रसमस्तनिरूपणं श्रीभगवद्गीतास्वनेकस्थानेषु प्राप्ति ॥ तद्यथा ॥ द्वितीयाध्याये कर्मण्येवाधि
कारस्ते मा फलेषु कदाचनेत्यारभ्य यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रो
तव्यस्य श्रुतस्य चेति श्लोकपर्यंतं ॥ तृतीयाध्याये ॥ लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघेत्या
रभ्य गुणा गुणेषु वर्तन्त इति मत्वा न सज्जत इति पर्यंतं ॥ चतुर्थाध्याये अजोपि सन्नव्ययात्मा भूताना
मीश्वरोपि सन्नित्यारभ्य ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमा
धिनेत्यर्यंतं ॥ पंचमाध्याये योगयुक्तो विशुद्धात्मेत्यारभ्य नवद्वारे पुरे देही नैव कुर्वन्न कारय
न्निति पर्यंतं ॥ षष्ठाध्याये ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न नि
रग्निर्न चाक्रियः ॥ इति नवमाध्याये ॥ राजविद्या राजगुह्यमित्यारभ्य न च मां तानि कर्माणि निबध्नं
ति धनंजयेति पर्यंतं ॥ अष्टादशाध्याये ॥ यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तदित्यारभ्य न द्वे

१४८

ष्टावृत्तानंदमभ्यावृत्तेनानुषज्यत इत्येनात्तात्पर्यं तं च ॥ किंचैतन्मतस्योपसंहारोपि तत्रैव यस्य नाहंकृ
तो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमांल्लोकान्न हंति न निबध्यत इत्यनेन कृतः ॥ एवं सप्तमा
ध्याये भूमिरापोनलो वायुरित्यारभ्य जीवभूतां महाबाहो ययेदं धार्यते जगदित्यंतेन प्रकृतिद्वयं नि
रूप्य पुनस्त्रयोदशाध्याये [illegible] च क्षेत्रक्षेत्रज्ञत्वेन च विस्तरतो निरूप्य पुनः पंचदशाध्या
ये द्वाविमौ पुरुषौ लोक इत्यादिना तेनैव प्रकारेण क्षराक्षरत्वेन गृहीतोपसंहृत्य सप्तमाध्याये मत्तः
परतरं नान्यत्किंचिदस्ति धनंजयेत्यनेनोपक्रांतस्य पुनः पंचदशाध्याये यस्मात्क्षरमतीतोऽहमक्षरा
दपि चोत्तमः ॥ अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम इत्यनेनोपसंहारः कृतः ॥ एवं चतुर्दशाध्या
ये सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवा इत्यादिना गुणत्रयं निरूपणं कृत्वा पुनः सप्तदशाध्या
ये त्रिविधा भवति श्रद्धेत्यादिना तेनैव गुण[illegible]विभागेन निरूप्य पुनरष्टादशाध्याये सर्वभूतेषु ये
नैकं भावमव्ययमित्यादिना विस्तरेण निरूप्य [illegible] तैर्वनतदस्ति पृथिव्यां वेत्यनेनोपसंहारः कृतः
इत्यद्वैतादित्यउन्नरायणेन दशमार्कपतिराजदीप्तिमत्संवादे श्रीभगवद्गीतानां छायाव्याख्यान
रूपेण तात्पर्यनिरूपणं नाम नवमो रश्मिः ॥९॥ दीप्तिमानुवाच ॥ ॥ अथ त्रयोदशाध्याये
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यत इति श्लोकेन प्रकृतेः कर्तृत्वं भासते तत्र सांख्यानुमतं सांख्य
त्वद्वैतशास्त्रं ॥ श्रीगीताशास्त्रं तु केवलाद्वैतब्रह्मप्रतिपादकमतस्तत्र द्वैतमतप्रतिपादकं सांख्यसिद्धां

क्रे १

१० १४८ 148 तत्त्वं कथं संगच्छते ॥ पक्षिराज उवाच ॥ हे शिशो इदं वाक्यं न सांख्यसिद्धान्तपरं नवा प्रकृतेः
कर्तृत्वबोधकं ॥ किं त्वस्य तात्पर्यमेवं ॥ वस्तुगत्या पुरुषोऽक्रियः शुद्धः परं तु प्रकृतिसंगवशात्पु
रुषः कारणत्वं कर्तृत्वं कार्यत्वं च प्राप्नोति ॥ विशिष्टचैतन्यनिष्ठकार्यत्वकारणत्वकर्तृत्वे च प्रकृ
तिर्हेतुरित्यर्थः ॥ प्रकृतिसंगाभावे तु पुरुषो न कार्यं न कारणं न कर्ता च ॥ सुखदुःखयोर्मनोधर्मत्वे
न तद्भोक्तृत्वं न केवलस्यात्मनः संभवति न वा प्रकृतिमात्रस्य किं तु चिज्जडग्रंथेः तत्रापि भोक्तृत्व
मनात्मधर्मो न भवति ॥ तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः ॥ किं तु विशिष्टचैतन्यस्य ॥ तस्मात्पु
रुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यत इत्युक्तं ॥ दीप्तिमानुवाच ॥ भो गुरो श्रीगीताशास्त्रस्योप
निषत्सारत्वेन तत्रोत्पत्तिप्रकरणं महावाक्यार्थोऽप्युपदिष्टस्तत्त्वाद्ववर्णनं तदिति मयानन्तायते भ
वद्भिर्वर्णनीयं ॥ पक्षिराज उवाच ॥ तत्रोत्पत्तिवाक्यानि भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां ॥ जीवभूतां म
हाबाहो ययेदं धार्यते जगत् ॥ एतद्योनीनि भूतानीति ॥ सर्वभूतानि कौंतेयेत्यारभ्य ॥ मयाध्यक्षेण प्र
कृतिः सूयते सचराचरं ॥ हेतुनानेन कौंतेय जगद्विपरिवर्तत इति पर्यंतं ॥ मम योनिर्महद्ब्रह्म त
स्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारतेत्यादीनि ॥ अयं महावाक्या
र्थप्रतिपादकानि तानीत्यात्मैवमेममतमिति ॥ हेतुरंते चापि मां विद्धीति ॥ उपद्रष्टानुमंता च भर्ता भो १४८

ज्ञाम ईश्वरः। परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परइत्यादीनि॥ हे शिशोश्चैव यथा मया यथार्थवादरीत्या
तात्पर्यं निरूपितं तथा ऽष्टादशाध्याये ऽपि ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप॥ कर्माणि प्रविभक्ता
नि स्वभावप्रभवैर्गुणैः॥ शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्म
कर्म स्वभावजं॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभाव
जं॥ कृषिगोरक्षवाणिज्यं वैश्यं कर्म स्वभावजं॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं॥ स्वे स्वे कर्म
ण्यभिरतः संसिद्धिं लभते नरः॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु इति श्लोकानां तात्पर्यं विलक्ष
णं वर्तते तद्वक्ष्यामि शृणु॥ अत्र प्रतिपादिता ब्राह्मणादयो लोकप्रसिद्धब्राह्मणादिभ्यो विलक्षणाः
अत्र निष्ठयैव ब्राह्मणत्वादिव्यवहारो न तु जात्या॥ तथाहि यः शमदमादिसाधनदशायां शान्तः
संस्तपो ऽभ्यासद्वारा मनोनिग्रहे तत्परो भवति किं चांतर्बहिश्च शुचिः॥ आपत्काले प्राप्ते वा न विदप
माने क्षान्ते क्षमां करोति सर्वत्र चर्जुस्वभावः शास्त्रीयज्ञानस्वरूपज्ञानाभ्यां युक्तश्च स ब्राह्मणः॥ यो म
नोनिग्रहासंभवे तपः साधनादि विना वैराग्यरूपशौर्येण मन आच्चनात्मसंघातजयं करोति य
स्य सुविस्वरूपतेजो भाति॥ इष्टानिष्टप्राप्तिप्राप्तौ शौर्यधैर्येन त्यजति यश्चानात्मकापटयमात्मरह
स्यं च करोतीति क्षात्त्रं समर्थो भवति॥ मनः क्वचिद्वस्तुनि लग्नं चेच्छुः परस्यो वा तन्निग्रहं कुर्यामि
त्युपेक्षामकृत्वा मनोऽभिलाषं न पूरयति यद्वस्तु स्वेन प्राप्यते तद्भगवदर्पणबुद्ध्या न त्यागमेव

दीयते॥ यस्य ध्यानधारणादिकं विनाप्यहं ब्रह्मास्मीति भावः सर्वदोपस्थितो भवति स क्षत्रियः॥
अत्र कृषिशब्दस्य तात्पर्यद्वयं॥ तत्र यथा कर्षकस्तत्तत्काले लाभमुद्दिश्य श्रमं कृत्वा प्राप्तधान्यादिकं
भूमौ निक्षिपति तथायं साधकः स्वर्गादिफलमुद्दिश्येष्टापूर्तादेर्धान्यस्थानीयद्रव्यस्य व्ययं क-
रोति॥ अथवायं साधक आत्मज्ञानमुद्दिश्यांतःकरणभूमिं विवेकहलेन कृष्ट्वा तत्त्वमस्यादि-
वाक्यबीजं वपति॥ गोपदमिंद्रियवाचकं तद्रक्षणं विषयेभ्यो निग्रहकरणं तद्यः करोति॥ वा-
णिज्यपदस्यापि तात्पर्यद्वयं॥ तत्र यो गोदानादिना जपस्वाध्यायादिना चामुत्र फलविशेषप्राप्ति-
र्भविष्यतीति भगवतासाकं गोदानादिजपस्वाध्यायादिकं वाणिज्यं करोत्यथवायं साधको
ज्ञानप्राप्तिमुद्दिश्य वेदांतविचाररूपव्यापारं करोति स वैश्यः॥ यो वेदांतश्रवणादावसमर्थः
स भगवन्मूर्त्याद्यर्चनं करोत्यथवा गुरूणां च शुश्रूषां करोति स शूद्रः॥ स्वस्वकर्मण्युक्तरीत्या
स्वस्वधर्मेऽभिरतोऽत्यंतासक्तो भवति स तत्तन्नाम (सत्पुरुषाणां) सिद्धिं प्राप्नोति नान्यथा शूद्रधर्माधिकारी वैश्यादि-
धर्माचरणं वैश्यो वा क्षत्रादिधर्माचरणं क्षत्रियो वा ब्राह्मणधर्माचरणमेवं ब्राह्मणादिः क्षत्रि-
यादिधर्माचरणं वा करोति स सिद्धिं न प्राप्नोतीत्यर्थः॥ आत्मारामउवाच॥ हे मधुपदीप्तिमान्हि-
राजस का प्रादेत ज्ञान विद्यादिकं सर्वं श्रुत्वा विगतसंशयः सन्नमस्कारपूर्वकं तदाज्ञां गृहीत्वा
स्वाश्रममागत्य गुरुपदवीं प्राप्तवान्॥ इतः परं सहजानंदसत्यसंधसंवादं वक्ष्यामि श्रृणु॥॥

इत्यैहेनादित्यजन्नरायणे दशमार्के पत्तिराजद्वीप्तिमन्संवादे श्रीभगवद्गीताष्टादशाध्यायस्थश्लोकपंच
कभावार्थवर्णनंनामदशमोरश्मिः ॥१०॥ इतिदशमार्कः समाप्तः ॥१०॥

दे॰
१५०

150

१५०

ए० १५१

151

ॐ श्रीगुरुभ्यो नमः ॥ आत्माराम उवाच ॥ हे मधुप सत्यसंधः त्वयाऽनेन सह श्रीहरिविहारस्व
रूपनिर्णयानंतरं पहिराजाज्ञां गृहीत्वा गंधमादनान्मानससरोवरं गत्वा स्वगुरुं सहजानंदं
प्रणम्य तत्सभाहृतांतःकरणं तत्प्रमतभेदेन श्रीहरिविहारस्वरूपनिर्णयश्चैतद्यज्ज्ञानं तत्सर्वं निवेदयामा
स ॥ सहजानंदोऽपि तत्सर्वं श्रुत्वा पहिराजं तुष्टाव तद्विवेकमनुभवं च प्रशशंस ॥ ततः सत्य
संधस्तं विज्ञापयामास भो गुरो पहिराजेन विभूतिविषये यन्निरूपितं तत्र श्रुतिस्मृत्यादिप्रमा
णाभावेन तत्त्वार्थमंगीकर्तव्यं ॥ सहजानंद उवाच ॥ अयं विचारः परमरहस्यरूपः सर्वेपि
राजर्षयस्तद्रहस्यं जानंति ॥ श्रीभगवद्गीतासप्तमनवमदशमाध्यायेषु विभूतिविषयः सं
क्षेपेण स्पष्टं निरूपितः एवमन्यत्र पुराणादिष्वपि यत्र कुत्र चिद्यत्किंचिन्निरूपितं ॥ वेदपु
राणादिषु रहस्यगोपनार्थं स्पष्टं न वर्णितं किंतु परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्वि
ष इति श्रुत्या छलेन भ्रूभंगरीत्या एकस्मिन्नेव विषये नानारेण गर्भितं कृत्वा वर्णितं ॥ काव्ये यथा व्याजो
क्तिस्तथाऽपि स्वाभिमतभावो विषय न्यत्रारोप्य वर्णितः ॥ एवं ब्रह्मवैवर्त्तपुराणे छलेनापा
विभूतिविषयो निरूपितः ॥ तद्रहस्यं संक्षेपेण वर्णयिष्यामि शृणु ॥ श्रीकृष्णो विभो विभु
स्थानीयो राधा विच्छक्तिस्थानीया गोपगोपिकास्तु विभुविभूतिस्थानीयाः ॥ तत्रैवं व
र्णितं भगवद्भ्यां महारूपेभ्यो गोपगोपिका उत्पन्ना इति ॥ तस्यैवं तात्पर्यं रोमकूपाणामानंत्ये

नविभूतीनामसंख्यानंत्येनसाम्याद्ब्रह्मरूपेभ्यउत्पन्नाइतिवर्णितमन्यथातत्रविग्रहाभावाद्ब्रह्मरूपेभ्य
उत्पत्तिरसंगतैवस्यात्॥ उत्पत्तितात्पर्यंतुविभूतीनांव्याकरणं॥ गोपदंरश्मिवाचकंपूर्वंपठितंराजे
नोक्तंजगदुत्पत्तिसमयेयथाऽनंतरश्मिभिःसाकंसूर्यउदेतितथाऽनंतविभूतिरूपरश्मिभिःस
हविष्णोर्विभुरूपादित्योदेदीप्यमानोभवति॥ अतएवगोलोकपदेनरश्मिलोकोरश्मिलोकपदेन
विभूतिलोकः॥ ब्रह्मवैवर्त्तपुराणेब्रह्मखंडेउत्पत्तिप्रकरणएवंवर्णितंश्रीकृष्णस्यदक्षिणपार्श्वतोना
रायणोवामपार्श्वतःशिवोनाभिदेशतोब्रह्माचोत्पन्नाइति॥ तत्तात्पर्यमेवंधर्मजन्यनारायणविरिंचि
जन्यशिवारववामलोद्भवब्रह्मणांबीजभूतास्तेत्रयइति॥ एवंतत्रधर्मोमन्मथोदुर्गासरस्वतीलक्ष्म्यादयः
श्रीकृष्णादुत्पन्नाइतिवर्णितंतदपिविभूतिव्याकरणतात्पर्येणैतेऽपिप्रसिद्धधर्मादीनांबीजभूता
स्तेषांपांचभौतिकशरीराभावात्॥ पुनःश्रीकृष्णस्यरेतोजलार्णवेपतितंतस्माद्विलसुजीतस्तन्नाभि
वामलाद्विरिंचिस्ततःसनकादयोरुद्रामरीच्यादिप्रजापतयश्चजातास्तेभ्यःसर्वंजगज्जातं॥ कृष्ण
रेतसउत्पन्नोविराण्मधुकैटभौहत्वातदीयमेदसामेदिनींकृतवानितितत्रयद्वर्णितंतत्सर्वंतात्पर्यं
तत्परममदेहशरीराभावेनरेतःपातासंभवाद्रेतःपदेनविभूतिबीजसमुदायोज्ञेयः॥ जलार्णवश
ब्देनाष्टधाऽपराप्रकृतिर्ज्ञेया॥ यथांतःकरणैकदेशमनोग्रहणेनांतःकरणचतुष्टयस्यापिभा
नंभवतितथाऽपरप्रकृत्येकदेशजलग्रहणेनाष्टविधप्रकृतेर्भानं॥ तयाचश्रीकृष्णविभूतिबीजस

मुदायोऽपरब्रह्मत्वेनस्थापितः॥ यावद्विभूतिसमुदायरूपेणतस्तोऽध्यात्मत्यागाहंसंयोगोनभवति
तावल्लिंगदेहः स्थूलदेहोवाविद्यमानोनभवति॥ ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं॥ संभवः
सर्वभूतानांततोभवतिभारत॥ तिस्मत्याविभूतिसमुदायरूपगर्भोऽपरब्रह्मातिरूपमहत्तत्वेभग
वतास्थापितइतिज्ञायते॥ सर्वेषांप्राणिनांदेहाभौतिकास्तत्राकाशवायुरूत्यत्संज्ञकौ॥ अग्न्यादि
त्रयंसत्त्वसंज्ञकं॥ देवादीनांदेहास्तद्रूपामनुष्यादीनांदेहाः सद्रूपाः॥ देवेभ्यः परंविभूतीनांवपुस्त
वालामात्रंचेतनाभूतरूपं॥ ॥ ॥ इत्यद्वैतादित्यउत्तरायणएकादशार्कसहजानंदसत्यसंध
संवादेब्रह्मवैवर्त्तपुराणस्यभावानुसारविभूतिविषयतात्पर्यनिरूपणंनामप्रथमोरश्मिः॥१॥
सत्यसंधउवाच॥ भोगुरोब्रह्मवैवर्त्तेकृष्णजन्मखंडेवासुदेवरूपेणावतरणसमयेगोलोकवासी-
श्रीकृष्णोगोपगोपिकाआज्ञापयामासपुष्पाभिर्भूलोकेऽवतरणंकर्त्तव्यमितिवर्णितं॥ पुनस्तत्रभा
गवतादीतरपुराणेषुचश्रीभगवान्देवदेवांगनादीन्भूलोकेऽवतरणार्थमाज्ञापयामासेतिप्रतिपा
दितं॥ विरुद्धमिदंकथंसंगच्छते॥ सहजानंदउवाच॥ हेशिशोयथापत्निराज्ञेनोनांतथेदानीत्व
याऽनुवादःकृतः॥ देवादयस्तत्तद्विभूत्यनुसारेणतत्पदंतेमनुष्यादयस्तुतत्तद्देवाद्यनुसारेणेति॥
मनुष्यादयोदेवाद्यधीनादेवादयोविभूत्यधीनाविभूतयस्तुविभोर्विभ्वधीनाः॥ अतोविभूतयोदेवा
दीन्द्वारीकृत्यैवमनुष्यलोकेऽवतरंतिनसाक्षात्॥ गोपगोपिकापदेविभुविभूतितात्पर्यकेइतिमया

पूर्वं निरूपितं ॥ विभूतीनां देवादीनां तादात्म्येन भूलोकावतरणार्थं गोपगोपिकाश्चात्तन्नाम्नो देवास्त्वात्तनाम्नाएव
एवं भूलोकावतरणार्थं देवादयश्चात्तनाम्ना इत्यर्थः गोपगोपिकाश्चाप्यात्तनाम्नाएव ॥ ॥ सत्यसंध उवाच ॥ ॥
भो गुरो ब्रह्मवैवर्ते पुराणे गोलोकवासी श्रीकृष्णो गोपगोपिकाभिः क्रीडितवानिति वर्णितं ॥ गोपगो-
पिकानां विभूत्यात्मकत्वेन गोलोकस्य रश्म्यात्मकत्वेन च तत्र शारीरासंभवात्क्रीडा कथं संभवति ॥ ॥
सहजानंद उवाच ॥ ॥ हे शिष्य तस्मिंल्लोके पांचभौतिकं शरीरं नास्ति किंतु चेतनात्मकविभूतीनामेव
व्याकरणं ॥ तत्र हि विभूतिमवलंब्य सर्वे जीवाः पांचभौतिकशरीरतादात्म्यं पन्ना भवंति स लोको मूल-
भूतः अर्धं लोकत्रयं शाखापत्रवत् ॥ मूले विद्यमानमेव शाखापत्रादिरूपेण भासते ॥ तस्मात्तल्लोके
यत्क्रीडनं वर्णितं तत् एतल्लोकत्रयक्रीडाबीजभूतं ॥ एतादृशजगन्मूलभूतव्याकरणादारभ्य शाश्व-
तिकप्रलयपर्यंतं परमात्मा सर्वविभूतिभिः सह क्रीडन्नपि नित्यशोऽक्रियः सर्वातीतो राजते ॥
भो तात यद्येतस्मिन्वृंदावन एव श्रीभगवान्गोपगोपिकाभिः सह क्रीडितवान्नान्यत्रेत्युच्येत ॥
तदा तत्क्रीडनमेकदेशीयमेककालीनमवतारद्वारा प्रकटितं जातं ॥ जगत्सर्गात्समाप्तिपर्यंतं लो-
कत्रये सर्वदा भगवतः क्रीडनं भवत्येव ॥ तत्क्रीडनरहस्यं परमभागवतान्विना कोऽपि न जानंति
यत एव मत्तोऽग्निर्हविर्होता हवनं भोक्ता च स एव ॥ अधियज्ञो यज्ञांतकर्त्ता च स एव ॥ युद्धं योद्धा वै-
रं वैरी शस्त्रमस्त्रं हननं हंता हतो जयोऽजयो राज्यं राजा स्वर्गः स्वर्गप्राप्तिश्च स एव ॥ एतत्सर्वस्मा-
दतीतो विलक्षणोऽपि स एव पूज्यः पूजकः पूजा च स एव फलं फलदाता फलभोक्तापि स एव ॥ गानं गीतं गायको गाणिका हावो भावो

र॰
१५३
153

वस्मादितीतोऽपि सएव॥ नानाविचित्रस्वमनोभूत्वाप्रफुल्लितोजातः सएवभ्रमरादिर्भूत्वामोहितोऽपिज्ञातः
॥ एवंप्रकारेणसकलचराचरेषुक्रीडन्नपिक्रीडाविकारादतीतोयथास्थितस्तथैवास्ति॥ तस्याऽद्भु
ताऽनिर्वचनीयलीलायाःपारोनास्ति किंवार्थंब्रूमः इत्यादिनर्काद्धलीनः क्वचिद्विरूपः स्वमनः क्वचि
त्त्वक्वचित्तुरंगः क्वचिद्रस्वरोहकः॥ एतादृशोऽनेकरूपास्तरंगाः समुत्थितास्तत्पहीनांबुधौ सदा
१॥२॥ सत्यसंधउवाच॥ भोगुरो पत्त्रिराजेनराजयोगस्य स्तोत्रं कृतं तन्माहात्म्यं कीदृशं तत्सांख्ये
नीयते वा न वा तद्वक्तव्यं॥ सहजानंदउवाच॥ हे शिष्य सांख्ययोगश्चेत्येते परमविद्ये अनादिसिद्धे
एतावत्पर्यंतं यत्क्रीडाविषयादिकं मया वर्णितं तद्राजयोगानुसारेण॥ सर्वस्य जगतो ब्रह्मत्वेनैवा
नुसंधानं राजयोगः॥ तयोर्विद्ययोर्मध्ये वाचनं ज्ञानिनः स्वस्वसंप्रदायानुसारेणैकस्यां विद्यायां नि
पुणाः॥ वाचनोभयत्र परंतु यस्य यद्विद्यासंप्रदायो भवति तस्य तद्विद्यायामेव निष्ठतरस्याः ज्ञान
मात्रं॥ एवं मम पत्त्रिराजस्य चोभयत्र ज्ञानमस्ति तथापि स्वस्वसंप्रदायानुसारेण मम सांख्ये नि
ष्ठा राजयोगे ज्ञानमात्रं पत्त्रिराजस्य तु राजयोगे निष्ठा सांख्ये ज्ञानमात्रं॥॥॥ इत्यद्वैतादित्यउन्नरा
यणएकादशार्कसहजानंदसत्यसंधसंवादे राजविद्यारहस्यवर्णनं नाम द्वितीयो रश्मिः॥२॥
सहजानंदउवाच॥ हे शिष्य शारीरकभाष्ये देवताधिकरणं त्वयाधीतं॥ तस्मिन्विषये पत्त्रिराजं
प्रति प्रष्टुमेकां युक्तिं वक्ष्यामि तच्छ्रुत्वा तत्र मन्नामग्रहणमहत्त्वास्त्वबुद्धिपूर्वकमिव यदितं

श्छेदः कृतस्तदा तस्य ब्रह्मद्विर्जोत्पत्तिन्निश्चत्वया ज्ञायेत ॥ यदेंद्रो ब्रह्महत्याभयेन कमलमृणालिकायां गुप्तो जातस्त
दा बृहस्पतिस्तत्समीपं गत्वोक्तवान् ॥ भो मघवं त्वं बहिर्निःसर पुनस्त्वामश्वमेधादिना याजयित्वा ब्रह्मह
त्यां निवारयिष्यामीति प्रतिज्ञायेंद्रमानीयाश्वमेधं कारयामास ॥ तदेंद्रासनेऽविंद्राभावादनेनेंद्रेणेंद्रा
यस्त्वाहेतींद्राय दत्तेन हविःकेन प्राप्तमितीमं प्रश्नं पप्रच्छ राजन् श्छेदस्तदा संसाध्यानुसारेण राजविद्यानुसा
रेण वा तद्दत्तं रंदास्यति तत्तस्तत्त्वामर्थ्यं त्वं जानीयाः ॥ यद्यप्ययं प्रश्नो देवताधिकारेण स्पष्टतया नास्ति तथा
पि सूक्ष्मगत्या वर्तते तत्र तिसूक्ष्मदर्शिभिर्ज्ञायते ॥ ॥ सत्यसंध उवाच ॥ भो गुरो यावदियं कथा सम्यङ्गु
न्तापनेनावदयं प्रश्नो मम मनसि तिविषयो न भवत्येतस्तां कथां विस्तरेण वद ॥ ॥ सहजानंद उवाच ॥ ॥
हे शिशो इयं कथा वेदपुराणादिषु प्रसिद्धा परं त्वेकावीन्यानास्ति किंतु वक्तृभेदेन ग्रंथभेदेन चाधिक
न्यूनभावेन वर्तते ॥ एकस्मिन्समये सुरगुरुरिंद्रसभायामागतस्तदेंद्रो गर्वेण प्रत्युत्थानादिकं त
स्य न कृतवान् ॥ ततः सुरगुरुः क्रुद्धः सन्नन्यत्र गतवान् ॥ तत इंद्रः पितामहस्य निकटं गत्वैतत्सर्वं
निवेदितवान् ॥ तच्छ्रुत्वा पितामहस्त्वष्टुः प्रजापतेः पुत्रं विश्वरूपं स्वगुरुपदव्यां स्थापयेत्याज्ञाप
यामास ॥ तेनैवमुपदिष्टः सन्निंद्रस्तथा चकार ॥ ततो विश्वरूपो देवासुरयुद्धसमये बहिर्देवादीनां
संज्ञादिकं दत्त्वांतरसुराणामपि पिहपातं कृतवान् ॥ इंद्रः सर्वज्ञत्वेन तत्कापट्यं ज्ञात्वा तस्य शिरश्छे
दनं कृतवान् ॥ तदा ब्रह्महत्येंद्रं प्रत्यधावत् ॥ तद्भीत्येंद्रः स्वर्गात्पलायितवान् ॥ यत्र यत्रेंद्रो गतवांस्त

१०
१५४
154

तत्रब्रह्महत्यापितत्पश्चान्नगाम ॥ ततइंद्रोव्यग्रः सन्नेकस्मिन्सरोवरेकमलमृणालिकायांगुप्तोजा
तः ॥ ततोबृहस्पतिः सर्वैर्देवैः प्रार्थितः सन्सोमवंशजंनहुषमिंद्रासनेस्थापयामास ॥ ततोनहुषस्सें
द्रपदवीप्रयुक्तगर्वोजातः ॥ कदाचिन्नहुषोगवाक्षमार्गेणशचीमंदिरंदृष्ट्वाकस्येदंमंदिरमितिस
मीपस्थानुवाच ॥ तेरूत्तामिंद्राण्याइति ॥ तच्छ्रुत्वानहुषोयथारंभाद्यप्ररसोमत्समीपमागन्ता
स्तथेयंविमर्थंनागतेतितामानेतुंदूतंप्रेषयामास ॥ भोसत्यसंधपापरूपव्याधीनामौषधंलोके
स्तिपरंत्वगर्वरूपव्याधेर्लोकत्रयेप्यौषधंनास्ति ॥ लोकेगुरुब्रह्महत्यासमोदोषोनास्तितथापी
द्रोऽश्वमेधाद्युपाये नतत्पापाद्विमुक्तः सन्पुनरिंद्रासनंप्राप्नवान् ॥ नहुषस्तुगर्वरूपव्याधि
ग्रस्तः सन्नधोगतिंप्राप्तः ॥ तस्माद्गर्वः सर्वथात्याज्यः ॥ ततइंद्राण्यपिदूतोक्तंश्रुत्वाबृहस्पतिस
मीपंगत्वेदंसर्वंनिवेद्यमम पातिव्रत्यसंरक्षणंभवद्भिः सर्वथाकार्यमितिविज्ञापयामास ॥ सुरगु
रुस्तद्वाक्यंश्रुत्वातामुवाच ॥ त्वयानहुषंप्रत्युत्तरमेवंप्रेषणीयं ॥ यदायदात्वतनइंद्रोभवतितदा
तदाप्रथमतः शिबिकामारुह्यमद्गृहमागच्छतिपरंत्वतच्छिबिकावाहकाः सप्तमहर्षयोऽग
स्त्यश्चनान्येभवंतीति ॥ ततः शच्यैतदुत्तरंदूतद्वारानहुषंप्रतिप्रेषयामास ॥ एतन्नहुषः श्रुत्वान
त्समीपगमनोत्साहेनैश्वर्येणोन्मत्तः संछिबिकामारुह्यागस्त्येनसहसप्तर्षींस्तद्वाहकान्कृत्वा
तत्रजगाम ॥ मार्गेऽगस्त्यानहुषं दृष्टवान्भोराजंश्चकुरुतिस्मत्योर्विरोधेप्राप्तेतत्रकावाबलवती

१५४

नहुषेणेत्थं स्तुतिरेवेति ॥ पुनरगस्त्येन दृष्टं श्रुत्योः परस्परविरोधे कावा गतिरिति ॥ नहुषः कामान्तरते
नतद्वत्तरमद्वत्वा सर्पैस्तुन्नावान् ॥ तच्छ्रुत्वागस्त्यस्त्वं सर्पो भवेति शशाप स्वसंधाष्टिकं विकोपातयामास
तदा नहुषः सर्पो भूत्वा पपात ॥ ततो देवाः पुनः स्वर्गमराजकं दृष्ट्वा सुरगुरुं प्रार्थयामासुः ॥ स तच्छ्रुत्वा
यत्रेन्द्रो गुप्तः भूत्वा तस्थानं तत्तान दृष्ट्वा तं ज्ञात्वा देवैर्ऋषिभिश्च सह तत्र गत्वा वासवस्याभयं दत्वा मृणालात्
बहिर्निष्क्रास्य तत्र हस्तात् स्वमेधं कारयामास ॥ ॥ ॥ इत्यष्टैतादित्यजनारायणएकादशार्कसहस्रानंदसत्य
संधसंवादे शान्तोनहुषस्य कथावर्णनं नाम तृतीयो रश्मिः ॥ ३ ॥ श्यात्माराम उवाच ॥ हे मधुपतनः सत्यसं
धो गंधमादनं गत्वा पतिराजं प्रणम्य तदुपदिष्टं प्रश्नं कृतवान् ॥ एतच्छ्रुत्वा पतिराजः हर्षेणोत्फुल्ली भूत्वो
वाच ॥ अयं प्रश्नस्त्वत्कृतो न भवति किं तु वेन चिन्त्यस्तु रखेणकृत इति भासते ससत्सुरषो महायोगी
श्वर इति ज्ञायते ॥ पूर्वकाले त्वेगेंद्र नाम वेनमत्पितामहेन शकुनिरुग्रबाहुनामा देवताधिकरण
विषये सद्भावनया शास्त्रविलासार्थं यथा संवादं कृतवांस्तथा वदामि तच्छ्रवणेन तव प्रश्नसमा
धानं भविष्यति ॥ अथ त्वेगेंद्रोग्रबाहुसंवादः ॥ उग्रबाहुरुवाच ॥ मंत्रमध्ये वदेवतानां तु विग्रहवती
॥ वेदपुराणादिषु यत्र यत्र विग्रहवद्देवताप्रतिपाद्यते तदर्थवादरूपं ॥ देहः कर्महेतुर्यदि देवानां
कर्माधिकारः स्यान्नहि देहकल्पनमपि स्यात् ॥ यदि श्रुत्यैव देवानां विग्रहः स्वीक्रियत इत्युच्येत न
ह्येकस्मिन्समयेऽनेकप्रदेशोपस्थितिं इन्द्रायस्वाहेत्येकस्मादिन्द्राय हविर्ददति तदेकं इन्द्रोऽनेकस्थले कथं गृह्णीयात् ॥ तस्मान्मंत्र एव

ए० देवतामंत्रं विना सदेहदेवो नैवेति सिद्धं ॥ रुगेंद्र उवाच ॥ वाच्यं विना वाचकं न संभवति यदि तद्दपि
१५५ संभवतीत्युच्यते तर्हि वंध्यापुत्रवच्छून्यमेव स्यात् ॥ यदि देवतायाः कर्माधिकारो नास्ति तर्हि विद्याऽ
155 धिकारोऽपि न स्यात् ॥ विद्याऽधिकारस्तूपनिषत्सु प्रतिपादितः ॥ यद्वा ब्रह्महत्याप्रभावेणेंद्रो राज्यभ्र
ष्टो जातस्तदा नहुषइंद्रासने स्थापितः स विग्रहवानभून्नवा ॥ एवं मेघनादेनेंद्रो बध्वा लंकायां स्था
पितः स चेंद्रो विग्रहवान्वा मंत्रमयो वा ॥ धनंजयस्य पाशुपतप्राप्त्यनंतरं यथेंद्रो धनंजयं पंच संवत्स
रपर्यंतं स्वर्गे स्थापितवान्स विग्रहवान्मंत्रमयो वा ॥ तस्मादेतत्सर्वं विग्रहमंतरा न संभवतीत्यर्थवा
दत्वकथनमसंगतं ॥ उग्रबाहुरुवाच ॥ भो गुरो पूर्वमीमांसकैरेतेषामर्थवादत्वमुच्यते ॥ तद्यथा
मेघनादेनेंद्रो जितः स लक्ष्मणेन हत इत्याख्यायिका लक्ष्मणमाहात्म्यप्रशंसापरा ॥ एवं रावणेन
वरुणयमादयो देवा जिता इत्याख्यायिकाप्यपि श्रीरामचंद्रमाहात्म्यप्रशंसापरा ॥ यदि कदाचिदिं
द्रेण रावणो जितो मेघनादेनेंद्रो जित इत्याख्यायिकाऽर्थवादरूपा कल्पिता स्यात्तर्हि श्रीराममाहात्म्य
प्रशंसार्थमिंद्रो रावणेन जित इत्येवं वर्णिता स्यादित्युच्यते तत्तावदबलः सर्वदेवजेतृरावणस्य जे
तारमिंद्रं वरप्रदानात्प्रागेवेंद्रं जित्वा पश्चान्मेघनादो ब्रह्मणः साकाशाद्वरांल्लब्धवानेतादृशो लक्ष्म
णेन हत इति लक्ष्मणस्यात्यंतमाहात्म्यप्रशंसापरैवेयं ॥ एवं धनंजयस्य पंचसंवत्सरपर्यंतं स्वर्गे स्थि
तिरिंद्रादिभ्यो देवेभ्योऽस्त्रशस्त्रादिप्राप्तिश्च धनंजयमाहात्म्यप्रशंसापरा ॥ एवं नहुषाख्यायि १५५

कापितन्माहात्म्यप्रशंसापरा तस्माद्देवानां विग्रहो नास्ति ॥ वेणींद्र उवाच ॥ ॥ धनंजयस्य स्वर्गवासादि
कथायाः अर्थवादत्वे निवातकवचादीनां वधः उर्वशीशापो लोमशर्षेर्युधिष्ठिरान्तिकप्रेषणं चैताः क
था निरर्थकाः स्युः ॥ एवं नहुषस्य स्वर्गप्राप्तिस्तत्कीर्त्यर्थवादत्वेन नहुषस्यावताराभावेन तत्कीर्तिवर्णन ता ३
मसंगतं स्यात् ॥ यदि कदाचिन्नहुषस्यावतारत्वाभावेऽपि महाराजत्वेन तत्कीर्तिवर्णनमावश्यकमित्युच्य
ते तर्ह्यगस्त्यशापेन तस्याधःपतनसर्पयोनिप्राप्त्याद्यपकीर्तिवर्णनं न स्यात् ॥ तस्मादियं कथाऽर्थवा
दरूपा न भवति ॥ एवं श्रीरामचंद्रः पूर्णावतारो लक्ष्मणस्तु शेषरूपत्वेनांशावतारः ॥ एवं सति पू
र्णावतारापेक्षयांऽशावतारस्य महिमाऽधिकावर्णनमर्थवादात्मकं न भवति ॥ अपरं चेंद्रः कामो
हितः सन्नहल्यागमनं कृतवान् ॥ स इंद्रो विग्रहवान्न वा यदि विग्रहवानित्युच्यते तर्ह्यस्मन्मतप्र
वेशः स्यात् यदि विग्रहवान्न भवतीत्युच्यते तदैतेनाहल्यायाः कीदृशार्थस्तावत्कालेनार्थवादत्वं
॥ प्रत्युतेंद्रगौतमयोरपकीर्तिसंपादिकेयमाख्यायिका ॥ यद्यपकीर्तिवर्णनार्थ एवार्थवाद इत्युच्य
ते तर्हीत्थं यथार्थकथनं विहायान्तकथाकल्पने श्रीव्यासवाल्मीक्योः किं प्रयोजनं ताभ्यां साकं को
वा विरोधः ॥ तस्मादेतस्याप्यर्थवादत्वं न संभवति ॥ अन्यच्च सूर्यचंद्रनक्षत्रादीनां देवानां विग्रहा
भावे कथं प्रत्यक्षत्वं संभवति ॥ अंततो गत्वा यः कश्चन प्राणी नः प्रेत्य लोकांतरगमनसमये तृणज
लौकान्यायेन तत्तल्लोकयोग्यकर्मजन्यशरीरं धृत्वैव गच्छति ॥ किं च वक्ष्यमाणदेवादयः सविग्रहाः

ति॥ केवलमेवं परमात्मानं विना कोऽपि व्यवायो न भवति॥ सत्कर्मणा प्राणी देवत्वं प्राप्नोति देवादिभ्यः
परं देहत्रयसाध्यक्रियपदं॥ अक्रियपदप्राप्तावक्रियनिष्ठैव कारणं भवति न तु कर्म॥ कर्मणा तु निर्देव
वपुः प्राप्तिपर्यन्ता कर्मफलस्य निरवशेषभोगं विना तच्छरीरान्मुक्तिर्नास्ति॥ कर्मणः प्रवृत्तिः का
मनाविषये स्वरूपं तु निष्कामं प्राप्य प्राप्तीः प्रापयितेति विभिरतीतं वासनावारणस्य निवृत्तिः सैव स्व
रूपप्राप्तिः स्वर्गादिलोकाः सर्वे भोगालया अंतवंतश्चेति॥ तेषु लोकेषु वपुर्विना कोऽपि भोगं भो
क्तुं न शक्नोति॥ तस्मात्सर्वे देवाः सशरीरा एव॥ अथ यथासौ सूर्यः सर्वस्मिं लोके + चन प्रास देशेषु
रश्मिभिः स्पर्शितं शनाकर्षति॥ तथायं शक्रोऽपि सर्वेषु लोकेषु ये यजना इंद्राय स्वाहेति हविर्ददति
तेषां हविः स्वतेजसा प्राप्नोति॥॥॥॥ इत्यष्टैतादित्यउत्तरायणकाष्ठाशार्के त्वगंडुग्रबाहुसंवा
दे देवताप्रकरणविवेचनं नाम चतुर्थो रश्मिः॥४॥ उग्रबाहुरुवाच॥ यथा शीतांशुग्रहणे सूर्य
रश्मयः प्रसिद्धास्तथा हविर्भागग्रहणे शक्रतेजांसि प्रसिद्धानि न भवंति॥ त्वगंडुरुवाच॥ अग्निमुखा
वै देवा इति श्रुत्या देवानां तेजः स्वमुखभूताग्निं व्याप्य तिष्ठति॥ यदि कदाचिद्देवानां तेजसा हविर्ग्रहणं
न संभवति किं तु हस्तादिनैव तु चेत्तर्हि श्रृणु॥ यथा सौभरिर्ऋषिः स्नातुं सरोवरं गतवांस्तत्र सपरि
वारं मत्स्यं दृष्ट्वा गार्हस्थ्यमिच्छन्मांधातानामं राजानं गत्वा कन्यां याचितवान्॥ तपसा कृशीभूतमृषिं दृ
दृष्ट्वा चिंताग्रस्तः संस्तच्छापभीत्या तमेवमुवाच॥ भवद्भिरंतःपुरे गंतव्यं तत्र मम कन्याशतं वर्तते १५६

तन्मध्येयात्वांहरणोतितांतन्ध्यंहास्यामीति॥ सतद्वाक्यमंगीकृत्यांतर्गच्छंस्तपःप्रभावेणस्वदेहंनवंमन्म
याकारंधृत्वांतर्गतवान्॥ तंदृष्ट्वाकन्याशतमपिवव्रे॥ ततोराजानाः सर्वास्तस्मैदत्तवान्॥ ततः सौभरि
स्ताहशशतवपूंषिधृत्वाताभिः सहक्रीडयामास॥ तथादेवानामपिकायव्यूहधारणंसंभवति॥ औड
ग्रबाहोएतावत्पर्यंतंत्वद्वचनानुसारेणनिरूपितंयदीदृंतवसंमतंनभवतितर्हिप्रकारांतरेणवक्ष्या
मिश्रृण॥ देवानांविग्रहद्वैविध्यमंगीकर्तव्यंतत्रैकोमंत्रमयोऽपरोविग्रहः॥ मंत्रमय्यादेवतायाअ
पिकल्परूपवपुर्भवति॥ विग्रहवद्देवतायामंत्रसिद्ध्यामंत्रमयीदेवतास्वाधीनाभवति॥ यःपुरुषो
मंत्रपूर्वकमिंद्रायहविर्ददातितस्मादिंद्रायमंत्रदेवोहितद्धविः प्रेषयति॥ उग्रबाहुरुवाच॥ ॥समूर्त्ति
देवाद्भिन्नोयोमंत्रदेवोभवद्भिःकल्पितः॥ सएवमंत्रदेवः स्यात्॥ मंत्रदेवाद्भिन्नः समूर्त्तिदेवः किमर्थ
मंगीकर्तव्यः॥ वैशेंद्रउवाच॥ समूर्त्तिदेवतायामंत्रदेवतैवंप्रकारेणभिन्ना॥ यथादेवासुरयुद्धे वास
वोंद्रास्त्रमकरोषुप्रयुंजानदातरस्त्रमिंद्ररूपेणास्त्रैरांछिनत्ति॥ यदिविग्रहवदिंद्रोमंत्रदेवश्चैक
एवांगीक्रियतेतर्हिप्रयोगकालेइंद्रःस्वस्थानेस्थितःकुलिशास्त्रहननात्पपनिः॥ किंचेंद्रप्रयुक्तेंद्रास्त्रे
ऽसुरैरैरावतपत्यस्त्रप्रयोगः क्रियतेतदातेनास्त्रेणैंद्रास्त्रस्योपसंहारोभवतिनत्विंद्रस्य॥ तस्मान्नयो
र्भेदोंगीकर्तव्यइति एवंब्रह्मास्त्रादिमंत्रदेवतास्वपियोजनीयं॥ एवंधनंजयस्यपाशुपतास्त्रप्राप्त्य
नंतरंतदस्त्रदेवतासर्वत्रयुद्धेशूलपाणित्रिलोचनरूपेणधनंजयस्यपुरतःस्थितवानतस्तद्धायमक

गी०
१५८
157

रोत॥ ॥ अस्मिन्नर्थे भारतकथाप्रमाणं ॥ द्रोणपर्वणि श्रीव्यासं प्रति धनंजयस्य वचनं ॥ भो भगवन्सर्वे
त्र युद्धे त्रिलोचनः शूलपाणिर्देवता मम पुरतः स्थित्वा यं शत्रुं यदा प्रथमतः शूलेन सा ताडयति तदा मद्बा
णप्रयोगेन तस्य वधो भवति ॥ परं तु न देवतादर्शनं धनंजयस्यैव नान्यस्य शस्त्रादेः ॥ एवं वाल्मीकिरामा
यणे बालकांडे विश्वामित्रः सुबाह्वादिराक्षसवधार्थं श्रीरामं गृहीत्वा स्वाश्रमं गच्छन्मार्गे सर्वास्त्रग्रा
मं तस्मा उपदिष्टवान् ॥ तत्क्षणमेव प्रयोगोपसंहारात्मकानंतमंत्रदेवा मूर्तिमंतः श्रीरामस्य साक्षाद्बभू
वुरिति कथाप्रसिद्धा तत्तात्पर्यालोचनयापि विग्रहवद्देवतापेक्षया पृथङ्मंत्रमयदेवता स्वीकर्तव्या
॥ तस्मान्मंत्रदेवतायाश्चपि तेजोमयसूक्ष्मशरीरमस्तीति भाति ॥ एतद्रहस्यमेवं मंत्रदेवा भगवद्वि
भूतिरूपाः ॥ चत्वारो वेदा विभूतिमयाः ॥ चतुर्णां वेदानां ब्रह्मणो मुखचतुष्टयनिःसृतत्वेन तेषाम
धिदेवो ब्रह्मा ॥ प्रत्येकं वेदचतुष्टयस्याधिदेवचतुष्टयमस्ति ॥ ते चत्वारो देवा ब्रह्माधीनाः ॥ एवमेवैक
वेदे यावंतः शाखाभेदास्तावंतोऽधिदेवास्तत्तद्वेदाधिदेववशाः ॥ एवमेवैकशाखायां यावंतः कांडा
स्तावंतोऽधिदेवाभिन्नास्तत्तच्छाखाधिदेवाधीनाः ॥ एकैकस्मिन्कांडे यावंतोऽध्यायास्तावंतोऽधि
देवाभिन्नाः कांडाधिदेववशाः ॥ एकैकस्मिन्नध्याये यावंतः सूक्तानुवाकखंडब्राह्मणसंज्ञिकास्तावं
तोऽधिदेवाभिन्नास्तत्तदध्यायाधिदेवाधीनाः ॥ सूक्तादिषु यावंतो मंत्रास्तावंतः प्रत्येकं तत्तदधिदेवा
भिन्नाः सूक्ताद्यधिदेवाधीनाः ॥ प्रत्येकं मंत्रे यावंति पदानि तावंतोऽधिदेवाभिन्ना मंत्राधिदेवाधीनाः १५८

प्रत्येकं पदे यावंतो वर्णाः स्वरास्तावंतः प्रत्येकमधिदेवाभिन्नाः पदाधिदेवाधीनाः॥ स्वरास्तु वर्णाधर्वय
ह्वरा तत्समस्तु ष्याद्योयस्तत्वासनयाययाविधिगुरूपदेशानुसारेण यं यं मंत्रादिकमनुष्ठायतत्तद्धिदे
वमुपासते तेन तदंतर्द्धिदेवः प्रसन्नो भूत्वा तत्तदुपासकस्य कामनापूरणं करोति॥ मंत्राद्यधिदेवशरीरं तेन
तोमयं जपानुष्ठानादिना तत्तज्ज्ञावबंधं वर्धते तत्तद्भावे स्वमहिम्नि राजते॥ उग्रबाहुरुवाच॥ मंत्रा
धिदेवविग्रहदेवयोर्भेदः स्वीकारेप्यनेकास्थलेषु एकस्मिन्काले इंद्राय स्वाहेत्येकं मंत्रमुच्चार्य हविर्द
तितत्सर्वहविरेको मंत्रदेव इंद्रं वा यं प्रापयति॥ वागीश उवाच॥ ब्रह्मास्त्ररूपमंत्रएव कस्तदधिदेवोप्य
वास्तयापि तत्तदुपासकाभेदेन तस्य भेदोऽवश्यमंगीकर्तव्यः॥ अत एव युद्धेऽश्वत्थाम्ना प्रयुक्तं ब्रह्मा
स्त्रमर्जुनो ब्रह्मास्त्रेणोपसंहृतवान्॥ तस्मात्तदनुष्ठानभेदेन मंत्रदेवोऽनेकरूपो भवति॥ तस्माद्धे उग्र
बाहो एकं परमात्मानं विना न कोप्यकार्यो भवति॥ इत्यद्वैतादित्य उत्तरायणकादशार्के वागीशोग्रबा
हुसंवादे देवताप्रकरणविवेचनं नाम पंचमो रश्मिः॥५॥ ॥॥ उग्रबाहुरुवाच॥ यदेंद्रो ब्रह्महत्या
निवृत्त्यर्थमश्वमेधं कृतवान् तदा इंद्राय स्वाहेति इंद्रदत्तहविर्भागस्य को वा भोक्ता॥ यदि वा तदा चिदिंद्रा
सने स्थित एव तदिंद्रात्मत्वमित्युच्यते न तर्हि तस्य जडत्वादिंद्रात्मत्वेन संभवति॥ स एवेंद्रः स्वयमेव गृह्णाती
ति चेत्तस्य स्वदत्तहविर्भोक्तृत्वासंभवः किं चेंद्रस्येंद्रासनभ्रंशेनेंद्राहुतिभोक्तृत्वासंभवश्च॥ वागीं
श उवाच॥ ॥ हे उग्रबाहो वेदेऽनेकास्थलेषु इंद्रशब्दः परमात्मवाचकः इंद्रो मायाभिः पुरुरूप ई

ग० यत इत्यादिश्रुतेः ॥ किंच अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वर
१५८ मिति च स्मृतेः सर्वेषां यज्ञभागान्नित्यशः स एव देवदेवो भुंक्ते ॥ इंद्रादयो देवास्तस्य मुखदंष्ट्रादिस्थानी
158 या भोक्ता स एव परमात्मा ॥ तस्य प्रदीप्तवक्त्रो हि भानुः ॥ ऊर्ध्वाधोदंष्ट्रे यमरुद्रौ ॥ पुरोदंता एव प्रजाप
रू.४ तयः ॥ उत्तराधरपल्लवौ पुरूरवैर्वमाइवसौ ॥ जिह्वैवाग्नि जिह्वाग्रमेव यज्ञपत्न्यः ॥ तालु वार्यमा ॥ कंठ
एव ब्रह्मा ॥ उपजिह्वैवेंद्रः ॥ गिलनं हि वायुः ॥ वागेव वाचस्पतिः ॥ निष्ठीवनमेव वरुणः ॥ हास्यमेव
चंद्रमाः ॥ जिह्वातलमेव पृथिवी ॥ आस्यं हि अश्विनीकुमारौ ॥ विष्णुरेव भोक्तेति ॥ अहं हि सर्वयज्ञा
नां भोक्ता च प्रभुरेव चेति प्रमाणेन ॥ स एव भोक्ता प्रभुरपि स एवेति सिद्धं ॥ भोक्तृत्वविकारनिवृत्त्यर्थ
मिंद्रादीन्निर्माय व्याजेन भोक्तृत्वं तत्र संस्थाप्य स्वयमक्रियः संक्रीडति ॥ सर्वयज्ञफलभोक्तापि स
न्भोक्तृत्वादतीतः ॥ तृप्तिस्तु तेनन्तृप्ति त्वप्राप्ता ॥ परं तु सद्भावनायाः स्वधा तस्य वर्ण्यते ॥ पत्रं पुष्पं
फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मन इति प्रमाणं ये ये कामार्त्ताः
पुरुषाः ॥ अज्ञानान्नदितरान्देवानुपासते तेषामुपासनापि तत्परायणा भवति स्वस्योपासनाफल
मपि तत्स्वकाशाल्लभंते ॥ परंतु कोपि तमादिपुरुषं नैव जानाति ॥ यं देवं जना उपासते स देवोप्यज्ञाना
ज्ञानमुपासनं स्वकीयोपासनामेव कल्पते ॥ यदि तदुपासनाफलं स देवदेवो ददाति ॥ तदा स देवोम
त एवेदं फलमुपासकः प्राप्त इति कल्पते ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य त

स्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव वि
हितान्हितान् ॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकमिति प्रमा
णं ॥ ॥ उग्रबाहुरुवाच ॥ भो गुरो यथेंद्रादीनां हविर्भागोस्ति तथा विष्णोरपि यदि विष्णोर्न स्यात्तर्हि भवदुक्तं
सर्वमुपपन्नं स्यात् ॥ वेगेंद्र उवाच ॥ हे उग्रबाहो न तस्य परमपुरुषस्य स्वरूपं त्वया न ज्ञातं ॥ यथा उच्चैःश्र
वसमश्वानां ॥ ऐरावतं गजेंद्राणां मृगाणां च मृगेंद्रोहं ॥ झषाणां मकरश्चास्मीत्यादिप्रमाणेनोच्चैः
श्रवश्वादीनां भगवद्विभूतिस्वरूपत्वं तथाऽदित्यानामहं विष्णुर्वृष्णीनां वासुदेवोस्मीति प्रमाणे
न विष्णुवासुदेवादीनामपि विभूतिस्वरूपत्वं ॥ यः परमपुरुषोऽनंतब्रह्मांडपोषकः स गोपवधूनां
निकटे स्वल्पतक्रं प्रार्थनापूर्वकं याचित्वाऽपिबत् ॥ एवं देवतासमूहेह हविर्भागं स्वयं प्रसार्य गृह्णा
ति ॥ तस्यैतादृशाद्भुतचरित्रे ब्रह्मादयोऽपि विमोहिताः ॥ तस्यानिर्वचनीयलीलां स एव जानाति ॥
किंच केऽपि परमभागवता येषां चित्तरूपभ्रमरास्तस्य चरणांबुजमकरंदे सर्वदा विमग्नास्तेपि
ज्ञानाभिमानाद्दूरीभवंति ॥ उग्रबाहुरुवाच ॥ ॥ यस्येंद्रादयो मुखं दृष्ट्वा द्विरूपास्तदेंद्रकृतान्य
मेध इंद्ररूपस्तत्वो भावेन तदीयहविर्भागं स कथं गृहीतवान् ॥ ॥ वेगेंद्र उवाच ॥ ॥ हे उग्रबाहो
भवदीयादृष्टिर्व्याजेन विमोहिताऽस्यापि व्याजान्न मुक्ता ॥ सोऽनादिपुरुषोत्तमोऽनंताद्भुतशक्ति
नायकः ॥ तच्छक्त्याविष्ट इंद्रोप्यधिकोऽस्तीयमिंद्रमयमिंद्रः स्वयं मन्यते ॥ एवं वरुणादयोप्यधिको

ए० १५९ 159

वरणोऽस्तियंवरणमयंवरणः स्ववरणंमन्यते॥ एवंसूर्ययमादयोऽपि॥ एवमनेकेषांब्रह्मणामिंद्रपद
म्रंशेपिनस्यपरमात्मनोऽपारलीलायांकिमंतरंभवति॥ कर्मवशःप्राणीस्वकृताद्युत्तमंपदंप्राप्नवान्
पुनर्दूषितकर्मणस्तत्पदाच्च्युतः पुनश्चसत्कर्मवशात्तदेवोत्तमंस्थानंप्राप्नोति॥ सपुरुषः कर्मा
कर्मभ्यामतीतोयथासीत्तथैवास्ति॥ हेउग्रबाहोहस्ताधिदेवइंद्रश्चरणाधिदेवःसूर्योरसनाधिदे
वोवरुणइतिप्रसिद्धं॥ एतेइंद्रादयःकश्यपस्तत्वःकश्यपोमरीचिपुत्रः॥ मरीचिकश्यपादीनामुत्प
त्तिसमयेहस्ताद्यधिदेवेंद्रादीनामभावेनहस्तचरणरसनाद्यवयवानस्युः॥ वर्तंतेचतयोः॥ सर्वेऽधि
कारिणोदेवाविराट्पुरुषस्यावयवाः॥ इंद्राणामंतरालसमयेहस्ताधिदेवाभावेनतदाविराट्पु
रुषस्यहस्तहीनतास्यात्सातुनसंभवति॥ तस्मादेतत्तात्पर्यमेवं॥ परमपुरुषः सर्वविभूतिभिर्दृदी
प्यमानोऽस्ति॥ मरीच्यादयऋषयइंद्रादयोदेवाश्चतत्तद्विभूतिमवलंब्यावतीर्णाः॥ इंद्रोनश्यति
परंतुयांविभूतिमवलंब्यसइंद्रोजातः सानन्नश्यति॥ अतस्तामेवविभूतिमवलंब्यान्यइंद्रउत्प
द्यते॥ एवमेवदेवर्षिमनुष्यादीनांद्रष्टव्यं॥ अतएवपार्वतीविवाहसमयेश्रीगणपतेर्गिरिजापुत्र
त्वेनैतत्पूजासंभवात्तस्यगणपतेःपूजाकृतेतिशंकापिनिरस्ता॥ उत्पत्रीत्यागणपतिर्यांविभूतिम
वलंब्यावतीर्णस्तस्याविभूतेरेवपूजासंभवति॥ पक्षिराजउवाच॥ उग्रबाहोरेतत्सर्वंश्रुत्वाविगत
संशयोभूत्वावेगेंद्रचरणयोःपपात॥॥॥ आत्मारामउवाच॥ यदापक्षिराजेनेदंसर्वंनिरूपितंतत

दासत्यसंधस्य समाधानं ज्ञात्वा ततः पक्षिराजात्तां गृहीत्वा स्वगुरुं प्रति ययौ ॥ ॥ ॥ इत्यैहेनादित्य उत्तरा
यणे एकादशार्के पक्षिराजसत्यसंधसंवादांतर्गत त्वेगेंद्रोपवादुसंवादे देवताप्रकरणविवेचनं नाम
षष्ठोरश्मिः ॥६॥ आत्मारामउवाच ॥ सत्यसंधः पक्षिराजेनोक्तं सर्वं सहजानंदं श्रावयामास स सर्वं श्रु
त्वा पक्षिराजप्रज्ञां प्रशशंस ततः सत्यसंधेनोक्तं भो गुरो एतस्मिन्कलियुगे मनुष्येषु कोपि राजविद्यानि
पुणो ज्ञातो न वा ॥ ॥ सहजानंद उवाच ॥ अस्मिन्युगे तु त्रियाएणां मध्ये कोपि राजयोगिनो न संति यदि स्युस्त
र्हि तेषां रा मुं श्रोतुं न स्यात् परं त्वत्रास्मिन्कुले वो चन गृहस्थो राजयोगमिश्रितसां निष्ठावंतो ज्ञा
ताः तन्मध्ये राजयोगमिश्रितसांख्यनिष्ठावत गालेश्वरोपाध्यायनामक गृहस्थस्यापरस्य संन्यासमिश्रि
तगार्हस्थ्यधर्मवतो वाचस्पतिमिश्रस्य च समाचारं वक्ष्यामि श्रृणु अथ गालेश्वरोपाध्यायसमाचारः
श्रीशैलोत्तरद्वारे हलतीरे गालेश्वरनामको ग्रामोऽस्ति तन्नामकेश्वरस्याल यः पुण्यतमोऽप्यस्ति
तत्र शंकरोपाध्यायाख्यो द्विजवरस्तद्देवालये स्थित्वा चिरकालमीश्वरमाराधितवान् तस्य तपसः
पारो नासीत् स कदाचित्तस्मिन्देवालये तस्य ज्ञाननिष्ठत्वं यथास्वरूपसाक्षात्कारार्थं च सर्वेषां रात्रावी
श्वरं ध्यायन्प्रार्थयामास रात्रौ व्यतीतायामशरीरवाणी तस्य प्रादुर्बभूव भो शंकर त्वया विवाहः
कार्यस्तव स्वतः प्रकाशवान्मदंशभूतः पुत्रो भविष्यति तत्संकाशात्त्वया ज्ञाननिष्ठतिः स्वरूपप्राप्तिश्च
भविष्यत्यपरेपि तत्प्रसादेन कृतार्था भविष्यंति ततः शंकरोपाध्यायोपि तथा कृतवान् ततः काले

पु० २६० 160

ततत्पत्नीगर्भवतीजाता ॥ चंद्रवासरे प्रदोषदिवसे वा तया गर्भवत्या देव्या किंचिदपि भुक्तं चेत्तद्गर्भस्था

बालको ऽतिव्याकुलो भवत् ॥ यदि सा देवी न भुङ्क्ते तदा बालकः संतुष्टः सन्नतिष्ठत् ॥ तद्ग्रामवा

सिनः सर्वे जनास्तच्चरित्रं दृष्ट्वाश्चर्यमयाश्चासन् ॥ ततो दशमे मासि शुभलग्ने तेजस्वी बालकस्तद्देवा

लयाभिमुखो जातः ॥ हे सत्यसंध तन्महात्म्यं वर्णितुं न शक्नोमि साक्षादीश्वरभूतात्माभूत् ॥ तस्यावस्था

प्यतिमूढा बभूव ॥ ततः स विरक्तः सन्नपि गार्हस्थ्यमंगीकृत्य विवाहं कृत्वा विध्युक्तसारेण सत्कर्म

कुर्वन्सद्वैरवर्त्तमानः सन्स्वरूपानुसंधानात्कदापि विमुखो न बभूव ॥ स्वयं जीवन्मुक्तः स

न्निरन्तरमायाबद्धांश्च ब्रह्मज्ञावतः पुरुषान्संसारान्मोचयामास ॥ शंकरोपाध्यायोऽपि पुत्रद्वारा स्वरू

पस्थितिं प्राप्य मुक्तो जातः ॥ तदनंतरं तस्यानंतमे धात्री पुत्रो जातः ॥ तत्कीर्तिं विद्वांसस्तद्बालकस्य

बुद्धिचमत्कारमवलोक्य तं गणेशावतारं मेनिरे ॥ स बालको द्वादशवर्षाभ्यंतरे सर्ववेदशास्त्रम

धीतवान् परंतु तस्य विद्यागर्वो जातः ॥ ततः गलेशोपाध्यायस्तं गर्वितं दृष्ट्वोवाच ॥ भो पुत्र त्वं विद्या

गर्वं त्यज विद्यागर्वेणानेके नाशं प्राप्ताः ॥ हे तात यावत्त्वं शास्त्रमात्रमभ्यसि तावत्तव शास्त्रप्रतिपाद्य

तत्वसाक्षात्कारो न जायते ॥ यतस्तत्त्वया न वशास्त्रावलोकनसामर्थ्यमस्ति तद्धेमुख्यं तदनोचितं ॥ ॥

बालक उवाच ॥ तं त्वौपनिषदं पुरुषमिति श्रुतिवाक्यात्तद्व्यतिरेकब्रह्म जानाति ॥ ॥ गलेशोपाध्या

य उवाच ॥ हे पुत्र तद्वाक्यतत्त्वं त्वया न ज्ञातं ॥ योऽयमौपनिषदः पुरुषः स एव निजस्वरूपः ॥ इदमेव

भ्रांत्या निजस्वरूपाद्विस्मृतिमयो भूत्वा स्वात्मन्यन्यमारोपयसि॥ ततस्त्वमेव विद्यात्मकमहाबालकास्तु च
नास्वकाशान्निजविस्मृत्याहंतां स्वस्वरूपं स्वपमेव स्वस्मिन्ज्ञानासि॥ नतिदं वा कंपचोपरि स्वार्थं [illegible] स्वार्थतत्वं थे२
जानासि॥ यावत्त्वं भ्रांतोसि तावन्नस्वस्वरूपानाविर्भावात्पंचोपरि वर्णमेव पश्यसि॥ वर्णज्ञेतेन नार्थं पश्यसि॥ अ
र्थज्ञानेन स्वार्थतत्वं पश्यसि॥ स्वार्थतत्वे विलीने सति वेदांतहृदेह विदेव चाहमिति स्वस्मिन्नेव संतिष्ठसि
ततस्तच्छिरशार्मूर्द्धाहंतावुद्धिसंस्कृत्या विचारं गृहीतुं नैव शक्ता॥ एतस्मिन्नंतरे ऽ सितते जस्वी विद्यार्थ
एष स्वामीदेवचतुष्टयस्य भाष्यं ज्ञात्वा तज्ञाप्यस्य शुद्धाशुद्धविचारे संदिग्धः सन्नेतन्निर्णयार्थं वा गंतव्य
मिति चिंतयास्थितः॥ तद्देशस्यां राजोनस्य स्तो ज्ञातः॥ स्वपितेल स्वरोपाध्यायं गच्छस भाष्य शोधनोपा
यं दर्शयिष्यतीति॥ ततो भाष्यं गृहीत्वा गले शोपाध्यायगृहं प्रत्यागतः॥ तत्र समये उपाध्यायः स्नानार्थं
नदीं गतस्तद्बालकः स्वर्णडोलायां क्रीडन्स्थितः॥ आगतं स्वामिनं दृष्ट्वा प्रत्युत्थानादिकमकृत्वा पृष्ट
वान्॥ भो दंडिन्किमर्थमागतोसीति॥ स्वामिनोक्तं निगमव्याख्यानशोधनार्थमुपाध्यायस्य सत्सहवा
सार्थमहमागतोस्मि॥ बालकेनोक्तमुपाध्यायो नदीं नीरं गतः किंत्वया वेदभाष्यं कृतं स्वामिनोक्तं भ
गवत्प्रेरणानुसारेण भक्तिपूर्वकं यथामति यत्किंचित्कृतं॥ बालकेनोक्तं नमकाध्यायपोलहृदयं
धद्रुत्यच्चकाथं त्वया व्याख्यातं॥ स्वामिनोक्तं चतुर्थ्यंतनात्पर्येण॥ बालकेन हसित्वोक्तं तव पदज्ञान
मेव नास्ति वाक्यं व्याख्यानं कृतं॥ ततः स्वामिनः क्रोधो जातस्तत्क्रूरदृष्ट्या सपालको डोलया साकं भस्मी

बभूव॥हेसत्यसंधसबालकःस्वामिनोविद्यायामेवदृष्टिंकृतवान्नतुतस्यतपोबलादौ॥सत्पुरुषाश्चत्वयुग
प्रतापात्तिष्ठंतितत्सहवासात्सिंहसंगोचरः सिंहःकुक्कुरैर्दैहिकाहानिंकरोतिसत्पुरुषक्रोधेत्विहपर
लोकहानिर्भविष्यति॥योनम्रोभूत्वाभक्तिभावेनसत्पुरुषाणांसहवासंकरोतिसकुशलंप्राप्नोति॥
॥इत्यैहैतादित्योत्तरायणेएकादशार्केसहजानंदसत्यसंधसंवादेगोलेशोपाध्यायसमाचारव
र्णनंनामसप्तमोरश्मिः॥७॥ ॥सहजानंदउवाच॥तद्बालकनाशानंतरंस्वामिनोहृदयेग्लानिर्जा
ता॥किमयमनर्थोजातइतिपश्चात्तापेनमंदंमंदंस्वामीनदीतीरमगमत्॥उपाध्यायोपिस्नात्वाऽग
मनसमयेमार्गेस्वामिनंदृष्ट्वासाष्टांगवंदनंकृतवान्॥सपुत्रनाशंस्वामिनःकथनात्पूर्वमेवज्ञान
न्स्वामिनमुवाच॥स्वामिन्पश्चात्तापःकिमितिक्रियतेयंदृश्यंमन्यसेसशाश्वतोऽजरामरः॥यथा
मरुदेशस्थरविमरीचिकायांमृगजलस्यभानंजायते॥तद्वदस्मिन्बालकेसंगदोषेणगर्वोजातः
स्तद्गर्वस्यसंबंधस्तद्बालकस्यदेहेंद्रियादिसंघातेऽभूत्॥तस्मात्तद्देहादिसंघातेनसहसगर्वोभव
द्दीयब्रह्मतेजसाभस्मसाद्भवत्॥यथामृगजलनाशाद्रवेस्तन्मरीचिकायावाहानिर्नभवति॥त
थातस्यदेहादिसंघातनाशेनममतस्यचहानिर्नास्तितस्मात्त्वयावैमनस्यंनकर्तव्यं॥स्वामिन्ज्ञानी
प्रथमतःसर्वसंसारंगर्वेणसहज्ञानाग्निनादग्ध्वानिजानंदेमग्नस्तिष्ठति॥वार्त्तत्वाभिमानएवसर्व
नाशमूलंयस्तस्मादतीतोभवतिसोलक्ष्योभूत्वाऽविनाशिपदेलीयते॥ब्रह्महत्याशापोवाल

त्वं धावति ॥ अलक्ष्यान्निराशो भूत्वा स्वलक्ष्यमेव नाशयति ॥ यथा राजांऽबरीषोऽबरीषत्वाभिमानरूपल
क्ष्यान्मुक्तः सन्नैव लवेऽलक्ष्यपदे विलीनो जातो दुर्वासः प्रयुक्तशापस्तस्मान्निराशो भूत्वा निर्मान्दुर्वास
संपत्यगमत् सोपि दुर्वासस्त्वाभिमानरूपलक्ष्यं परित्यज्यालक्ष्यविस्मृभूतांबरीषपदालीनो जातः
तदा स शापस्तस्माद् पि[illegible] निराशो भूत्वा स्वयमेव नष्टस्तद्वत् ॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुष
ज्जते ॥ त्यागी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वा
पि स इमांल्लोकान्न हंति न निबध्यते इति प्रमाणेन कर्तृत्वाभिमानाद्विवर्जितेन भाव्यं ॥ स्वामिन्पुराम
मैवाः सहाध्यायी भूत ॥ अवस्मादृवेच्छया तत्प्रयत्नं विना तेन कोप्येको ब्राह्मणो हतः ॥ ब्रह्महत्यातस्तुरा
रामत ॥ तदा स ब्राह्मण इत्थं चिंतयामास ॥ नाहं ज्ञानवान्मया को पि हतः ॥ अविद्ययैवाविद्याहंतान
तोहं वा स्वपश्चात्तापं करोमि ॥ न स्वब्राह्मणस्य हननात्पातकमनसि येच्छाकृत्वाभूत्स्वेच्छैव ननु ब्रह्मण
शरीरांत कारिण्यभवत् ॥ न स ब्राह्मणो मया हतो न मयि हंतृत्वविकारोस्ति ॥ आत्मैवाजरोमरः ह
तत्वेन हंतृत्वेन च मुक्तः ॥ इयमिच्छेदं शरीरं चाविद्याकार्यं यावद्विद्या निरस्तं तावत्कुरु भं ॥ ततस्त्वे
वं स्मृति मम वास्य भयं ॥ स ब्राह्मण इत्थं विचारसंपन्न इति कृत्वा ब्रह्महत्यातदुपरि गंतुं न समर्था ॥ तदनं
तरमेवास्यां रात्रौ स ब्राह्मणो निजस्त्रीसंगमेऽन्याभार्यामुखं निजवंन्यामुखमिवापश्यत् ॥ तदा तस्यां
तःकरणे ग्लानिरुत्पन्नाभवत् ॥ तस्माद्ग्लानिसकाशात्सा ब्रह्महत्या तस्योपर्यारूढा न स्वप्राणान्पर्यहर

त॥ हे स्वामिन्नात्मब्रह्मणोर्यावदात्मविद्यायां विलीनो भूत्तावत्तावद्ब्रह्महत्या तं ब्राह्मणं हंतुं नैवाशक्नोत्॥ इ
षद्विद्याहते सति विनष्टः॥ पूर्वोक्तप्रकारेण विद्याकार्यच्छायां क्रियां कस्मान्नस्थापयामास॥ तस्माद्धे
स्वामिन्नुत्तममप्यात्मविद्याव्यवधानं कोटिपातकानां मूलम्॥ यस्यैव निष्ठा दृढा प्रवृत्ता हि नित्यशो वर्त्ते
ते स एव ब्रह्मभूतात्मा शिवपदे सदा तिष्ठति॥ **विद्यारण्य उवाच॥** हे द्विजवर तव निष्ठा प्रवृत्ता च चतुर्था
श्रमयोग्यास्ति॥ **शालेश उपाध्याय उवाच॥** स्वामिन्नापि मां प्रत्युत्थानं न दत्वा पमानं वा रोति चेन्मयि क्रो
धत्वालात्तुत्थापनार्थं ममेदं गार्हस्थ्यमेव संमतं॥ अथ च पुत्रशोको भार्यादिशोकश्च संन्यासिनां ब्रुतस्त
थैव तेषां विवाहोत्साहः पुत्रोत्पत्त्युत्साहाद्यपि नास्ति॥ शोकोत्साहयोः समचित्तार्थं प्राज्ञप्राज्ञोः सम
भावार्थं ममेदं गार्हस्थ्यमेव संमतं॥ शोकहर्षयोर्लाभालाभयोश्च चित्तं समं तिष्ठति वा न वैतत्परीक्षा
र्थं मम गृहस्थत्वं न तु संसारसुखार्थं वंशवृध्यर्थं चेति॥ **सहजानंद उवाच॥** हे सत्यसंधैवं प्रकारेण
शालेशोपाध्यायो गृहस्थाश्रमे योगनिष्ठावान् भूत्॥ इदानीं गार्हस्थ्ये सन्यासनिष्ठावतो वाचस्पतेर्दे
नां तव वक्ष्यामि शृणु॥ ॥ ॥ **इत्यद्वैतादित्य उत्तरायणे एकादशार्के सहजानंदसत्यसंधसंवादे**
शालेशोपाध्यायोपाख्याने गार्हस्थ्ययोगनिष्ठावर्णनं नामाष्टमो रश्मिः॥ ८॥ ॥ सहजानंद
उवाच॥ वाचस्पतिमिश्रो बृहस्पतिसम आसीत्॥ मैथिलदेशे स प्रादुरभूत्॥ श्रीमद्भगवच्छंकरवा
रमताचानुयायी॥ तस्यातिगूढावस्था॥ बाल्यप्रभृति तस्य चित्तं भगवदासक्तं॥ गार्हस्थ्ययद्यपि न

स्येच्छा नासीत्तथापि पित्रादिभिर्बलात्कारेण बाल्ये तस्य विवाहः कृतः॥ ततस्तच्चित्तं चंचरीको गुरुपदपंक
जे लिप्तोऽभूत्॥ तस्य स्वदेहस्य संसारव्यवहारस्य च भानं नासीत्॥ स कदाचिद्गुरुसमीपे स्थितस्तदा को
प्यकिंचनस्तत्रागत्य गुरुं महं वस्त्रहीनोस्मि भगवन्त्रीत्यर्थं मह्यं वस्त्रं देहीति याचितवान्॥ ततो वाचस्प
तिं प्रति गुरुणोक्तं कोष्ठागारस्य वस्त्रमानीयैतस्मै दीयतामिति॥ वाचस्पतिनोक्तं कोष्ठागारः क्वास्तीति
मया न ज्ञायत इति पुनर्गुरुणोक्तं मेलावत्पर्यंतं मन्निकटे स्थित्वापि तत्वज्ञानं नासीदिति तन्महदाश्चर्यमि
ति॥ वाचस्पतिरुवाच॥ भो सद्गुरो युष्मत्पदपंकजस्मरणेन मम सर्वसंसारस्य विस्मृतिर्जाता॥ एकमा
त्मानं विना पदार्थांतरस्य प्रयोजनं नास्ति॥ सहजानंद उवाच॥ ततो गुरुः प्रसन्नो भूत्वा तमालिंगितवान्
हे सत्यसंध यथा वाचस्पतेः संसारस्य प्रयोजनाभावेन प्रत्यहं सिद्धकोष्ठागारभानं नाभूत्॥ तथा सं
सारिणां ब्रह्मणः प्रयोजनाभावेन प्रत्यहेऽपि ब्रह्मणि तज्ज्ञानं न भवति॥ यस्यानन्यभावेन सर्वदा
ब्रह्मैवाभिलषितं भवति तत्तस्यैव प्रत्यक्षं॥ तस्य प्रपंचव्यवहारस्य सर्वदाऽभावः॥ भो सत्यसंध एवं
वाचस्पतिः षष्टिसंवत्सरपर्यंतं वैराग्यसंपन्नः सन्सर्वदा स्वरूपे निमग्न आसीत्॥ यद्यपि तस्य दृ
ष्टिः क्षणमपि स्वरूपानुसंधानान्न च्युता तथापि विद्यासारेण नित्यनैमित्तिककर्मणो विस्मृतिर्नाभ
वत्॥ अन्नपानवस्त्राभूषणादिषु कदाप्यभिलाषो न जातः॥ तस्य समाधौ वेदांतविचारे वा कालक्षेपोऽभू
त्तद्दिनेतरव्यासंगो नासीत्॥ षष्टिवर्षपर्यंतं भार्यामुखं नावलोकितवान्॥ स्वविवाहो जातो न वेत्य

ए०
१६३
163

तत्संधानमपि नासीत् एकस्यां रात्रौ पुस्तकावलोकनसमये कंका निलेन दीपो निर्वापितः ॥ पुनस्तद्भार्यया दी
पः प्रज्वलितः स तदानीं तन्मुखं दृष्ट्वा त्वं कासीति पृष्टवान् ॥ तद्भार्ययाऽश्रुपूर्णनेत्रया षष्टिवर्षानंतरं
मन्मुखं दृष्ट्वा भाषणं कृतमहं तव भवद्धर्मपत्न्यस्मीत्युक्तं ॥ तदा तस्य तनूपरि किंचिद्दया जाता ततस्तां त
व किमपेक्षितमिति स पृष्टवान् तस्य पत्नी भामतीनामिका करौ मुकुलीकृत्य पतिं प्रत्येवं ययाचे ॥ वाच
स्पतिरुवाच ॥ हे भामति यस्मिन्काले स्वप्रार्थना विफला न भवतीति निश्चये सति तत्तदुपदार्थयाचने
न तत्कालं वृथा किं गमयसि ॥ पुराऽस्मद्गुरुस्थितिसमये सुपात्रब्राह्मणौ द्वावास्तां ॥ तीर्थयात्राटनं
कुर्वंतौ कदाचिन्मल्लिकार्जुननगिरौ मार्गं विस्मृत्य घोरारण्ये भ्रमंतौ मार्गदर्शिनं कमप्यप्राप्याऽसायं
भ्रमणेन खिन्नौ प्रदोषसमये क्वापि पर्वतशिखरे स्थितौ ॥ ततः किंचिद्दूरं वने कंचन प्रकाशं दृष्ट्वा तं
दभिमुखं गतौ ॥ तत्र देवालये हीनमेकं विविधपुष्पैः पूजितं शिवलिंगं कंचित्तेजस्विनं सर्वांगभस्म
लेपं दिगंबरं स्वांगतेजसा तदरण्यं प्रकाशयंतं शिवोपरि पुष्पांजलिं दत्वा संपुटीकृतहस्तं निमीलि
तनेत्रं पुरश्चरणं दृष्टवंतौ ॥ तयोर्मध्यादेकेन मेधाविनाऽपरं प्रत्येवमुक्तं ॥ अयं कोपि सिद्धः पुरुषः ईश्व
रानुग्रहादस्मद्दृष्टिगोचरो जातोऽस्य पूजासिद्धाऽनया भगवान्संतुष्टोऽतोऽस्मीष्टवरं प्रार्थयते ॥ इ
दानीं येन यत्प्रार्थ्यते तस्य तत्सिध्यतिसमेवं भातीति ॥ ततोऽपरस्तच्छ्रुत्वा भगवंतं वरत्रयमयाचत
हे भगवन्नावाभ्यां मार्गो विस्मृतः शीघ्रमावयोः स्वग्रामप्राप्तिर्भवतु ॥ २ ॥ यावन्ममाऽयुस्तावत्स

त्यहमेकस्वर्णमुद्राप्राप्तिर्भवतु ॥ २ ॥ संसारे मम महती प्रतिष्ठा भवत्विति ॥ ३ ॥ द्वितीयेन स्वपात्रे-
णापि वरत्रयं याचितं ॥ भो भगवंस्त्वदीया माया मां मा मोहयतु सांसारिकाः सर्वे विषया मद्दृष्टौ तुच्छा
एवभासंतां ॥ १ ॥ सर्वदा मम चित्तं त्वच्चरणांबुजे व चित्तं तिष्ठतु क्षणमपि तस्मादुदासीनं मा भूत् ॥ २ ॥
मम देहपातानंतरं त्वत्परमभक्तायच त्वत्परमपदे रमं तेनत्रैव मम निवासोऽस्त्विति ॥ ३ ॥ एतस्मिन्नंत-
रे समिद्धः पुरुषः सावधानो भूत्वा तं मुद्रिकायाचकं द्विजमुवाच ॥ ॥ हे मंदबुद्धे भाग्यहीनायं का-
लः स्वप्रार्थितसिद्धिदइति ज्ञानन्नपि त्वं किं याचितवानसि ॥ क्षणमेकं गुरे पदार्थं तव अग्रस्थालिप्साज्ञा-
ता ॥ एतत्स्वपात्रेण समं त्वया किं न याचितं ॥ इत्युक्त्वा द्वितीयं ब्राह्मणमालिंग्योवाच ॥ साधु साधु हे
द्विजवर त्वया सर्वमेव याचितमिति ॥ स त्वं तावन्नेत्रनिमीलनं क्रियतामिति तं वाज्ञापयामास ॥ तदनं-
तरं तौ नेत्रनिमीलनं कृत्वा क्षणानंतरं नेत्रोन्मीलनं कृत्वा स्वग्रामं प्राप्तावपश्यतां ॥ ततो विस्मितौ स्व-
स्वगृहं प्राप्य स्वस्वकुटुंबेन मिलित्वा सुखेन शयनमकुरुतां ॥ मुद्रिकायाचकस्य स्वप्ने स्वर्णमुद्रा-
लाभो जातो जागृत्कालेऽपि सा मुद्रा तथैव तत्करे स्थिता ॥ एवं तस्य प्रत्यहं मुद्राप्राप्तिस्तन्निमित्ता
महती प्रतिष्ठा चाभवत् ॥ द्वितीयब्राह्मणस्य तस्यामेव रात्रौ प्रकाशो जातः सर्वे सांसारिकविषया
स्तद्दृष्टौ तुच्छा अवभासिरे ॥ द्वितीयदिवसे सर्वसंगं परित्यज्य प्रसन्नवदनः स्वानंदमग्नो बभूव
ततः कालांतरे तावुभौ मम गुरुदेवसमीपमागतौ तदा तं मुद्रिकायाचकं मम गुरुर्दृष्ट्वा संबोध्या

धिङ्मामितिगर्हयामास॥ तंस्तुपार्श्वेप्रसन्नः सन्नालिंग्यसाधुसाध्वितिप्रशशंस॥ भोभामत्यहमपितो
दृष्टवानस्मिमुद्रिकायाचकस्यप्रत्यहमप्रयत्नेनमुद्रिकाप्राप्तिंदृष्ट्वाऽयंपरमसिद्धइतिज्ञनामहंतो
प्रतिष्ठांचक्रुः तत्तस्तुपात्रदर्शनमपिममज्ञानंतस्यप्रतिरोमहृत्पात्रहस्तेनज्ञाभासमर्पनेमधूनच्चरणार
ज्ञस्यनेकपरमसिद्धानांलुठनेच्छाऽसीत्॥ तस्माद्धेभामतियस्मिन्कालेस्वाभिलाषानुसारेणया
चनासिद्धिर्भवेदितिनिश्चयेसतितंकालंतुच्छपदार्थयाचनयाकस्माद्व्यागमयसि॥ यत्स्वर्वा
न्हाष्टैववस्तुतदेवकिंनयाचसे॥॥॥ इत्यद्वैतादित्यउत्तरायणएकादशार्कसहजानंदसत्यसंधसंवा
देवांस्पतिमिश्रकथावर्णनंनामनवमोरश्मिः॥९॥ सहजानंदउवाच॥ हेसत्यसंधैतच्छ्रुत्वा
सादेवीभर्तारमुवाचभोस्वामिन्नुपदे एतत्कालदृष्टिद्वारास्वनामप्रणश्वतंभवतिपिन्नएणांसद्भूतिश्चा
पिभवति॥ अतःप्रत्ययाचनापेक्षयाकावोत्कृष्टयाचनाऽस्ति॥ वाचस्पतिरुवाच॥ ॥ हेभामति
यावत्त्वंवायुस्तावदेवतत्कालेनसाकंतवसंबंधः पश्चात्त्वंज्ञातत्कालेचस्वास्ति॥ एतत्कालेपुनस्त
वागमनंनास्तित्वदीयावार्तापितवकालेभविष्यतित्वत्कालवार्तापिनतव॥ तवतत्त्वत्कालस्याय
मेवदिनचतत्पष्टयसंबंधः पुनःकिमपिनास्ति॥ यन्नामस्थितितिनिमित्तंत्वंयत्नंकरोषितदप्येत
द्देहस्थितिपर्यंतमेवपुनः अन्यरूपगर्तेपतिष्यति॥ तवपितामहपितामहस्यकिंनाममपि
तामहपितामहस्यवा॥ हेभामतित्वमेवमेवानेकजन्मसुस्वपरिवारवृद्धिर्भवत्वस्मन्नामप्याप्त

नेतिष्ठन्निति त्वं चिंतया हृष्या कालं गमितवत्यसि ॥ तन्मध्ये किमपि कुलं त्वया साकं न स्थितं न कस्यापि नाम
स्त्वं स्मरणं ॥ वस्तुतस्त्वं स्वर्णस्थानीयासि त्वय्यनेकनामरूपाण्याभूषणस्थानीयान्युत्पन्नानि निष्ठानि च
अतस्त्वं कानि कानि नामानि स्मरसि किं किं कुलमुद्दिश्य रोदिषि ॥ भामत्युवाच ॥ भोः स्वामिन्नुच्चैश्चेदहं यापि
उद्दानादिना पितॄन् स्तारयिष्यति पुत्रं विना प्राणिनां गतिर्नास्ति ॥ वाचस्पतिरुवाच ॥ रे भामति स्वात्मन्येव वि
चारय त्वं शरीरो वा शरीराद्भिन्नो जीवो वेति ॥ भामत्युवाच ॥ स्वामिन्नहमिदं किमपि न जानामि किं तु ब्राह्म
ण्यहमिति जानामि ॥ वाचस्पतिरुवाच ॥ रे भामत्यहं ब्राह्मणीति मन्ता त्वमेव वा त्वदन्यो वा ॥ भामत्युवा
च ॥ स ब्राह्मणीति मन्ताऽहमेव ॥ वाचस्पतिरुवाच ॥ इदं न संभवति ब्राह्मणीत्युक्ते ब्राह्मणीत्वविशिष्टान
रूमयवेत्तृत्वेन तद्रूपत्वासंभवात् ॥ यदि वस्तुगत्या ब्राह्मणीत्वं त्वयि न संभवति तर्हि तत्त्वयि कस्मादागतं तन्
त्वमेव वद ॥ सहजानन्द उवाच ॥ हे सत्यसंध सत्पुरुषाणां चरित्रं विचित्रं यद्यपि मिश्रस्य सिद्धिद्वारा तन
स्या मनोरथपूरणे सामर्थ्यमभूत् तथापि तामज्ञां ज्ञात्वा तस्याः श्रेयःप्राप्त्यर्थं प्रणीकटाक्षदृष्ट्या तस्यामि
थ्याभिलाषं वारयित्वा तच्छुरवासनया विमुखीचकार ॥ साधुप्रसादेन तद्हृदयाच्छनैः शनैरज्ञाननि
वृत्तिरभवत् ॥ अतस्तस्याः सद्विचारे रतिरुत्पन्ना बभूव ॥ ततः करौ मुकुलीकृत्य मिश्रं प्रत्युत्तरं
दत्तवती ॥ भामत्युवाच ॥ भोः स्वामिन्मम देहं ब्राह्मणीत्वं वर्णितः प्राप्तं ॥ वाचस्पतिरुवाच ॥ वर्णोपि कस्मा
दागतः ॥ ॥ भामत्युवाच ॥ इदं तु मया न ज्ञायते ॥ ॥ वाचस्पतिरुवाच ॥ यथा ब्राह्मणीत्वं त्वद्देहे चत्वे

प० १६५ 165 नत्वत्तो भिन्नं तथा वर्णोऽपि वेद्यत्वात्त्वत्तो भिन्नः ॥ तस्मान्न त्वं ब्राह्मणो न वा वर्णः पुनस्त्वं कावात्वमेव वद ॥ भा
मत्युवाच ॥ ॥ अहं तु पापिष्ठतत्परमरहस्यं न जानामि ॥ वाचस्पतिरुवाच ॥ भूतभविष्यद्वर्तमानकालत्रये
पि त्वं नासि किं त्वेवः सच्चिदानंदघन एव सर्वत्र व्यापकः ॥ यथा त्वं स्वात्मनि ब्राह्मणीत्वं कल्पितवत्यसि त
था च पापमारोप्य पापिष्ठास्मीति वदसि ॥ यथा ब्राह्मणीत्वं त्वद्देहे तथा पापिष्ठात्वमप्यनन्तत्वाभ्यामति
रिक्तासि ॥ भामत्युवाच ॥ स्वामिन्नेतत्परब्रह्मस्वरूपाहं जीवभूतातोऽहं पुण्यपापाभ्यां लिप्तास्मि ॥ मिश्र
उवाच ॥ रे भामति पूर्वं नाहं जीवरूपं त्वं तु इदानीं जीवभूतास्मीति वदसि जीवः शरीराद्भिन्नो वा न वा ॥ भामत्युवाच ॥
स्वामिन् जीवे गते सति शरीरं भस्मसाद्भवत्यतो जीवः शरीराद्भिन्न इति भाति ॥ मिश्र उवाच ॥ यदि जीवः
शरीराद्भिन्नस्तदा जीवस्य को वा वर्ण आश्रमश्च ॥ भामत्युवाच ॥ जीवस्यैतद्देहात्प्राक् को वा वर्ण आश्रमो
वा न ज्ञायते शरीरोत्पत्त्यनंतरं वर्णादिकमुत्पद्यतेऽतो वर्णादिर्देहधर्म इति ॥ मिश्र उवाच ॥ यदि वर्णादि
जीवधर्मो न भवति तदा त्वमात्मनि पुण्यपापे किमर्थं कल्पयसि ॥ तस्माद्धे भामति न त्वं न चाहं न च जी
वो न शरीरमेको ह्यात्मास्त्यस्मिन्नेव सर्वं पूर्णः ॥ भामत्युवाच ॥ स्वामिन् पिंडविच्छेदेन वा नैव्यः प्राणि
नां पिंडं विना प्रेतत्वनिवृत्तिर्नास्ति ॥ मिश्र उवाच ॥ हे भामति प्रेतशास्त्रस्यार्थो जीवत्यक्तो देहः पिशाचा
दिर्वा यः प्राणी देहाधीनस्तस्य देहत्यागानंतरमपि देहाभिमानस्तद्रूपपर्यायरूढो भवति ॥ तस्माद्दे
हाभिमानेन विपरीतभावनया च वस्तुतो निर्लिप्तः प्राणी प्रेतत्वारोपेण संबद्धो भवति ॥ निजसत्ता १६५

याऽज्ञानेन देही देहं स्वाधारं कल्पयति यदा देहं कालव्यालो ग्रसति तदा स्वात्मानं निराधारं मत्वा भ्रमारण्ये
दुःखी भ्रमति तस्मात्त्वं देहत्यागात्पूर्वमेव देहाभिमानं त्यज यदा देहाभिमानो नश्यति तदा विद्यमानः स
न्नपि देहः पतितत्वो भवति ॥भामत्युवाच॥ स्वामिंस्त्वं सत्कर्माचरणं कुर्वन्नपि किमिति आरब्धकर्म निरा-
करोषि ॥मिश्र उवाच॥ हे भामति यथा देहिनोऽयं पांचभौतिको देहस्तथा कर्मापि देहः कर्तृत्वाभिमाने-
न देही कर्मवशगो भवति कर्तृत्वाभिमाने नष्टे सत्यर्थात्कर्मदेहोऽपि पतितो भवति यथा देहाभिमाननिवृत्त्या
वयं देहः पतितो भवति तद्वत् ॥भामत्युवाच॥ स्वामिन्कालो महान्भयंकरो यथा कालभयं निवर्त्तेत तथोपदि-
श ॥वाचस्पतिरुवाच॥ हे भामति शरीरलक्ष्यं भिन्नं नालक्ष्यं यथाऽकाशो हि भिन्नः शरीरलक्ष्यमप्राप्य लक्षि-
तद्भवाधोमुखस्तच्चैव पतति तथा कालरूपशरस्याऽत्मरूपश्च आकाशे देहाभिमानरूपलक्ष्यं न दृष्टिगो-
चरं भवति तदा स शरीरो देहिनः सकाशान्निराशो भूत्वा देहमात्रे पतति तस्मात्त्वं देहेऽभिमानं त्यज तेन का-
ऽपि तव कालभयं न भवेत् ॥भामत्युवाच॥ स्वामिन्नयं देहो देहाद्भिन्नास्मि तर्हि अहं का वा ॥वाचस्पतिरुवा-
च॥ हे भामति या कोऽहमिति पृच्छति सैव त्वमसि भ्रमात्मकसंशयं निवार्य त्वं तु निजस्वरूपे स्थिरीभव
न कर्म न कर्ता न देहो न कालो वास्ति किं त्वेकोऽखंड आत्मैव सर्वत्र व्यापकोऽस्तीत्यनन्यभावेन दृढनि-
श्चयं कुरु ॥ ॥सहजानंद उवाच॥ हे सत्यसंध ततो भामत्येतत्सर्वं श्रुत्वा विगतसंशया स्वात्मनि निम-
ग्ना बभूव ततोऽल्पेनैव कालेन स्वामिप्रसादाद्देहाभिमानाद्विमुक्ता सती स्वात्मानं सर्वत्र पूर्णं दृष्टव

ग
२६६

166

ती ॥ पुनर्वाचस्पतिनोक्तं त्वं कासीति स्मित्वा तयोक्तं त्वमहं त्वाभ्यामतीताऽद्वैतैकस्वरूपास्मि ॥ न दृष्टं न
रं वाचस्पतिना वेदान्तशास्त्रे ग्रंथं निर्माय तस्य भामतीति नाम स्थापितं सत्सु रघाणं च विचित्रमपारमस्ति स्व
भार्या निजस्वरूपं बोधयित्वा ग्रंथद्वारा तन्नामापि शाश्वतमकरोत् ॥ भामतीग्रंथस्तु शारीरकभाष्यव
न्तून्यस्तद्व्याख्यारूपः ॥ ॥ इत्यद्वैतादित्य उत्तरायणे एकादशार्कसहज्ञानंदसत्यसंधसंवादे वाच
स्पतिमिश्रकथावर्णनं नाम दशमो रश्मिः ॥१० ॥ ॥ एकादशार्कः समाप्तः ॥ ॥ २१ ॥

द्वा
१६१
167

ॐश्रीगुरुभ्योनमः ॥ अथद्वादशार्कप्रारंभः ॥ ॥ आत्मारामउवाच ॥ हेमधुपसत्यसंधःस्वगुरुस-
काशादेतद्वाख्यायिकाद्वयंश्रुत्वासंतुष्टःसन्विभूतिविषयेपुनर्गुरुंपृष्टवान् ॥ सत्यसंधउवाच ॥
भोगुरोइंद्रचंद्ररविवरुणादयोदेवामनुष्यादीनांमनसइंद्रियाणांचाधिदेवाः ॥ यथामनुष्याणां
मनश्चक्षुरादीनिहस्तादीनिचेंद्रियाणिचभवंतितथादेवादीनामपिसंति ॥ तेषांमनइंद्रियाणा
मधिदेवाःकेसंति ॥ यदींद्रादिदेवानांमनइंद्रियाधिदेवाश्चन्यइंद्रादयःकल्प्यंतेतदानवस्थाप्रसं
गः ॥ सहजानंदउवाच ॥ उक्तानवस्थानास्ति ॥ देवमनइंद्रियाणांदेवदेवांशभूतविभूतीनामे
वाधिदेवत्वस्वीकारात् ॥ यांयांविभूतिमवलंब्ययोयोदेवोऽवतीर्णःसासाविभूतिस्तत्तद्देवस्यत-
धिदेवभूता ॥ यथाइंद्रोयांपरमविभूतिमवलंब्यावतीर्णःसाविभूतिरिंद्रस्यतद्धस्तस्यसर्वदेव
हस्तानांचाधिदेवभूता ॥ इंद्रस्यमनश्चक्षुरसनादींद्रियाणांचयांयांविभूतिमवलंब्यचंद्रसूर्य
वरुणादयोऽवतीर्णाःसासाविभूतिरेवाधिदेवता ॥ एवंचंद्रसूर्यवरुणादीनामपिद्रष्टव्यं ॥ स
त्यसंधउवाच ॥ भोगुरोश्रीमद्भागवतेचतुर्विंशत्यवतारवर्णनानंतरंएतेचांशकलाःपुंसः
कृष्णस्तुभगवान्स्वयं ॥ इंद्रारिव्याकुलंलोकंमृडयंतियुगेयुगेइतिप्रमाणेनैवंविलुप्तराणादि
प्रामाण्येनचश्रीकृष्णःसाक्षात्परब्रह्मैवप्रादुरभूदित्युक्तं ॥ पुनस्तत्रैवभूमेःसुरेतरवरूथवि
मर्दितायाः ॥ क्लेशव्ययायकलयासितकृष्णकेशः ॥ जातःकरिष्यतिजनानुपलक्ष्यमार्गः का-

र्माणि चात्ममहिमोपनिबंधनानीति ॥ विष्णुपुराणेऽपि ॥ उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ भार
ते च ॥ स चापि केशो हरिरुच्चजहे शुक्लमेकमपरं चापि कृष्णं ॥ तौ चापि केशावाविशतां यदूनां कुले स्त्रि
यौ रोहिणीं देवकीं च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः ॥ कृष्णो द्वितीयः केशवः
संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ इति प्रमाणेनांशावतारत्वमपि भासते न तथा च परस्परविरोधः
कृपया समपरिहर्तव्यः ॥ सहजानंद उवाच ॥ हे शिष्याः प्रथमतो भगवद्विभूतयो देवादिरूपेण जगत्यव
तीर्णाः पुनस्ता एव देवादिद्वारा मनुष्यादिरूपेणावतरंत्येवमेव जगदुत्पत्तिक्रमः ॥ वैस्व विभूते द्वे वि
ध्यंते तत्रैकां विभूतिमवलंब्य वैकुंठवासी श्रीविष्णुरवतीर्णः ऽन्यामवलंब्य श्वेतद्वीपवासी श्रीनारायणः
॥ तत एवं श्रीकृष्णं विहाय मत्स्यादिविष्ण्ववताराः यावंतो जातास्ते सर्वे विष्णुनारायणेऽभयप्रभावेणैव
जगति बभूवुः ॥ तत्र कोऽप्यवतारो विभोर्विभुप्रभावेणनावतीर्णः ॥ श्रीकृष्णस्तु साक्षाद्विभोर्विभुरू
पः ॥ मनुष्यादीनां देवादिद्वारकजन्मत्वेन तेषु देवांशोऽवश्यमंगीकर्तव्यः ॥ तस्माच्छ्रीकृष्णः स्वयं
विभोर्विभुः सन्नपि नारायणविष्णुशिवशक्तिसूर्येंद्रादिसर्वदेवांशान्गृहीत्वा लीलामानुष्यरूपेण
प्रकटो बभूव ॥ श्रीमद्भागवतादिषु केशादुत्पत्तिवर्णनाभिप्रायस्त्वेवं श्रीकृष्णे विष्ण्वंशः केशवत्त्व
ल्पो मुख्यस्तु विभोर्विभुरेव ॥ एवं संवादिषिणो मुख्येन याशेषावतारस्तथापि केशवत्त्वल्प विष्णुकला
विशिष्टः ॥ हे शिष्या विष्ण्वंशाल्पना स्वचनं प्रकारांतरेणापि भवति नियमेन केशग्रहणस्य किं तात्प

येमिति पृच्छसि चेद्वक्ष्यामि॥ पूर्वं ब्रह्मवैवर्ततात्पर्यनिरूपणसमये भगवतः श्रीकृष्णस्य रोमकूपे
भ्यो गोपा गोप्यश्चोत्पन्ना इत्यत्र विभुविभूतीनां व्याकरणमिति मयोक्तमेवं विष्णुकेशग्रहणमपि वै
लव विभूतितात्पर्यकं॥ सत्यसंध उवाच॥ भो गुरो एतावत्पर्यंतं भगवतः श्रीकृष्णस्य शंकितवि
रोधपरिहारपूर्वकं यत्परात्परत्वं व्यवस्थापितं तदत्यंतपवित्रं परं त्वस्मिन्विषये मम महान्संशयो
जातः॥ यस्मिन्समये सत्राजितो भ्रातरं प्रसेनं सिंहो हत्वा स्यमंतकमणिं हृतवान्॥ तं सिंहं हत्वा जां
बवान्मणिं हृतवान्॥ तदालोचनया यादवाः सत्राजित्संबंधिनः॥ श्रीकृष्णः प्रसेनं हत्वा मणिमपहृ
तवानिति कृष्णस्यापवादं चक्रुः॥ तच्छ्रुत्वा भगवता मया भाद्रपदशुक्लचतुर्थीचंद्रदर्शनं कृतम
तो ममायमपवादो जात इत्युक्तं॥ एतादृशस्य परात्परस्य सर्वज्ञस्य भगवत एतद्वचनमत्याश्चर्य
करं॥ किंच॥ तस्यैव मणेरक्रूरेणापहरणसमये भीत्या पलायमानं शतधन्वानं मणिरेतन्निकटे
ऽस्तीति मत्वाऽक्रूरं विहाय तत्पश्चाद्धावंस्तं शतधन्वानं हतवान्॥ अत्रापि नाटकस्य भगवतः क
थमेवमज्ञानं संभवतीति॥ सहजानंद उवाच॥ हे शिष्य यद्वेदार्थं पूरयति तत्पुराणमित्युच्यते॥
श्रीमद्भगवान्बादरायणः पूर्वमीमांसया निराकरणं न कृतवान्॥ देवेषु श्रीगणपतिर्मुख्यः॥
भाद्रपदशुक्लचतुर्थीचंद्रावलोकनस्य निगमादौ पापं वर्णितः॥ अत एव पुराणेष्वर्थवादत्वमि
त्वेण वेदार्थपूरणं कृतं॥ यस्य निश्वसितं वेदा भवंति स एव श्रीगोपिकारमणः स्वस्य वाक्यप्रति-

पालनं स्वयं न करोति चेत्तर्ह्यन्यः को वा कुर्यात् ॥ भो शिशो यत्परमपुरुषभक्तपादरजो भावनया त्र
सहत्यादिमहापातकान्यपि निवर्तन्ते कथं तस्य चंद्रदर्शनेन दोषः स्यात् ॥ तस्मात्सत्पुरुषाणां नि
कटे चंद्रावलोकनदोषप्रकारोऽन्य एव ॥ ॥ इत्यद्वैतादित्यजगन्नारायणे द्वादशार्के सहजानंदसत्य
संधसंवादे भगवद्विभूतिनिरूपणे भगवतः श्रीहलस्य परात्परत्वव्यवस्थापनं नाम षष्ठमोऽर
श्मिः ॥ ६ ॥ सत्यसंध उवाच ॥ भो गुरो सत्पुरुषाणां निकटे चंद्रावलोकनदोषोऽन्यप्रकार इति यदु
क्तं तच्छ्रोतुमिच्छामि ॥ ॥ सहजानंद उवाच ॥ श्रीकृष्णस्य भगवतस्सान्निध्यवशादहं ज्ञानवैराग्यसं
पन्न इति गर्वी जातः ॥ तदुपशमनार्थं श्रीभगवांश्चंद्रावलोकनदोषं स्वस्मिन्नारोपितवान् ॥ श्रीकृ
ष्णछलनार्थं व्याजेन स्वस्मिंश्चंद्रावलोकनदोषारोपणं ॥ ब्रह्मणा हृतवत्सापहरणसमये भगव
न्निर्मितवत्सान्बालकांश्च दृष्ट्वा तत्तन्मातृणामस्मद्बाला एवैत इति ममत्वेन प्रीतिरुत्पन्ना वत्स
बालानामप्येता मम मातर इति ॥ ततो ब्रह्मा स्वेनापहृतवत्सबालांस्तत्रैव दृष्ट्वा पुनर्भगवन्निर्मि
तान्गोवालेऽपि दृष्ट्वा चकितः सन् भगवंतं तुष्टाव ॥ एतद्भगवच्चरित्रं यद्यप्यक्रूरो ज्ञातवान् ॥ य
द्यपि पूतनाचाणूरकंसादीनां संहारं ज्ञातवान् ॥ यद्यपि गोकुलान्मथुरागमनसमये कालिंद्यां भ घ३
गवत्कृताद्भुतचरित्रं दृष्टवान् ॥ तथाप्यनात्मनः स्यो भाऽत्मज्ञानमाहृतवती ॥ अनात्मनो राग
स्तन्मरागो निवारयामास ॥ मणिः सूर्यजन्यः सूर्यः काश्यपः कश्यपो मारीचिर्मरीचिर्ब्रह्म

द्वा
१६९
169

त एतादृशानेकब्रह्माण्डानां यस्य निमेषमात्रेण तत्प्रलयो भवत एतादृशाद्भगवतो भीतः सन्नन्यत्र म
णिनास्तह्ममसंरक्षणं भविष्यतीति पलायितवान्॥ मणिलाभः क्षणभंगुरदेहस्य स्वल्पः॥ त
दृष्ट्वानित्याविनाशितेन त्रारापि सर्वब्रह्माण्डजीवनमूलं सर्वसाक्षिणं भगवन्तं विस्मृत्य पलायितवा
न्॥ अहह मायामहाप्रबलेतादृशं दृष्ट्वा विद्वांसं भगवत्सान्निध्येवर्त्तमानमप्यक्रूरं मोहयति
मासेतरेषां का वार्ता गणना॥॥ ॥सत्यसंध उवाच॥ भो गुरोऽक्रूरस्य चित्ते ज्ञानवैराग्याभ्यां कथं चलि
तं तत्स्पष्टतया मया न ज्ञातं॥ सहजानंद उवाच॥ अनात्मनि वैराग्यमात्मनि ज्ञानं चोचितं॥ मणि
रनात्मा श्रीभगवांस्तु केवलात्मा॥ अनात्मा मणिर्मिथ्यासौंदर्यस्यातः छललाभस्य चोपर्यक्रूरो ल
ब्धो ज्ञातस्तदानीमनात्मरागात्मज्ञानमाहृणोत्॥ धन्यो धन्योऽनाथबंधुः करुणासिंधुर्वि
स्मृतिपरायणं निजभक्तं च मया प्रबुद्धं ज्ञातवान्॥ अथ स मणिमक्रूरं विहाय मणिरहितं सुध
न्वानं यदवधीत्तद्भगवतः सर्वज्ञस्य ज्ञानस्य च व्यासितियत्नयोनंतं च वक्ष्यामि शृणु॥ भगवता
ऽक्रूरनिकटे मणिरस्तीति न सुधन्वनो निकट इति ज्ञातमेव यद्यमणेरर्थे सेव भगवतः प्रवृत्तिः स्या
त्तर्हि सुधन्वानं परित्यज्याक्रूरमेव हन्यात्॥ किंतु श्रीभगवतो धर्मत्वेन तत्परिपालकत्वेन
च निरपराधिनः सत्राजितोऽयं हंतेत्येतस्य प्रतिहननं विहितमिति विचार्य श्रीभगवान्सुध
न्वानं जघान॥ सुधन्वहननानंतरमक्रूरस्य पृष्ठतो धावन्महात्मा भगवांस्त्रसीमाः स॥॥

अक्रूरस्यभगवान्ममपश्चाद्द्वारात्यमंहत्वामणिंग्रहीष्यतीतिभीतिरभूत॥मणिविषयेभगवन्हात्तौ
द्वासीन्नंकृष्णपुनस्तस्यैदेवप्रहृतिमत्वेनपश्चात्तापोजातः॥हत्वाऽग्रस्तच्छस्मण्यर्थसाहिभूतंभगवं
तंवंचितवानस्यहोमयाकृतमिति॥एवमक्रूरोऽनर्लज्जितःसन्नात्मनिस्वयंप्रबुद्धोजातः॥सोऽनादि
गुरुदेवःस्वभक्तानानेकप्रकारेणबोधयतिविस्मारयतिच॥अहोभागवतीमायाऽतीवप्रबलायोज्ञा
नवैराग्याभिमानिनंमिथ्यापदार्थान्सत्यपदार्थान्निवदर्शयित्वामोहयति॥तस्मात्त्वंज्ञानध्यानरागवैरा
ग्यादीनामास्थांविहायसाधनोपासनादिभ्योनिराशोभूत्वातमेवशरणंव्रज॥तदात्वंमायाछलाद्वि
मुक्तोभविष्यसि॥सत्यसंधउवाच॥भोगुरोऽद्यत्वयाअर्थवारंश्रीसंकर्षणोमत्स्याद्यवतारेष्ववतारत्वे
नगणितःसुधन्ववधानंतरंमणिर्नप्राप्तइतिमामसंप्रतारयतीतिश्रीहलीरुष्टोमिथिलांगतवानिति
सहजानंदउवाच॥हेशिशोसंकर्षणस्याक्रूरनिकटेमणिरस्तिसुधन्वनोनिकटेनास्तीतिज्ञानंना
९५ सीत्किंतुसुधन्वनःसकाशान्मणिंगृहीत्वाहलःप्रतारितवानितिज्ञानमासीत॥अनःसंकर्षणस्य
विस्मृतिलेशोऽस्तीतिज्ञायते॥एतन्निर्णयस्त्वेवं॥संकर्षणस्यसर्वदाऽनंतःस्वरूपेस्थितत्वेनबहिर्व्य
वहारेविस्मरणंसंभवः॥पुराणादिषुभगवतःपरात्परत्वस्यसूचनार्थमेवसंकर्षणस्यांशावतारत्वं
प्रतिपादितं॥यदाप्रलंबासुरस्कंधलेनसंकर्षणस्तुस्यापिपर्वताकारोभूत्वागतस्तदासञ्चकितोजातः
पुनःश्रीकृष्णेनत्वंशेषावतारोऽस्यनंतबलस्तत्किमर्थंविस्मृतवानितिबोधितःसंस्तमवधीत॥पौंड्र

वादेव प्रकृतिमेतादृग्योधनस्त्वास्तु रप्रकृतिमान् ॥ यत्त्वं कार्षिणोदृग्योधनं पक्षपातं कृतवांस्तदपि वि
स्मृतिलेशस्त्वत्कं भवति ॥ तस्मात्त्वं कार्षिणस्य स्वरूपविषये स्मरणं व्यवहारे विस्मरणं पक्षद्वये भा
सते ॥ यद्यप्येतादृशावर्णनमनुचितं लोके दुर्योऽऽमध्येतावृतस्य वर्णनं न समीचीनं विभुतावतारा
णामवस्थानारतस्य कथनं तथापि भगवतत्वं ऋद्धावलोकजनजनितदोषारोपणेनेश्वरत्वे तव संशयो
जातस्तन्निवृत्यर्थं प्रसंगेन पुराणादिस्थमेवैतदुक्तिं ॥ ॥ ॥ इत्यद्वैतादित्य उपनारायणे द्वाद
शार्के सहजानंदसत्यसंवादे चतुर्थी चंद्रावलोऽन दोषारोपेण भगवतोऽनीश्वरत्वसंशयनिवार
णं नाम द्वितीयो रश्मिः ॥२॥ सत्यसंध उवाच ॥ ॥ भो गुरो भगवदवताराणां मध्ये केऽंशावताराः
के वा पूर्णावताराः इत्येतत्तत्त्वं निरूपय ॥ ॥ सहजानंद उवाच ॥ हे शिष्य कुमारः कपिलऋष
भो धन्वंतरिर्मोहिनी भार्गवः संकर्षणो धनंजय एते सर्वेंऽशावताराः ॥ हे शिष्य ततोऽयस्मिन्का
स्मिंश्चित्तु रूपे भागवत्यै काकलावर्जितेन तस्यांशप्रादुर्भावे ॥ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव
वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभव इति प्रमाणं ॥ यत्रापि भगवतोऽनेनः शाख्यारूपोवैनाते
यमारतीवाहनभूतेन तथापि तेषु परपराक्रमोऽस्मितेजः स्वरूपभूतसंपद्रूहन सामर्थ्यं चैते
वैलवकलाभूताः ॥ परं भार्गवार्जुनयोरपारतेजोवैलवोऽस्यभूतं स्थितं ॥ यदा द्वाभ्यां वैलवनेजो
भगवतोऽऽकृष्टं तदा भार्गवः केवलऋषिर्जातोऽर्जुनस्त्वं ततो यादववधूसंरक्षणेप्यसमर्थो

कद

ज्ञातः॥ धन्वंतरावपि रोषधीज्ञाने वैलक्षण्यकला॥ एवं स्वायंभुवादयोऽवताराः प्रत्येकमेकैकवैलक्षण्यकला-
विशिष्टाः॥ एवं श्रीपृथ्व्याद्यवतारेषु केचन चतुष्कलाः केचन दशकलाः केचनेतोऽपि बहुकला बभूवुः॥
तद्यथा श्रीपृथावपारतेजो महदैश्वर्यं परमौदार्यं धर्मतत्त्वं प्रजापोषकत्वं परमनियंतृत्वमित्यादयः कलाः
यावंतो तेनाः सर्वा वैलक्षण्यः॥ श्रीदत्तात्रेयकुमारकपिलबादरायणेष्वमितप्रकाशो दिव्यविद्याः पारसि-
द्धिः परमदेशिकत्वं ब्रह्मभूतात्मवत्त्वमित्यादयो वैलक्षण्यकलाः॥ श्रीमत्स्यकूर्मवराहनारसिंहा बहुवैलक्ष-
ण्यकलाविशिष्टाः परंतु यद्यत्प्रयोजनमुद्दिश्यावतीर्णास्तत्तत्प्रयोजनानुकूलकलानामेव प्रकाशो जा-
तः प्रयोजनाभावेनेतरकलाभिभूय स्थिताः॥ उपेंद्रदाशरथिवासुदेवाः पूर्णावताराः॥ तत्र श्रीहंसस्य र-
मावतारत्वेन सर्ववैलक्षण्यकला गृहीत्वा साक्षात्परात्परभावेनावतीर्णः॥ तत्र श्रीत्रिविक्रमः साक्षाद्विल-
र्यस्य चरणकमलं लोकत्रयव्यापि॥ यस्मादनेकदासकलदेवानां कष्टनिवृत्तिर्जाता॥ यस्माच्चादित्या-
दयो ब्रह्मविद्यां प्राप्ताः स एव गरुडध्वजो भक्तमनोरंजनऋषिमुनिमनोवासी॥ अनाथनाथः श्रीरघु-
नाथोऽत्युदारो महावीरोऽमितपराक्रमस्तेजःपुंजः सौंदर्यसीमाप्रकाशाब्धिरैश्वर्यप्रतापावधिर्मुनि-
पालको धर्मरक्षको दुष्टनाशकोऽमरसंकष्टनिवारकः परमगुरुर्दयानिधिः स्वनामस्मर्तॄणां निखिल-
पापनाशकः॥ परंतु मायामानुषवेषेण स्वस्वरूपं जुगोपन स्माद्वाल्मीकिनाज्ञानवासिष्ठे वसिष्ठेनो-
पदिष्ट इति वर्णितं यदि कदाचिन्मायामानुषभावो नांगीकृतः स्यान्नर्हि तस्य कथं प्रामाण्यं स्यात्॥ यत्स

काशाद्युत्सादयः सनकादयश्च ब्रह्मविद्यां प्राप्तुः स परमगुरुः केनोपदिष्टो भवेत् ॥ इदमपि वाल्मीकिमता-
नुसारेण श्रीबादरायणमतानुसारेण तु स परमगुरुरेव ॥ रामहृदयरामगीतास्तु येन पवनसुतं लक्ष्म-
णाय तूपदिष्टा ॥ श्रीभगवान् देवदेवो वासुदेवः संपूर्णकलाभिः सह विभोर्विभुभावेनावतीर्णः ॥ सर्ववि-
भूत्यधिष्ठानभूतोऽपारैश्वर्यवाननंताद्भुतशक्तिमान् ॥ सकलाकलंककलाकलुषीभूतः सौंदर्यपारा-
वारोऽमितवीर्यो लीलाधार्यनादिब्रह्मचारी ब्रह्मोपदेशकारी योगमायाय स्याज्ञाकारिणी निरंतरात्मा-
निराशानामाशारूपो निर्गतीनां गतिर्निर्मानमानोऽशरण्यशरण्योऽनाथनाथो राजयोगोपदेष्टा मद-
नमोहनः कंदर्पजनको मुनिजनमनोरंजकः सज्जनसहायको दुर्जनविद्रोहकोऽमरपालकोऽसुरना-
शकः संकष्टहारको मोहादिविध्वंसकः शरणागतरक्षको भक्तवत्सलः त्रिलोकभरणपोषणक-
र्त्ता दीनबंधुः करुणासिंधुः सनातनगुरुः परमभागवतानां मनोबुद्धिविश्रांतिस्थानभूतः सर्वा-
परमविभुः
वताराणामवधिः ॥ हे शिष्याः श्रीकृष्णः सर्वकलासमुद्रः ॥ एतस्मिन्बालक्रीडातरुणलीलामाया-
छलः प्रजापोषणरीतिः प्रभुत्वमुदारत्वं ब्रह्मविद्यापरमदेशिकत्वं परमसिद्धिरैश्वर्यं धनुर्विद्या
युद्धकालेत्यादयः सर्वाः कलास्तिष्ठंति न कापि कलातत्त्वावशिष्टा ॥ स पुरुषोत्तमोऽनंतत्वादनंती
तो नारायणभावेन विजृंभमाणः ॥ श्रीवत्सलांछनलांछितः शंखचक्रगदाशार्ङ्गादयो यस्याज्ञाका-
रिणः ॥ इंद्रविश्वकर्मादयो देवाः समुद्रादयश्च यस्याज्ञातत्पराः विरिंचिना यदा वत्सबालकाश्च

पट्टनास्तदा परमसिद्धिः प्रकटिता तस्मात्परमसिद्धः ॥ अनेकगोपीभिः सह क्रीडन्नपि निर्विकारी
तस्मादनादिब्रह्मचारी ॥ केशिकंसचाणूरादीन्हत्वा जगन्निष्कंटकं कृतवानतः सर्वसंकष्टहर्त्ता
बाणं पराजित्य शाल्ववक्त्रनरकासुरादीन्हत्वाऽमरपालनं कृतवानतोऽमरपालकः ॥ युद्धे स्त्री
शोकरे विमोहितवांस्तस्माद्दर्शितपराक्रमः ॥ सनाथायायाश्चप्यनाथायायाऽवस्थितायाः पांचाल्याः
सभायां महाऽऽपत्काले लज्जां रक्षितवानतो दीनबंधुरनाथबंधुश्च ॥ पांडवादिसहायं कृतवानतः
सज्जनसहायकः ॥ कालिंद्यंतः स्वयं तत्तीरे पि स्वयमेतं दृष्टुं तमक्रूराय दर्शितवान् ॥ षोडशसहस्र
स्त्रीभिः सह प्रत्येकमेकदा क्रीडितवानतो विभुः ॥ इंद्रादिदेवान्विजित्य पारिजातं तं जहार तस्मादम
रेश्वरः ॥ शिशुपालदंतवक्त्रादीन्हतवानतो दुर्जनविदारकः ॥ स्वप्रतिज्ञां परित्यज्य गांगेयप्रति-
ज्ञां रक्षितवान् तस्माद्भक्तवत्सलः ॥ स्वसुतेयशोदायै विचित्रलीलां दर्शितवानतो मायिकः ॥ धनंजयं विश्व
रूपं दर्शयामास तस्मात्परमेश्वरः ॥ कालीयशिरसि नर्तनं तस्मात्परमनर्त्तकः ॥ एवं सकलक-
लाभिः प्रकाशमानः ॥ ॥ ॥ इत्यद्वैतादित्य उत्तरायणे द्वादशांके सहजानंदसत्यसंधसंवादे भग
वदवताराणां मंशत्वपूर्णत्वविवेचनं नामन्टत्तीयो रश्मिः ॥ ३ ॥ सत्यसंध उवाच ॥ भो गुरो श्रीभा
र्गवादशावतारेषु वर्णितस्तस्य महान्प्रतापो पि श्रूयते येन युद्धे श्रीगणपतिर्दंतभंगः कृतस्तस्य कथमं
शावतारत्वं ॥ सहजानंद उवाच ॥ हे शिष्य दशावतारेष्वपि केचनांशावताराः केचन पूर्णाव-

तारा:॥ भार्गवैर्वेलवंशाः प्रकारद्वयेन वर्तते तेनैव कश्चरणप्राप्तोऽन्योऽध्यात्मरामायणप्रमाणेन तपसा
प्राप्तः॥ तेनैव त्रिःसप्तकृत्वः पृथिवी निःक्षत्रिया कृता॥ अंततोऽयमेवांशः श्रीदाशरथिनाऽपहृतः॥
एतदंशद्वयप्रभावेणास्य महत्त्वं ज्ञातं॥ सत्यसंध उवाच॥ भो गुरो देवमनुष्यमृगादिषु भगवदव-
ताराज्जातास्तत्र देवयोनिं विहाय मनुष्ययोनावुपरात्परावतरणं किमिति॥ सहजानंद उवाच॥ ॥
हे शिष्यो मनुष्ययोनिमाहात्म्यं त्वया न ज्ञातं विदेहकैवल्यप्राप्तिर्मनुष्यजन्मन्येव न त्वन्यस्मिंज्ज-
न्मनि॥ यद्यपि देवयोनिरुत्कृष्टा न तथापि॥ यथा स्वदेहेन पितृलोके यथाप्सरूपमीव देहेनैतथा
गंधर्वलोके छायातपयोरिव ब्रह्मलोके इति श्रुतिप्रमाणेन न च स्वस्वरूपप्राप्तिर्दुर्लभा॥ यद्यपि मनु-
ष्यो मलमूत्रादिना दूषितस्तथापि स्वरूपप्राप्तियोग्यता नान्तदैवेऽस्ति॥ अत एव देवादीनामप्यतिदुर्ल-
भमनुष्यजन्माभिलाषोऽस्ति॥ तस्मात्परात्परभावरूपं संपूर्णावतारणसामर्थ्यं देवानां नास्तीति मनुष्य-
ज्ञातौ यादवकुले परात्परभावेन विष्णोर्विभुः प्रादुरभूत॥ सत्यसंध उवाच॥ भो गुरो श्री भगवान्-
रूपरीत्यार्थं छलं कृतवानिति पुराणेषु क्वापि न दृश्यते तेन सविस्मृत्यात्मकापराधकथनम-
पितं च नास्ति॥ तन्नार्थं॥ सहजानंद उवाच॥ यदि कदाचिदेतत्पुराणेषु स्पष्टतया प्रतिपादित-
मासीत्तर्हि न वसंदेहोऽपि न स्यात्॥ यदि कदाचित्कुत्रचिद्भगवानक्रूरे छलं न कृतवान्स्यात्तर्हि त-
स्यापराधोपरि कोपमेव कुर्यात्॥ लीलार्थं स्वभक्तस्य स्वात्मज्ञाननिरोहत्यर्थं च छलं कृतवांस्तस्मा १७२

त्रुटीयात्तानात्मकापराधेकोपमकृत्वात्तमयाविस्मृतिपरायणस्त्वभक्तस्यात्तानबंधनेविच्छेद ॥
अक्रूरोपिदैवप्रहतिमत्ता श्रीभगवतः क्षमाकरणान्नालोकदासीनाच्चमणस्त्वच्छत्तं स्वात्मीयं
चत्तात्वालक्षितवानासीत् ॥ अनात्मरागात्मविरक्तोभूत्वामनसामगवच्छरणंययौ ॥ श्रीभगव
तः क्षमाकरणेनाक्रूरः प्रबुद्धोभूत्वाः त्तानान्निवृत्तस्तेनपुराणादिषुक्रूरापराधस्यनिंदानवर्णि
ता ॥ यदिकदाचिद्भगवानक्रूरोपरिकोपंकुर्यात् ॥ यद्विवाक्रूरोः त्तानान्नविमुंचेत्तर्हिपुराणादि
षुनिंदापिवर्णितास्यात् ॥ श्रीभगवद्भक्तस्यनिंदाकथंवर्णितास्यात् ॥ श्रीभगवान्बादरायणः सा
क्षान्नारायणस्तस्माद्भगवताश्रीहरिणैनक्षमितापराधस्यवर्णनंतेनपुराणादौकथंवर्णनंकृतंस्या
त् ॥ हेशिशोऽहमपिभगवतः क्षमापात्राक्रूरस्यनिंदावर्णनेकुर्यांतर्ह्यपराधीस्यां ॥ तस्मान्मयानिं
दानकृताकिंतुतवभगवतः श्रीकृष्णस्यपरात्परत्वेसर्वज्ञत्वेचयः संशयोजातस्तन्निवृत्तिः वो
नाप्युपायेननभवतीतितदर्थंपुराणादिग्रन्थार्थंगृहीत्वातवसमाधानंकृतवानस्मि ॥ तस्मान्म
यानिंदानकृताकिंतुतस्यभगवत्प्रीतिपात्रत्वमेववर्णितं ॥ ॥ ॥ ॥ इत्यद्वैतादित्यश्रुतनारायणेश्व
रशार्वसहजानंदसत्यसंधसंवादेऽक्रूरस्यभगवत्कृपापात्रत्ववर्णनंनामचतुर्थोरश्मिः ॥४॥
सत्यसंधउवाच ॥ भोगुरोपहिराज्ञोदीन्निमंतंपत्युत्पन्निप्रकारणंस्यादेतन्तदेत्तनबहूनांप्रज्ञाये
येतिश्रुतेस्तात्पर्यंयद्वर्णितवांस्तत्संक्षेपेणैव ॥ तच्छ्रुत्वार्थेयोयः संशयोभवतितन्निवृत्तिस्तत्त्व

तिपादितार्थेन न ज्ञायते ॥ यथा संशयनिवृत्तिर्भवेत्तथा वर्णय ॥ सहजानंद उवाच ॥ भवदीयः को
वा संशयः स निरूपणीयः ॥ सत्यसंध उवाच ॥ सदेव सोम्येदमग्र आसीदिति छांदोग्यश्रुतिरसद्वा
इदमग्र आसीदिति तैत्तिरीयश्रुतिस्तयोरेवमनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी
ति छांदोग्यश्रुतिस्तत्सृष्ट्वा तदेवानुप्राविशदिति तैत्तिरीयश्रुतिस्तयोश्च परस्परविरोधात्कथमे
कवाक्यता संभवति ॥ सहजानंद उवाच ॥ पाहिराजस्य मूर्त्तित्रयनिर्णयो मतत्रयनिर्णयश्च विव-
हितः स्थितः ॥ तत्र प्रसंगात्त्वदृशमुदाहृतं नैतद्व्याख्यानं तस्य विवहितं ॥ सुवीरनामा व्याघ्रोऽतिमे
धावी मम परमसखोऽभूत् ॥ स (संग) कदाचिन्मम दर्शनार्थमागतस्तत्समये दुर्जयनामा शंबरोपाग
तः ॥ तदा मत्कालहेपार्थमिदानीयं प्रश्नं त्वं कृतवान् सितमेव दुर्जयः सुवीरं पृष्टवान् ॥ सुवीरो
ऽपि घटिकाचतुष्टयपर्यंतं विचारपूर्वकं तन्निरूपणं कृतवान् ॥ अहमपि तत्र साक्षी सन्स्थि
तः परं तु तद्विचारस्य सूक्ष्मत्वेन दुर्जयस्य सम्यग्बोधो न जातः ॥ पुनः सुवीरो दुर्जयस्य कल्याणार्थ
मिममेव विषयं पूर्वपक्षसिद्धांतोपन्यासपूर्वकं दुर्जयमुपदिष्टवान् ॥ तमेव संवादं वक्ष्यामि श्र
णु तेन तव सर्वसंशयनिवृत्तिर्भविष्यति ॥ अथ सुवीरोक्तविचारः ॥ सुवीर उवाच ॥ तदैक्षत बहु
स्यां प्रजायेयेति श्रुतौ ॥ तच्छब्दार्थस्सदेवतात्विमेहाते त्याहवद्भुस्या मिति नन्वीक्षणं वृत्तिस्त
त्वात्थं शुद्धे संभवतीति चेन्न ॥ योगमायाया एव ईक्षणरूपत्वात् ॥ ननु योगमाया किं स्वरूपापेक्ष

याभिन्नावाभिन्नावानाद्यस्तदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिश्रुतिविरोधान्नद्वितीयदृष्ट
णासंभवस्यदुर्वारत्वादितिचेन्नयोगमायानामपराचिच्छक्तिस्ताचयथासूर्येप्रभानिजशक्तिस्तथे
यमितिभिन्नत्वाभिन्नत्वाभ्यामनिर्वचनीयाचिच्छक्तिर्नामजगदपेक्षिकातदभावेतुनासदासीन्नो
सदासीदितिश्रुत्यासदसद्विलक्षणमनिर्देश्यमेकमेवाद्वितीयंभवति॥ननुबहुस्यांप्रजायेयेत्यत्र
बहूनिकानियदीमानिसर्वाणिनामरूपात्मकानिभूतानीत्युच्यतेतर्हितत्किंसत्त्वरूपाणिउतातिरि
क्तानिवानाद्यस्तत्त्वरूपत्वेतेषामपिसत्यत्वापत्तेः॥नद्वितीयः॥बहुस्यांप्रजायेयेत्युत्तमपुरुषवि
रोधादितिचेन्नघटपटादेर्व्यक्तिर्नश्यतिपरंतुतेषांवेदांतिभिर्निरन्वयनाशोनांगीक्रियते॥अस
द्वाइदमग्रआसीदितिश्रुतिप्रामाण्यात्॥असदितिपदेनशून्यतातात्पर्यंवामिदमासीदितिपदयोगा
त्किंत्वव्यक्ततातात्पर्यकंतस्माद्येनामरूपात्मकविशेषाः भासंतेतेसर्वेसृष्टेःप्रागव्यक्तरूपाण्य
वतिष्ठंति॥अतएवयद्यन्नामरूपात्मकंकिंचित्तत्तत्सत्पुरस्कारेणैवसन्घटसन्पटइतिभासते
सद्विनानतेषांभानेनचव्यक्तिः॥यद्भातितत्सदेवपरंतुनामरूपविशेषेणसतस्तादात्म्याद्वि
शेषतोनामरूपयोरेवभानंनामरूपाभ्यांविनासत्त्वरूपसामान्यस्यनप्रत्यक्षंसत्तुभविष्यत्वा
भविष्यत्वव्यक्तत्वाव्यक्तत्वादिधर्मरहितंसद्व्यतिरिक्तंकिमप्यस्तिचेत्तत्किंचिद्भविष्यत्यपि॥अव्या
कृतरूपायेनामरूपात्मकविशेषास्तेसत्तादात्म्याद्व्याकृतरूपाभासंतेतस्मादर्थात्ततएवनाम

रूपात्मना बहुभवनमिति नोक्तमपुरस्य विरोधः ॥ यथा श्रुतिरेव रज्जुताकारा भाति पुनस्तत्त्वतः श्रु
तिः किंचिदप्युत्पन्नं नाभवत् ॥ तथा सदेवेदं सर्वमभवत् ॥ पुनस्तत्त्वतः किंचिदप्युत्पन्नं नाभवत् ॥ उ
तेषु सर्वेषु सत्त्वमपि न तद्यथाभूतं तथैवास्ति ॥ ननु तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्या स्रष्टुः प्रागव्यक्त
रूपेणास्थितस्य व्याकरणं कृत्वा तदनुप्रवेशोक्तः ॥ अत्र कोसौ विभीस्वरउत जीवश्चान्यो वा ॥ प्रयोज
नाभावात् ॥ त्वा प्रत्ययविरोधात् ॥ तदुक्तातिरिक्तवस्तुनोऽभावाच्च न पक्षत्रयमपि संभवतीति चेन्न
अत्र प्रवेशार्थो हि न संभवति उपसर्गबलात् धात्वर्थोन्यत्र नीयते प्रविशद्धातुतात्पर्यं विशेषता
दात्म्यादिविशेषानुसारतया तिष्ठदित्यर्थः ॥ तत्तत्सृष्टिप्रागुत्पत्तिलयेष्वेकरूपं कूटस्थं विशे
षस्तद्रूपविपिनादिवत् तत्तद्विशेषान्तरं स्वयं ब्रुवत् ॥ यथा प्रविष्टस्तथा भाति ॥ ननु तत्सृष्ट्वेति तात्पर्य
वदन्यत्रानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिरपि वर्त्तते तस्मात्प्रविशत्य
दार्थोन्यो न कल्पनीय इति चेन्न ॥ तद्वाक्यतात्पर्यभिन्नमे… तद्वाक्यतात्पर्यं भिन्नं तद्वाक्योपनिषद्
प्रश्ने सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायामिति स्वयमेवास्थितइति निहितपदतात्पर्यं तत्
स्मात्तत्सृष्ट्वेति वाक्यार्थ उपक्रमवाक्यार्थेन्नीयेत एतद्वाक्यार्थं तु चिदाभासेन्नीयेत तस्मिन्सृष्ट्वा
भासतया प्रविष्ट इत्यर्थः ॥ ॥ ॥ ॥ इत्यद्वैतादित्य उत्तरायणे द्वादशार्के सहजानंदसत्यसंधसंवा
दान्तर्गतस्त्वीरदुर्नयसंवादे सदेव सोम्येति श्रसद्वाइदमित्यादिश्रुतिद्वयपरस्परविरोधप

रिहारवर्णनंनामपंचमोरश्मिः॥ ५ ॥ ॥आत्मारामउवाच॥ ॥ ॥ हेमधुपयदासहजानंदेनस्वबीरो
क्तसंवादोनिरूपितस्तदासत्यसंधोविगतसंशयःसद्गुरुंप्रणनाम॥तत्समीपस्थःस्वव्रतश्चापस्तं
वशाखोवत्वेनस्वशाखोपसंगेनहर्षितःसद्गुरुंविज्ञापितवान्॥भोगुरोस्वबीरोक्तप्रकरणेसत्यं
ज्ञानमनंतंब्रह्मेतितिनस्त्सृष्ट्वातदेवानुप्राविशदितिवाक्यतात्पर्यंसत्यसंधेनसहश्रुत्वाऽतिविस्मितो
स्मि॥अधुनातत्तैत्तिरीयोपनिषदिब्रह्मवल्ल्यांयद्यन्ममसंशयोवर्त्ततेतत्सर्वंपृच्छामितदनुग्रहेण
वक्तव्यं॥ब्रह्मणाविपश्चितेतिवाक्येविपश्चित्पदस्यकेनसाकमन्वयः॥सृष्टिप्रकरणेतुसोकामय
तबहुस्यांप्रजायेयेत्याद्युपवर्त्तते॥तत्पूर्वंत्यस्यपूर्वमेवाऽऽत्मनआकाशःसंभूतइत्यादिनासृष्टि
क्रमकथनस्यकोवाऽभिप्रायः॥योऽन्नंब्रह्मोपासतइत्यादिनाऽन्नमयकोशादीनांब्रह्मत्वमुक्तं
तत्कथं॥आनंदमयकोशस्यैवब्रह्मत्वमुतान्यस्य॥अथातोनुप्रश्नाइत्यादिनानिरूपितप्रश्नचतुष्ट
यस्योत्तरंक्वास्ति ब्रह्मज्ञानिनोब्रह्मानंदावाप्तिर्वचारितार्थ्यमनुष्याद्यानंदावाप्तिकथनस्यकिंप्र
योजनं॥॥ सहजानंदउवाच॥ ॥हेशिष्योब्रह्मविदाप्नोतिपरमित्युपक्रमवाक्येब्रह्मविदोमहिमा
वर्णितः॥तद्व्याख्यानेब्रह्मपदंवर्त्ततइतिद्योतनंतरवाक्येसत्यंज्ञानमनंतंब्रह्मेतिब्रह्मलक्षणमु
क्तं तदेषाभ्युक्तेत्यस्यविपश्चितेत्यनेनसंबंधः॥विपश्चिताब्रह्मज्ञानिनैषाऋगभ्युक्ताकथि
ता॥यदिवाद्याविद्विपश्चित्पदस्यसन्निहिततृतीयांतब्रह्मपदेनसाकमन्वयःक्रियतेतर्हिव्या

ब्रा०
१७५
175
वर्ण्याभावेनाव्यावर्त्तकत्वापत्तिः॥ किंच तदेषाभ्युक्तेऽत्यत्र श्रुत्येत्यध्याहारे क्रियमाणे पूर्ववाक्ये ब्रह्म
वेत्तृवच्छ्रुतेरत्तृपक्रांतत्वेनाप्रकृतप्रशंसा स्यात्॥ अतोऽहरस्यस्यापि विपश्चित्पदस्य तदेषाभ्युक्ते
त्यनेन संबंधः कृतः॥ योत्तानीहृद्याकाशे निहितं ब्रह्मस्वाव्यतिरेकेणैव जानाति स्वाभिन्नब्रह्म
स्वरूपमत्त भवतीत्यर्थः सब्रह्मणा सह सर्वान्कामान्मत्त्यानंदप्रभृति ब्रह्मानंदांतानश्नुते प्राप्
नोति ब्रह्माभिन्नः सन्नाप्तकामो भवतीति भावः॥ सोऽकामयतेत्यादिना सृष्टिक्रमं विहाय तत्पू
र्वमेवात्मन आकाशः संभूत इति सृष्टिक्रमनिरूपणं किमर्थमिति यत्पृष्टं तच्छृणु॥ श्रुत्या ब्रह्म
विदः प्रशंसा कृतेति स प्रसंगात् संगत्या ब्रह्मविद्ब्रह्मणः सकाशात्कथमभवतीर्णः कथं वा प्र
नर्ब्रह्म प्राप्नोतीत्याशंकायां तत्समाधानार्थमात्मन आकाशः संभूत इत्यारभ्य ब्रह्म पुच्छं प्रतिष्ठे
त्यंतग्रंथस्य प्रवृत्तिः॥ एतत्संगत्यैवाग्रिमसोऽकामयतेत्यादिसृष्टिवाक्यप्रवृत्तिः॥ आत्मन आ
काशः संभूत इत्यारभ्य अन्नात्पुरुष इत्यंतेन प्राणिनामवतरणक्रमो निरूपितः॥ स वा एष पु
रुषोन्नरसमय इत्यारभ्य ब्रह्म पुच्छं प्रतिष्ठेत्यंतेनारोहणक्रमः॥ तत्र स वा एष पुरुषोन्नरसम
य इत्यारभ्य इदं पुच्छं प्रतिष्ठेत्यंतेनान्नमयपुरुषस्वरूपमुक्तं ब्राह्मणप्रतिपादितोऽर्थोऽयं मं
त्रो भवति॥ अन्नाद्वै प्रजाः प्रजायंत इत्यारभ्य अथैनदपियंत्यंतत इत्येतेनान्नब्रह्मलक्षणमुक्त्वा
न्नब्रह्मोपासनं वक्तुमनंतं स्तौति॥ अन्नं हि भूतानां ज्येष्ठमित्यादिना॥ अन्नब्रह्मोपासकस्य फ १७५

लेनतदुपासनंचाहसर्वंवैतेन्नमाप्नुवंतियेऽन्नंब्रह्मोपासतइति ॥ अन्नोपासकस्यसर्वान्नप्राप्तिर्नामसम
ष्टान्नप्राप्त्यैश्वर्यभावापत्तिर्भवतीत्यर्थः ॥ उक्तान्नब्रह्मलक्षणमुपसंहरतिअन्नाद्भूतानिजायंतइत्यादिना
तस्मादन्नंतदुच्यतइत्यंतेन ॥ तत्रअद्यतेऽत्तिचभूतानीत्यस्यायंभावः यावदन्नोपासनासिद्धिर्नभवतिता
वदन्नंभूतान्यत्तिभूतान्यन्नवशगानिभूत्वाजायस्वम्रियस्वेत्यादिश्रुतिप्रामाण्येनात्रैवभ्रमंतीति
॥ अद्यतेप्राणिभिरितिविशेषः स्वाधीनीक्रियते ॥ यदान्नब्रह्मोपासनांनेनाऽसदिशारीरतपःसाधनासहिते
नान्नमयकोशंजयंतितदाप्राणब्रह्मोपासनायोग्यतांप्राप्नुवंतीतिभावः ॥ एवंध्यानधारणादितपःस
हितेनप्राणब्रह्मोपासनेनयेप्राणमयकोशंजयंतितेमनोब्रह्मोपासनायोग्यतांप्राप्नुवंति ॥ एवंमनो
मयकोशेप्यत्रायंविशेषः ॥ तस्ययजुरेवशिरः यजुर्मंत्रालोचनात्मिकामानसीवृत्तिः शिरःऋ
मंत्रा ६ ग्मंत्रालोचनात्मिकावृत्तिर्दक्षिणःपक्षः सामालोचनात्मिकावृत्तिरुत्तरःपक्षः अथर्वमंत्रालोच-
नात्मिकावृत्तिःपुच्छंअवरभागः ॥ यतोवाचोनिवर्तंतइतिमंत्रस्यायंभावः निर्गुणब्रह्मलक्षक
वाक्यानांनैरंतर्येणमानसिकाभ्यासःकर्तव्यः एतेनचनरपदार्थवृत्तिनिरासद्वाराचित्तस्थैर्यंभवती
तिमनोब्रह्मोपासनमावश्यकं ॥ तेनोपासनेननकदापिभयंनभवतीतिफलंदर्शितं ॥ एवंशमदमा-
दिसहितेनमनोब्रह्मोपासनेनमनोमयकोशंजित्वाविज्ञानब्रह्मोपासनयोग्यतांप्राप्नोतीति ॥ किंच
यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिवाक्यप्रतिपाद्योयोऽयंब्रह्मानंदस्तद्दर्शनंरुत्वेनमानसोपास

ह्मा०
१७६
176
नंकर्त्तृकं ॥ आनंदइत्येनदुपासीतकानंदतायात्तवल्लामनसाएवसम्नालितिश्रुतेस्तेनाभयप्राप्तिमेव
तीत्यादिसमाने ॥ निश्चयात्मिकाबुद्धिर्विज्ञानमयकोशः ॥ आस्तिक्यबुद्ध्यात्मिकाश्रद्धातस्यशिरः ॥
यथार्थबुद्धिर्दक्षिणः पक्षः सर्वत्रसमदर्शनमुत्तरः पक्षः ॥ बुद्धेः स्थिरीभावआत्मा ॥ महत्तत्त्वंपुच्छं
प्रतिष्ठाआधारभूतं ॥ विज्ञानंब्रह्मेत्युपासीततदुपासनात्सर्वमानंदंप्राप्नोतितस्येदंफलंशरीरेपाप्म
नोहित्वासर्वान्कामान्समश्नुतइति ॥ एवंविज्ञानब्रह्मोपासनेनश्रवणमननसहितेनविज्ञानमय
कोशंजित्वानंदब्रह्मोपासनयोग्यतांप्राप्नोति ॥ एवमानंदमयकोशस्यमूलाज्ञानोपाधिरानंद
मयः ॥ स्वात्मविषयकप्रीतिः शिरः ॥ आत्मवस्तुन्यधिकारविर्मोदः सदक्षिणः पक्षः ॥ ततो
ऽप्यधिकारविरूपप्रमोदउत्तरः पक्षः ॥ आत्मलाभरूपआनंदआत्मा ॥ तदधिष्ठानभूतंब्रह्मपु
च्छंचरमभागः ॥ एवमानंदब्रह्मोपासनेननिदिध्यासनसहितेनाऽनंदमयकोशंजित्वास्व
रूपसाक्षात्कारद्वारापुच्छशब्दलक्ष्यसत्यज्ञानादिलक्षणलक्षितब्रह्मस्वरूपोभवति ॥ तस्मा
द्ब्रह्मविदुक्तरीत्याऽन्नमयादिपंचकोशजयद्वारापरमाप्नोति ॥ अन्नमयादिपंचकोशनिराक
रणंकृत्वाऽनंदमयकोशाधिष्ठानत्वेननिरूपितंब्रह्मेंद्रियाद्यगोचरत्वेनप्राप्तुंशृंगादिवच्छू
न्यमेवस्यादित्याशंकानिराकरणार्थमसन्नेवसभवतीत्यादिग्रंथप्रवृत्तिः ॥ इत्यद्वैतादित्यउ
न्नारायणोद्वादशार्कैसहज्ञानंदस्तुव्रतसंवादेब्रह्मवल्ल्युपनिषच्छ्रसमाधाननिरूपणंना १७६

अथषष्ठोरश्मिः॥६॥॥॥सदानंदउवाच॥॥॥॥हेशिशोऽन्नमयादीनांकिमर्थंब्रह्मत्वंस्वीकर्तव्यमितियत्पृ
ष्टंतच्छृणु॥पंचकोशजयमंतराब्रह्मज्ञानंनभवतीतितस्मान्नयेऽन्नमयादीनांब्रह्मत्वेनोपासनमुक्तंतत्रप्रत्यर्थंस
र्वैवैतेऽन्नमाप्नुवंतीतितत्तदुपासनाफलमप्युक्तं॥यथालोकेबालकस्यरोगनिवृत्त्यर्थमौषधेदातव्येतस्यरोचनार्थंल
ड्डुकादिप्रदर्शनेनहृत॥यथावालोकेराजदर्शनार्थिनांतदीयप्रतिवारद्वारपालाद्युपसर्पणद्वारातज्जयमंतरारा
जदर्शनंनभवतितथाब्रह्मदर्शनार्थिनांतत्प्रतिबंधकीभूतान्नमयादिषुब्रह्मत्वेनोपासनद्वारातत्पंचकोशजयेन
ब्रह्मदर्शनसामर्थ्यंभवत्यतोऽन्नमयादिपंचकोशानांब्रह्मत्वेनोपासनमावश्यकं॥आनंदमयकोशस्यैवब्रह्मत्वमु
नान्यस्येतियत्पृष्टंतदपिश्रोतव्यं॥यद्यप्यन्नमयादारभ्यतदंतरंतदंतरमात्मानंनिरूप्यानंदमयापेक्षयाऽन्यों
तरात्मानेतः॥एवमानंदस्यब्रह्मस्वरूपत्वेनानंदमयस्यब्रह्मस्वरूपत्वकथनमुचितंतथाप्यन्नमयादिवद्विका
रार्थकमयट्प्रवाहपतितत्वेनब्रह्मणोब्रह्मपुच्छवाक्येनतदधिष्ठानत्वेननिरूपणेनचानंदमयस्यजीवत्वं॥
तदन्यस्यतत्पुच्छत्वेनप्रतिपादितस्यैवब्रह्मत्वमितिबोध्यं॥अथातोनुप्रश्नाश्चतुष्टयस्योत्तरंवक्तव्यंतदितिय
त्पृष्टंतच्छृणु॥उताविद्वानमुंलोकंप्रेत्यकश्चनगच्छति॥आहोविद्वानमुंलोकंप्रेत्यकश्चित्समश्नुता३उ॥प्रश्न
प्रश्नचतुष्टयस्योपपत्तिरेवं॥अविद्वानितःप्रेत्यामुंलोकंस्वर्गादिकंगच्छतीत्येकःप्रश्नः॥नवागच्छतीतिद्वि
तीयः॥एवंविद्वानपीतःप्रेत्यामुंलोकंसत्यलोकादिकमश्नुतइतितृतीयः॥नवाश्नुतइतिचतुर्थइति॥एतेषा
मुत्तरत्वेनप्रश्नचतुष्टयांगीकारार्थंवाउ३इत्युकारःप्लुतत्वेनपठितः॥निपातानामनेकार्थत्वात्॥तस्यायमर्थः॥अवि

त१ प्रश्नाद्यत्पत्र ५+

ज्ञानस्तु कृतवानितः प्रेत्यामुं स्वर्गलोकं स्वकर्मानुसारेण गच्छतीति गमनमंगीकृतं॥ कश्चनाविद्वान्यापी प्रेत्याऽत्रैव जाय
स्वम्रियस्वेति श्रुतिप्रामाण्येन कृमिकीटमशकादिरूपेण भ्रमतीति न गच्छतीत्यप्यंगीकृतं॥ उताहो कश्चन विद्वानप्यप
रिपक्वब्रह्मज्ञानीतः प्रेत्य सत्यलोकादिकं प्राप्य तत्रैव मश्नुत इत्यप्यंगीकृतं॥ परिपक्वब्रह्मसाक्षात्कारवान्विद्वान् स
त्यलोकादिस्थानं न गच्छतीत्यगमनागमनरहितः संल्लिंगदेहभंगपूर्वकमत्रैव विदेहकैवल्यमश्नुत इत्यप्यंगीकृ
तं॥ एवं प्रश्नचतुष्टयं गीकारार्थकउकारो द्रष्टव्यः॥ ब्रह्मज्ञानिनो ब्रह्मानंदावाप्ते विचारितत्वात् मनुष्याद्यानंदावाप्ति
वा यतस्य किं प्रयोजनमिति यत्पृष्टं तत्र चूक्तम्॥ तत्राकामहतस्य श्रोत्रियस्य सार्वभौमानंदप्रभृतिब्रह्मानंदपर्यंतस्य
प्राप्तिर्नोच्यते किंतु तस्मिन्विद्यमानानंदस्यानुवादः क्रियते तस्मिन्सार्वभौमानंद(प्रभृतिब्रह्मानंद)पर्यंतानां कथं सिद्धिरिति चेदुच्यते
लोके येन येन मनुष्येण यावद्यावत्साधनोपासनादिकं संपादितं तस्य तस्याधिकारतारतम्येन तत्तल्लोकानंदावाप्ति
र्भवतीति नियमः॥ तथा चाकामहतेन श्रोत्रियेण निःशेषसाधनादिकं संपादितमिति सर्वलोकानंदास्तस्य सिद्धाः १६
परंतु तस्याकामहतत्वात्तस्मिन्नर्थानंदे सक्त्यभावेन विदेहकैवल्यस्यैव प्राप्तिर्भवति॥ यद्विकदाचिदकामहतस्य श्रो
त्रियस्यापि कामत्वेन तदानंदस्य ब्रह्मानंदतुल्यत्वेन वक्तुमुचितात्तु मनुष्याद्यानंदतुल्यत्वेन नोच्यते तर्हि लोकेः किंचन
स्यात्तत्र धनाद्यवाप्तौ संतोषाधिक्येन यथा ब्राह्मण एव निर्गच्छतीति न तथा मनुष्याद्यानंदावाप्तियोग्यतामसंपाद्य ब्रह्मानंदावा
प्तये यतते इह दृष्टांतस्थानीयस्तु न स्नात एव भवतीति तन्माभूदिति मनुष्यानंदप्रभृतिब्रह्मानंदक्रमः कथितः॥ तथा च पूर्वपूर्वयो
ग्यतासिद्धावुत्तरयोग्यतां संपाद्य तद्द्वारा ब्रह्मानंदं प्राप्नोतीति भावः॥ अकामहतश्रोत्रियानंदस्य मनुष्याद्यानंदसाम्ये

१ तरो

वेनधर्मेणेतिचेच्छृणु ॥ सार्वभौमानंदस्यतदर्वाचीनमानुषानंदानामवधित्वेनतस्यतदर्वाचीनानंदकामनानन्तायतश्चा
मत्वादेवमकामहतस्यश्रोत्रियस्यमानुषानंदकामनानन्तायतत्वात्तत्कामत्वेनसाधर्म्यमेवमग्रेऽपिसर्वत्रयोजनीयं
इत्यद्वैतादित्यउत्तरायणेद्वादशार्कसहजानंदसंवादेब्रह्मवल्ल्युपनिषत्प्रश्नसमाधाननिरूपणंनामसप्तमो
रश्मिः ॥ ७ ॥ ॥ मधुपउवाच ॥ ॥ भोप्रभोसहजानंदेनसत्यसंधायुष्मत्कृतितात्पर्यमुपदिष्टंतच्छ्रुत्वाऽहमपिकृ
तार्थोस्मि ॥ इतः परंपद्मिराजेनपरमगुरुणाश्रुतितात्पर्ययद्यदुक्तंतच्छ्रोतुमिच्छामि ॥ ॥ आत्मारामउवाच ॥ ॥
हेमधुपवाढंविद्वद्वरः पद्मिराजसमीपात्वैविज्ञापितवान्भोगुरोभवदनुग्रहेणमयावेदांतशास्त्रमप्यधीतं ॥ परंतु
कठवल्ल्युपनिषद्दिव्यविद्याविस्तरेद्वावर्थौतेनतन्निवारणंभवंतंविनासमर्थः कोऽपिनदृश्यतेऽतः कृपयातद्विवेचनेन
सर्वसंशयनिवारणंकार्यं ॥ पद्मिराजेनोक्तंतवयेयेसंशयास्तेतेपृष्टव्याः ॥ भद्रकउवाच ॥ भोगुरोनचनचिकेतसस्तृ
तीयप्रश्नस्योत्तरंकेनवाक्येनभवतिनज्ञातं ॥ किंचयेयंप्रेतेविचिकित्सामनुष्येऽस्तीत्येकेनायमस्तीतिचैकइति
तृतीयप्रश्नेनास्तीतिपदेनास्तिकमताभिप्रायकमित्युच्यतेनहिपूर्ववाक्यविरोधंस्यात्नप्रश्नोऽपिपामरकृतः स्यात् ॥
नचैवंतास्तुनपामरः किंत्वास्तिकोऽनुशयोपदेशयोग्यतासंपन्नश्च ॥ अन्यथाऽनंदानामतेलोकास्तान्सगच्छतीतिना
इदृइत्यादिकथंवदेत् ॥ कथंवास्वर्गादायकाग्निविद्यानिषेधकद्वितीयप्रश्नंकृतवान्स्यात् ॥ किंचमत्युरपिसत्वंप्रिया
न्प्रियरूपांश्चकामानभिध्यायन्नचिकेतोऽत्यस्राक्षीरित्यादिनानचिकेतसंकथंस्तुवीयात् ॥ अपिचमत्युरुति
ताऽनुसारेणवरत्रयंयाचित्वापुनरन्यत्रधर्मादन्यत्राधर्मादित्यादिनानचिकेतसाचतुर्थप्रश्नः कथंकृतः ॥ किंच

कठो॰ ज्ञानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तदित्यनेन मृत्युरनित्यैर्द्रव्यैर्नित्यप्राप्तिर्न भवतीत्युक्त्वा ततो मया नाचिकेतश्चि- तोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यमित्यनेन
१७८ अनित्यैर्नित्यप्राप्तिमुक्त्वा तत्त्वार्थं संगच्छते ॥ पत्निराजउवाच ॥ हे शिशो येयं प्रेते विचिकित्सेत्यादितृतीयप्रश्नेन चिकेत-
178 सो जीवनास्तित्वकोटिकः संशयो न भवति ॥ किंतु नचिकेतोऽभिप्रायस्त्वेवं ॥ यदुक्तं रमणीयचरणा अभ्याशो ह यत्ते र-
मणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वेत्यादिना ॥ आत्मन इह लोकपरलोकगमनागमन-
प्रवाहः श्रूयते क्वचित् ॥ न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिना विदेहकैवल्यप्राप्तिः श्रूयते ॥ एतत्तत्त्वं
वीक्षामिति ॥ इदं तु परमरहस्यमतो मृत्युः प्रत्युत्तरं न दत्त्वा शिष्यपरीक्षार्थं तं प्रश्नं निषिध्य शतायुषः पुत्रपौत्रान्वृणी-
ष्वेत्यादिना शिष्यं लोभयित्वा ततः स्वाभावामर्त्यस्य यदुक्तं केत्यादिना वरस्तु मे वरणीयः स एवेत्येतेन शिष्यवाक्येन तद्दृ-
ष्ट्वा वैराग्यं दृष्ट्वा प्रसन्नः सन् स्वप्रस्तुतस्य ब्रह्मप्राप्त्युपायांतराभावे च एक उपायोऽस्तीति मनसि निधाय जानाम्यहं शे-
वधिरित्याद्युपदिष्टवान् ॥ यद्वेदं वाक्यं द्वितीयप्रश्नोत्तरं स्यात्तर्हि ततो मया नाचिकेतश्चितोऽग्निरित्यत्राग्निपदं श्रौतोऽग्नि-
परं स्यादिदं तु तृतीयप्रश्नोत्तरं तस्मादिदमग्निपदं ज्ञानाग्निपरं ॥ अनित्यैर्द्रव्यैर्वैरंतःकरणेंद्रियादिभिर्ज्ञानाग्नौ हुतैर्नि-
त्यस्वरूपं प्राप्तवानस्मीत्येतद्वाक्यतात्पर्यं ॥ अनंतरं तं दुर्दर्शं गूढमनुप्रविष्टमित्यादिगुरुवाक्यस्य स्वरूपलक्षणप्र-
तिपादकत्वसंगत्यात्तृतीयप्रश्नांतर्गतब्रह्मविषयकप्रश्नोऽन्यत्र धर्मादन्यत्राधर्मादित्यादिना कृतः ॥ तस्योत्तरं तु
सर्वे वेदा यत्पदमामनंतीत्यारभ्य ओमित्येतदित्येतेन गुरुणा दत्तं ॥ येयं प्रेत इत्यात्मविषयकात्तृतीयप्रश्नोत्तरं तु न जा-
यते म्रियते वेत्यारभ्याध्यायपरिसमाप्तिपर्यंतं ज्ञेयं ॥ पारमार्थिकव्यावहारिकभेदेन जीवस्य प्रकारद्वयं यो जीव-

त्वभ्रांतिनिरासे सति विदेहकैवल्यं प्राप्नोति स पारमार्थिकात्मलक्षणं तु न जायते म्रियत इत्यादिना प्रतिपादितं ॥ य
स्त्वकर्मबद्धः संसारासक्तो जन्ममरणप्रवाहे भ्रमति यस्य जीवत्वं पारमार्थिकं भासते स व्यावहारिकः ॥ तत्स्वरूपं
तु योनिमन्ये प्रपद्यंत इत्यादिना निरूपितं न जायते म्रियत इत्यादिवाक्यं जीवपरमात्मब्रह्मपरमिति शिष्यस्य संदे
हे तन्निबोधनार्थं तृतीयखंडे ऋतं पिबंतौ सुकृतस्य लोक इत्यादिना जीवपरयोर्लक्षणनिरूपणं कृतं ॥ वाच्यलक्ष्यभेदे
न शक्त्यैकं जीवपरयोर्द्वैविध्यं ॥ तत्रात्मानं रथिनं विद्धीत्यारभ्य सत्तु तत्पदमाप्नोति यस्माद्भूयो न जायत इत्यंते
नोभयजीवनिरूपणं कृतं ॥ ब्रह्मणस्तु यः सेतुरीजानानामक्षरं ब्रह्म यत्परं ॥ अभयं तितीर्षतां पारं नाचिकेतं शं
शाके महीत्यनेन वाच्यस्वरूपं निरूप्यात हि लोः परमं पदं ॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ अशब्दमस्प
र्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यदित्यादिना कैवल्यस्वरूपं च प्रतिपादितं ॥ ॥ ॥ इत्यैहितादित्यउन्नराय
णोद्धादशार्के पहिराजभइकसंवादे काठवल्ल्युपनिषद्भावार्थनिरूपणं नामाष्टमो रश्मिः ॥८॥ भइक उवाच ॥ भो
गुरो उक्तं द्वैरेयोपनिषदः षष्ठाध्यायस्यैकादशद्वादशखंडयोस्तात्पर्यं मया सम्यङ्न ज्ञातं तत्त्वं ग्रहेण निरूपणीयं
पहिराज उवाच ॥ ॥ हे शिशो ऽत्र महद्भूतपदस्थानीयमिदं शरीरं ॥ यः कश्चन पुमान् केनापि हेतुना मूले स्ववस्थ
चतुराद्यैमध्ये हस्तादावग्रे पादादौ वा ऽभ्याहन्यात्ताडयेत् सतत्तदिंद्रियादिकं जीवं त्वत्वेन जीवत्वेव स्वत्वेन न शुष्यन्
द्वहजन्मनि जन्मांतरे वा तत्पुनः संप्राप्स्यतीति भावः ॥ स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठती
त्यस्य तात्पर्यमेवं ॥ अयं स्थूललिंगसाधारणशरीरात्मको वृक्षो जीवेन तादात्म्यापन्नः संस्तत्तद्विषयाननुभवन्न

सन्नः सम्प्रमाणितस्तिष्ठतीति ॥ यदिजीवएकमिंद्रियंत्यजतितच्छुष्यतिविषयवासनारहितंभवतियदिद्वितीय
मिंद्रियंतृतीयमिंद्रियंसर्वमिंद्रियजातंचजहातितत्तन्तस्यस्वविषयवासनाशून्यंभवति ॥ एवमेवदर्शितक्रमेणै
वसोम्यसोमवन्निम्रियदर्शनहेश्वेतकेतोविद्धिजानीहि ॥ जीवापेतंवाववकिलेदंजीवेनात्मनारहितंशरीरंम्रियतेवि
षयाद्विमुक्तंभवतिनजीवोम्रियतेजीवस्यशुद्धबुद्धमुक्तस्वभावत्वेनशरीरद्वयतादात्म्यनाशात्स्वयंननश्यतीतिकिं
तुब्रह्मस्वरूपोभवतीत्यर्थः ॥ द्वादशखंडस्यतात्पर्यमेवंसर्वमिदंजगद्ब्रह्मणःसकाशादुत्पन्नमितिशास्त्रसिद्धां
तः ॥ ब्रह्मनीरूपंसूक्ष्मतरंच ॥ तस्मात्स्वरूपस्थूलस्यजगतउत्पत्तिःकथंसंभवेदित्याशंकायांतदुत्तरत्वेनैतत्खं
डमुत्थानं ॥ ॥ सर्वत्रबीजेषुतत्सूक्ष्मत्वातिष्ठतियेनांकुरोत्पत्तिर्भवतिसर्वेषुबीजेषुप्रकाटतःकेषुचित्प्रकाटत
श्चतिष्ठति ॥ वटबीजंत्वतिसूक्ष्मंतद्गतमज्ञात्वतिसूक्ष्मतमः ॥ सर्वेषांदृष्टांतानांमध्येवटदृष्टांतस्त्वत्यंतस्थूलइति
वटबीजगतदृष्टांतेनश्रुत्यासमाधानंकृतं ॥ तथाहि ॥ उद्दालकारुणिःश्वेतकेतुंन्यग्रोधफलमतआहरेत्यु
क्तवान् ॥ श्वेतकेतुरपिइदानीयेदंभगवइतिदर्शितवान् ॥ सोपितच्छ्रुत्वातद्भिंधीतिपुनराहभिन्नमितिप्रत्युक्तिः तत्र किंपश्यसीतिप्रश्नः सूक्ष्मतराधानाइति प्रत्युक्तिः
तत्रैकांधानांभिंधीतिपुनराहभिन्नाभगवइतिप्रत्युक्तिः ॥ किंतत्रपश्यसीतिप्रश्नस्तद्गतमज्ञानाऽतिसूक्ष्मानान्नदृ
ष्टमशक्नःसन्नाहनकिंचनभगवइति ॥ अतोयंवैसोम्यैतमणिमानंहेश्वेतकेतोननिभालयसेनपश्यसितस्यवै
सोम्यैषोणिम्नएवंमहान्न्यग्रोधस्तिष्ठतिहेसोम्ययंसूक्ष्मतमंमज्जानंनपश्यसितस्यैवसूक्ष्मतमस्यमज्ज्ञए
षमहान्न्यग्रोधस्तिष्ठति ॥ यथायंदृष्टांतएवंसर्वस्यापिनिषेधेकृतेसर्वनिषेधावधिभूतंयत्सूक्ष्मतमंवस्तु

तत्सकाशादिदं सर्वं जगदुत्पन्नमिति श्रद्धत्त्वविश्वासं कुर्विति ॥ भद्रक उवाच ॥ भो गुरो ब्रह्म सर्वत्र व्यापकमिति
सिद्धान्तः ॥ मृतदेहे चैतन्याभावेन कथं ब्रह्मणस्तद्व्यापकत्वं ॥ पतिराज उवाच ॥ हे शिष्य प्रेतशरीराच्चेतना
भूतस्य निर्गतत्वेन तद्धे चेतनं भवति ॥ न तु ब्रह्मणोऽभावेन ॥ ब्रह्मणस्तु गमनागमनाभावेन घटपटादिष्विव तत्रापि
व्यापकत्वमक्षतमेव ॥ तत्तु चराचरेषु सर्वत्र सर्वदा व्याप्यैव तिष्ठति ॥ तस्मात् घटपटादिवदचेतनं सर्वं ब्रह्मर
हितं न भवति ॥ यदि मृतशरीरं ब्रह्मविहीनं स्यात्तर्हि तस्य स्थितिरेव न स्यात् सर्वस्यापि ब्रह्मसत्ताधीनसत्तावत्त्वा
दन्यथा प्राणोत्क्रमणोत्तरक्षणे तदप्यलीकमेव स्यात् ॥ भद्रक उवाच ॥ भो गुरो ब्रह्मण एवमुक्तरीत्या सर्वपदा
र्थसंगित्वेन असंगो ह्ययमिति श्रुतिवचनप्रतिपाद्यासंगित्वं कथमुपपद्यते ॥ पतिराज उवाच ॥ हे शिष्य सर्वपदा
र्थैः साकं ब्रह्मणः संसर्गोऽद्वयद्वयसंसर्गापेक्षया गुणद्वयसंसर्गापेक्षया गुणगुणिसंसर्गापेक्षया स्थूलसू
क्ष्मसंसर्गापेक्षया विषयविषयिभावसंसर्गापेक्षया च विलक्षण आरोपितरञ्जनेन साकं शुक्त्यवच्छिन्नचैतन
न्यसंसर्गवदाध्यासिकः सर्वत्र विद्यमानमपि ब्रह्मादृश्यत्वाद्यथा नास्तिवज्ज्ञायते तथा तत्संसर्गोऽपि सर्वत्र वि
द्यमानोऽपि सूक्ष्मत्वान्न भाति ॥ भद्रक उवाच ॥ भो गुरो सर्वपदार्थप्राप्तिर्यदि कर्माधीना भवति तर्हि तत्प्राप्तये भ
गवदाराधनं किमर्थं कर्तव्यं ॥ पतिराज उवाच ॥ हे शिष्य यमेवैष वृणुते तेन लभ्य इति श्रुत्या यथास्वरूपप्रा
प्तिः परमात्माधीना तथा सर्वपदार्थप्राप्तिस्तन्निष्ठनिश्चयपरमात्माधीनैव ॥ कर्मणो जडत्वेन कर्माधीना न भ
वति ॥ वैषम्यनैर्घृण्यदोषनिवृत्त्यर्थं कर्मणः सहकारित्वमपेक्षते ॥ न तु तत्स्वातन्त्र्यं ॥ तस्मात्संयोगवियोग

श्री·
१८०
180

कर्त्ता सर्वकर्मफलदाता च परमात्मैव ॥ एष ह्येव साधु कर्म कारयतीत्यादिश्रुत्या स्वकृतं न दुष्कृतं न कारयिता कस्य
चित्संचिते पापाधिकारमस्ति तन्निवृत्त्यर्थं स परमात्मशरणं गतश्चेत् प्रायश्चित्तादिना तत्पापनाशं कारयिता कस्य
चित्पुण्याधिकारमस्ति स कर्मास्थां धृत्वा गर्विष्ठः सन् परमात्मविमुखो भवति तेन पापकर्म कारयित्वा तत्पुण्यह
पकारयिता च परमात्मैव ॥ एवं सर्वस्य वशी सर्वस्येशान इति श्रुत्या सर्वं परमात्माधीनमेव ॥ तस्मात्त्वं शुभ
कर्मादिष्वाग्रहं परित्यज्यानन्यभावेन तच्छरणं व्रज ॥ भक्त उवाच ॥ ॥ भो गुरो परमात्मानं निर्गुणं निष्क्रियं
शान्तमित्यादिश्रुत्याऽक्रियं स्थापयन्ति ॥ सर्वकर्मा सर्वकाम इति श्रुत्या महाकर्मा महाज्ञातुरिति स्मृत्या च स
क्रियमपि स्थापयन्ति ॥ किंच प्राणिनां कर्माचरणे कामक्रोधादीनां प्रेरकत्वमन्तर्यामिणोऽपि प्रेरकत्वं वदन्ति
अपरं च कर्माचरणे जीवस्य स्वातन्त्र्यं ज्ञायते ॥ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥ केना
पि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमीति प्रमाणेन परमात्मन एव स्वातन्त्र्यं भासते ॥ अत्र यद्वे
णे तन्मे बोधय ॥ ॥ पण्डित उवाच ॥ हे शिष्य वस्तुतः परमात्माऽक्रिय एव परं तु तदैक्षत बहु स्यां प्रजाये
येति सोऽकामयत बहु स्यां प्रजायेयेत्यादिना कार्यमात्रस्य परमात्मस्वरूपत्वे क्रियावत्त्वमप्युपगीकर्त्तव्यं ॥ स
र्वस्य ब्रह्मस्वरूपत्वेन कर्तृकार्यक्रियादीनां ब्रह्मव्यतिरिक्तत्वं कथं स्यात् ॥ ब्रह्मातिरिक्तभावनैव ब्रह्मभिन्नप्रपंच
संपादिका ॥ अनादिनाऽविद्ययैव विना ब्रह्मातिरिक्तभावना सर्वं च ब्रह्मभावनया निवृत्ता चेत्तदा ब्रह्मातिरिक्तप्रपं
चोऽपि निवर्तते ॥ प्राणिनां कर्मप्रेरकोऽन्तर्याम्येव परं तु तत्तत्प्राणिकर्मानुसारेण ॥ प्राणिनः संचिते पापाधिकं

चेन्नदातच्चित्तेकामक्रोधादीनांप्राबल्यंभवति॥ अतोंऽतर्यामीकामक्रोधादिद्वारातच्चित्तंपापकर्मसुप्रेरयति॥ य
दितुण्याधिक्यंस्यात्तदाऽक्रोधाहिंसादिद्वारापुण्यकर्मसुप्रेरयति॥ तस्मादंतर्यामिण्एवप्रेरकत्वेनतत्कामादीनां
कर्माचरणेयद्यप्यहंकारोमीत्यादिप्रतीत्याजीवस्यस्वातंत्र्यंभासतेतथापिजीवस्यस्वातंत्र्यांगीकारेसर्वदास
र्वोपीष्टमेवकुर्यात्नतुनसंभवतिदृष्टविरोधात्॥ एवंजडत्वात्कर्मणोपिस्वातंत्र्यंनसंभवति किंतुसर्वस्वातंत्र्यं
परमात्मनएव॥ जानामि धर्ममितिश्लोकोयद्यपिश्रीव्यासप्रणीतस्तथापितद्वक्तृदुर्योधनस्यासुरप्रकृतिम
त्वेनसस्वात्मनिदोषमनंगीकृत्यांतर्यामिणिदोषमारोपयति॥ अंतर्यामीतुसर्वदासर्वदोषरहितः॥ वस्तुतो
दोषः प्राणिनएवधर्मंजानन्नपिसंचितस्यपापाधिक्याद्धर्मेनप्रवर्त्तते॥ अधर्मंतत्फलंचजानन्नपिसंचि
तस्यपापप्रभावेणयदातस्यचित्तमधर्मेचरणमालोचयतितदास्वकर्मोपरिदोषंस्थापयित्वापरमात्मानंश
रणंगत्वाऽधर्मवासनानिवृत्त्यर्थंनप्रार्थयते॥ तस्माद्दुःशिशोत्वंजीवंकर्त्तारंमत्वाऽशुभकर्मभगवदाराधनंचप
श्चात्करिष्यामीतिमत्वेंद्रियजन्यसुखलाभार्थंधार्ष्ट्याद्दुष्कर्माचरणेच्छांमाकार॥ किंचदुर्योधनवत्कर्त्ता
कारयितापरमात्मैवेतिमत्वानिश्चिंतोभूत्वाऽशुभकर्माचरणद्वारावद्धजननाच्चविमुखोमाभव॥ यदातववचित्तमध
र्माचरणमिच्छेत्तमादाद्वाऽधर्माचरणंभवेत्तदास्वात्मोपरिस्वकर्मोपरिचदोषंसंस्थाप्यपरमात्माऽधीनःस
न्दुर्वासनानिवृत्त्यर्थंसविनयंतमेवप्रार्थय॥ तस्मात्सर्वभावेनतमेवशरणंव्रज॥ इत्यद्वैतादित्यउत्तरायणे
द्वादशार्केपरिहिराजभट्टकसंवादेपरमात्मनःसर्वव्यापकत्वस्वातंत्र्यनिरूपणंनामनवमोरश्मिः॥९॥

ह्रा०
१८१
181

मधुपत्रवाच॥ हे कृष्ण मद आत्मारामानुग्रहेणैतन्मुखोक्तसकलग्रंथपवित्रसंवादं सम्यक्श्रवणं चरित्रं चानयादरेण श्रुत्वा
विगतसंशयः संस्तदनुसारेण साधनादिद्वारा भवबंधनान्मुक्तो भूवं॥ इदानीमहं तादृशरहस्यश्रवणार्थं त्वं विज्ञापि
तवानसि अतस्त्वदभिलाषानुसारेण त्वां प्रत्यहं तादृशवर्णनं ज्ञातवानस्मि॥ यदि त्वमपि मदुक्तानुसारेण श्र
द्धाभक्तिपूर्वकं श्रवणानुसारेण स्वहृदये तद्रहस्यं सम्यक् स्थापयित्वाऽभ्यासं वारोषितवांस्त्वमपि भवबंधनान्मु
क्तो भविष्यसि॥ एवं ये के च न श्रद्धाभक्तिसहितां श्रवणपठनादिकं करिष्यंति तेषामिह लोके शुभं परलोके चोत्तम
गतिश्च भविष्यति॥ ये चैतद्ग्रंथवर्तीं रेखलेखनीलेखकादिवत्साधनमात्रं मत्वा तत्स्वैरं परमात्मानं कर्तारं मत्वा श्रद्धा
भक्तिपूर्वकमेतत्संवादं सम्यग्विचार्यैतद्रहस्यं हृदि निधाय तदनुसारेणाचरिष्यंति तेऽपीह लोके ज्ञानसंपदं परत्र प
रमगतिं च प्राप्स्यंति॥ कृष्णो हे मधुप सकाशादेतत्सर्वं श्रुत्वा तद्रसास्वभावेनोन्मत्तः सन्नत्यस्या ज्ञाननिवृत्त्यर्थं परमा
त्मानं प्रार्थयति॥ कृष्णदेव उवाच॥ हे परमात्मंस्त्वच्छरणागतवत्सल यद्यप्यहमनेकजन्मार्जितपापसंचयेन नीचयो
निं प्राप्तोऽस्मि तथापि त्वं सर्वेश्वरत्वसर्ववशित्वादिगुणकं पुराणादिषु लोकबंधुत्वसर्वसुहृत्त्वादिधर्मविशि
ष्टं च त्वां ज्ञात्वा सर्वविषयेभ्यो निराशो भूत्वा त्वच्छरणं गतोऽस्मि॥ हे नाथ बंधो मयि सर्वमिदं प्रोक्तं सद्गुणैर्मणिग
णाद्भवेति त्वयैतदुक्तं तस्माद्वयं मणिगणास्त्वदाज्ञासूत्रेण बद्धास्त्वदधीनाः अहं नर्तकत्वं कुर्विति मम विधिं करो
षि चेन्नहि मया कथं वर्तुं शक्नोति॥ विरक्तिं न ददसि त्वं मा कुर्विति मां वदसि चेन्नहि मया तन्निवर्तितुं कथं शक्नोति तस्मा
द्धे प्रभो मोहनिवृत्त्यर्थं विरक्तिं देहि तत्पूजार्चनार्थं श्रद्धां त्वयि विलयार्थं मनन्यभक्तिं च देहि॥ पाहि पाहि दीनना

ह६
१८१

थलोभान्निराहात ॥ त्राहित्राहिजगन्निवासाहं ममतापाशात् ॥ हे हरे हे हरे भक्तवत्सल संतोषजीवने ॥ तवदत्तग्र
हाद्दतेन मया विहंसितगतिर्मम ॥ तवाद्वैतासद्दशरूपस्य ममालाभोऽस्ति तस्मात्त्वदन्यदृष्टं कृतवानस्मि ॥ अतएवत्वा
द्भुतशोभां दर्शयित्वा मद्धृदयादन्यथाशोभानिवारणीया ॥ यस्त्वां नि(हि)शान्येकालेन सत्वदन्यं त्यज्य तितनत्वहृणं तस्माद्दे
हि विरहव्ये स्वभक्तपदपंकजपरागरेणुं तवैकाद्वितीयरूपसाक्षात्कारार्थं भजामि नित्यं स्वलोचनांधज्योतिषितरु
द्भुतांजनरूपरेणुं ॥ नयाचेवैषयान्भोगान्न च राज्यं स्ववोनिच ॥ त्वन्नस्त्वामेवयाचेऽहं स्वात्मानं हि समर्प्यते ॥ २ ॥
णतत्प्रार्थनाः नंतरं कुसुदेपरि भगवत्प्रसादो जातः ॥ तेन स कुसुदत्वाद्विमुच्य परां गतिं प्राप्तवान् ॥ ननु मधुपेन त्व
सुदं प्रत्यद्वैतादित्यग्रंथस्योपदेशः कृतः तथैदपि मधुपस्य लेखनयोग्यावयवविहीनत्वेन कथं ग्रंथनिबंधो जातः पे १
तत्संवादं श्रुत्वा केनचिन्मनुष्येण लिखितं इत्युच्यते तर्हि तदपि न संभवति मधुपकुसुदयोः संस्कृतभाषाकथनं
प्यावयवाभावादिति चेदुच्यते ॥ अथैतावत्पर्यंतं स्वप्रतिष्ठानिहृत्यर्थं स्वनामगोपनं कृत्वा मधुपकुसुदसंवादरू
पेण यं ग्रंथः कृतः ॥ तथापीदानीं श्रोतृणामियं शंका जाता इत्येतत्परिहारार्थं ग्रंथकर्त्रा स्वनामप्रकटनं क्रियते
परंतु मम सत्संगत्या भगवत्प्रसादेन चाबाल्याद्ज्ञानयोगविचारे भगवद्विभूतिविचारे श्रीहरिहरविविंचित
त्वविचारादौ च यस्य यस्य विषयस्य स्फुरणमभूत्तस्य तस्य विषयस्य निरूपणं सत्कालक्षेपार्थं ग्रंथरूपेणाय
थामति कृतवानस्मि ॥ परंतु विद्वांसोऽत्र पञ्चामोपसंहारादिना तात्पर्यं सम्यग्विचार्य मद्ग्रंथं शोधयंतु ॥ ॥ ॥
भेरावुशाखाभिधपत्तने भूत्हत्रान्वयकौशिकगोत्रवर्यः ॥ माध्यंदिनीशाखिविवरः परादिसुरामशास्त्रीतकना

द्वा०
१८२
182

मवाप्य ॥ १ ॥ तत्कृतश्रीमद्वरमूलचंद्रस्तस्यात्मजोललहिरामाभिधोभूत ॥ नारायणोललहिरामस्यपुत्रोगुणैस्त
तत्तुल्यनामाबभूव ॥ २ ॥ नारायणस्यात्मजन्मासमत्र गोविंदवत्ताः किलभाग्यपुर्य्यां ॥ ब्रह्मेशदेवेंद्रयमाधनेशे
मोनोयपेन्द्रर्वोदेवास्युवंतु ॥ ३ ॥ वल्लीवह्नितिमंडलबभूतितोथात्तवियाणंद्दनाज्ञातिस्तन्नतभेद्यशाद्दमिहिव
स्तहाच्यसूर्योयतः ॥ तद्वेषेयाः यमतोहिवत्तसिगतंगोविंदत्रुपंयतस्तस्मादस्यचनामहृन्निजमिदंगोविंद
वत्ताइति ॥ ४ ॥ श्रवन्मासिशितेपुरौचदिवसेपत्तेव्ययाद्धाभिधेरामाष्टाष्टविधोमितेः तकतिथौगोविंदवत्ता
भिधः ॥ श्रद्वैतादितिनाभिधाद्वयपरग्रंथस्यसंपूर्णतांकुर्वंतस्यविलोकनेनसुधियोमुक्तिंलभंतेपराम् ॥ ५ ॥
योविश्वंसृजतिप्रपातिभगवान्यस्मिन्पुनर्लीयते यस्यात्तामजशङ्कुरप्रभृतयःकुर्वंतिचन्द्रादयः तंदेवंश
रणमाश्रियत्वारणयाकुर्वेऽस्यसंपूर्णतां ॥ ग्रंथस्येतिविभावयामिभगवन्भक्तिंपरांदेहिमे ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥

इत्यद्वैतादित्यत्रनारायणद्वादशार्कमधुपकसुरसंवादेग्रंथसमा
प्तौग्रंथकारनामादिवर्णनंनामदशमोरश्मिः ॥ १० ॥ ॥

ग्रं० ५४५

इतिद्वादशार्कोग्रंथस्समाप्तौ ॥

शुभं ॥ शुभ

शुभ